॥ श्रीः ॥


काशी संस्कृत ग्रन्थमाला

३८


श्रीवररुचिप्रणीतः

# प्राकृत-प्रकाशः

श्रीभामहकृत 'मनोरमा' व्याख्यासहितः


महामहोपाध्याय

श्रीमथुराप्रसाददीक्षितविरचित-

'चन्द्रिका'-'प्रदीप'-संस्कृत-हिन्दीव्याख्याद्वयोपेतः

श्रीमदुदयरामशास्त्रिडबरालकृत-

टिप्पणीपरिशिष्टाभ्यां विभूषितः

साहित्याचार्य

श्रीजगन्नाथशास्त्रिहोशिङ्गमहोदयेन

भूमिकादिभिः सम्भूष्य संशोधितः



चौखम्भा संस्कृत संस्थान

भारतीय सांस्कृतिक साहित्य के प्रकाशक तथा वितरक

पो० बा० नं. ११३९

के. ३७/११६, गोपाल मन्दिर लेन (गोलघर समीप मैदागिन)

वाराणसी - २२१ ००१ ( भारत )

# प्रस्तावना

श्रीमद्वाग्देवताऽनुरञ्जनविमलमतीनां प्रेक्षावतां सुविदितमेवैतद्यद् धर्मार्थकाममोक्षाचतुर्णां वर्गस्य प्राप्तये एव यतितव्यं सर्वैः । तत्प्राप्त्युपायाश्च बहवोऽसङ्ख्यैः प्रबन्धैः सम्पादिता अपि मृदुबुद्धीनां क्रीडनैकमनोऽनुरागिणां न तयोपकर्तुं शक्ता यथा दृश्यकाव्यानि । तानि हि झटिति दर्शनमात्रेणैवानन्दसन्दोहजनकानि सदुपदेशं [illegible]न्ति । तदुक्तं नाट्याचार्येण श्रीमता भरतमुनिना नाट्यशास्त्रे प्रथमेऽध्याये—

ब्रह्मोवाच—

सर्वशास्त्रार्थसम्पन्नं सर्वशिष्यप्रवर्तकम् ।
नाट्याख्यं पञ्चमं वेदं सेतिहासं करोम्यहम् ॥ १५ ॥

[illegible] तत्रैव ब्रह्मणो दैत्यसान्त्वनावसरे—

भवतां देवतानां च शुभाशुभविकल्पकैः ।
कर्मभावान्वयापेक्षी नाट्यवेदो मया कृतः ॥ ७२ ॥
नैकान्ततोऽत्र भवतां देवानां चापि भावनम् ।
त्रैलोक्यस्यास्य सर्वस्य नाट्यभावानुकीर्तनम् ॥ ७३ ॥
धर्माधर्मप्रवृत्तानां कामाः कामार्थसेविनाम् ।
निग्रहं दुर्विनीतानां मत्तानां दमनं क्रिया ॥ ७५ ॥
देवानामसुराणां च राज्ये लोकस्य चैव हि ।
महर्षीणां च विज्ञेयं नाट्यं वृत्तान्तदर्शकम् ॥ ८४ ॥
धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्द्धनम् ।
लोकोपदेशजननं नाट्यमेतद्भविष्यति ॥ ८६ ॥ इति ।

तानि च संस्कृतमयानि प्राकृतमयानि च भवन्ति; तदाह मुनिः—

नानादेशसमुत्थं हि काव्यं भवति नाटके । इति ।

तत्र संस्कृतभाषापरिज्ञानं पाणिनीयादिव्याकरणेन, प्राकृतज्ञानाय च वररुच्यादीनां प्रयत्नः । तच्च किमिति कुशीलवाधीनमेव । वयन्तु आचार्याणां वचनोपन्यासेनैवोदास्महे ।

अत्र मुनिः—

एतदेव विपर्यस्तं संस्कारगुणवर्जितम् ।
विज्ञेयं प्राकृतं पाठ्यं नानावस्थान्तरात्मकम् ॥ अ० १७, श्लो० २ ॥

तथा च वाक्यपदीये भर्तृहरिः—'दैवी वाक् व्यवकीर्णेयमशक्तैरभिधातृभिः ।' इति । कथमियमशक्तिरिति तु न प्रयत्नावगम्यम् । 'अम्बाम्बेति यथा बालः शिक्षमाणः प्रभाषते ।' इत्यादिरीत्या देशकालभेदेनैव प्रतीमहे ।

वङ्गमध्यपञ्चालादिदेशजानां परस्परमेकस्यैव शब्दस्य जागरूको महानुच्चारणभेद एव विप्रतिपन्नानां तुष्टिदो भविष्यति ।

हेमोऽपि—प्रकृतिः संस्कृतम्। तत्र भवं, तत आगतं वा प्राकृतम्। इति।

तथा च गीतगोविन्दे रसिकसर्वस्वः—'संस्कृतात्प्राकृतम् इष्टं ततोऽपभ्रंशभाषणम्' इति।

शकुन्तलायां शङ्करोऽपि 'संस्कृतात्प्राकृतं श्रेष्ठं ततोऽपभ्रंशभाषणम्' इति प्रमाणत्वेनोदाजहार—संस्कृताद् श्रेष्ठं प्राकृतं जातम्, ततोऽपभ्रंशः।

केचित्तु—प्रकृत्या स्वभावेन सिद्धम् प्राकृतम्। ततश्च वैयाकरणैः साधितं हि संस्कृतमित्यभिधीयते। अतो न संस्कृतमूलकं प्राकृतम्। प्रत्युत प्राकृतमूलकमेव संस्कृतम्—इत्याहुः।

अपरे तु—वेदमूलकमिदम्। तनत्वनादिप्रत्ययानाम्, अम्हे-अस्मे-आदिपदानां, लिङ्गवचनविभक्त्यादीनाञ्च वैदिकैः प्रयोगैः साम्यदर्शनात्। एतन्मूलकं च संस्कृतम्—इति वदन्ति।

साम्प्रदायिकैस्तूभयमपि नाद्रियते—यदि स्वभावसिद्धं प्राकृतम्, तर्हि कोऽसौ स्वभावः कीदृशश्च, येनेदृगेव भाषणं स्यात् किंसमवेतश्च। जनसमवेतश्चेद् 'दैवी वाग् व्यवकीर्णेयम्' इत्यस्मदभिहिते पक्षपातः। पारमेश्वरे तु स्वभावे वैरूप्यं नोपपद्यते—न ह्यग्नौ शैत्यं क्वचिदपि कदाप्युपलभ्यते। एवं तत्तद्भाषाभेदः सुतरान्नोपपद्यते।

सर्वासामेव भिन्नानामपि पारमेश्वरस्वभावसिद्धत्वे तु भाषापरिज्ञानिनां विदुषां महान् कोलाहलो भविष्यति।

अथ च यदीयं भाषा वेदभाषासमुद्भवा तत्समकालिका संस्कृतात् प्राचीना वा स्वीक्रियते तर्हि पाणिनीयव्याकरणस्याऽपूर्णता स्यात्, तत्र प्राकृतस्याऽव्याकृतत्वात्। भगवता पाणिनिना च तत्र तत्र बाहुलकेनाऽपि वैदिकशब्दव्याकृत्या स्वव्याकरणस्य पूर्णतायाः प्रदर्शनात्। तथा च गावी-गोणी-गोपोतलिकेत्यादीनामपि असाधुशब्दत्वव्यवहारो नोपयुज्यते। प्रत्युत संस्कृताद्विकृतस्य प्राकृतस्येव प्राकृताद्विकृतस्य संस्कृतस्यैवापभ्रंशव्यवहारापत्तिः स्यात्। न तथा व्यवहारस्तथाव्युत्पन्नानामपीष्टः। न ह्यस्ति राजाज्ञा 'पाणिनीयादिव्याकृतस्य नाऽपभ्रंशव्यवहारः' इति।

लिङ्गवचनसाम्यन्तु न दृढतरं प्रमाणम्। न हि आङ्ग्लभाषायाः 'फादर' इति शब्दः उच्चारणसौकर्येणोच्चरितस्य पितृशब्दस्य प्रकृतिरिति कोऽपि प्रेक्षावान् मनुते। तथा च-'डाटर' इति शब्दं दुहितृशब्दस्य। नच कोऽपि 'तात' इत्युच्चारयितव्ये 'टाट' इति रटन् भारतीयो बाल आङ्ग्लभाषापाठकस्तद्देशीयो वा गण्यते।

अतो युक्तमुत्पश्यामः—प्रकृतिः संस्कृतम्, ततः प्राकृतमिति। तथा च प्राकृतमञ्जर्याम्—'व्याकर्तुं प्राकृतत्वेन गिरः परिणतिं गताः' इति।

वेदमूलकत्वेऽपि न किमपि प्रमाणम्।

अस्तु वा यदपि तज्ज्ञानायाऽवश्यं प्रयतितव्यम्। यतोऽत्र भाषायां सुललिताः प्रबन्धाः सन्ति। तदुक्तम्—

'अहो तत् प्राकृतं हारि प्रियावक्त्रेन्दुसुन्दरम्।
सूक्तयो यत्र राजन्ते सुधानिष्यन्दनिर्झराः'॥ इति।

तत्र प्राकृतं वररुचिमते—प्राकृत-पैशाची-मागधी-शौरसेनी-भेदेन चतुर्द्धा। तासु पैशाची मागधी च शौरसेनीविकृती, प्रकृतिः शौरसेनीत्युभयत्र दर्शनात्। शौरसेनी संस्कृतविकृतिः प्राकृतवत्। 'प्रकृतिः संस्कृतम्'-इति दर्शनात्। शौरसेन्यामनुक्तं कार्यं नवभिः परिच्छेदैः प्रतिपादितप्राकृतानुसारि भवति 'शेषं माहाराष्ट्रीवद्' इत्यत्र माहाराष्ट्रीपदेन तस्यैव ग्रहणात्। तथा च काव्यादर्शे—

महाराष्ट्राश्रयां भाषां प्रकृष्टं प्राकृतं विदुः। इति।

हेमस्तु—चूलिकापैशाचिकम् १ आर्षं प्राकृतम् २ अपभ्रंशम् ३ चेत्यधिकभेदैः सप्तधा विभजते।

तथा च भेदप्रतिपादकानि सूत्राणि—

आर्षम्। ८। १। ३।

चूलिकापैशाचिके द्वितीयतुर्ययोराद्यद्वितीयौ। ८। ४। ३२५।

स्वराणां स्वराः प्रायोऽपभ्रंशे। ८। ४। ३२९।

प्राकृतसर्वस्वकारमार्कण्डेयेन भाषा-विभाषा-अपभ्रंश-पैशाची-भेदाद् भाषाश्चतुर्धा विभक्ताः।

तत्र भाषा—माहाराष्ट्री-शौरसेनी-प्राच्या-अवन्ती-मागधी-भेदेन पञ्चधा।

अर्द्धमागधी तु मागध्यामेवान्तर्भाविता।

विभाषा—शाकारी १ चाण्डाली २ शाबरी ३ आभीरिकी ४ शाक्की (शाखी) ५ चेति पञ्चधा।

अपभ्रंशः—आर्द्रीं द्राविडीं च विना सप्तविंशतिधा च विभक्तः।

अन्या अपि तिस्रो भाषाः स्वीकृताः—नागर-आचडोपनागरभेदेन। पैशाचीभाषा तिसृषु नागरभाषासु विभक्ता। तद्यथा—कैकेयी १, शौरसेनी २, पाञ्चाली ३ च। रामतर्कवागीशेनाऽपि एवमेव प्रकटितम्। सर्वैरपि प्राकृतवैयाकरणैर्माहाराष्ट्री-पैशाची-मागधी-शौरसेनी चैताः प्राकृतभाषाः स्वीकृताः। काव्यालङ्कारे रुद्रटो भाषाणां तिस्रो विधाः प्राह—'प्राकृतं संस्कृतञ्चैतदपभ्रंश इति त्रिधा।' इति।

काव्यादर्शे दण्डी च—

'तदेतद्वाङ्मयं भूयः संस्कृतं प्राकृतं तथा।
अपभ्रंशश्च मिश्रं चेत्याहुराप्ताश्चतुर्विधम्' ॥ इति। १। ३२।

चतुर्विधा हि ग्रन्थाः संस्कृतनिबद्धाः केचित्, प्राकृतनिबद्धाः केचित्, केचिदपभ्रंशनिबद्धाः, केचिदासां साङ्कर्येण निबद्धा मिश्रा इत्युच्यन्त इत्यर्थः। 'संस्कृतं सर्गबन्धादि प्राकृतं स्कन्धकादिकम्। आसारादीन्यपभ्रंशो नाटकादिषु मिश्रकम्' ॥ इति च।

पुराणवाग्भटोऽपि वाग्भटालङ्कारे (२। १) संस्कृतप्राकृतापभ्रंशभूतभाषितैतिभेदेन चतुर्धा विभजते।

अर्वाचीनोऽपि अलङ्कारतिलके (१५-३), एवं रुद्रटश्च काव्यालङ्कारे (२। १२

सूत्रे ), एवमपभ्रंशविचारस्यावश्यकत्वाद् वररुचिना कथमुपेक्षित इति विप्रतिपत्तौ कश्चिद्—इयमपूर्णतैव वररुचेरिति ।

आसां प्रादुर्भाव एव नेति त्वन्यः ।

अपरे तु—वररुचिना 'दाढादयो बहुलम्' (४।३३) इति सूत्रकरणादेवाऽपभ्रंशोऽपि संगृहीत एव । तस्य च भामहेन आदिशब्दोऽयं प्रकारार्थः, तेन सर्व एव देशसङ्केतप्रवृत्ता भाषाशब्दाः परिगृहीताः, इति व्याख्यातत्वात् । अपभ्रंशश्च देशसङ्केतप्रवृत्ता एव भाषाः । तदुक्तं वृद्धवाग्भटेन—

'अपभ्रंशस्तु यच्छुद्धं तत्तद्देशेषु भाषितम्' ॥ इति ।

तथा च काव्यादर्शे दण्डी—

'यदा च आभीर्यादयो देशभाषाः काव्यनाटकेषु निबद्धास्तदाऽपभ्रंशपदेन व्यवह्रियन्ते ।' तदुक्तम् तेन—

'शौरसेनी च गौडी च लाटी चान्या च तादृशी ।
याति प्राकृतमित्येवं व्यवहारेषु सन्निधिम् ॥
आभीरादिगिरः काव्येष्वपभ्रंश इति स्मृताः ।
शास्त्रेषु संस्कृतादन्यदपभ्रंशतयोदितम् ॥' इति । ( १ । ३५–३६ )

यत्तु अपभ्रंशपदेन भारतीयाः प्रचलिता भाषा गृह्यन्ते, ताश्च निबध्यन्ते काव्यनाटकेषु । तदुक्तं नाट्यशास्त्रे भरतमुनिना—

'शौरसेनीं समाश्रित्य भाषा कार्या तु नाटके ।
अथवा छन्दतः कार्या देशभाषाप्रयोक्तृभिः ॥' इति । ( १७–४६ )

अधुना प्रचलिततत्तद्देशभाषास्वपि वङ्गदेशे यात्रागन्धर्वगानम्, नैपाले कूर्माचले च हरिश्चन्द्रादिनर्तनम् उपलभ्यत एव । अतोऽपभ्रंशस्य प्राकृतपदेन ग्रहीतुमशक्यत्वादुचित एव तदनुल्लेखः प्राकृतप्रकाश इति । तत्तु दण्डिविरोधादुपेक्ष्यम् ।

वररुचिसमयेऽपभ्रंशस्य व्यवहारानुदय इति तु न सम्यक् प्रतिभाति ।

'त्रिविधं तच्च विज्ञेयं नाट्ययोगे समासतः ।
समानशब्दैर्विभ्रष्टं देशीमतमथापि वा ॥'

इति भरतमुनिनाऽपि तस्य प्रदर्शितप्रायत्वात् । यथा 'गौरित्यस्य गावी गोणी गोपोतलिकेत्येवमादयो बहवोऽपभ्रंशाः' इति भगवता पतञ्जलिना महाभाष्येऽपभ्रंशस्य व्यवहृतत्वात् स्वयं दाढेत्यादिसूत्रप्रणयनाच्च स्यादेतत् । सर्वमेवैतद् प्राकृतं तद्भवः, तत्समः, देशी चेति त्रिधा विभजन्ते सूरयः । तदाह दण्डी—'तद्भवस्तत्समो देशीत्यनेकः प्राकृतक्रमः ।' इति । तत्र यद्यपि तद्भवप्राकृतव्याकृत्यर्थमेव प्राकृतवैयाकरणानां प्रयत्नः । तदुक्तम्—'अथ प्राकृतम् ।' (८।१।१) इति सूत्रे व्याख्यानावसरे हेमेन—'संस्कृतानन्तरं प्राकृतस्याऽनुशासनं सिद्धसाध्यमानभेदसंस्कृतयोनेरेव तस्य लक्षणं न देश्यस्य इति ज्ञापनार्थम् । संस्कृतसमं तु संस्कृतलक्षणेनैव गतार्थम्' इति । तथापि तत्तत्प्रदेशेषु

बाहुलकेन दैशिकानामप्युल्लेखाद्दैशिकमपि प्रायस्तद्भवत्वेन स्वीकुर्वन्ति । ४।३३ सूत्र-व्याख्यानावसरे भामहेन देशसङ्केतेत्यादिनैतस्यार्थस्य स्पष्टमुक्तत्वात् ।

हेमोऽप्याह—'गोणादयः' (८ । २ । ७३) गोणादयः शब्दा अनुक्तप्रकृतिप्रत्यय-लोपागमवर्णविकारा बहुलं निपात्यन्ते, तद्यथा—गौः-गोणी गावी । त्रिपञ्चाशत्—तेवण्णा । त्रिचत्वारिंशत्—तेआलीसा । इति । तत्समस्तु न संस्कृतात्पृथगिति न तद्विषयकः प्रयत्नः कस्यापि ।

अथ कोऽयं प्राकृतसूत्रप्रणेता वररुचिः कदा समभवत्, कदा चैतत्सूत्राणि प्रणिनायेति वृत्तं सम्यक्तया निश्चेतुं न शक्यते । एको वररुचिः सुप्रसिद्धविक्रमराजसमानकालिकोऽप्युपलभ्यते । तथाहि—

'धन्वन्तरिक्षपणकामरसिंहशङ्कुवेतालभट्टघटखर्परकालिदासाः ।
ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नवविक्रमस्य ॥' इति ।

अन्यत्र—

'पाणिनिं सूत्रकारं च भाष्यकारं पतञ्जलिम् ।
वाक्यकारं वररुचिम्……………… ॥'

इति पाणिनिसमकालिकः कात्यायनाऽपराभिधः प्रतीयते । महाभाष्यकारैरपि 'तेन प्रोक्तम्' ( ४ । ३ । १०७ ) सूत्रे 'वररुचिना प्रोक्तो ग्रन्थः वाररुचः' इति चोदाहृतम् । तथा च प्राकृतमञ्जर्याम्—

'प्रसीदन्तु च वाचस्ता यासां माधुर्यमुच्छ्रितम् ।
प्राकृतच्छद्मना चक्रे कात्यायनमहाकविः ॥
व्याकर्तुं प्राकृतत्वेन गिरः परिणतिं गताः ।
कोऽन्यः शक्तो भवेत्तस्मात्कवेः कात्यायनादृते ॥' इति ।

अयमेव कात्यायनापराभिख्यः श्रौतसूत्रकारः पाणिनीयसूत्रवार्तिककारो रूपमाला-प्रणेता बृहत्संहितानिर्माता चेत्यत्र दृढतरप्रमाणाऽभावेपि विरोधं नाऽऽकलयन्ति सूरयः । कथासरित्सागरकथामञ्जर्यादावुपवर्णितोऽपि वररुचिर्विलक्षणप्रतिभाशालित्वेन नोक्तार्थे विरोधमवतारयतीति विवेचकैर्विवेचनीयम् ।

अन्यो वाप्ययं वररुचिः स्यात् । तथाप्येतत्प्रतीयते यदयं सर्वेषु प्राकृतवैयाकरणेषु प्रथम आचार्यः ।

एतत्सूत्रप्रकाशवृत्तिप्रणेता भामहः कदा समभवत् इत्यप्यतिदुरूहताज्ञतो निर्णेतुम् । भामहप्रणीतमलङ्कारलक्षणमप्यस्तीति श्रूयते । स च काश्मीरदेशीयः परमप्राचीनश्चेति भलकीकरोपाख्यैर्वामनाचार्यैर्निरूपितम् । एतेनापि वररुचेः परमपुराणता प्रतीयते । इत्यलं पल्लवितेन ।

अन्यत्र प्राकृतसूत्रेषु भाषाबाहुल्येन कार्यवैविध्येन च वररुचेः प्राचीनता प्रदर्श्यते । यच्च कार्यं वररुचिना बाहुलकेन आदिशब्देन च संगृहीतं तदर्थमपि अन्येषां सूत्र-

प्रणयनप्रयत्नः। आस्तामेतद्। हेमचन्द्रसमये हि विविधभाषाः भिन्नरूपाः सञ्जाता इति प्रतीयते। तथा च प्राकृतप्रकाशतो विशेषकार्याणां दिग्दर्शनम्—

प्रत्यये ङीर्न वा ८। ३। ३१। नीली। नीला–३२-३३।

अणादिप्रत्ययनिमित्तो ङी स्त्रियां वा भवति। साहणी कुरुचरी, साहणा कुरुचरा।

धातवोऽर्थान्तरेऽपि ८। ४। २५९। उक्तादर्थादर्थान्तरेऽपि धातवो वर्तन्ते। वलिः प्राणने पठितः, खादनेऽपि वर्तते। वलइ। खादति प्राणनं करोति वा। एवं कलिः सङ्ख्याने संज्ञानेऽपि। कलइ। जानाति संख्यानं करोति वा।

विलप्युपालम्भ्योर्झङ्खः आदेशः। झङ्खइ। विलपति, उपालभते, भाषते वा।

फक्कतेस्थक्कः। थक्कइ। नीचां गतिं करोति विलम्बयति वा। नीहरइ। पुरीषोत्सर्गं करोति।

बहुलम् ८। १। २। बहुलमित्यधिकृतं वेदितव्यमापादसमाप्तेः।

लुप्त-य-र-व-श-ष-सा दीर्घः ८। १। ४३। प्रकृतलक्षणवशाल्लुप्ता याद्या उपर्यधो वा येषां शकारषकारसकाराणां तेषामादेः स्वरस्य दीर्घो भवति।

शस्य यलोपे—पश्यति, पासइ। रलोपे–विश्राम्यति, वीसमइ। मिश्रम्–मीसं। वलोपे–अश्वः, आसो। विश्वासः, वीसासः। शलोपे–दुश्शासनः, दूसासणो। षस्य यलोपे–शिष्यः, सीसो। रलोपे–वर्षः, वासो। वलोपे–विष्वक्, वीसुं। षस्य–निषिक्तः, नीसित्तो। सस्य यलोपे–सस्यम्, सासं। कस्यचित्, कासइ। रलोपे–उस्रः, ऊसो। वलोपे–निस्वः, नीसो। सलोपे–निस्सहः, नीसहो।

न दीर्घोऽनुस्वाराद् ८। २। ८२। इति द्वित्वनिषेधः।

अवर्णो यश्रुतिः ८। १। १८०। कगजेत्यादिना लुकि सति शेषोऽवर्णोऽवर्णात्परो लघुप्रयत्नतरयकारश्रुतिर्भवति। तित्थयरो। सयढं। नयरं। इत्यादि। क्वचिदन्यतोऽपि-पियइ-इति।

इतः प्राचीनपुस्तकमधिकमशुद्धमासीद्। श्रीमतां वाराणसीस्थराजकीयसंस्कृतपुस्तकालयाध्यक्षाणां पण्डितवर-म० म० श्रीगोपीनाथकविराजमहोदयानां म० म० पं० विन्ध्येश्वरीप्रसादद्विवेदिनां च साहाय्येन लिखितपुस्तकं जर्मनदेशीयकाविल्महोदयसम्पादितपुस्तकं च दृष्ट्वा यथामति सावधानं संशोधितम्। तत्सहायेनैव यत्र क्वचिद् टिप्पण्यां पाठान्तरेण च संयोजितम्। द्वादशपरिच्छेदवृत्तौ च साहाय्यं प्रापम्।

छात्राणामुपकारार्थं पदसाधुत्वज्ञानार्थं तत्तत्कार्यप्रतिपादकसूत्राणां संख्या कोष्ठकान्तरे प्रदर्शिता। अन्यग्रन्थेभ्यः कार्यविशेषाश्च टिप्पण्यां प्रदर्शिताः। मानुषमात्रसुलभतया दृष्टिप्रमादाज्जातानवधानता क्षन्तव्या विद्वद्भिरिति विज्ञापयते विदुषामनुचरः—

वैशाखशुक्ला एकादशी,
वि. सं. १९७७

पर्वतीय उदयराम डबरालः

## अथ नाट्याचार्य-मुनिमतेन भाषाणां भेदप्रदर्शन-पूर्वकं विनियोगः प्रदर्श्यते—

मागध्यवन्तिजा प्राच्या शूरसेन्यर्द्धमागधी ।
बाह्लीका दाक्षिणात्या च सप्त भाषाः प्रकीर्त्तिताः ॥ ४८ ॥
शबराभीरचण्डालसचरद्रविडोद्रजाः ।
हीना वनेचराणां च विभाषा नाटके स्मृताः ॥ ४९ ॥
मागधी तु नरेन्द्राणामन्तःपुरनिवासिनाम् ।
चेटानां राजपुत्राणां श्रेष्ठिनां चार्द्धमागधी ॥ ५० ॥
प्राच्या विदूषकादीनां धूर्तानामप्यवन्तिजा ।
नायिकानां सखीनां च शूरसेनाविरोधिनी ॥ ५१ ॥
योधनागरकादीनां दाक्षिणात्याथ दीव्यताम् ।
वाह्लीकभाषोदीच्यानां खसानां च स्वदेशजा ॥ ५२ ॥
शबराणां शकादीनां तत्स्वभावश्च यो गणः ।
(श)सकारभाषयोक्तव्या चण्डाली पुक्कसादिषु ॥ ५३ ॥
अङ्गारकारव्याधानां काष्ठयन्त्रोपजीविनाम् ।
योज्या शवरभाषा तु किंचिद्वानौकसी तथा ॥ ५४ ॥
गवाश्वाजाविकोष्ट्रादिघोषस्थाननिवासिनाम् ।
आभीरोक्तिः शाबरी वा द्राविडी द्रविडादिषु ॥ ५५ ॥
सुरङ्गा खनकादीनां सौण्डीकाराश्च ( शौण्डिकानां च ) रक्षिणाम् ।
व्यसने नायकानां स्यादात्मरक्षासु मागधी ॥ ५६ ॥
न वर्बरकिरातान्ध्रद्रविडाद्यासु जातिषु ।
नाट्यप्रयोगे कर्तव्यं काव्यं भाषासमाश्रयम् ॥ ५७ ॥
गङ्गासागरमध्ये तु ये देशाः श्रुतिमागताः ।
एकारबहुलां तेषु भाषां तज्ज्ञः प्रयोजयेत् ॥ ५८ ॥
विन्ध्यसागरमध्ये तु ये देशाः श्रुतिमागताः ।
नकारबहुलां तेषु भाषां तज्ज्ञः प्रयोजयेत् ॥ ५९ ॥
सुराष्ट्रावन्तिदेशेषु वेत्रवत्युत्तरेषु च ।
ये देशास्तेषु कुर्वीत चकारबहुलामिह ॥ ६० ॥
हिमवत्सिन्धुसौवीरान् ये च देशाः समाश्रिताः ।
उकारबहुलां तज्ज्ञस्तेषु भाषां प्रयोजयेत् ॥ ६१ ॥
चर्मण्वतीनदीपारे ये चार्बुदसमाश्रिताः ।
तकारबहुलां नित्यं तेषु भाषां प्रयोजयेत् ॥ ६२ ॥
एवं भाषाविधानं तु कर्तव्यं नाटकाश्रयम् ।
अत्र नोक्तं मया यच्च लोकाद् ग्राह्यं बुधैस्तु तद् ॥ ६३ ॥

# उपोद्घातः

अथायं प्रकाश्यते श्रीवररुचिप्रणीतः प्राकृतप्रकाशो नाम प्राकृतभाषाव्याकरणग्रन्थः श्रीभामहनिर्मितया मनोरमाख्यव्याख्यया, महामहोपाध्यायश्रीमथुराप्रसाददीक्षितविरचितया चन्द्रिकाभिधया संस्कृतव्याख्यया प्रदीपनामकसरलहिंन्दीभाषाटीकया च विभूषितो मुद्रापयित्वा । केवलं मनोरमाख्यव्याख्यया सह नैकवारमनेकत्र प्राकाश्यमुपगतोऽयं ग्रन्थः । चौखम्बासंस्कृतपुस्तकालयेऽपि वाराणसेये द्वित्रिवारमसौ प्राकाश्यमुपगच्छन्ननेकोपकरणालङ्कृतः श्रीमदुदयरामशास्त्रिडबरालमहोदयैः सम्पादितः । साम्प्रतं तु ततोऽपि वैशिष्ट्यमावहति चन्द्रिका-प्रदीपाख्याभ्यां संस्कृत-हिन्दीव्याख्याभ्यां समलङ्कृतः ।

तत्र प्रकृते को नाम प्राकृतशब्दस्यार्थ इति विवेचनायां विदुषां मतद्वयं जागर्ति लोके । तत्र हि प्रकृतिर्नाम सर्वसाधारणो जनः, तया व्यवह्रियमाणं वचनकदम्बकं प्राकृतम् । व्याकरणादिसंस्कारसम्पन्नं तत् संस्कृतमिति प्रथमः पक्षः । स्त्रीबालवैधेयादिभिर्झटिति बोधगम्यतयाद्रीयमाणा भाषा प्राकृताभिधाना सामान्यतया प्रतीयत इति सुस्पष्टं प्रथमपक्षाश्रयिणां सुधियां मतम् । श्रीवररुच्यादिप्राकृतव्याकरणसूत्रप्रणेतृणामन्येषां च संस्कृतप्रणयिनां विदुषां 'प्रकृतिः संस्कृतम्, तत आगतं समुत्पन्नं वा प्राकृतम्' इति मतम् । मतद्वये यत् किमप्येकतरं समीचीनमसमीचीनं वा भवतु मतं, परं प्राकृतपदेन व्यवह्रियमाणा भाषा काप्यस्तीति न विप्रतिपत्तिः केषामपि विदुषाम् । तस्या एव भाषाया अन्तर्गतानां पदानां व्युत्पत्तिं प्रदर्शयन्नयं ग्रन्थः प्राकृतप्रकाश इत्यन्वर्थं नाम धत्ते ।

अथ च प्राकृतभाषायाः कति के च सूत्रकर्तार इति विषये वररुचि-वाल्मीकि-हेमचन्द्र-त्रिविक्रमदेवानां चतुर्णां नामानि सप्रमाणमुपन्यस्यन्ति तद्विदः । तत्र वररुचि-हेमचन्द्रयोः सूत्रकर्तृत्वमव्याहतमेव । त्रिविक्रमदेवस्य निजसूत्राणां स्वोपज्ञवृत्तिकर्तृद्वारा सूत्रकर्तृत्वं प्रतिपादयन्ति विचक्षणाः, परं कतिचन धीमन्तस्तु हेमचन्द्रकृतसूत्राणामेवेयमेतत्कृता वृत्तिरिति प्रमाणयन्तो विवदमाना दृश्यन्ते । रुद्रमणिपुत्रः कश्चिद्वाल्मीकिः कविरप्युपलभ्यते वाल्मीकिनाम्ना, परं स एतत्सूत्रप्रणेता भवितुं नार्हति । पुष्टप्रमाणमन्तरा नैतदपि प्रतिपादयितुं शक्यते यत्—आदिकविर्वाल्मीकिरेवैतन्निर्माता, यद्यपि षड्भाषाचन्द्रिकाकाराः श्रीलक्ष्मीधरास्तथा प्रत्यपादयन् । स एवायमिति प्रमाणान्तरैः साधितं स्यात्तर्हि न तत्र विषयेऽस्माकं कापि विप्रतिपत्तिः ।

श्रीवररुचिप्रणीतस्य प्राकृतप्रकाशस्य प्राचीनाश्चतस्रो व्याख्याः समुपलभ्यन्ते—१ मनोरमा, २ प्राकृतमञ्जरी, ३ प्राकृतसञ्जीवनी, ४ सुबोधिनीति । तासु प्राचीनतमा तु भामहविरचिता मनोरमैवेति निर्विवादम् । श्रीकात्यायनप्रणीता प्राकृतमञ्जरी तदुत्तरकालमाश्रयतीति विद्वन्मतम् । सा च व्याख्या पद्यमयी नवपरिच्छेदात्मिका पूर्वं निर्णयसागरयन्त्रालय-मोहमयीतः प्रकाशिता, परमन्विष्यापि नास्माभिरुपलब्धेति तद्विषये न किमपि वक्तुं पारयामः—चन्द्रिकोद्धृताः पद्यपद्यांशास्तत्रस्था उत ततोऽपि प्राचीना

इति। चन्द्रिकाकारैः सञ्जीवनीसुबोधिन्योरुद्धृत्य प्रदर्शिता इत्यनुमिनुमः। वाराणसेय-सरस्वतीभवन-ग्रन्थमालाया एकोनविंशे पुष्पे भागद्वयेन तृतीयतुरीये वसन्तराजकृत-प्राकृतसञ्जीवनी, सदानन्दविनिर्मितसुबोधिनीत्याख्ये व्याख्ये अपि नवम( अष्टम )परिच्छेदान्ते प्रकाशिते स्तः।

प्रकरणवशात् प्राकृतव्याकरणविषयकानामेषामन्येषामपि ग्रन्थानां विषये सामान्यः परिचयः प्रदर्श्यते—

१ प्राकृतप्रकाशः—श्रीवररुचिप्रणीतः प्राचीनतमः। समयादि तु नोपलभ्यते। वररुचेर्नाम कात्यायनेन सह सम्बध्यते। कात्यायनेति वररुचेर्गोत्रनामेति केचित्। अद्ययावत् चतस्रः प्राचीना व्याख्याः सन्ति, यासु भामहरचिता मनोरमा प्रथमा, कात्यायनकृता प्राकृतमञ्जरी पद्यमयी द्वितीया, वसन्तराजनिर्मिता प्राकृतसञ्जीवनी तृतीया, सदानन्दप्रणीता सुबोधिनी तुरीया। पञ्चमी तु नव्या प्रकाश्यमाना चन्द्रिकाख्या।

२ प्राकृतलक्षणम्—चण्डकृतम्। विभक्तिस्वरव्यञ्जनविधानात्मकविभागान्वितं कलिकातानगरीतः प्रकाशितचरम्। न विशेषः समुपलभ्यते।

३ सिद्धहेमचन्द्रम्—हेमचन्द्रप्रणीतम्। विशालं स्पष्टमत्युपयोगि च। एतस्य ढुण्ढिकापरपर्याया प्राकृतप्रक्रियावृत्तिनाम्नी व्याख्या उदयसौभाग्यगणिनिर्मिता। एतस्य समयस्तु ११७२ ईशवीय इत्यैतिहासिकाः।

४ संक्षिप्तसारः—क्रमदीश्वरकृतः। समयानुपलम्भः। अस्य तिस्रो व्याख्याः श्रूयन्ते—जूमरनन्दिन्-कृता रसवती, चण्डीदेवशर्मकृता प्राकृतदीपिका, विद्याविनोदाचार्य-निर्मिता प्राकृतपादटीका। तिस्रोऽप्येता अमुद्रिताः।

५ प्राकृतव्याकरणम्—त्रिविक्रमदेवकृतम्। वाल्मीकिसूत्रव्याख्येति केचिन्मतम्, स्वसूत्रव्याख्येत्यन्यमतम्, हेमचन्द्रसूत्राणां वृत्तिरिति तृतीयं मतम्। अस्य समयस्तु १२३६–१३०० ईशवीयशतकम्।

६ प्राकृतरूपावतारः—सिंहराजनिर्मितः। अयं सिंहराजः त्रिविक्रमग्रन्थस्थसूत्रानुयायी १३००–१४०० ईशवीयशतकस्थः।

७ षड्भाषाचन्द्रिका—लक्ष्मीधरनिर्मिता। लक्ष्मीधरस्तु सूत्रकर्तारमादिकविं वाल्मीकिमेव प्रतिपादयति। समयस्तु १५४१–१५६५ ईशवीयं शतकम्। त्रिविक्रम-सिंहराजलक्ष्मीधरैर्व्याख्यातानि सूत्राणि तु समानान्येव।

८ प्राकृतसर्वस्वम्—मार्कण्डेयकवीन्द्रकृतम्। आर्याछन्दोमयं स्वोपज्ञवृत्तिसहितम्। विशेषस्तु द्रष्टव्योऽन्यत्र।

९ प्राकृतकल्पतरुः—रामशर्मतर्कवागीशनिर्मितः पद्यमयः। एष लङ्केश्वरकृत-प्राकृतकामधेनुमाधारीकृत्य निर्मितवानिति स्वग्रन्थे प्रत्यपादयत्।

एतदतिरिक्ता अपि केचन ग्रन्थाः प्राकृतव्याकरणविषये सन्ति, आसन् वेति ग्रन्थकाराणामन्येषकाणां चोद्धरणादिभिः प्रतीयन्ते। सकर्तृकाणां तेषां नामोल्लेख

एवैतत्पूर्तयेऽलमिति। यथा—१ भरतः (प्रायो नाट्यशास्त्रकर्ता), २ शाकल्यः, ३ कोहलः, ४ लङ्केश्वरः प्राकृतकामधेनुकर्ता, ५ समन्तभद्रः प्राकृतव्याकरणनिर्माता, ६ नरचन्द्रः प्राकृतप्रबोधकर्ता, ७ कृष्णपण्डितः (शेषकृष्णः) प्राकृतचन्द्रिकारचयिता, ८ वामनाचार्यः प्राकृतचन्द्रिकाकृत्, ९ रघुनाथशर्मा प्राकृतानन्दकृत्, १० नरसिंहः प्राकृतप्रदीपिकायाः कर्ता, ११ चिन्नबोम्मभूपालः प्राकृतमणिदीपिकानिर्माता, १२ अप्पय्यदीक्षितः (अप्पयज्वन्) प्राकृतमणिदीपकर्ता, १३ भामकवेः षड्भाषाचन्द्रिका, १४ दुर्गुणाचार्यस्य षड्भाषारूपमालिका, १५ नागोबानाम्नः षड्भाषासुबन्तरूपादर्शः, १६ षड्भाषामञ्जरी, १७ षड्भाषावार्तिकम्, १८ षड्भाषासुबन्तादर्शः, १९ शुभचन्द्रस्य प्राकृतव्याकरणम्, २० श्रुतसागरस्य औदार्यचिन्तामणिः, २१ भोजस्य प्राकृतव्याकरणम्, २२ पुष्पवननाथस्य प्राकृतव्याकरणं चेति।

श्रीभामहनिर्मितमनोरमासहिते श्रीवाररुचे प्राकृतप्रकाशे सूत्राणां पूर्णा संख्या चतुःशतसमाशीतिमिताऽस्ति। सञ्जीवनीसुबोधिन्यनुसारिण्या चन्द्रिकया द्वाविंशतिः सूत्राण्यधिकानि संगृह्य प्रदर्शितानीति मिलित्वा नवाधिकं पञ्चशतं सूत्रसंख्या भवति। भामहसम्मतसूत्रेषु नव सूत्राणि चन्द्रिकया न व्याख्यातानीति तत्पक्षे केवलं पञ्चशतं (५००) सूत्रसंख्येति प्रतिपादनमत्र कौतुकायेत्यलम्।

श्रीवररुचिविषये तु केवलमिदमेव ज्ञातुं शक्यते यदयं प्राकृतव्याकरणकृत्सु प्राचीनतम इति। पाणिनेः सूत्राणामुपरि वार्तिकानां रचयिता कदाचिदयमपि भवितुं युज्यते।

श्रीभामहविषये परिचयस्त्वित्थम्—ध्वन्यालोके श्रीमदानन्दवर्धनाचार्यैरलङ्कारशास्त्रविषयकग्रन्थप्रणेतृत्वेनास्योल्लेखः कृतः, भामहालङ्कारनाम्ना प्रायस्तत्पुस्तकं प्रसिद्धमेव। स एवायं न वेति प्रमाणान्तरानुपलब्धेर्न निर्णेतुं पारयामः।

प्राकृतमञ्जरीनाम्ना प्राकृतप्रकाशस्य पद्यमय्या व्याख्यायाः कर्तुः श्रीकात्यायनस्यापि विषये प्रमाणानुपलम्भादस्माकमौदासीन्यमेव। चन्द्रिकाव्याख्यायां समुद्धृताः पद्यपद्यांशास्तत्रत्या उताहो तेऽन्यत्रस्था इति न शक्नुमः कथयितुम्। चन्द्रिकायां तु सञ्जीवनीसुबोधिनीभ्यामुद्धृत्य संगृहीता इति तु कल्पयितुं पारयामः। तयोस्तु कुतः संगृहीता इत्यस्मिन् विषये मौनमेव शरणीकुर्मः।

श्रीवसन्तराजस्य प्राकृतसंजीवनीटीकाकर्तुर्विषये तु वयं सन्दिहाना एव। यतो हि काट्यवेमपालकः कुमारगिरेर्नृपतिरेकः सः। विजयभूपतेः पुत्रः शिवराजस्यानुजः चन्द्रदेवमैथिलाज्ञया शकुनार्णवनिर्माता कश्चिदन्यः। सञ्जीवनीकर्ता तूभयोरन्यतरोऽपि नास्तीति प्रतिभाति। किञ्चामुष्य विषये किमप्यैतिह्यं नोपालभ्यत इतीव प्राकृतसञ्जीवनीसम्पादकैरस्मत्सुहृद्वर्यैः स्वर्गीयश्रीबटुकनाथशर्मभिस्तथा हिन्दूविश्वविद्यालये वाराणसेये प्राध्यापकपदासीनैः श्रीबलदेवोपाध्यायशर्मभिश्च स समुपेक्षित एव।

सुबोधिनीव्याख्याकर्तुः श्रीसदानन्दस्यापि विषये ताभ्यां तत्रैव तथैवाचरितमिति प्रमाणोपन्यासं विना न किञ्चिदपि वक्तुं कोऽपि समर्थः स्यात्। कश्चिच्च भट्टकेशवपुत्रो

भट्टकेशवपिता सदानन्द इति समुल्लेखो दृश्यते। परं स एतद्विषयक एवेति कथं निर्णेतुं प्रभवामः।

अथ चन्द्रिकाख्या व्याख्येयं पञ्चमीति निश्चप्रचम्। एतन्निर्मातारस्तु हरदोई-मण्डलान्तर्गत-भगवन्तनगरवास्तव्याः कान्यकुब्जब्राह्मणाधिचिकित्सकचूडामणि-श्रीहरिहरशर्मणां पौत्राः, तद्द्वितीयपुत्रश्रीबदरीनाथशर्मणां पुत्रा, लब्धमहामहोपाध्यायादिसम्मानसूचकपदवीकाः श्रीपण्डितमथुराप्रसाददीक्षितमहोदयाः सन्ति, यैश्च वैद्यक-कामशास्त्र-व्याकरण-पाली-प्राकृत-शास्त्रार्थ-नाटकादिभिन्नभिन्नविषयेष्वनेके ग्रन्थाः प्रणीताः सन्ति, यदन्तर्गता प्राकृतप्रकाशव्याख्येयं चन्द्रिका श्रीमतां पुरस्ताद् विद्यते। एतत्कुलं विद्वत्कुलमिति कथयितुं शक्यते यतोऽस्मिन् कुले विद्वांस एव त्रयः श्रीसदाशिववैकुण्ठनाथ-रामनाथाख्याः पुत्रा एतेषाम्। श्रीमदयोध्यानाथप्रभृतयो नव पौत्राश्च सन्ति येषु कतिपये विद्वत्कोटिमारूढा अन्ये चारुरुक्षवः। अधिकं तु 'भक्तसुदर्शन'नाटकभूमिकादिभ्योऽवगन्तव्यम्।

श्रीडबरालमहोदयैः प्राकृतपदार्थनिर्वचनं, भाषोपभाषाः प्राकृतप्रकाशपुस्तकस्याधारश्च स्पष्टं स्वीये प्रास्ताविके कृतमिति तत एवावगन्तव्यम्। चन्द्रिकाप्रदीपयोराधारश्च ग्रन्थकृल्लेख एवेति न तत्रापि किमपि वक्तव्यमवशिष्टम्।

एतदुपोद्धातलेखनावसरे श्री प० ल० वैद्यमहोदयैः सम्पादितं श्रीत्रिविक्रमदेव-निर्मितप्राकृतशब्दानुशासन—मनोरमासहितप्राकृतप्रकाश-पुस्तकद्वयं तथा श्री प्रा० कृ० त्रिवेदिसम्पादितं षड्भाषाचन्द्रिकाख्यं पुस्तकमेकमुपलब्धम्। ततश्च भूमिकासामग्री-संग्रह इति धन्यवादार्हास्ते। विशेषतः श्रीवैद्यमहोदयाः।

शरीरस्यास्वास्थ्येन यत्रतत्र गन्तुमशक्यतया यैः साहाय्यं सम्पादितं तेऽस्माकं भागिनेया आयुष्मन्तः साहित्याचार्य-पुराणेतिहासादिशास्त्राचार्याः एम्० ए० उपाधि-भाजः श्रीबलिरामशास्त्रिभारद्वाजाः सरस्वतीभवन-वाराणसीपुस्तकालयोपाध्यक्षाः, गुरुवद्गुरुपुत्रेष्विति न्यायेन गुरुतुल्या अपि शिष्यत्वं गता आयुष्मन्तः साहित्याचार्या महामहोपाध्यायगुरुवरश्रीलक्ष्मणशास्त्रितैलङ्गसूनवः श्रीजगन्नाथशास्त्रितैलङ्गा अथ च श्रीव्यङ्कटेशशङ्करतैलङ्गा एम्० ए०, बी० एल० महोदयाश्च शुभाशीर्वादैरभिनन्द्यन्ते। एवं श्रीरामचन्द्रझामहाशया अपि कथं विस्मरणीयाः स्युः।

एतत्कार्यप्रोत्साहनादिना समुपकुर्वन्तः चौखम्बासंस्कृतग्रन्थमाला-चौखम्बाविद्या-भवनग्रन्थमालाद्वयाध्यक्षाः श्रीजयकृष्णदासगुप्तमहोदयाः शुभाभिराशीर्भिरभिनन्द्यन्ते। अन्ते च ज्ञानप्रदेभ्यः पूज्यपादश्रीभालचन्द्रशास्त्रिमानवल्लितैलङ्गेभ्यः प्रणामपरम्पराः समर्प्य श्रीभगवन्तं काशीविश्वनाथं मनसि निधाय विरमामि पल्लवितादमुष्मादुपोद्धात-प्रपञ्चादिति शम्।

वाराणसी पू:,<br>वि० सं० २०१६, जन्माष्टमी

विदुषामाश्रवः—<br>जगन्नाथशास्त्री होशिङ्गः

# भूमिका

श्री परमात्मा के अनुग्रह से और मातृभूमि भारतवर्ष के सुपुत्रों के अथक प्रयत्नों से हमारा देश भारतवर्ष इस समय एक स्वतन्त्र राष्ट्र है, जिसके प्रधान नेता माननीय श्री जवाहरलाल नेहरू जी तथा राष्ट्रपति देशरत्न डॉ० श्री राजेन्द्रप्रसाद जी हैं। ऐसे स्वतन्त्र राष्ट्र में प्रसिद्ध होनेवाली संस्कृत पुस्तकों में भी राष्ट्रियता की झलक आवश्यक है। अत एव उनका राष्ट्रभाषा में अनुवाद होना भी न्यायसङ्गत है। संस्कृत पुस्तकों की भूमिका संस्कृतज्ञों के लिये संस्कृत में अवश्य उपादेय है। इसी प्रकार राष्ट्रभाषा हिन्दी में भी उसका होना उचित प्रतीत होता है। जैसा कि आंग्लशासनकाल में अधिकतर विद्वान् अंग्रेजी में ही सब कुछ लिखते थे। किन्तु वह समय लद गया। अब अपने देश की राष्ट्रभाषा में उसकी जननी संस्कृत भाषा के साथ-साथ राष्ट्रभाषा हिन्दी में भी सब कार्य होने चाहिएँ—ऐसी इस तुच्छ लेखक की धारणा है। इसके पूर्व भी कभी-कभी छोटी-मोटी पुस्तकों में इस लेखक द्वारा वैसा प्रयत्न किया गया है। अत एव आज भी यह प्रयत्न किया जा रहा है तो उससे किसीको भी अरुचि न होनी चाहिए। प्रकृत विषय की ओर मुड़ रहे हैं।

श्री वररुचिकृत प्राकृतप्रकाश का चौखम्बा संस्कृत सीरीज, वाराणसी से यह चतुर्थ संस्करण प्रकाशित हो रहा है। इसके पूर्व अनेक उपकरणों से सुसज्जित केवल श्री भामहकृत मनोरमा नामक संस्कृत टीका के साथ इसका प्रकाशन हुआ था, जो श्री उदयराम शास्त्री डबराल महाशय द्वारा परीक्ष्य-छात्रोपयोगी बनाया गया था। किन्तु समय के परिवर्तन के साथ उसमें भी परिवर्तन की आवश्यकता प्रतीत होने लगी। ऐसे अवसर पर दूरदर्शी म० म० पं० मथुराप्रसाद दीक्षित जी ने 'चन्द्रिका' नामक एक नई संस्कृत टीका और 'प्रदीप' नामक सरल हिन्दी टीका लिखकर उसकी पूर्ति कर दी। उन टीकाओं के साथ यह पुस्तक कितनी उपादेय है—यह पाठकों के निर्णय के ही अधीन है। यह टीका संजीवनी और सुबोधिनी की अनुगामिनी होने से अष्टम (भामहानुसार नवम) परिच्छेद के अन्त तक ही है। अनुगामिनी होने पर भी यह समालोचिका भी है—यह विशेष स्थलों के निरीक्षण से स्पष्ट हो जायगा। अस्तु, दशम से द्वादश तक तीन परिच्छेदों की टीका न होने से अध्यक्ष महोदय को सूचित किया गया। उन्हींके कथनानुसार यह संपादन-कार्य मुझे सौंपा गया था और मैंने भी सरस्वती सेवा के नाते इसे सहर्ष स्वीकार भी किया था। अतः उन्हींकी इच्छानुसार शेष भाग की टीका रचने का भार भी संपादक के ऊपर ही आया। आधारान्तर के अभाव में भामहवृत्त्यनुसार ही चन्द्रिकादि की शैली पर नई संस्कृत एवं हिन्दी टीका लिखकर पूर्ति की गई। अत एव उसका नाम भी चन्द्रिकापूरणी रखा गया। विद्वद्गण इसकी आलोचना स्वयं करेंगे।

प्रकृत पुस्तक अर्थात् वररुचि-सूत्र एवं भामहवृत्ति-मनोरमा के प्रकाशन का आधार—श्री कवराल महोदय की 'प्रास्ताबना' से ज्ञात होता है कि वाराणसेय राजकीय संस्कृत पुस्तकालय—सरस्वती भवन की हस्तलिखित दो पुस्तकें हैं। प्रस्तुत संस्करण का आधार उपर्युक्त महाशय द्वारा सपादित पुस्तक ही है तथा नवीन व्याख्याओं का अवलम्ब स्वयं व्याख्याकार-लिखित पुस्तक है। अत एव इस विषय में विशेष चर्चा की आवश्यकता प्रतीत नहीं होती।

'प्राकृत-प्रकाश' इस पद में प्राकृत शब्द का अर्थ क्या है? इसमें विद्वानों के दो मत मालूम पड़ते हैं। प्रथम मतः—प्रकृति अर्थात् प्रजागण, तत्सम्बन्धी अर्थात् उनके पारस्परिक व्यवहार या बोल-चाल में आने वाली भाषा प्राकृत पद का अर्थ है। उन्हींके सिद्धान्तानुसार व्याकरण के नियमों से संस्कार पाकर शुद्ध व सुन्दर बनी भाषा 'संस्कृत' नाम धारण करती है। द्वितीय मतः—प्राचीन समय, वैदिककाल से उपयुक्त होने वाली भाषा अर्थात् संस्कृत ही प्रकृति अर्थात् मूल भाषा है और उससे आई या बनी रूपान्तर को प्राप्त होने वाली भाषा प्राकृत है। पूर्वोत्तर मतों में कोई भी मत ग्राह्य माना जाय, तो 'प्राकृत' यह नाम एक भाषा का है जिसके अनेक भेद उपलब्ध हैं। उस प्राकृत भाषा के शब्दों के साधुत्व को प्रकाश करने वाला यह ग्रन्थ अपने 'प्राकृत-प्रकाश' नाम को सार्थक बना रहा है।

इस प्राकृत भाषा के सिद्धान्तों को सूत्ररूप में निर्मित करने वालों में वररुचि, वाल्मीकि, हेमचन्द्र एवं त्रिविक्रमदेव के नाम संमुख आते हैं। उनमें वररुचि तथा हेमचन्द्र को सूत्रकर्ता मानने में कोई वाद-विवाद नहीं। त्रिविक्रम देव के सम्बन्ध में एक मत है कि सूत्र एवं वृत्ति दोनों उनकी हैं और दूसरा मत है कि वाल्मीकि के सूत्रों पर इनकी व्याख्या है तथा तृतीय मत इस प्रकार है कि हेमचन्द्रप्रणीत सूत्रों पर इन्होंने व्याख्या की है। बहुत से विद्वान् आदिकवि वाल्मीकि-कृत सूत्र मानने में पुष्ट प्रमाण के अभाव में सहमत नहीं हैं। परन्तु षड्भाषाचन्द्रिकाकार १६वीं शताब्दी के विद्वान् श्री लक्ष्मीधर अपने ग्रन्थारम्भ के पद्यों द्वारा श्री वाल्मीकि आदिकवि को ही सूत्र-निर्माता स्वीकार करते हैं और प्रमाणों से यदि यह बात सिद्ध हो तो हमलोगों को भी कोई आपत्ति नहीं है।

इस ग्रन्थ में भामहवृत्त्यनुसार बारह परिच्छेदों के सूत्रों की पूर्ण संख्या ४८७ है तथा चन्द्रिका-टीकानुसार २२ सूत्र अधिक हैं। किन्तु ऊपर लिखी संख्या में से ९ सूत्रों की चन्द्रिका में उपेक्षा कर व्याख्या नहीं की गई है। अतः उनके मत से ५०० सूत्र हैं। एवं पूर्ण योग ५०९ सूत्रों का है। अस्तु, प्राकृतप्रकाश की ४ प्राचीन टीकाएँ हैं, यथा—१ मनोरमा, २ प्राकृतमञ्जरी, ३ प्राकृतसंजीवनी तथा ४ सुबोधिनी। उनमें मनोरमा प्राचीनतम है जिसके रचयिता भामह हैं। वररुचि के समान भामह के सम्बन्ध में ऐतिहासिक सामग्री के अभाव में परिचय कराना अशक्य-सा हो रहा है। दूसरी टीका प्राकृतमञ्जरी पद्यात्मक नवम परिच्छेदान्त तक ही है जिसके निर्माता श्री कात्यायन नामक विद्वान् हैं। वे कौन थे? किस समय में थे? इत्यादि भी अस्पष्ट है, जैसा कि पूर्व के सम्बन्ध में। तीसरी टीका प्राकृतसञ्जीवनी नामक है। यह भी नवम परिच्छेदान्त ही है। इसके रचयिता श्री वसन्तराज हैं। इनका परिचय भी पूर्ववर्ती व्याख्याकारों के समान दुर्लभ है। एवं चौथी टीका श्रीसदानन्दनिर्मित सुबोधिनी है, जो नवम परिच्छेद के नवम सूत्र की समाप्ति के साथ समाप्त हुई है। अन्तिम दोनों टीकाएँ वाराणसी के सरस्वतीभवन से 'सरस्वतीभवन-ग्रन्थमाला' के १९वें पुष्प के दो भागों में प्रकाशित हुई हैं।

प्राकृतव्याकरणसम्बन्धी जो ग्रन्थ आजतक प्रकाशित हो चुके हैं उनका संक्षिप्त परिचय देना आवश्यक समझकर उल्लेख नीचे किया जा रहा है।

| ग्रन्थ | कर्ता | समय | व्याख्या |
|---|---|---|---|
| १ प्राकृतप्रकाश | वररुचि | परम प्राचीन | मनोरमा–मञ्जरी–संजीवनी–सुबोधिनी ४ प्राचीन, चन्द्रिका १ नवीन, हिन्दीटीका १ प्रदीप |
| २ प्राकृतलक्षण | चण्ड | प्राचीन | × |
| ३ सिद्धहेमचन्द्र | हेमचन्द्र | ११७२ ई० | प्राकृतप्रक्रियावृत्ति या ढुण्ढिका उदयसौभाग्यगणिकृत |
| ४ संक्षिप्तसार | क्रमदीश्वर | × | रसवती, प्राकृतदीपिका, प्राकृतपादटीका–३ |
| ५ प्राकृतव्याकरण ( शब्दानुशासन ) | त्रिविक्रमदेव | १२३६–१३०० ई० | स्वोपज्ञवृत्ति |
| ६ प्राकृतरूपावतार | सिंहराज | १३००–१४०० ई० | × |
| ७ षड्भाषाचन्द्रिका | लक्ष्मीधर | १५४१–१५६५ ई० | आदिकवि वाल्मीकि के सूत्रों की अपनी व्याख्या का समर्थन |
| ८ प्राकृतसर्वस्व | मार्कण्डेय कवीन्द्र | × | आर्याछन्द में वृत्ति का लेखक |
| ९ प्राकृतकल्पतरु ( पद्यमय ) | रामशर्म तर्कवागीश | अर्वाचीन | × |

इसके सिवाय भरत, कोहल, शाकल्य, लङ्केश्वर ( प्राकृतकामधेनुकर्ता ), शेषकृष्ण पण्डित एवं अप्पय दीक्षित के नाम ग्रन्थकर्ता के रूप में आदरणीय हैं।

अन्त में पुनः प्रकृत पुस्तक में अनेक ग्रन्थों के निर्माता, कवि, महामहोपाध्याय पण्डित श्रीमथुराप्रसाद दीक्षित भगवन्तनगर-हरदोई के निवासी का स्मरण उचित है, क्योंकि प्राकृत-प्रकाश पर आपकी 'चन्द्रिका' नामक पञ्चम संस्कृत व्याख्या एवं 'प्रदीप' नामक सरल हिन्दी टीका भी है जिसका ऊपर उल्लेख हो चुका है।

जिसकी प्रेरणा से कार्य किया गया उस परमात्मा को प्रणाम। जिन लोगों ने साहाय्य दिया उन मित्र, सम्बन्धी आदि की मंगलकामना के साथ प्रस्तुत ग्रन्थमाला के अध्यक्ष गुप्त बन्धुओं को शुभाशीर्वाद देकर ज्ञानदाता पूज्यपाद श्री गुरुचरणों में नतमस्तक हो इस भूमिका-लेखन-कार्य से विराम लेते हैं।

वाराणसी<br>
दि० २७–८–५९

भवदीय—<br>
**जगन्नाथ शास्त्री होशिङ्ग**

# विषयसूची


| विषयाः | | | पृष्ठाङ्काः |
|---|---|---|---|
| १ प्रस्तावना | ... | ... | १—६ |
| २ प्राकृतभाषाभेदः | ... | ... | १ |
| ३ उपोद्घातः | ... | ... | १—४ |
| ४ भूमिका ( हिन्दी ) | ... | ... | १—३ |
| ५ प्राकृतप्रकाशः सटीकः | ... | ... | १—२५२ |
| ( क ) प्रथमः परिच्छेदः | ... | ... | १ |
| ( ख ) द्वितीयः ,, | ... | ... | २८ |
| ( ग ) तृतीयः ,, | ... | ... | ४८ |
| ( घ ) तुरीयः ,, | ... | ... | ८२ |
| ( ङ ) पञ्चमः ,, | ... | ... | १०७ |
| ( च ) षष्ठः ,, | ... | ... | १२७ |
| ( छ ) सप्तमः ,, | ... | ... | १५० |
| ( ज ) अष्टमः ,, | ... | ... | १७२ |
| ( झ ) नवमः ,, | ... | ... | २१२ |
| ( ञ ) दशमः ,, | ... | ... | २२४ |
| ( ट ) एकादशः ,, | ... | ... | २३१ |
| ( ठ ) द्वादशः ,, | ... | ... | २३९ |
| ६ सूत्रपाठः | ... | ... | २५३ |
| ७ सूत्रानुक्रमणिका | ... | ... | २६५ |
| ८ चन्द्रिकोद्धृतानां पद्यपद्यांशानां वर्णानुक्रमणिका | ... | ... | २७३ |
| ९ अपभ्रंशविचारः | ... | ... | २८२ |
| १० शब्दरूपावलिः | ... | ... | २९० |
| ११ धातुरूपदिग्दर्शनम् | ... | ... | २९९ |
| १२ धात्वादेशाः | ... | ... | ३०१ |
| १३ शब्दसूची | ... | ... | ३०२ |
| १४ शुद्धिपत्रम् | ... | ... | ३२० |

॥ श्रीः ॥

# प्राकृतप्रकाशः

## 'मनोरमा'-'चन्द्रिका'-व्याख्याद्वयोपेतः ।

## प्रथमः परिच्छेदः

जयति मदमुदितमधुकरमधुररुताकलनकूणितापाङ्गः ।
करविहितगण्डकण्डूविनोदसुखितो गणाधिपतिः ॥ १ ॥
वररुचिरचितप्राकृतलक्षणसूत्राणि लक्ष्यमार्गेण ।
बुद्ध्वा चकार वृत्तिं संक्षिप्तां भामहः स्पष्टाम् ॥ २ ॥

### आदेरतः ॥ १ ॥

अधिकारोऽयम् । यदित ऊर्ध्वमनुक्रमिष्याम आदेरतः स्थाने तद्भवतीत्येवं वेदितव्यम् । आदेरित्येतदाऽऽपरिच्छेदसमाप्तेः । अत इति च आकारविधानात्[1] । अत इति तकारग्रहणं सवर्णनिवृत्त्यर्थम् ॥ १ ॥

याऽऽर्द्रालक्तकरक्तचन्दनमधुव्राताधरद्योतिनी
विद्युत्कुङ्कुमरत्नकुक्कुटशिखाखद्योतभाभ्राजिनी ।
उल्काकोकिलदृक्चकोरनयनाशोकद्युतिस्वामिनी
सेयं विष्णुपदप्रभा विजयते संसारतस्तारिणी ॥

आदेरतः—इत ऊर्ध्वम् आपादपरिसमाप्तेः आदेरित्यधिक्रियते । अतः इति तु 'अदातो यथादिषु वे'त्यतः प्राक् ॥ १ ॥

यह अधिकारसूत्र है । पादसमाप्ति तक जो कार्य विहित होगा वह आदि को ही होगा और 'अदातो यथादिषु वा' के पूर्व २ अतः ह्रस्व अकार को कार्य होगा ॥ १ ॥

### आ समृद्ध्यादिषु वा ॥ २ ॥

समृद्धि-इत्येवमादिषु शब्देष्वादेरकारस्याऽऽकारो भवति वा । समिद्धी सामिद्धी[2] । ( १-२८ ऋ = इ, ३-१ दलोपः, ३-५० द्वित्वम् , ३-५१ ध् = द्, ५-१८ दीर्घः ) पअडं, पाअडं । ( ३-३ रलोपः, २-२ कलोपः, २-२०

---

१. क्वचिद्-आ आकारविधानाद् पाठः । २. 'अन्त्यस्य हलः' ४-६ इति सोर्लोपः, एवं सर्वत्र सोर्लोपे बोध्यम् ।

द् = ड् , ५-३० बिन्दुः ) अहिजाई, आहिजाई । ( २-२७ भ् = ह् , २-२ तलोपः, ५-१८ दीर्घः ) मणंसिणी, माणंसिणी । ( २-४२ न् = ण् , ४-१५ बिन्दुः, ३-३ वूलोपः, ३-४२ न् = ण् ) [1]पडिवआ, पाडिवआ । ( ३-३ र्लोपः, २-१५ प् = व् , २-२ द्लोपः ) सरिच्छं, सारिच्छं । (१-३१ ऋ = रि, २-२ द्लोपः, ३-३० क्ष् = च्छ् , ५-३० बिन्दुः ) पडिसिद्धी, पाडिसिद्धी । (३-३ र्लोपः, २-४३ ष् = स् , ३-१ द्लोपः, ३-५० द्वित्वम्, ३-५१ ध् = द्, ५-१८ दीर्घः ) पसुत्तं, पासुत्तं । ( ३-३ र्लोपः, ३-१ प्लोपः ३-५० त्द्वित्वम्, ५-३० बिन्दुः) पसिद्धी, पासिद्धी । ( ३-३ र्लोपः, २-२ द्लोपः, ३-५० द्वित्वम् , ३-५१ ध् = द्, ५-१८ दीर्घः ) अस्सो, आसो[2] । ( २-४३ श् = स् , ३-३ वूलोपः, ३-५८ द्वित्वम्[3], ५-१ ओ ) समृद्धि-प्रकटाभिजातिमनस्विनीप्रतिपदा[4]सदृक्षप्रतिषिद्धि[5]प्रसुप्तप्रसिद्ध्यश्वाः । आकृतिगणोऽयम् ॥ २ ॥

**आ समृद्ध्यादिषु वा**—समृद्ध्यादिषु शब्देषु आदिभूतस्य ह्रस्वाकारस्य विकल्पेन आकारः । सामिद्धी, समिद्धी । समृद्धिः । पाडिसिद्धी, पडिसिद्धी । प्रतिषिद्धिः । पासिद्धी, पसिद्धी । प्रसिद्धिः । माणंसिणी, मणंसिणी । मनस्विनी । आहिजाअं, अहिजाअं । 'कगचजे'त्यत्र प्रायोग्रहणात् न जकारलोपः । केचित्तु आहिआअं, अहिआअं इति वदन्ति । अभिजातम् इति । पासुत्तं, पसुत्तं । प्रसुप्तम् । पाडिवआ, पडिवआ । प्रतिपद् । पाअडं, पअडं । प्रकटम् । सारिच्छं, सरिच्छं । सदृक्षम् । वाशब्दस्य व्यवस्थितविकल्पत्वात् क्वचिन्नित्यमात्वम् । वाससअं । वर्षशतम् । पासिस्सं । प्रस्विन्नम् । सासू । श्वश्रूः । समृद्ध्यादिगणोक्तः अश्वशब्दपाठस्तु चिन्त्य एव ।

समृद्धिः प्रतिषिद्धिश्च प्रसिद्धिश्च मनस्विनी ।
अभिजातं प्रसुप्तं च प्रतिपद् प्रकटं तथा ॥
सदृक्षं चैवमादिः स्यात् समृद्ध्यादिगणः किल ॥ २ ॥

समृद्ध्यादिक शब्दों के आदिस्थ ह्रस्व अकार को विकल्प से आकार हो जाता है । ( समृद्धिः ) नं. १० से इकार, ५२ से अन्त्य इकार को दीर्घ, ६० से सुलोप, आ समृ० इससे आत्व । सामिद्धी, पक्ष में समिद्धी । ( प्रतिषिद्धिः ) नं. ५ से रलोप, २६ से सकार, ५२ से दीर्घ, ६० से सुलोप, आत्व, प्रतिसरवेतस २।८ से डकार । पाडिसिद्धी, पडिसिद्धी । एवम् ( प्रसिद्धिः ) का पूर्ववत् पासिद्धी, पसिद्धी । ( मनस्विनी ) नं. ५ से वलोप, ६१ से अनुस्वार, २५ से णकार, प्रकृत सूत्र से दीर्घ । माणंसिणी, मणंसिणी । ( अभिजातं ) नं २३ से भ को हकार, २ से जकार, तकार का लोप,

---

१. प्रत्यादौ डः ८ । १ । २०६ इति हेमसूत्रेण तो डः । केचित्तु 'प्रतिसरवेतसपताकासु डः' २-८ इति सूत्रे प्रतिसरादयः प्रत्यादीनामुपलक्षणमिति वदन्ति । २. न दीर्घाऽनुस्वारात् ८ । २ । ९२ इति हेमसूत्रेण द्वित्वनिषेधः । ३. द्वित्वाभावपक्षे असो । ४. क पुस्तके प्रतिपद् पाठस्तत्र-( ४-७ द् = आ ) । ५. यत्र प्रतिस्पर्द्धिपाठस्तत्र (३-३७ स्प = सिं) इति विशेषः ।

आ समृ० से दीर्घ, ६२ से अनुस्वार। आहिआअं, अहिआअं। ( प्रसुप्तम् ) पूर्वोक्त नं. ५+२+६+६२ से सिद्ध कर लेना। पासुत्तं, पसुत्तं। ( प्रतिपत् ) पाडिवआ, पडिवआ, पूर्वोक्त सूत्रों से सिद्ध है। प्रतिवेतसपताकासु डः इससे डकार आदेश हो जाता है। ( क्या भामह पण्डित जी पडिवआ का साधुत्व करते हुये यह सूत्र ही भूल गये थे, अथवा प्रेस दोष से रह गया ) ( प्रकटम् ) ( पाअडं, पअडं ) नं. ५+२+१९+६२ से सिद्ध हो जाता है ) ॥ २ ॥

नोट—( १० ) इदृष्यादिषु। ( ५२ ) सुभिसुप्सु दीर्घः। ( ६० ) अन्त्यस्य हलः। ( ५ ) सर्वत्र लवराम्। ( २६ ) शषोः सः। ( ६१ ) वक्रादिषु। ( २५ ) नो णः सर्वत्र। ( २३ ) खघथधभां हः। ( २ ) कगचजतदपयवां प्रायो लोपः। ( ६२ ) नपुंसके सोर्विन्दुः। ( ६ ) शेषादेशयोर्द्वित्वमनादौ। ( १९ ) टो डः ॥ २ ॥

## इदीषत्पक्वस्वप्नवेतसव्यजनमृदङ्गाऽङ्गारेषु* ॥ ३ ॥

**ईषदादिषु शब्देषु आदेरतः स्थाने इकारादेशो भवति। वेति निवृत्तम्। इसि[1]। ( ४–१ ई = इ, २–४३ ष् = स्, ४–६ अन्त्यलोपः ) पिक्कं। (३–३ व्लोपः, ३–५० कद्वित्वम्, ५–३० बिन्दुः) सिविणो[2]। (३–३ व्लोपः, ३–६२ विप्रकर्ष इकारता च, २–४२ न् = ण्, ५–१ ओ) वेडिसो। (२–८ त् = ड्, ५–१ ओ) वअणो। (३–२ य्लोपः, २–२ ज्लोपः, २–४२ न् = ण्, ५–१ ओ ) मिइङ्गो[3]। ( १–२८ ऋ = इ, ४–१७ बिन्दुः, २–२ द्लोपः, ५–१ ओ ) इङ्गालो। ( ४–१७ बिन्दुः, २–३० र् = ल्, ५–१ ओ ) ॥ ३ ॥**

ईदीषत्०—ईषदादिषु शब्देषु आदेरतः स्थाने इकारः स्यात्। चकारादनादेरपि। ( ईषत् ) ईसि–ईषद्शब्दात् सुप्रत्यये अन्त्यस्य हलः ४।६ इति सोः, दकारस्य च लोपे शषोः सः २।४३ इति सकारः। इदीषत्० अनेन अनन्त्यस्यापि सकारोत्तरस्याकारस्य इकारः। यत्तु भामहेन ईषदः आदिभूतस्य दीर्घकारस्य इकारः कृतस्तच्चिन्त्यम्, अत इत्युक्तेस्तस्य अकाररूपाभावात्। किञ्च पुनः सकारोत्तरस्याकारस्येकारः केन स्यात्। न च भवन्मयेऽपि आदेरित्यधिकारात्, सकाराकारस्य अनादित्वात्कथमिकारः, चकारग्रहणादनादेरपीत्युक्तेः। अन्यथा वेतसशब्दे मध्यस्थितस्य तकाराकारस्य इकारः कथं स्यात्। किंच ईषदः ईसि-इति रूपम्, न तु इसि, इति। तत्र ईकारस्य ह्रस्वेकारविधायकसूत्राभावात्। ( पक्वम् ) पिक्कं सर्वत्र लवरामिति वलोपः, शेषादेशेति कद्वित्वम्, अनेन इकारः। पिक्कं। ( स्वप्नः ) सिविणो। पूर्ववद् वलोपः, आदिस्थत्वान्न सस्य द्वित्वम्, प्रकृतेन इत्वम्। इत् श्री ह्री ३।६२। इत्यादिना पकारनकारयोर्विप्रकर्षः पूर्वस्य

---

* सूत्रेऽस्मिन् वसन्तराजमतानुयायि'चन्द्रिका'-व्याख्याकृन्मतेऽन्ते 'च' इति वर्णोऽधिकः।

१. 'इत्वमीषत्पदे कैश्चिदोकारस्यापि चेष्यते। इसि चुम्बिअमित्यादि रूपं तेन हि दृश्यते।' इत्यभियुक्ताः। हेमस्तु ईसि इति मन्यते, तथा च शाकुन्तले-'ईसीसि चुम्बिआई' इति प्रायो दीर्घादिर्लभ्यते। २. स्वप्ननीव्योर्वा ८। १। २५९। सिमिणो, सिविणो। हे०। ३. इदुतो वृष्टि-वृष्ट-पृथङ्-मृदङ्ग-नप्तृके ८। १। १३७ तेणाहिट्ठं गीअं मुइङ्गि करताडिय मिइङ्गं। हे०। का० पु० मुइङ्ग पाठे १–२९ सूत्रेणोत्वं बोध्यम्, तत्र गणे आदिग्रहणात्।

पकाराकारस्य चेत्वम् । पो वः । नो णः सर्वत्रेति नस्य णत्वे । अत ओत् सोः । सिविणो इति । ( वेतसः ) वेडिसो । प्रतिवेतसपताकासु डः इति डः । यत्तु भामहेन प्रतिसरेति पठितम् , तन्नये पडिहरं । पडिवअणं इत्यादिकाः कथं सेत्स्यन्तीति विभावयन्तु सुधियः । साधुत्वं लोकभाषायां स्फुटीभविष्यति । ( व्यजनकम् ) विअणअं । (मृदङ्गः) मुइंगो । (अङ्गारः) इङ्गालः । चकारग्रहणाद् मज्झिमं, चरिमं इत्यादि ॥ ३ ॥

ईषदादिक शब्दों में आदिस्थ अकार को इकार होता है। जिस शब्द में आदिस्थ अकार न होगा वहाँ मध्यस्थ को ही इकार हो जायगा, उदाहरणों में स्पष्ट है। ( ईषत् ) नं. २६ से षकार को सकार, ६० से सु का और ईषद् के दकार का लोप, प्रकृत सूत्र से अकार को इकार, ईसि इति। ( पक्वम् ) नं. ५ से वलोप, ६ से द्वित्व, इत्व, पिक्कं। ( स्वप्नः ) नं. ५ से वलोप, इदीषत्० से आदिस्थ अकार को इकार। इत् श्रीही० इससे पकार नकार का विप्रकर्ष और पकारस्थ अकार को इकार। नं. १८ से पकार को वकार, २५ से नकार को णकार, ४२ से ओकार, सिविणो। ( वेतसः ) प्रतिवेतस० से डकारादेश, प्रकृत सूत्र से मध्यस्थ अकार को इकार। नं. ४२ से ओकार, वेडिसो। ( व्यजनकम् ) नं. ४ से यलोप। प्रकृत इदीषत् से इकार। नं. २ से जकार और ककार का लोप। २५ से णकार। ६२ से अनुस्वार, विअणअं। ( मृदङ्ग ) नं. ११ से ऋ को उकार। उक्त प्रकृत सूत्र से इकार नं. २ से दलोप। ४२ से ओकार, मुइङ्गो। ( अङ्गारः ) नं. ६४ से रेफ को लकार। उक्तसूत्र से इकार, ४२ से ओकार। इङ्गालो ॥ ३ ॥

नोट—नं.-( २६ ) शषोः सः। ( ६० ) अन्त्यस्य हलः। ( ५ ) सर्वत्र लवराम्। ( ६ ) शेषादेशयोर्द्वित्वमनादौ। ( १८ ) पो वः। ( २५ ) नो णः सर्वत्र। ( ४२ ) अत ओत्सोः। ( ४ ) अधो मनयाम्। (२) कगचजतदपयवां प्रायो लोपः। ( ६२ ) नपुंसके सोर्बिन्दुः। ( ११ ) उदृत्वादिषु। ( ६४ ) हरिद्रादीनां रो लः ॥ ३ ॥

## लोपोऽरण्ये ॥ ४ ॥

**अरण्यशब्दे आदेरतो लोपो भवति। रण्णं। ( ३-२ यलोपः, ३-५० द्वित्वम् , ५-३० बिन्दुः ) ॥ ४ ॥**

लोपोऽरण्ये—अरण्यशब्दे आदेरकारस्य लोपः स्यात्। अरण्यं। रण्णं। कथम् इदानीमित्यस्य 'दाणि' इति। योगविभागात्सेत्स्यति। लोपः ।४। आदेर्लोपः स्यात्। इतीकारलोपे, नो णः सर्वत्रेति णकारे, इदीतः पानीयादिषु इतीत्वे, मो बिन्दुरित्यनुस्वारः। तस्य मांसादित्वाल्लोपः। दाणि इति ॥ ४ ॥

**अरण्य शब्द के आदिभूत अकार का लोप हो। ( अरण्यम् ) इससे अकार का लोप हो गया। नं. ४ से यकार का लोप। ६ से अवशिष्ट णकार को द्वित्व। ३७ से अन्त्य मकार को अनुस्वार। रण्णं। इदानीम् का दाणि। योगविभाग करके 'लोपः'—यह सूत्र मानना। अरण्य शब्द के अतिरिक्त भी कहीं लोप हो। इससे इकार का लोप। नं. २५ से णकार। इदीतः पानीयादिषु से ह्रस्व इकार। मकार को अनुस्वार। मांसादित्वाल्लोप दाणि। इति ॥ ४ ॥**

## ए[1] शय्यादिषु ॥ ५ ॥

**शय्या इत्येवमादिषु शब्देषु आदेरत एकारादेशो भवति। सेज्जा। ( २-४३ श् = स् , ३-१७ य्य् = ज् , ३-५० द्वित्वम् ) सुन्देरं। ( ४-१७ बिन्दुः, १-४४ औ = उ, ३-१८ र्य् = र् , ५-३० बिन्दुः ) उक्केरो। ( ३-१ त्लोपः, ३-५० द्वित्वम् , ५-१ ओ) तेरहो। (३-३ र्लोपः, २-२ य्लोपः, ४-१ ओलोपः, २-१४ द् = र् , २-४४ श् = ह् , ५-१ ओ) अच्छेरं। (४-१ आ = अ[2], ३-४० श्च् = छ् , ३-५० द्वित्वम् , ३-५१ छ् = च् , ३-१८ र्य् = र् , ५-३० बिन्दुः ) पेरन्तं। ( ३-१८ र्य् = र् , ५-३० बिन्दुः) वेल्ली। ( ३-३ ल्लोपः, ३-५० द्वित्वम् ) शय्यासौन्दर्योत्करत्रयोदशाश्चर्य-पर्यन्तवल्ल्यः ॥ ५ ॥**

ए च शय्यादिषु—शय्याशब्देन सदृशाः शय्यादयः, सादृश्यं च संयुक्तत्वेन। शय्याशब्दसदृशेषु आदेरत एत्वं स्यात्। चकारादनादेरपि। ( शय्या ) अनेन आदेरकारस्य एत्वे, य इत्यस्य जकारे तस्य द्वित्वे, सकारे च कृते। सेज्जा। ( सौन्दर्यम् ) सुन्देरं। ( वल्ली ) वेल्ली। ( कियत् ) केत्तिअं। ( यावत् ) जेत्तिअं। ( तावत् ) तेत्तिअं। ( उत्करः ) उक्केरो। ( त्रयोदशः ) तेरहो। ( आश्चर्यम् ) अच्छेरं। ( स्तोकमात्रम् ) थोअमेत्तं। ( पर्यन्तम् ) पेरन्तं। ( वृन्तम् ) वेण्टं।

शय्यासौन्दर्यपर्यन्तवल्लीत्रित्तिआन्तोत्कराः।
आश्चर्यमात्रवृन्तानि ज्ञेयः शय्यादिरीदृशः ॥ ५ ॥

**शय्यादिक शब्दों के आदि अकार को एकार हो। चकार ग्रहण से अनादि अकार को भी एकार होगा। शय्या०, इससे एकार। नं. २६ से शकार को सकार। ४ से अधःस्थ एक यकार का लोप। 'यशय्याभिमन्युषु जः' इससे जकार। नं. ६ से जकार को द्वित्व। सेज्जा। ( सौन्दर्यम् ) इसमें मध्यस्थ अकार को एकार। नं. ६५ से औकार को उकार। नं. ४ से यलोप। नं. ३७ से मकार को अनुस्वार। सुन्देरं। (वल्ली) प्रकृत सूत्र से एकार। वेल्ली। ( कियत् ) 'किमः कः' ५।५९ इससे कादेश। प्रकृत से एकार। 'इष्टौ कियत्तदेतेभ्यः परिमाणे त्तियडहौ' इस इष्टि से परिमाण अर्थ में त्तिय प्रत्यय। नं. ६० से अन्त्य तकार का लोप। सुप्रत्यय। केत्तियं। एवम् ( यावत् ) से त्तिय प्रत्यय। एत्व। नं. २४ से यकार को जकार। जेत्तियं। एवम् ( तावत् ) से पूर्ववत्। तेत्तियं। ( उत्करः ) नं. ३ से तकार लोप। नं. ६ से ककार को द्वित्व। नं. ५२ से ओकार। उक्केरो। ( आश्चर्यम् ) नं. ५८ से आकार को अकार। नं. ६४ से श्च को छकार। नं. ६ से छकार को द्वित्व। नं. ७ से छकार को चकार। मध्यस्थ छकारोत्तरवर्त्ती अकार को प्रकृत सूत्र से एकार। तूर्यधैर्य० ३।१८ से रेफादेश। नं. ३७ से अनुस्वार। अच्छेरं। ( त्रयोदशः ) नं. ५ से रेफ-लोप। प्रकृत से एत्व। 'संख्यायाश्च' से दकार को रेफादेश। नं. २७ से शकार को हकार। नं. ४२ से ओकार। 'लोपः साचो**

---

१. वसन्तराजमतानुयायि'चन्द्रिका' व्याख्यानुरोधादत्र 'च' इति वर्णोऽपेक्षितः।

२. ह्रस्वः संयोगे ८। १। ८४। तित्थम्। हे० एवं सर्वत्र बोध्यम्।

यकारस्य' इससे यकार, ओकार का लोप। तेरहो। ( स्तोकमात्रम् ) नं. २९ से थकार। नं. २ से कलोप। नं. ५८ से आकार को अकार। एत्व प्रकृत सूत्र से। नं. ५ से रेफ लोप। नं. ६ से तकार को द्वित्व। नं. ३७ से अनुस्वार। थोअमेत्तं। ( पर्यन्तम् ) शय्यादिषु वा से एकार। तूर्यधैर्य० से यकार का लोप। नं. ३७ से अनुस्वार। पेरन्तं। ( वृन्तम् ) नं. ९ से ऋकार को अकार। 'तालवृन्ते ण्टः' से 'न्त' को 'ण्ट' आदेश। प्रकृत सूत्र से एकार, नं. ३७ से अनुस्वार। वेण्टं। प्रायः शय्यादिक उक्त मात्र हैं॥ ५॥

नोट—नं. (४) अधो मनयाम्। (६) शेषादेशयोर्द्वित्वमनादौ। ६२ नपुंसके सोर्बिन्दुः। ( २५ ) नो णः सर्वत्र। ( २६ ) शषोः सः। ( ६५ ) उत्सौन्दर्यादिषु। ( ६० ) अन्त्यस्य हलः। ( २४ ) आदेर्यो जः। ( ३ ) उपरि लोपः कगडतदपषसाम्। ( ४२ ) अत ओत् सोः। ( ५८ ) अदातो यथादिषु वा। ( ६४ ) श्चत्सप्सां छः। ( ७ ) वर्गेषु युजः पूर्वः। ( ५ ) सर्वत्र लवराम्। (२७) दशादिषु हः। (२९) स्तस्य थः। (९) ऋतोऽत्।

## ओ बदरे देन ॥ ६ ॥

**बदरशब्दे दकारेण सहादेरत ओत्वं भवति। बोरं (५-३० बिन्दुः) ॥६॥**

ओ बदरे देन—बदरशब्दे दकारेण सह आदेरत ओत्वं स्यात्। बोरं। ( बदरम् ) लवणशब्देऽपि वकारेण सह अकारस्य ओत्वमिष्यते। लोणं। आर्द्रार्पितशब्दयोस्तु विकल्पेन इष्यते। ओद्दं, अद्दं। ( आर्द्रम् )। ओप्पिअं, अप्पिअं। ( अर्पितम् )। इयमिष्टिरिति वसन्तराजसदानन्दौ। पुस्तकान्तरे तु सूत्रमेवम् ॥ ६ ॥

बदर शब्द में दकार के सहित आदिवर्णस्थ अकार को ओकार हो तो बकारोत्तर अकार और दकार के स्थान में ओकार होगा। नं ३७ से अनुस्वार। ( बदरम् ) बोरं। वसन्तराजादिक लवण शब्द में प्रयोगप्रामाण्य से ओत्व मानते हैं, अन्य के मत से 'लवण०' यह ७ वाँ वररुचि कृत सूत्र है। अस्तु, पूर्ववत्साधुत्व जानना। ( लवणम् ) लोणं। आर्द्रा-अर्पित शब्द में विकल्प से ओकार होगा। (आर्द्रा) नं. ५ से नित्य रेफद्वय का लोप, अथवा 'द्रे रो वा' इससे विकल्प से लोप। नं. ५८ से अकार। नं. ६ से दकार को द्वित्व, नं. ३७ से अनुस्वार। ओद्दं। पक्ष में अद्दं। एवम् ( अर्पितम् ) ओप्पिअं, अप्पिअं। साधुत्व पूर्ववत् जानना ॥ ६ ॥

## लवणनवमल्लिकयोर्वेन ॥ ७ ॥

**लवणनवमल्लिकयोरादेरतो वकारेण सह ओकारः स्यात्। लोणं। ( ५-३० बिन्दुः ) णोमल्लिआ ( २-४२ न् = ण्, २-२ क्लोपः ) ॥ ७ ॥**

लवणनवमल्लिकयोर्वेन—एतयोर्वकारेण सह आदेरत ओत्वं स्यात्। लोणं ( लवणम् )। णोमल्लिआ ( नवमल्लिका ) ॥ ७ ॥

लवण और नवमल्लिका शब्द में वकार के सहित आदि अकार को ओकार होगा। ( लवणम् ) लोणं। ( नवमल्लिका ) नं. २५ से नकार को णकार। नं. २ से ककार लोप। प्रकृत सूत्र से ओत्व। णोमल्लिआ ॥ ७ ॥

## मयूरमयूखयोर्य्वा वा ॥ ८ ॥

**मयूर मयूख इत्येतयोर्यूशब्देन सहादेरत ओत्वं वा भवति। मोरो,**

मऊरो। ( ५-१ ओ ) मोहो, मऊहो। ( २-२७ ख् = ह् , ५-१ ओ ) उभयत्र, ( पक्षे २-२ यलोपः ) ॥ ८ ॥

मयूरमयूखयोर्य्वा वा—य्वा इति तृतीयान्तम्। एतयो'र्यू' इत्यनेन सह आदेरत ओत्वं वा स्यात्। मोरो। मऊरो ( मयूरः )। मोहो। मऊहो ( मयूखः ) ॥ ८ ॥

मयूर-मयूख शब्द में 'यू' के सहित आदि वर्णस्थ अकार को ओकार होगा। ( मयूरः ) नं. ४२ से सु को ओकार। मोरो। पक्ष में नं. २ से यलोप। मऊरो। एवम् ( मयूखः ) यू और मकाराकार को ओकार। नं. २३ से खकार को हकार, मोहो, पक्ष में मऊहो, साधुत्व पूर्ववत् ॥ ८ ॥

## चतुर्थीचतुर्दश्योस्तुना ॥ ९ ॥

**एतयोस्तुना सहादेरत ओत्वं भवति वा। चोत्थी, चउत्थी। ( ३-३ र्लोपः, ३-५० थ्द्वित्वं, ३-५१ थ् = त् , पक्षे २-२ तलोपो विशेषः ) चोद्दही, चउद्दही[1]। ( २-४४ श् = ह् , शेषं पूर्ववत् ) ॥ ९ ॥**

चतुर्थीचतुर्दश्योस्तुना—एतयोः तु इत्यनेन सह आदेरत ओत्वं वा स्यात्। चोत्थी। चउत्थी ( चतुर्थी )। चोद्दसी, चउद्दसी ( चतुर्दशी ) ॥ ९ ॥

चतुर्थी और चतुर्दशी शब्द में 'तु' के सहित आदि अकार को ओकार हो। चतुर्थी० इससे ओकार। नं. ५ से रेफलोप। नं. ६ से थकार को द्वित्व। नं. ७ से थकार को तकार। चोत्थी, पक्ष में चउत्थी। ( चतुर्दशी ) नं. २६ से शकार को सकार। रेफलोप। दकार को द्वित्व पूर्ववत्। चोद्दसी, चउद्दसी ॥ ९ ॥

नोट—( ३७ ) मो बिन्दुः। ( ५ ) सर्वत्र लवराम्। ( ५८ ) अदातो यथादिषु वा। ( ६ ) शेषादेशयोर्द्वित्वमनादौ। ( २५ ) नो णः सर्वत्र। ( २ ) कगचजतदपयवां प्रायो लोपः ( ४२ ) अत ओत् सोः। ( २३ ) खघथधभां हः। ( ७ ) वर्गेषु युजः पूर्वः। ( २६ ) शषोः सः। ( ६२ ) नपुंसके सोर्बिन्दुः ॥ ९ ॥

## अदातो यथादिषु वा ॥ १० ॥

**अत इति निवृत्तम् , स्थान्यन्तरनिर्देशात्। यथा इत्येमवादिषु आतः स्थाने अकारादेशो भवति वा। जह, जहा। तह, तहा। ( २-२७ थ् = ह् )। पत्थरो, पत्थारो। (३-३ रलोपः, ३-१२ स्त् = थ् , ३-५० थ्द्वित्वम्, ३-५१ थ् = त् , ५-१ ओ) पउअं, पाउअं। ( ३-३ र्लोपः, १-२९ ऋ = उ, २-२ कतयोर्लोपः, ५-३० बिन्दुः ) तलवेण्टअं, तालवेण्टअं। ( १-२८ ऋ = इ[2], १-१२ इ = ए[3], ३-४५ न्त = ण्ट, २-२ कलोपः, ५-३० बिं० )**

---

१. क० पु० चतुर्थी-तत्र चोत्थी, चउत्थी। चतुर्दशी-तत्र चोद्दही, चउद्दही। पाठः।

२. ऋष्यादेराकृतिगणत्वात्। ३. संयोगपरत्वेन पिण्डसमत्वात्। 'इदेदो वृन्ते' ८। १। १३९ विण्ट, वेण्ट, वोण्ट। हे०।

उक्खअं, उक्खाअं। ( ३-१ तूलोपः, ३-५० खूद्वि०, ३-५१ ख् = क् , २-२ तूलोपः, ५-३० बिं० ) चमरं, चामरं। ( ५-३० बिं० ) पहरो, पहारो। (३-३ रूलोपः, ५-१ ओ) चडु, चाडु। (२-२० ट् = ड् ) दवग्गी, दावग्गी। ( ३-२ नूलोपः, ३-५० द्वि०, ५-१८ दीर्घः ) खइअं, खाइअं। ( २-२ दूलोपः तूलोपश्च, ५-३० बिं० ) संठविअं, संठाविअं। ( ८-२६ स्था = ठा, ३-५६ द्वित्वनिषेधः, २-१५ प् = व् , २-२ तलोपः, ५-३० बिं० ) हलिओ, हालिओ। ( २-२ कलोपः, ५-१ ओ )। यथातथाप्रस्तारप्राकृततालवृन्त-कोत्खातचामरप्रहारचाटुदावाग्निखादितसंस्थापितहालिकाः ॥ १० ॥

अदातो यथादिषु वा—यथादिषु शब्देषु आदेराकारस्य अकारः स्यात्, वा शब्देऽनुवर्तमानेऽपि पुनर्वाग्रहणादनादेरप्याकारस्याकारः। जह, जहा। तह, तहा। पवहो, पवाहो। पहरो पहारो। पअअं, पाअअं। पत्थरो, पत्थारो। तलवेण्टअं, ताल-वेण्टअं। उक्खओ, उक्खाओ। चमरं, चामरं। पहरो, पहारो। चडु, चाडु। दवग्गी, दावग्गी। खइअं, खाइअं। संठविअं, संठाविअं। पत्थवो, पत्थावो। परिआओ, पारि-आओ। हलिओ, हालिओ। वाग्रहणेन व्यवस्थितविभाषाग्रहणाद् यथादिष्वेव विकल्पः। ब्राह्मणादौ तु नित्यमकारः। बंम्हणो। ठविओ। पत्तं। पंसू। अच्छरिअं। पुव्वण्हो। मज्झण्णो। अवरण्हो। इत्यादि ॥ १० ॥

यथादिक शब्दों में आदि अथवा अनादि दीर्घ आकार को ह्रस्व अकार होगा। वाग्रहण अनुवृत्ति से सिद्ध था, फिर जो 'वा' ग्रहण किया है इससे आदिस्थ एवं अनादिस्थ आकार का ग्रहण करना। उदाहरण—( यथा ) नं. २३ से थकार को हकार। उक्त सूत्र से अकार। नं. २४ से जकार। जह, पक्ष में जहा। एवम् ( तथा ) तह, तहा। ( प्रवाहः ) नं. ५ से रेफ लोप। नं. ४२ से ओकार। विकल्प से अकार। पवहो, पवाहो। ( प्रहारः ) पूर्ववत्। रेफ लोप। ओकार। विकल्प से अकार। पहरो, पहारो। प्राकृत शब्द का पाउड भी प्रयोग होता है। ऋष्यादि गण में मान कर उकार। कृत शब्द के तकार को डकार। कइं देवेहिं, पाउड भासाए। इत्यादि प्रयोग बहुलांश में मिलते हैं। ( प्राकृतम् ) नं. ५ से रेफ लोप। नं. ९ से ऋकार को अकार। नं. २ से ककार तकार का लोप। नं. ३७ से मकार को अनुस्वार। प्रकृत सूत्र से विकल्प से आदिस्थ पकाराकार को अकार। पअअं, पाअअं। ( प्रस्तारः ) नं. ५ से रेफ लोप। २९ से स्त को थकार। नं. ६ से थकार को द्वित्व। नं. ७ से थ को तकार। प्रकृत सूत्र से आकार को अकार विकल्प से। नं. ४२ से ओकार। पत्थरो, पत्थारो। ( तालवृन्तकम् ) नं. १० से ऋकार को इकार। नं. ६५ से इकार को एकार। तालवृन्ते ण्टः से न्त को ण्ट आदेश। नं. २ से कलोप। नं. ३७ से अनुस्वार। विकल्प से अकार। तलवेण्टअं, तालवेण्ट । ( उत्खातम् ) नं. ३ से त-लोप। नं. ६ से द्वित्व, ७ से ककार। नं. २ से द्वितीय तकार का लोप। ३७ से अनुस्वार। प्रकृत सूत्र से अकार। उक्खअं, उक्खाअं। ( चामरम् ) प्रकृत सूत्र से पाक्षिक अकार। अनुस्वार पूर्ववत्। चमरं, चामरं। ( प्रहारः ) नं. ५ से रेफ लोप। ४२ से ओकार।

श्री-ह्री-क्लान्त-क्लेश-म्लान-स्वप्न-स्पर्श-आदर्श-हर्ष-अर्ह-इन शब्दों में युक्त वर्ण का विकर्ष हो अर्थात् युक्त वर्ण का पृथक्-पृथक् विभाग हो और विभक्त पूर्व वर्ण के साथ इकार स्वर हो। (श्रीः) का श्-री विभाग हो गया और श के साथ इकार स्वर लग गया। २६ से श को स। सिरी। एवम्-(ह्रीः) हिरी। (क्लान्तः) ५८ से आकार को अकार। किलंतो। (क्लेशः) २६ से सकार। किलेसो। (म्लानः) २५ से न को ण। मिलाणो। (स्वप्नः) ५ से वलोप। 'उदीषत्' (१+३) सकार के साथ इकार। पकार-नकार का विकर्ष, इकार। १८ से प को व। २५ से न को णकार। सिविणो। 'स्व' का विकर्ष क्यों नहीं? वैसा प्रयोग नहीं होता है। अथवा वा की अनुवृत्ति से व्यवस्थित कार्य होगा, अतः पूर्व का त्याग करके द्वितीय अक्षर 'प्न' में विकर्ष, इकार होगा। पूर्ववत् णकार। सिविणो। वा-पद की अनुवृत्ति करके स्पर्श-आदर्श में विकल्प से विकर्ष, इकार होगा। (स्पर्शः) 'स्पस्य' (३+२६) से स्प को फ। रेफ और शकार का विकर्ष। रेफ के साथ इकार। २६ से श को सकार। फरिसो। पक्ष में—६१ से अनुस्वारागम। ५ से रेफलोप। २६ से सकार। फादेश पूर्ववत्। फंसो। एवम्-(दर्शनम्) विकर्ष पूर्ववत्। २५ से नकार को णकार। दरिसणं। पक्ष में-दंसणं। पूर्ववत् अनुस्वारादि। कहीं पर नित्य विकर्ष और इकार होगा। (आदर्शः) २ से दकार का लोप। रेफ और शकार का विकर्ष, इकार। २६ से श को स। आअरिसो। (हर्षः) हरिसो। हर्ष-पद से रेफ-षकार का विकर्षादि अन्यत्र भी जानना। (उत्कर्षः) ३ से तलोप। ६ से कद्वित्व। रेफ-षकार का विकर्ष। २६ से ष को स। उक्करिसो। एवम्-(अमर्षः) अमरिसो। (वर्षः) वरिसो। (वर्षवरः) वरिसवरो। कहीं पर 'र्ष' का विकर्ष नहीं होगा। (वर्षारात्रः) 'आ समृद्ध्यादिषु वा' (१+२) से आकार। ५ से रेफलोप। २६ से ष को सकार। ५८ से रेफ के आकार को अकार। ६ से तद्वित्व। वासारत्तो। (वर्षशतम्) पूर्ववत्। आकार, रेफलोप, ष-श को सकार। २ से तकार का लोप। वाससअं। 'र्ह' का कहीं नित्य विकर्ष और इकार, और कहीं नहीं। (अर्हः) अरिहो। (गर्हा) गरिहा। (बर्हिणः) बरिहिणो। कहीं नहीं होगा। जैसे (दशार्हः) २६ से श को स। रेफ के अधःस्थित हकार का कहीं लोप होता है—इससे हकार का लोप हो गया। दसारो। 'प्लोष-प्लुष्ट-स्नायु-श्लोक और विश्लेष शब्दों में युक्त वर्ण का विभाग हो और विभक्त पूर्व वर्ण के साथ इकार हो'। (प्लोषः) २६ से ष को स। पिलोसो। (प्लुष्टः) २८ से ष्ट को ठ। ६ से द्वित्व। ७ से टकार। पिलुट्ठो। (स्नायुः) सकार का विभाग, इकार। २५ से णकार। २ से यलोप। सिणाऊ। (श्लोकः) २६ से श को स। २ से कलोप। सिलोओ। वज्र-शब्द में विकल्प से युक्त का विकर्ष और पूर्व में इकार हो। (वज्रम्) विकर्ष-इकार होने पर 'वजिरम्' हुआ। २ से जलोप। वइरं। पक्ष में-रेफलोप, द्वित्व। वज्जं। पूर्व-शब्द में युक्त का विकर्ष, इकार-योग और वकार को मकार। (पूर्वम्) ५९ से ऊकार को उकार। विकर्ष, मकारयोग, व को म। पुरिमं। पक्ष में-५ से रेफलोप, २ से द्वित्व। पुव्वं ॥ ६२ ॥

नोट—नं. (९) ऋतोऽत्। (२६) शषोः सः। (५८) अदातो यथादिषु वा। (२५) नो णः सर्वत्र। (५) सर्वत्र लवराम्। (१८) पो वः। (६१) वक्रादिषु। (२) कगचजतदपयवां प्रायो लोपः। (३) उपरि लोपः कगडतदपषसाम्। (६)

शेषादेशयोर्द्वित्वमनादौ । (२८) ष्टस्य ठः । (७) वर्गेषु युजः पूर्वः । (५९) उदूतो मधूकादिषु ।

## अः क्ष्माश्लाघयोः ॥ ६३ ॥

**क्ष्मा-श्लाघा इत्येतयोर्युक्तस्य विप्रकर्षो भवति, पूर्वस्य अकारस्तत्स्वरता च भवति । खमा ( ३-२९ क्ष् = ख्, शे० स्प० ) । सलाहा ( २-४३ श् = स्, विप्रकर्षः पूर्वस्याऽत्वं, तत्स्वरता च, २-२७ घ्=ह् ) ॥ ६३ ॥**

अः क्ष्माश्लाघयोः—एतयोर्युक्तस्य विकर्षः स्यात्, पूर्वस्य चाकारः । खमा । सलाहा । 'वा विकर्षो विपर्यासो दीर्घेऽप्यत्वं च पूर्ववत्' । दिहरो, दीहो ॥ ६३ ॥

क्ष्मा और श्लाघा-शब्द में विकर्ष और पूर्व में अकार योग । ( क्ष्मा ) विकर्ष अकार का योग । ३४ से क्ष को ख आदेश । खमा । ( श्लाघा ) २६ से श को स । २३ से घ को हकार । सकार-लकार का विकर्ष, अकार का योग । सलाहा । 'दीर्घ'-शब्द में भी विकल्प से विकर्ष, अकार का योग और वर्णव्यत्यय हो । ( दीर्घः ) विकल्प से विकर्ष और अकार का योग होने से 'दीरघ' हुआ, वर्णव्यत्यय होने से दीघर हुआ । २३ से घ को ह आदेश । वार्तिक में चकारग्रहण से अथवा ३६ से ईकार को इकार । दिहरो । पक्ष में-५ से रेफलोप । २३ से हकार । दीहो ॥ ६३ ॥

## स्नेहे वा ॥ ६४ ॥

**स्नेहशब्दे युक्तस्य विप्रकर्षो वा भवति, पूर्वस्य च अकारस्तत्स्वरता च भवति । सणेहो ( पूर्ववत् विप्रकर्षादिकं, २-४२ न् = ण्, ५-१ ओ ) । णेहो ( ३-१ स्० स्प० ) ॥ ६४ ॥**

स्नेहे वा—अत्र युक्तस्य विकर्षो वा भवति, पूर्वस्य च इकारः । सिणेहो । क्वचित्पूर्वस्य चाकारः, तदा-सणेहो, णेहो ॥ ६४ ॥

स्नेह-शब्द में विकल्प से विकर्ष और पूर्व को अकार । ( स्नेहः ) २५ से णकार । सणेहो । पक्ष में-३ से सलोप । २५ से ण । णेहो । किसी मत से इकार का पूर्व वर्ण के साथ योग होता है, तब-सिणेहो होगा । सूत्र में 'स्निह'शब्द का ग्रहण नहीं करना, किन्तु प्रधानतया धात्वर्थ लेना । अतः 'स्निग्धः' यहाँ स्निह धातु से क्त प्रत्यय के योग होने पर भी हो जायगा । ( स्निग्धः ) ३ से गकार का लोप । ६ से धद्वित्व । ७ से द । २५ से णकार । सिणिद्धो । पक्ष में-पूर्ववत् । णिद्धो ॥ ६४ ॥

नोट—नं. ( ३४ ) ष्कस्कक्षां खः । ( २३ ) खघथधभां हः । ( ३६ ) इदीतः पानीयादिषु । ( ५ ) सर्वत्र लवराम् । ( २५ ) नो णः सर्वत्र । ( ३ ) उपरि लोपः कगडतदपषसाम् । (६) शेषादेशयोर्द्वित्वमनादौ । (७) वर्गेषु युजः पूर्वः ।

## उः पद्मतन्वीसमेषु ॥ ६५ ॥

**पद्मशब्दे तन्वी-इत्येवं समेषु च युक्तस्य विप्रकर्षो भवति, पूर्वस्य च उकारस्तत्स्वरता च भवति । पउमं[1] ( ३-२ प्लोपः, शे० स्प० ) । तणुई**

---

१. ओत्पद्मे ८ । १ । ६१ । तेन, पोम्मं । हे० ।

(२-४२ न् = ण्, उत्वादिपू०, व्लोपश्च)। लहुई (२-२७ घ=ह, शे० पू०)। तन्वी। लघ्वी ॥ ६५ ॥

उः पद्मतन्वीसमेषु—पद्मतुल्येषु तन्वीसदृशेषु च युक्तस्य विकर्षः स्यात् पूर्वस्य च उकारः। 'पद्मघस्मरकश्मीरवेश्मसद्माग्रादयः। समानाः पद्मशब्दस्य प्राकृतज्ञैः प्रकीर्तिताः' ॥ पउमं। घसुमरो। कसुमीरो। वेसुमं। सउमं। अउमरो। 'तन्वी लघ्वी तथाऽशिश्वी मृद्वी पट्वी तथैव च। बह्वी गुर्वी च पृथ्वी च तन्वीतुल्याः स्युरीदृशाः ॥' तणुई। लहुई। असिसुई। मउई। पडुई। बहुई। गरुई। पुहुई ॥ ६५ ॥

पद्म तथा तन्वी के समान शब्दों में युक्त वर्ण का विकर्ष और पूर्व में उकार हो। पद्म, घस्मर-इत्यादिक पद्म-सदृश हैं और तन्वी, लघ्वी, अशिश्वी-इत्यादिक तन्वी-सदृश हैं। ( पद्मम् ) दकार-मकार का विश्लेष। उकारागम। २ से दलोप। पउमं। ( घस्मरः ) विकर्ष, उकार। घसुमरो। ( कश्मीरः ) २६ से श को सकार। कसुमीरो। मतान्तर से स्त्रीलिङ्गप्राकृतत्वात् बहुवचन। कसुमीराः। ( वेश्म ) वेसुमं। ( सद्म ) विकर्ष, उकारागम। २ से दलोप। सउमं। ( अग्ररः ) अउमरो। ये पद्मसदृश दिखाये। तथा प्रचलित प्रयोगानुसार अन्य भी जानना। द्वार शब्द में दकार और वकार का विकल्प से लोप, उकार हो। ( द्वारम् ) वारं, दारं, दुआरं। तन्वी इत्यादि में विकर्ष, उकार। ( तन्वी ) २५ से णकार। २ से वलोप। तणुई। ( लघ्वी ) २३ से घ को ह। लहुई। ( अशिश्वी ) २६ से दोनों श को स। २ से वलोप। असिसुई। ( मृद्वी ) ९ से ऋ को अकार। मउई। ( पट्वी ) पडुई। १९ से ट को ड। ( बह्वी ) बहुई। ( गुर्वी ) 'अन्मुकुटादिषु' से अकार। गरुई। ( पृथ्वी ) १० से ऋ को इकार, पिहुई। मतान्तर से ११ से उ। पुहुई ॥ ६५ ॥

## ज्यायामीत् ॥ ६६ ॥

इति वररुचिविरचिते प्राकृतप्रकाशे तृतीयः परिच्छेदः ॥

**ज्याशब्दे युक्तस्य विप्रकर्षो भवति पूर्वस्य च ईकारस्तत्स्वरता च। जीआ ( २-२ यलोपः )[1] ॥ ६६ ॥**

इति भामहविरचिते प्राकृतप्रकाशे युक्तवर्णविधिर्नाम तृतीयः परिच्छेदः ॥

ज्यायामीत्—ज्याशब्दे विकर्षः, पूर्वस्य चेकारः स्यात्। जीआ। जीवाशब्दादपि जीआ-इत्येव ॥ ६५ ॥

इति श्री म. म. मथुराप्रसादकृतौ चन्द्रिकाख्यव्याख्यायां युक्तवर्णविधिस्तृतीयः परिच्छेदः।

ज्याशब्द के युक्त वर्ण का विश्लेष करके ईकार हो। (ज्या) विश्लेष, ईकार। २ से यलोप। जीआ। एवम्-जीवाशब्द का भी जीआ होगा। (जीवा) २ से वलोप। जीआ ॥ ६६ ॥

नोट—नं. ( २ ) कगचजतदपयवां प्रायो लोपः। ( २६ ) शषोः सः। ( ९ ) ऋतोऽत्। ( १९ ) टो डः। ( १० ) इदृष्यादिषु। ( ११ ) उदृत्वादिषु।

इति श्री म. म. मथुराप्रसादकृतौ प्राकृतप्रकाशस्य प्रदीपटीकायां तृतीयः परिच्छेदः।

---

१. क० पु० 'इवेव' ॥ ६७ ॥ इवशब्दे व इति निपात्यते। प्पाण व्व धनं। अ० पा०।

# अथ चतुर्थः परिच्छेदः

सन्धावचामज्लोपविशेषा[1] बहुलम् ॥ १ ॥

अचामिति प्रत्याहारग्रहणम्। अजिति च। सन्धौ वर्तमानानामचां स्थाने अज्विशेषा लोपविशेषाश्च बहुलं भवन्ति। अज्विशेषास्तावत्-जउणअडं, जउणाअडं (२-३ सूत्रे स्पष्टं जउणा, तटमिति २-२ तूलोपः[2], २-२० ट् = ड्, अत्र बहुलग्रहणात् 'णा' इत्यत्र ह्रस्वत्वं विकल्पेन, ५-३० सोर्बिन्दुः)। णइसोत्तो, णईसोत्तो (२-४२ न् = ण्, २-२ दूलोपः, ह्रस्वविकल्पः पू०, सोत्तो ३-५२ सूत्रे द्रष्टव्यः। अत्र विशेषः ४-१८ पुं०[3])। बहुमुहं, बहूमूहं (२-२७ ख् = ह्, ५-३० बिं०, शे० पू०)। कण्णउरं, कण्णऊरं (३-३ र्लोपः, ३-५० णूद्वि०, २-१ पूलोपः, शे० पू०)। सिरोवेअणा, सिरवेअणा (२-४३ श् = स्, ४-६ सूलोपे अज्विशेष ओ = सिरो इति, वेअणा १-३४ सू० स्प०, शे० पू०)। पीआपीअं, पिआपिअं। सीआसीअं, सिआसिअं (२-२ तूलोपः, शेषं ह्रस्वविकल्पादि पूर्व०)। सवोमुओ (३-३ र्लोपः, ओत्वमकारस्य, २-२७ ख् = ह्, ५-१ ओ)। सवोमूओ (३-३ र्लोपः, २-१५ प् = व्, ओत्वमूत्वे बाहुलकात्, शे० पू०)। सरोरुहं, सररुहं (४-६ सूलोपः, ओत्वविकल्पः, शे० स्प०)। लोपविशेषाः-राउलं, राअउलं (जलोपे विकल्पेनाऽलोपः, २-२ कूलोपः, ५-३० बिं०)। तुहद्धं, तुहअद्धं (६-३१ तव = तुह, विकल्पेन बाहुलकादकारलोपे, ३-३ रकारलोपः, ५-३० बिं०)। महद्धं, महअद्धं (६-५० मम = मह, शे० पू०)। वावडणं, वाअवडणं (२-१५ प्=व्, २-२ दूलोपे बाहुलकाद् विकल्पेन अकारलोपे वापतनमिति जाते, पुनः २-१५ प = व्, वावतन इति जाते, ८-५१ त् = ड्, २-४२ न् = ण्, ५-३० बिं०, अलोपाभावे स्पष्टम्)। कुम्भारो, कुम्भआरो (अनादिग्रहणात् २-२ कूलोपो न, ४-१७ वर्गान्त०, २-२ कलोपे, ४-१ भकारोत्तरवर्त्यकारलोपे, ५-१ ओ, अलोपाभावे स्पष्टम्)। पवणुद्धअं, पवणउद्धअं (प्राय इति वलोपो न, २-४२ न् = ण्, पूर्ववदकारलोपः, पवण् उद्धतमिति जाते, २-२ तूलोपः, ५-३० बिं०, अलोपाभावे पूर्व०)। यमुनातटं, नदीस्रोतस्, बहुमुखं, कर्णपूरं, शिरोवेदना,

---

१. अयं पाठः का० पु० सम्मतः। इतः प्राचीनेषु अज्रूपविशेषा इति पाठः। २. वृत्त्यवयमनादिरेव गृह्यते। ३. ३-५२ सूत्रे तु व्यत्ययेन नपुंसकत्वम्।

**पीतापीतं, सीतासीतं ( शीताशीतं ), सर्वमुखः ( सर्पमुखः ), सरोरुहं, राजकुलं, तवार्द्धं, ममार्द्धं, पादपतनं, कुम्भकारः, पवनोद्धतम्। संयोगपरे सर्वत्र पूर्वस्याचो लोपः, [ ह्रस्वश्च । यथा-णत्थि, सकङ्कन्ती, णिकङ्कन्तो, अत्तो-इत्यादयः ] ( [1]स्पष्टाः )। क्वचिन्नित्यं, क्वचिदन्यदेव बहुलग्रहणात्। तेनान्यदपि लाक्षणिकं कार्यं भवति ॥ १ ॥**

सन्धावचामड्[2]लोपविशेषा बहुलम्—अचां सन्धौ कर्तव्ये अच्-विशेषो लोपविशेषश्च बहुलं स्यात्। बहुलग्रहणात् विभिन्नानि कार्याणि भवन्ति ।

क्वचित्प्रवृत्तिः, क्वचिदप्रवृत्तिः, क्वचिद् विभाषा, क्वचिदन्यदेव ।
विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति ॥ १ ॥

तच्च महाकविप्रयोगानुसारेण लोकव्यवहृतशब्दानुसारेण च संस्कृतशब्देषु स्वयं कल्पनीयम्। यतो हि पाणिनीयानां छायावाहीनि खलु प्राकृतसूत्राणि। अचां सन्धौ अज्-विशेषास्तावत्-राएसी, राअइसी। वासेसी, वासइसी। कण्णेरो, कण्णऊरो। चक्काओ, चक्कवाओ। कुंभारो, कुंभआरो। अंधारो, अंधआरो। ममवि, ममावि। केणवि, केणावि। क्वचिद्दीर्घविकल्पः-वारीमई, वारिमई। वईमूलं, वइमूलं। वेणूवणं, वेणुवणं। क्वचिद्वा ह्रस्वः-जउणअडं, जउणाअडं। णइसोत्तो, णईसोत्तो। बहुमुहं, बहूमुहं। क्वचिद्वा ओकारस्य अत्वम्-सररुहं, सरोरुहं। मणहरं, मणोहरं। सिरविअणा, सिरोविअणा। क्वचिन्नैव ओकारस्य अत्वम्-मणोरहो। मणोहओ। अथ लोपविशेषाः—क्वचित् पूर्वपदान्तस्य अकारस्य वा लोपः। राउलं, राअउलं। पापडणं, पाअपडणं। पापीढं, पाअपीढं। क्वचिद् हल्परत्वेऽपि अचो नित्यमादिलोपः-एत्थ, त्थ। तुम्हे त्थ, अम्हे त्थ। बम्हणो त्थ चिट्ठइ। प्रायः एङः परत्वे एव एवं लोपः। नेह-हरी एत्थ चिट्ठइ। अच्परत्वेऽपि क्वचिन्नित्यं लोपः। राइंदो। मइंदो। उविंदो। दीवुज्जलो। मअरंदुज्जाणं। पमदुज्जाणं। महूसवो। तुह त्ति। मह त्ति। गओ त्ति। सुओ त्ति। इओ त्ति। क्वचिद् यष्टिशब्दस्य वा लकारलोपः। चम्मट्ठी। चम्मलट्ठी। क्वचिन्न-असिलट्ठी। बहुलग्रहणात् क्वचिन्न सन्धिः। मुहअंदो। परिअरो। उवआरो। पईवो। दुराआरो। विआलो-इत्यादि। परोप्परं। अन्तेउरं। तेरह। तेवीस। तेत्तीसा। पुणो, पुणा, पुण-इत्यादि ॥ १ ॥

**अचों की सन्धि होने पर कहीं दोनों अच् मिलकर अज्-विशेष अर्थात् तीसरा ही अच् ( स्वर ) हो जाता है। सूत्र में अड्लोप० पाठ है, वह 'चर्मयष्टि' में यकारलोप के ग्रहणार्थ है। अट्-प्रत्याहार में अच् आ जाते हैं। विभिन्न प्रकार के आदेश आदि बहुलपदग्रहण से जानना। क्योंकि बहुलपद का अर्थ ही यह है कि 'कहीं सूत्र की उचित प्रकार से प्रवृत्ति हो और कहीं सूत्र प्रवृत्त होते हुए भी अप्रवृत्त रहे, अर्थात् कुछ भी कार्य न करे। कहीं विकल्प और कहीं अन्य ही कार्य कर दे'। इस तरह अनेक कार्यों के करने का प्रकार विचार कर चार प्रकार का बहुल-जन्य कार्य माना**

---

१. [ ] एतत्कोष्ठकान्तर्गतः पाठो न सार्वत्रिकः। २. एष पाठः संजीवन्यादिसंमतः।

है। इन चार प्रकारों में सबका अन्तर्भाव हो जाता है। वह बहुल-जन्य कार्य महाकवियों के प्रयोग से अथवा लोक-व्यवहृत-शब्दानुसार संस्कृत शब्दों में स्वयं कल्पना कर लेना। क्योंकि प्राकृतसूत्र पाणिनीय प्रयोगों का ही अनुसरण करते हैं।

अच्-विशेष—(राज ऋषिः) २ से जलोप। १० से इकार।२६ से ष को स। अ + इ मिलकर एकार। राएसी। पक्ष में–राअइसी। ( व्यास ऋषिः ) ४ से यलोप। वासेसी, वासइसी। ( कर्णपूरः ) ५ से रेफलोप। ६ से द्वित्व। २ से वलोप। अ+ऊ मिल कर एकार। कण्णेरो, कण्णऊरो। पूर्ववत्-( चक्रवाकः ) चक्काओ, प्रायग्रहण से वलोप। नहीं तो चक्कवाओ। एवम्, ( कुम्भकारः ) कुंभारो, कुंभआरो। ( अन्धकारः ) अंधारो, अंधआरो। ( मम अपि) पूर्व के साथ दीर्घ। ममावि। अकार का लोप, ममवि। १८ से प को व। एवम्—( केन अपि ) २५ से न को ण। केणावि, केणवि। कहीं पूर्व स्वर को विकल्प से दीर्घ हो। ( वारिमयी ) ४ से यलोप, वारीमई। पक्ष में वारिमई। एवम्—( वृत्तिमूलम् ) ३ से दोनों तकारों का लोप। ९ से ऋ को अकार। ३५ प्रकृत से विकल्प से इकार को दीर्घ। वईमूलं, वइमूलं। अथवा ( वृत्तिमूलम् ) का पूर्ववत् साधुत्व। ( वेणुवनम् ) २५ से न को ण। विकल्प से दीर्घ। वेणूवणं, वेणुवणं। कहीं पर विकल्प से ह्रस्व होगा। ( यमुनातटम् ) २४ से य को ज। 'यमुनायां यस्य' से मकारलोप। २५ से न को ण। २ से तकारलोप। १९ से ट को ड। ३५ से विकल्प से ह्रस्व। जउणअडं। जउणाअडं। एवम् ( नदीस्रोतः ) ५ से रेफलोप। ४१ से तद्वित्व। ३५ से विकल्प से ह्रस्व। णइसोत्तो, णईसोत्तो। ( वधूमुखम् ) २३ से ध और ख को हकार। ३५ से विकल्प से ह्रस्व। बहुमुहं, बहूमुहं। कहीं ओकार को विकल्प से अकार। ( सरोरुहम् ) सररुहं, सरोरुहं। ( मनोहरम् ) मणहरं, मणोहरं। ( शिरोवेदना ) सकार, दलोप, ण आदेश पूर्ववत्। 'एत इद०' ( १+३५ ) से ए को इकार। प्रकृत सूत्र से ओ को अकार। सिरविअणा, सिरोविअणा। कहीं ओकार को अकारादेश नहीं होगा। ( मनोरथः ) मणोरहो। ( मनोभवः ) मणोहओ। उक्त सूत्र से हकार।

लोपविशेष—कहीं पदान्तस्थ पूर्व अकार का विकल्प से लोप हो। ( राजकुलम् ) २ से ज और क का लोप। प्रकृत से अकार का लोप। राउलं। राअउलं। ( पादपतनम् ) पापडणं, पाअपडणं। (पादपीठम् ) 'ठो ढः' से ठ को ढ। पापीढं, पाअपीढं। कहीं हल् पर होने पर भी, आदिस्थ अच् का नित्य लोप हो। एत्थ के एकार का लोप होगा। तुम्हे, अम्हे का साधुत्व पञ्चमपरिच्छेद में है। ( यूयमत्र ) तुम्हे एत्थ, तुम्हेत्थ। अम्हे एत्थ, अम्हेत्थ। ( ब्राह्मणः+अत्र ) बम्हणोत्थ। प्रायः एङ् से पर अकार का लोप होता है। यहाँ नहीं होगा–(हरिः+अत्र) हरी एत्थ। कहीं अच् परे होने पर भी नित्य अकार का लोप होता है। ( गज+इन्द्रः ) २ से जलोप। ५ से रेफलोप। नित्य अकार का लोप। गइंदो। ( मृग+इन्द्रः ) ९ से ऋ को अकार। पूर्ववत् रेफ-गकार का लोप। नित्य अकार का लोप। मइन्दो। ( उप+इन्द्रः ) १८ से प को व। अलोप। उविंदो। (दीप+उज्वलः) ५ से व लोप। ६ से जद्वित्व। प को व। अकारलोप। दीवुज्जलो। ( मकरंद+उद्यानम् ) २ से कलोप। ३२ से द्य को ज आदेश। ६ से द्वित्व। अकारलोप। मअरंदुज्जाणं। ( प्रमदा+उद्यानम् ) ५ से रेफलोप। अन्य कार्य पूर्ववत्। पमदुज्जाणं। ( महा+उत्सवः ) आकारलोप। महूसवो। उत्सवशब्द के

उकार को 'इदूतौ' वार्तिक की इष्टि से ऊकार। (तव+इति) तुह इति, प्रकृत सूत्र से इकारलोप। ४१ तकारद्वित्व। तुहत्ति। (मम इति) मह इति। महत्ति। (गतः इति) गओत्ति। (श्रुतः इति) सुओत्ति। (दयितः इति) दइओत्ति। २+५+२६ से रूपसिद्धि हो जायगी। ४२ से सर्वत्र ओकार। कहीं पर यष्टि शब्द के लकार का विकल्प से लोप हो। (चर्मयष्टिः) ५ से रेफलोप। ६ से द्वित्व। 'यष्ट्यां लः' २+२९ से लकार। २८ से ठ। ६ से द्वित्व। ७ से टकार। विकल्प से प्रकृत सूत्र से लकार का लोप। चम्मट्ठी, चम्मलट्ठी। कहीं यष्टि के लकार का लोप नहीं होगा। जैसे—(असियष्टिः) असिलट्ठी। कहीं पर बहुल ग्रहण से सन्धि ही न होगी। (मुखचन्द्रः) मुहअंदो। (परिकरः) परिअरो। (उपकारः) उवआरो। (प्रदीपः) पईवो। (दुराचारः) दुराआरो। (विकालः) विआलो। सर्वत्र पूर्वोक्त (२३+२+५+१८) नम्बर के सूत्रों से सिद्धि जानना। (परस्परम्) इत्यादिक शब्दों में कहीं सकार का और कहीं पकार का लोप होता है। तो परस्पर शब्द के सकार का लोप। ६ से पकारद्वित्व। ३५ प्रकृत सूत्र से ओकार। परोप्परं। (अन्तः पुरम्) २ से पकार का लोप। प्रकृत सूत्र से विसर्गसहित अकार को एकार। अन्तेउरं। (त्रयोदश) तेरह। (२+१४) द्वितीय अध्याय चौदहवें सूत्र में साधुत्व है। (त्रयोविंशतिः) ५ से रफलोप। 'मांसादिषु' (४+१६) सूत्र से अनुस्वार का लोप। 'आदीदूतौ' से ईकार। ३१ से एकार। ३५ प्रकृत सूत्र से ति को आकार। तेवीसा। (त्रयस्त्रिंशत्) ५ से रेफलोप। ३१ से एकार। 'मांसादि' से अनुस्वारलोप। ३५ प्रकृत सूत्र में 'लोपः साचो यकारस्य' से यकार का लोप। 'आदीदूतौ' वार्तिक से ति के इकार को ईकार। ६ से 'त्रिंशत्' के तकार को द्वित्व। 'तेत्तीशत्' इस अवस्था में २६ से श को स आदेश। ६० से तकार का लोप। 'स्त्रियामात्' से आकार। तेत्तीसा। कहीं एक पद में भी भिन्न-भिन्न आदेश होते हैं। (पुनः) २५ से न को ण आदेश। प्रकृत सूत्र से कहीं ओकार, पुणो। कहीं आकार, पुणा। कहीं विसर्ग का लोप, पुण। ये सब आदेश बहुल-ग्रहण से कल्पना कर लेना। तथा महाकविप्रयुक्त अथवा लोकव्यवहृत शब्दों में संस्कृतानुगामी शब्द की कल्पना करके आदेश-विशेष की कल्पना कर लेना। क्योंकि समस्त प्राकृत वाङ्मय के संस्कृत शब्द ही जनक अथवा माता हैं। म्लेच्छादिक देशों में स्वरूप अधिक बिगड़ गया है। परन्तु वे भी संस्कृत शब्द से जन्य हैं। इति ॥१॥

नोट—नं० (२) कगचजतदपयवां प्रायो लोपः। (१०) इदृष्यादिषु। (२६) शषोः सः। (४) अधो मनयाम्। (५) सर्वत्र लवराम्। (६) दोषादेशयोर्द्वित्वमनादौ। (१८) पो वः। (२५) नो णः सर्वत्र। (९) ऋतोऽत्। (३५) सन्धावचामज्लोपविशेषा बहुलम्। (२४) आदेर्यो जः। (१९) टो डः। (४१) नीडादिषु। (२३) खघथधभां हः। (३२) स्तय्ययां चछजाः। (४२) अत ओत् सोः। (२८) ष्टस्य ठः। (७) वर्गेषु युजः पूर्वः। (३१) ए शय्यादिषु। (६०) अन्त्यस्य हलः।

## उदुम्बरे दोर्लोपः ॥ २ ॥

उदुम्बरशब्दे दु इत्येतस्य लोपो भवति। उम्बरं (४-१७ वर्गान्तः, ५-३० सोर्बिन्दुः) ॥ २ ॥

उदुम्बरे दोर्वा[1] लोपः—उदुम्बरशब्दे दु इत्यस्य वा लोपः स्यात् । उम्बरं । उउम्बरं ॥ २ ॥

( उदुम्बर इति )। उदुम्बरशब्द में 'दु' का विकल्प से लोप हो। ( उदुम्बरम् ) दु का लोप हो जाने से उम्बरं। पक्ष में-२ से दकार का लोप हो जाने से उउम्बरं ॥२॥

## कालायसे यस्य वा ॥ ३ ॥

**कालायसशब्दे यस्य वा लोपो भवति । कालासं, कालाअसं। ( स्प० ) ॥ ३ ॥**

कालायसे यस्य[2]—कालायसशब्दे साचो यकारस्य वा लोपः स्यात् । कालासं, कालाअसं। 'लोपः साचो यकारस्य 'क्वचिन्नित्यं क्वचिन्न वा'। तेत्तीसा। सहिओ, सहिअओ। किसलं, किसलअं। ओसो, ओआसो ( अवश्यायः )। कइवं, कइवअं। सुहाइ, सुहाअइ। धूमाइ, धूमाअइ ॥ ३ ॥

( कालायसे इति )। कालायसशब्द में अच्-सहित यकार का लोप हो। ( कालायसम् ) अकारसहित यकार का लोप हो गया। कालासं। पक्ष में-२ से यलोप। कालाअसं। कहीं पर अच्सहित यकार का नित्य लोप हो और कहीं नहीं हो अथवा हो, अर्थात् विकल्प से लोप हो। ( त्रयस्त्रिंशत् ) ५ से रेफलोप। 'लोपः साचो यकारस्य' इससे अकार-विसर्ग-सहित यकारलोप। ३१ से एकार अथवा ३५ से अकार-विसर्ग-सहित को एकार। त्रिंशत् के रेफ का ५ से लोप, ६ से तद्वित्व। ३५ से अनुस्वार का लोप। २६ से श को स। ६० से अन्त्य हल् का लोप। ३६ से आकार। तेत्तीसा। ( सहृदयः ) विकल्प से यकारलोप। २ से दकारलोप। १० से ऋकार को इकार। ४२ से ओकार। सहिओ। पक्ष में-सहिअओ। ( किसलयम् ) यलोप। किसलं। पक्षे—किसलअं। ( अवश्यायः ) 'ओदवापयोः' ( ४+२० ) से ओकार। 'लोपः साचो' से यलोप। ४ से श्या-गत यकार का लोप। 'सेवादिषु वा' (५+९) से ६ से प्राप्त द्वित्व का निषेध। २६ से श को सकार। पूर्ववत् ओकार। ओसो। पक्ष में-अवसाओ। पूर्ववत् श को स। यकारलोप। ( कतिपयम् ) १८ से प को वकार। २ से तकारलोप। उक्त से अच्-सहित यकार का लोप। कइवं। पक्ष में-कइवअं। ( सुखायते ) २३ से ख को ह। यलोप। 'ततिपोरिदेतौ' इससे इकार। २ से तलोप। सुहाइ। पक्ष में-सुहाअइ। एवम्-( धूमायते ) धूमाइ, धूमाअइ ॥ ३ ॥

## भाजने जस्य ॥ ४ ॥

**भाजनशब्दे[3] जकारस्य लोपो वा भवति। भाणं, भाअणं ( २-४२ न् = ण, ५-३० बिं०, पक्षे २-२ सूत्रेण केवलजकारलोपो भवति ) ॥ ४ ॥**

भाजने जस्य—अत्र साचो जकारस्य वा लोपः। भाणं, भाअणं ॥ ४ ॥

( भाजने इति )। भाजनशब्द के जकार का विकल्प से लोप हो। २५ से न को ण। भाणं। पक्ष में-२ से जकार-लोप। भाअणं ॥ ४ ॥

---

१. वा-इति नास्ति भामहे। २. वा-इत्यधिकं भामहे।

३. सस्वरस्य लोपो ज्ञेयः। हेमस्तु ८। १। २६७ सूत्रे सस्वरस्येति पठत्येव।

## यावदादिषु वस्य ॥ ५ ॥

**यावदित्येवमादिषु [1]वकारस्य वा लोपो भवति । जा, जावता । ता, तावता । (२-३१ य् = ज्, ४-६ तलोपः, पक्षे-स्प०) । पाराओ, पारावओ ( २-२ त्लोपः, ५-१ ओ, पक्षे-स्प० ) । अणुत्तन्त, अणुवत्तन्त ( २-४२ न् = ण्, वलोपे, ३-३ रलोपः, ३-५० त्द्वि, ७-१० मान = न्त, वलोपाभावे स्प० ) । जीअं, जीविअं ( २-२ त्लोपः, ५-३० बिं०, शे० स्पष्टम् ) । एअं, एव्वं (३-५८ वद्वित्वं, ५-३० बिं०) । एअ, एव्व ( ३-५८ व्द्वि० ) । कुअलअं, कुवलअं[2] । ( विकल्पेन स्वररहितवलोपे २-२ य्लोपः, ५-३० बिं० ) । यावत्, तावत्, पारावतः, अनुवर्तमानं, जीवितं, एवम्, एव, कुवलयम्-इत्येवमादयः ॥ ५ ॥**

**यावदादिषु वस्य**—एषु साचो वकारस्य वा लोपः स्यात् । एषु सर्वत्र 'कगचजे'-त्यादिना लोपे सिद्धे साचो ग्रहणार्थं सूत्रचतुष्टयम् । या, याव । ता, ताव ।

यावत्तावज्जीवितदेवकुलावर्तमानशब्दा ये ।
प्रावरक एवमेव स्कन्धावारो यावदादयो ह्येवम् ॥ ५ ॥

यावदादिक-शब्दों में अच्-सहित वकार का लोप हो । ६० से तकारलोप । ( यावत् ) या । पक्ष में-याव । ( तावत् ) ता, ताव । ( जीवितम् ) २ से तलोप । जीअं, पक्ष में-जीविअं । ( देवकुलम् ) देउलं, देवउलं । ( आवर्तः ) वकार का लोप । ५८ से आकार को अकार । ३० से र्त को ट । ६ से द्वित्व । अट्टं । पक्ष में-आअट्टं । ( प्रावारकः ) ५ से रेफलोप । यावदादि से वा का लोप । २ से ककार का लोप । पारओ । पक्ष में-पाआरओ । ( एवमेव ) वलोप । एमेअ । पक्ष में-एअमेअ । ( स्कन्धावारः ) ३४ से 'स्क' को ख । खन्धारो । पक्ष में-खन्धाआरो । कई विद्वान् चक्रवाक शब्द को भी यावदादिगण में मानते हैं । ( चक्रवाकः ) चक्काओ । यह उदाहरण देते हैं । परन्तु चक्रवाक शब्द में आकार-सहित वकार का लोप करने पर 'चक्कओ' होगा । अतः ( चक्रवाकः ) २ से वलोप । ५ से रेफलोप । ६ से द्वित्व । 'सन्धावचां' ३५ से अकार को विकल्प से दीर्घ । चक्काओ । पक्ष में-चक्कवाओ ॥ ५ ॥

## अन्त्यहलः ॥ ६ ॥

**वेति निवृत्तम् । शब्दानां योऽन्त्यो हल् तस्य लोपो भवति । जसो ( २-३१ य् = ज्, २-४३ श् = स्, ४-१८ पुंस्त्वं, ५-१ ओ ) । णहं ( २-४२ न् = ण्, ४-१९ पुंस्त्वाभावः, ५-३० बिं० ) । सरो ( जसोवत् ) । कम्मो ( ३-३ रलोपः, ३-५० मद्वि०, शे० पू० ) । जाव, ताव ( ४-५ सू० द्रष्टव्यम् ) । यशः, नभः, सरः, कर्म, यावत्, तावत् ॥ ६ ॥**

---

१. सस्वरवलोपः, क्वचिद्वाडुलकात्स्वररहितस्याऽपि । २. क० पु० चक्काओ, चक्कवाओ । देउलं, देवउलं । अ० पा० ।

अन्त्यस्य हलः—प्रादिपदिकसम्बन्धिनोऽन्त्यस्य, सुप्रत्ययसम्बन्धिनश्च हलो लोपः स्यात्। कम्मो। चम्मो। जसो। णमो। एसो। धणू। रमा। पाणी। धेणू। 'क्वापि लोपानुबन्धस्य बुधा वाञ्छन्त्यदन्तताम्'। सक्खिणो। पक्षे-सक्खी॥ ६॥

प्रातिपदिकसंज्ञक शब्द के अन्त्य हल् का तथा प्रातिपदिक से पर सु-प्रत्यय के हल् का लोप हो। (कर्मन्) ५ से रेफलोप। ६ से द्वित्व। प्रकृत से अन्त्य हल् नकार का लोप। 'नसन्तप्रावृट्०' (४+१८) से पुंल्लिङ्ग। ४२ से ओकार। कम्मो। एवम्-चम्मो। (यशस्) अन्त्य सकार का लोप। २४ से यकार को जकार। २६ से श को स। पूर्ववत् पुंलिङ्ग। जसो। (नमस्) २५ से न को ण। अन्य कार्य पूर्ववत्। णमो। (धनुष्) धणू। (एषः) 'तदेतदोः०' (५+६८) से तकार को सकार। अन्त्य का और सुप्रत्यय का लोप। ४२ से ओकार। एसो। (रमा) प्रातिपदिक से पर सु का लोप। रमा। (पाणिः) पाणी। (धेनुः) प्रातिपदिक से पर सु-प्रत्यय का लोप। ५२ से पाणि में इकार को धेनु में उकार को दीर्घ। धेणू। कहीं लोपानुबन्धी को अर्थात् हलन्त को विकल्प से अदन्त कर देते हैं। जैसे—(साक्षिन्) नकारान्त का अदन्त हो गया। ३४ से क्ष को ख आदेश। ६ से द्वित्व। ७ से क। २५ से न को ण। ४२ से ओकार। ५८ से ह्रस्व। सक्खिणो। पक्ष में-सक्खी। साधुत्व पूर्ववत्॥ ६॥

## स्त्रियामात्॥ ७॥

स्त्रियां वर्त्तमानस्यान्त्यहल आकारो भवति। सरिआ (स्पष्टम्)। पडिवआ (१-२ सू० स्प०)। वाआ (स्प०)। सरित्, प्रतिपद्, वाक्॥७॥

स्त्रियामात्—स्त्रियां प्रातिपदिकस्यान्त्यस्य हल आत्वं स्यात्। संपआ। एआवआ। सरिआ। वाआ। एआवई[1]॥ ७॥

स्त्रीलिङ्ग में हलन्त प्रातिपदिक को आकार हो। (संपत्) त् को आकार हो गया। संपआ। (सरित्) सरिआ। (वाच्) वाआ। एतावत्-शब्द में एतावती के स्थान पर 'एआवआ'-जो वसन्तराज जी ने माना है, वह अव्यवहार्य है। वस्तुतः जिन शब्दों में भागुरि के मत से हलन्त से आप् होता है वहीं आकारयुक्त है। क्या लिह्, गोदुह्, पुंस् आदि में भी आकार होगा? कभी नहीं, वस्तुतः भागुरि-प्रसिद्ध, काव्यादि में व्यवहृत शब्दों में आप् मानते हैं, अतः एतावती में आकार नहीं होगा, किंतु 'एआवई' होगा॥ ७॥

नोट--नं० (२) कगचजतदपयवां प्रायो लोपः। (५) सर्वत्र लवराम्। (३१) ए शय्यादिषु। (३५) सन्धौ अज्लोपविशेषा बहुलम्। (६) शेषादेशयोर्द्वित्वमनादौ। (२६) शषोः सः। (६०) अन्त्यस्य हलः। (३६) स्त्रियामात्। (१०) इदृष्यादिषु। (४२) अत ओत् सोः। (४) अधो मनयाम्। (१८) पो वः। (२३) खघथधभां हः। (२५) नो णः सर्वत्र। (६०) अदातो यथादिषु वा। (२०) तस्य टः। (३४) ष्कस्कक्षां खः। (२४) आदेर्यो जः। (५२) सुभिसुप्सु दीर्घः। (७) वर्गेषु युजः पूर्वः।

## रो रा॥ ८॥

---

१. संजीवनीसम्मतः पाठः।

स्त्रियामन्त्यस्य हलो रेफस्य रा इत्ययमादेशो भवति। धुरा, गिरा। (स्प०)॥ ८॥

रो रा—स्त्रियां वर्तमानस्य रेफान्तस्यान्त्यस्य रा भवति। गिरा। पुरा। धुरा। 'बहिःशब्दे हलोऽन्त्यस्य रेफादेशो विभाषया'। बाहिरं। बही॥ ८॥

रेफान्त स्त्रीलिङ्ग शब्द के अन्त्य रेफ को रा हो। (गिर्) गिरा। (पुर्) पुरा। (धुर्) धुरा। बहिः शब्द में अन्त्य हल् रेफ को सस्वर रेफ विकल्प से हो। (बहिः) अन्त्य र् को सस्वर रेफ हो गया। ६७ से बकाराकार को आकार हो गया। बाहिरं। पक्ष में-६० से अन्त्यलोप। ५२ से दीर्घ। बही॥ ८॥

## न विद्युति॥ ९॥

विद्युच्छब्दे आकारो न भवति। विज्जू (३-२७ द्य्=ज्, ४-६ त्लोपः, ३-५० जद्वि०, ५-१८ दीर्घः)। विद्युत्॥ ९॥

न विद्युति[1]—विद्युति अन्त्यस्य हल आकारो न स्यात्। विज्जू॥ ९॥

विद्युत्-शब्द में अन्त्य हल् को आकार न हो। (विद्युत्) ३२ से द्य को जकारादेश। ६० से तकारलोप। ६ से अकारद्वित्व। ५२ से उकार को दीर्घ। विज्ज॥ ९॥

## (क्षुधो हः।)

क्षुधो हः[2]—क्षुधाशब्देऽन्त्यस्य हः स्यात्। छुहा। 'भागुरिमतेन प्रयोगानुसृत्या आपि कृते 'कगचजे'ति लोपे, 'खघथधे'ति हकारे, इयं सूत्रचतुष्टयी मन्दप्रयोजना॥

क्षुध्-शब्द के अन्त्य ध को ह हो। (क्षुध्) ध को ह आदेश। ६८ से छकरादेश। छुहा। यदि भागुरिमतानुसार प्रयोगानुकूल हलन्त से आप्-प्रत्यय मान लें तो ये चारों सूत्र निष्प्रयोजन हैं। आ प्रत्यय करने पर वाचा आदि में २ से, छुहा में २३ से सर्व प्रयोग सिद्ध हो जायेंगे॥

## शरदो दः॥ १०॥

शरच्छब्दस्यान्त्यहलो दो भवति। सरदो[3] (२-४३ श्=स्, ४-१८ पुं०, ५-१ ओ)॥ १०॥

शरदोऽत्[4]—शरच्छब्देऽन्त्यस्य अः स्यात्। सरओ॥ १०॥

शरद् शब्द में अन्त्य द् को आकार हो। (शरद्) द् को अकारादेश। 'नसन्त०' से पुँल्लिङ्ग। ४२ से ओकार। २६ से शकार को सकार। सरओ॥ १०॥

## दिक्प्रावृषोः सः॥ ११॥

दिक्छब्दस्यान्त्यहलः प्रावृट्शब्दस्यापि सकारो भवति। दिसा[5] (स्प०)। पाउसो (१-३० सू० स्प०)॥ ११॥

---

१. संजीवन्यां प्रथमं 'न विद्युति' इति सूत्रं, ततः 'रो रा' इति। एवं पाठक्रमोऽस्ति।

२. भामहे सूत्रमिदं नास्ति ३. 'शरदादेरत्' ८।१।१८ सरओ, शरद्। भिसओ, भिषक्। 'क्षुधो हा' ८।१।१७ छुहा, क्षुत्। हे०। ४. संजीवनीसंमतः पाठः। ५. आपि कृते दिशाशब्दः प्रकृतिः। क्वचिद् दिशा, प्रावृड् इति संस्कृतदर्शनात्।

दिक्प्रावृषोः सः—एतयोरन्त्यस्य सः स्यात्। दिसा। पाउसो। 'आयुरप्सरसोः सो वा हलोऽन्त्यस्य विधीयते'। दीहाउसो, दीहाऊ। अच्छरसा, अच्छरा ॥११॥

दिश्, प्रावृष् शब्द के अन्त्य हल् को सकारादेश हो। (दिश्) दिसा। (प्रावृष्) ष को सकारादेश। ५ से रेफ का और वकार का लोप। ११ से ऋ को उकार। 'नसन्त प्रावृट्०' (४+१८) से पुंलिङ्ग। ४२ से ओकार। पाउसो। 'आयुस् और अप्सरस् शब्द के अन्त्य हल् को सकारादेश हो। (दीर्घायुष्) ५ से रेफलोप। २३ से हकारादेश। ४ से यलोप। पूर्ववत् पुंस्त्व, ओत्व। दीहाउसो। पक्ष में–६० से अन्त्यलोप। ४२ से दीर्घ। दीहाऊ। (अप्सरस्) ६४ से प्स को छकार। ६ से द्वित्व। ७ से चकार। अच्छरसा। पक्ष में–५४ से आकार। अन्य कार्य पूर्ववत्। अच्छरा ॥११॥

नोट– नं० (३२) त्यथ्यद्यां चछजाः। (६०) अन्त्यस्य हलः। (६) शेषादेशयोर्द्वित्वमनादौ। (५२) सुभिसुप्सु दीर्घः। (६७) आ समृद्ध्यादिषु वा। (२) कगचजतदपयवां प्रायो लोपः। (२३) खघथधभां हः। (६८) अध्यादिषु। (४२) अत ओत्सोः। (२६) शषोः सः। (५) सर्वत्र लवराम्। (११) उदृत्वादिषु। (४) अधो मनयाम्। (६४) श्चत्सप्सां छः। (७) वर्गेषु युजः पूर्वः। (५४) आदीतौ बहुलम्।

## मो बिन्दुः ॥ १२ ॥

अन्त्यस्य हलो मकारस्य बिन्दुर्भवति। अच्छं (४–२० विकल्पेन पुंसि अमि, ५–३ अमोऽकारस्य लोपः, शे० ३–३० सू० स्प०)। वच्छं (स्प०)। भद्दं (३–३ र्लोपः, ३–५० द्वि०, शे० पू०)। अग्गि (३–२ नलोपः, ३–५० गद्वि०, शे० पू०)। दट्ठं (३–१० ष्ट्=ठ्, ३–५० ठद्वि०, ३–५१ ठ्=ट्, शे० पू०)। वणं। धणं[1] (२–४२ न्=ण्, शे० पू०) ॥ १२ ॥

## अचि मश्च ॥ १३ ॥

अचि परतो मो[2] भवति वा। फलमवहरइ, फलं अवहरइ (स्प०)[3] ॥

मो बिन्दुरचि वाऽलोपश्च[4]—चकारग्रहणादत्र त्रिसूत्री कल्प्यते। मो बिन्दुः (१)। मस्य बिन्दुः स्यात्। किं। एदं। कहं। तुण्हिं। अचि वा (२)। अचि परतः अन्त्यस्य मस्य वा अनुस्वारः स्यात्। पढमवहरइ, पडं अवहरइ। रसमुवणेइ, रसं उवणेइ। अलोपश्च (३)। अन्त्यस्य हलो मस्य लोपो न भवति। किम् इणमो। फलम् एरिसं। अहम् एसो। सच्चम् इणं ॥ १२–१३ ॥

इस सूत्र में 'लोपश्च' यहाँ चकारग्रहण है, इससे भिन्न-भिन्न तीन कार्यों की कल्पना होगी। 'मो बिन्दुः' १। म को बिन्दु हो। (किम्) किं। (एतम्) उक्त से म को अनुस्वार। एदं। (कथम्) उक्त से बिन्दु। २३ से थ को ह। कहं। (तूष्णीम्) ५९ से ऊकार को उकार। २६ से ईकार को इकार। 'ह्नस्ष्ण०' (३+३३) से ष्ण को ण्ह। अनु-

१. अक्षः, वत्सः, भद्रम्, अग्निः, दष्टः, वनं, धनम्। २. क० पु० बिन्दुः पा०। ३. फलमपहरति। ४. संजीवनीसंमतः पाठ एषः। 'मो बिन्दुः,' 'अचि मश्च'–इति सूत्रद्वयमत्र भामहे।

स्वार। तुण्हिं। 'अचि वा' २। अच् के परे अन्त्य मकार को अनुस्वार विकल्प से हो। (पटम् अपहरति) १९ से ट को ड। १८ से प को वकार। २ से तकारलोप। पडमवहरइ। पक्ष में-पडं अवहरइ। एवम्-( रसम् उपनयति ) २५ से न को ण। रसमुवणेइ, रसं उवणेइ। जिस पक्ष में मकार को अनुस्वार नहीं हुआ, किंतु मकार रहा, वहाँ ६० 'अन्त्यस्य हलः' से लोप प्राप्त था, नहीं होगा। किम् इणमो। फलम् एरिसं। अहम् एसो। सच्चम् इणं-इत्यादि॥ १३॥

## नञोर्हलि ॥ १४ ॥

**नकारञकारयोर्हलि परतो बिन्दुर्भवति मकारश्च। नस्य-अंसो, अम्सो ( ५-१ ओ, शे० स्प० )। कंसो, कम्सो। ञस्य-वंचणीअं, वम्-चणीअं ( २-४२ न् = ण्, २-२ य्लोपः, ५-३० बिं०, शे० स्प० )। विंझो, विम्झो[1] ( ३-२८ ध्य् = झ्, न्कारस्य बिन्दौ मकारे च ३-५६ सूत्रेण द्वित्वादिबाधः )॥ १४॥**

नङो[2]र्हलि—नकारङकारयोर्हलि बिन्दुः स्यात्। संझा। वंझा। पंती। संकरो॥

नकार और ङकार को हल् के परे अनुस्वार हो। ( सन्ध्या ) ३३ से ध्य को झ आदेश। संझा। ( वन्ध्या ) बंझा। ( पङ्क्तिः ) २ से ककारलोप। ५२ से इकारदीर्घ। पंती। ( शङ्करः ) २६ से श को स। ४२ से ओकार। संकरो॥ १४॥

## वक्रादिषु ॥ १५ ॥

**वक्रादिषु शब्देषु बिन्दुरागमो भवति। वंकं ( ३-३ र्लोपः, ५-३० बिं० )। तंसं ( ३-३ रकारयोर्लोपः, ३-२ य्लोपः, शे० स्प० )। हंसो ( ३-३ रेफलोपः व्लोपश्च, ५-१ ओ )। अंसू ( ३-३ र्लोपः, २-४३ श् = स्, ५-१८ उदीर्घः )। मंसू ( ३-६ श्लोपः, २-४३ श् = स् ३-३ र्लोपः, ५-१८ उदीर्घः )। गुंठी ( १-२९ ऋ = उ, ३-१० ष् = ठ्, ५-१८ दीर्घः )। मंथं ( १-२२ उ = अ,[3] ३-१२ स्त् = थ्, ५-३० बिं० )। मणंसिणो ( १-२ सू० स्प० )। दंसणं ( ३-३ र्लोपः, २-४३ श् = स्, २-४२ न् = ण्, ५-३० बिं० )। फंसो ( ३-३६ सू० स्प० )। वण्णो ( ३-३ र्लोपः, ३-५० ण्द्वि०, ५-१ ओ )। पडिंसुदं ( ३-३ र्लोपः, २-८ त् = ड्, २-४३ श् = स्, ३-३ र्लोपः, १२-३ त् = द्, ५-३० बिं०, २-४२ श् = स्, ५-१ ओ )। अंसो ( स्पष्टम् )। अहिमुंको[4] ( २-२७ भ् = ह्, ३-१ त्लोपः, ५-१ ओ )। वक्र-त्र्यस्र-ह्रस्व-अश्रु-श्मश्रु-गृष्टि-मुस्त-मनस्विनी-दर्शन-स्पर्श-वर्ण-प्रतिश्रुत-अश्व-अभिमुक्त-इत्यादयः॥ १५॥**

---

१. अंसः, कसः, वञ्चनीयं, विन्ध्यः। २. संजीवन्यनुसारी पाठः। ३. मुकुटादेराकृतिगणत्वात्। ४. शक्तमुक्तदष्टरुग्णमृदुत्वे को वा ८।२।२ मुक्को-मुत्तोऽक्को दट्ठो लुक्को लुग्गो माउक्कं माउत्तणं-इति हे०। अत्र अहिमुंको इत्यत्र 'न बिन्दुः परे' इत्यनेन द्वित्वनिषेधो ज्ञेयः।

वक्रादिषु—एषु हलि परे बिन्दुरागमः स्यात् । वंको । तंसं । वअंसो । इत्यादि ।

वक्रत्र्यस्रवयस्याश्रुसौरभाणि मनस्विनी ।
स्पर्शो निवसनं शुल्कं स्युर्वक्रादय ईदृशाः ॥ १५ ॥

वक्रादिक शब्दों में हल् के परे अनुस्वार का आगम हो । ( वक्रः ) ५ से रेफ का लोप । वंको । ( त्र्यस्रम् ) अनुस्वारागम । पूर्ववत् रेफलोप । ४ से यलोप । तंसं । ( वयस्यः ) वअंसो । ( अश्रु ) अंसु । ( सौरभम् ) १४ से औ को ओ । 'खघथधभां हः' सूत्र में प्रायःपदानुवृत्ति से भ को ह नहीं होगा । अनुस्वारागम । सोरभं । 'नपुंसके सोर्बिन्दुः' से अनुस्वारागम सिद्ध ही था फिर वक्रादि में सौरभ शब्द का पाठ मन्द-प्रयोजन है । ( मनस्विनी ) मणंसिणी । ( स्पर्शः ) 'स्पस्य फः' ( ३ + ६६ ) से फादेश । फंसो । ( निवसनम् ) णिअंसणं । ( शुल्कम् ) सुंकं ॥ १५ ॥

नोट—नं० (२३) खघथधभां हः । (५९) उदूतो मधूकादिषु । (३६) इदीतः पानीयादिषु । (११) ठो ढः । (१८) पो वः । (२) कगचजतदपयवां प्रायो लोपः । (२५) नो णः सर्वत्र । (३३) ध्यह्यमोर्झः । (५२) सुभिसुप्सु दीर्घः । (२३) शषोः सः । (४२) अत ओत्सोः । (५) सर्वत्र लवराम् । (४) अधो मनयाम् । (१४) औत ओत् । (५८) अदातो यथादिषु वा ।

## मांसादिषु वा ॥ १६ ॥

मांसादिषु शब्देषु वा बिन्दुः प्रयोक्तव्यः । मंसं, मासं ( स्प० ) । कहं, कह ( २-२७ थ् = ह्, शे० स्प० ) । णूणं, णूण ( स्प० ) । तहिं, तहि ( स्प० ) । असुं, असु[1] ( स्प० ) । तदयमपठितो मांसादिर्गणः । यत्र क्वचिद्वृत्तभङ्गभयात् त्यज्यमानः क्रियमाणश्च बिन्दुर्भवति, स मांसादिषु द्रष्टव्यः ॥ १६ ॥

मांसादिषु[2]—मण्डूकप्लुत्या लोप इत्यनुवर्तते । मांसादिशब्देषु बिन्दुलोपो वा स्यात् । मासं, मंसं । कह, कहं । णूण, णूणं । दाणि, दाणिं । समुहो, संमुहो । 'संस्कार-संस्कृतादौ तु नित्यं बिन्दुर्विलुप्यते' । सक्कारो । सक्कअं ॥ १६ ॥

मण्डूकप्लुति से लोप-पद की अनुवृत्ति । मांसादिक शब्दों में अनुस्वार का विकल्प से लोप हो । (मांसम्) अनुस्वार का लोप । मासं । पक्ष में-५८ से आकार को अकार । मंसं । ( कथम् ) २३ से थ को हकार । कह, कहं । ( नूनम् ) णूण, णूणं । ( इदानीम् ) दाणि, दाणीं । ( संमुखः ) समुहो, संमुहो । संस्कार और संस्कृत शब्द में नित्य अनुस्वार का लोप होगा । ( संस्कारः ) ३ से सकारलोप । मांसादित्व से नित्य अनुस्वार का लोप । ६ से ककारद्वित्व । सक्कारो । ( संस्कृतम् ) ९ से ऋ को अकार । २ से तकारलोप । अन्य कार्य पूर्ववत् । सक्कअं ॥ १६ ॥

## ययि तद्वर्गान्तः ॥ १७ ॥

ययि परतो बिन्दुस्तद्वर्गान्तो वा भवति । सङ्का ( २-४३ श् = स्,

---

१. क० पु० मांसः, कथम्, नूनम्, तर्हि, अश्रु अ० पा० । २. संजीवन्यां सूत्रान्ते 'वा'-इति नास्ति ।

शे० स्प० )। सङ्खो ( ५-१ ओ, शे० पूर्व० )। अङ्को । अङ्कं ( स्प० )। सञ्चरइ ( ७-१ ति = इ, शे० स्प० )। सण्ढो ( २-४३ ष् = स् )। सन्तरइ ( स्प० )। सम्पत्ती ( ५-१८ दीर्घः, शे० स्प० )। ययीति किम् ? अंसो ( ४-१४ सूत्रे स्प० )। वाऽधिकारात् पंकं, बिंदू, संका, संखो। ( सुगमानि)[1] ॥ १७ ॥

कपि[2] तद्वर्ग्योन्तः—कवर्गादारभ्य पवर्गं व्याप्य कप्-प्रत्याहारग्रहणेन प्राप्यम् । कादिपञ्चवर्गीयाक्षरे परे यो वर्णः परस्तद्वर्गीयः पञ्चमाक्षरोऽनुस्वारस्य वा भवति । सङ्करो, संकरो। धणञ्जओ, धणंजओ । सण्ठिओ, संठिओ । चिरन्तणं, चिरंतणं । किम्पि, किंपि । सन्तो, संतो । गुम्फिअं, गुंफिअं । पदान्त एवायमिति केचित् ॥ १७ ॥

कवर्ग से लेकर पवर्ग पर्यन्त अर्थात् क से म पर्यन्त कप्-प्रत्याहार है। इन कवर्गादि पाँच वर्गों के किसी अक्षर के परे अनुस्वार को पञ्चम अक्षर हो, अर्थात् जिस वर्ग का अक्षर पर में होगा उसी वर्ग का पाँचवाँ अक्षर होगा। ( शंकरः ) श को स। नकार को णकार। यकार-तकार का लोप। पूर्वोक्त २६+२५+४+२ से जानना। अनुस्वार को विकल्प से ककार के परे ङकार हो गया। सङ्करो। पक्ष में-संकरो। एवम् ( धनंजयः ) धणञ्जओ, धणंजओ। ( संस्थितः ) ३ से षकारलोप। सण्ठिओ, संठिओ। ( चिरन्तनम् ) चिरन्तणं, चिरंतणं। ( किमपि ) किम्पि, किंपि। जहाँ पदान्त नहीं है, वहाँ भी विकल्प से अनुस्वार होगा। ( शान्तः ) सन्तो, संतो। ( गुंफितम् ) गुम्फिअं, गुंफिअं। कोई आचार्य पदान्त में ही विकल्प से परसवर्ण मानते हैं, परंतु इसमें कोई प्रमाण नहीं है और प्राकृत में दोनों प्रकार के प्रयोग मिलते हैं ॥ १७ ॥

## नसान्तप्रावृट्शरदः पुंसि ॥ १८ ॥

नकारान्ताः सकारान्ताश्च प्रावृट्शरदौ च पुंसि प्रयोक्तव्याः । नान्ताः—कम्मो ( ४-६ अन्त्यनकारलोपः, ३-३ र्लोपः, ३-५० म्द्वि०, ५-१ ओ )। जम्मो ( ३-४३ सू० स्प० )। वम्मो ( ३-३ र्लोपः, ३-५० म्द्वि०, ४-६ न्लोपः, ५-१ ओ )। सान्ताः-जसो ( २-३१ सू० स्प० )। तमो ( ४-६ स्लोपे, पुंस्त्वे च, ५-१ ओ ) सरो। पाउसो ( १-३० सू० स्प० )। सरदो[3] ॥ १८ ॥

नसन्तप्रावृट्शरदः[4] पुंसि—नकारान्तः सकारान्तः प्रावृट्शरदौ च पुंसि भवन्ति । चम्मो । वम्मो । 'नान्तं नपुंसके विद्धि पुंलिङ्गेऽपि प्रशस्यते' । चम्मं । वम्मं । पेम्मं । तमो । महो । पाउसो । सरओ ॥ १८ ॥

---

१. शङ्खः, शङ्खः, कंसः, अङ्कः, अङ्कं, सञ्चरति, षण्ढः, सन्तरति, सम्पत्तिः, अंसः, पङ्कं, बिन्दुः । २. संजीवनीसंमतः पाठः । ३. कर्मन्, जन्मन्, वर्मन्, यशस्, तमस्, सरस्, प्रावृष्, शरदः । यत्र सेयं, वयं, सुमणं, सम्मं, चम्ममिति दृश्यते तद् बाहुलकाधिकारात्-इति हेमः । ४. संजीवन्यादिसंमतोऽयं पाठः ।

नकारान्त, सकारान्त, प्रावृष् और शरद् शब्द का पुंलिङ्ग में प्रयोग हो। (चर्मन्) नपुंसकलिङ्ग प्राप्त था, पुंलिङ्ग हो गया। ४२ से ओकार। ५ से रेफलोप। ६ से द्वित्व। चम्मो। एवम् (वर्मन्) वम्मो। नकारान्त नपुंसकलिङ्ग में तो है और पुंलिङ्ग में भी होता है। तो नपुंसकलिङ्ग में ६० से अन्त्य हल् नकार का लोप। ६२ से अनुस्वार। चम्मं। वम्मं। (प्रेमन्) पूर्ववत् साधुत्व। पेम्मो, पेम्मं। (तमस्) सान्त होने से पुंलिङ्ग। तमो। (महस्) महो। (प्रावृष्) ५ से रेफलोप। २ से वलोप। ११ से ऋकार को उकार। 'दिक् प्रावृ०' (४+१२) से ष् को सस्वर सकार। प्रकृत से पुंलिङ्ग। पाउसो। (शरद्) २६ से सकार। 'शरदोऽत्' से द् को अकार। सरओ॥१८॥

नोट—नं० (३) उपरि लोपः कगडतदपषसाम्। (६) शेषादेशयोर्द्वित्वमनादौ। (९) ऋतोऽत्। (२) कगचजतदपयवां प्रायो लोपः। (२६) शषोः सः। (२५) नो णः सर्वत्र। (४) अधो मनयाम्। (४२) अत ओत्सोः। (६०) अन्त्यस्य हलः। (६२) नपुंसके सोर्बिन्दुः। (११) उदृत्वादिषु।

## न शिरोनभसी ॥ १९ ॥

शिरस्, नभस् इत्येतौ न पुंसि प्रयोक्तव्यौ। सिरं (४-६ सलोपः, ५-३० बिं०)। णहं ॥ १९ ॥

न शिरोनभसी—एतौ पुंसि न स्तः। सिरं। णहं ॥ १९ ॥

शिरस्, नभस् को पुंलिङ्ग न हो। सान्तत्वात् पूर्वसूत्र से प्राप्त पुंस्त्व का निषेधक यह सूत्र है। (शिरः) २६ से श को स। ६० से अन्त्यलोप। ६२ से अनुस्वार। सिरं। (नभः) २५ से णकार। २३ से भकार को हकार। अन्य कार्य पूर्ववत्। णहं ॥ १९ ॥

## पृष्ठाक्षिप्रश्नाः स्त्रियां वा ॥ २० ॥

एते स्त्रियां वा प्रयोक्तव्याः। पुट्ठी, पुट्ठं (१-२९ ऋ=उ, ३-१० ष्ठ=ठ, ३-५० ठ्द्वि०, ३-५१ ठ्=ट्, स्त्रीत्वे ई, पक्षे-पूर्ववत्कार्येषु कृतेषु ५-३० बिं०)। (एवम्)-अच्छी, अच्छं (३-३० सू० स्प०)। अच्छो पुंस्त्वे तु (५-१ ओ)। पण्हा, पण्हो (३-३ रलोपः, ३-३३ श्न=ण्ह, स्त्रीत्वे आत्वं, पुंस्त्वे ५-१ ओ)। पृष्ठम्। अक्षि। प्रश्नः ॥ २० ॥

पृष्ठाक्षिप्रश्नाः स्त्रियां वा—एते स्त्रियां वा स्युः। पट्ठी, पट्ठं। अच्छी, अच्छिं। पण्हा, पण्हो। 'एवं लिङ्गविपर्यासो ज्ञेयः शब्दान्तरेष्वपि'। गुणाइं। बिन्दूइं। लोअणा। रस्सीओ ॥ २० ॥

पृष्ठ, अक्षि, प्रश्न ये स्त्रीलिङ्ग में विकल्प से हों। (पृष्ठम्) ९ से ऋ को अकार। ३ से षकार का लोप। ६ से द्वित्व। ७ से टकार। ५४ से ईकार। पट्ठी। कोई-कोई आचार्य ऋष्यादि में पाठ मान कर इकार मानते हैं-'पीठ' लोकभाषा। पंजाब में उकार-'पुट्ठे तरफ दिट्ठा'। पक्ष में-पट्ठं। (अक्षि) ६८ से क्ष को छ। द्वित्व, चकार, ईकार पूर्ववत्। अच्छी, अच्छिं। (प्रश्नः) 'ह्नश्नष्ण०' (३+३३) श्न को ण्ह आदेश। ५४ से स्त्रीलिङ्ग में आकार। पण्हा। पक्ष में-पण्हो। इसी प्रकार प्राकृतभाषा में लिङ्गव्यत्यय अन्यत्र भी जानना। (गुणाः) 'इं जश्शसोर्दीर्घश्च' (५+२६) से जस् को इंकार।

पूर्व को दीर्घ। गुणाइं। एवम् (बिन्दवः) बिन्दूइं। (लोचनम्) लोअणा। (रश्मयः) २६ से श को स। ४ से मलोप। ६ से द्वित्व। 'जसो वा' (५+२०) से जस् को ओकार। ४८ से दीर्घ। रस्सीओ ॥ २० ॥

## ओदवापयोः ॥ २१ ॥

**अव, अप इत्येतयोरुपसर्गयोर्वा ओत्वं भवति। ओहासो, अवहासो। ओसारिअं, अवसारिअं (२-२ त्लोपः, ५-३० बिं०)। अवहासः, अपसारितम् ॥ २१ ॥**

ओदवापयोः—अव-अप-इत्येतयोरुपसर्गयोः ओकारादेशो वा स्यात्। ओवासो, अवआसो। ओसिअं, अवसिअं। ओपत्तं, अवअत्तं। 'ओत्वं वा स्यान्निरो माल्ये क्वचिदोत्वमुपस्य वा'। ओमल्लं। णिम्मल्लं। ओहसिअं, पक्षे-उवहसिअं। 'लुग्वा दुरुपसर्गस्य विसर्गस्य क्वचिद् भवेत्'। दुलहो, दुल्लहो। दूसहो, दुसहो। 'ऊदुतः सविसर्गस्य दुःसहादौ विकल्प्यते' ॥ २१ ॥

अव, अप उपसर्गों को ओकार विकल्प से हो। (अवकाशः) काशको वास आदेश। अव को ओकार। ओवासो। पक्ष में-२ से कलोप। अवआसो। (अपसृतम्) अप को ओकार। १० से इकार। तलोप। ओसिअं। पक्ष में-१८ से प को व। अवसिअं। (अपवृत्तम्) अप को ओकार। ९ से ऋ को अ। २ से वलोप। ओअत्तं। पक्षे-अवअत्तं। निर् उपसर्ग को माल्य शब्द के परे विकल्प से ओकार हो और कहीं उप को विकल्प से ओकार हो। (निर्माल्यम्) निर् को ओकार। ४ से यलोप। ६ से द्वित्व। ५८ से आ को अ। ओमल्लं। पक्ष में-निम्मल्लं। (उपहसितम्) ओहसिअं। पक्ष में—उवहसिअं। कहीं पर दुर् उपसर्ग के विसर्ग का लोप हो। (दुर्लभः) २३ से भ को ह। दुलहो। पक्ष में-दुल्लहो। दुःसहादिक शब्दों में विसर्गसहित उकार को विकल्प से ऊकार हो। दूसहो। पक्ष में-दुसहो ॥ २१ ॥

नोट—नं० (२६) शषोः सः। (६०) अन्त्यस्य हलः। (६२) नपुंसके सोर्बिन्दुः। (२५) नो णः सर्वत्र। (२३) खघथधभां हः। (९) ऋतोऽत्। (३) उपरि लोपः कगडतदपषसाम्। (६) शेषादेशयोर्द्वित्वमनादौ। (७) वर्गेषु युजः पूर्वः। (५४) आदीतौ बहुलम्। (६८) अक्ष्यादिषु छः। (४) अधो मनयाम्। (४८) जश्शस्ङ्यास्सु दीर्घः। (२) कगचजतदपयवां प्रायो लोपः। (१०) इदृष्यादिषु। (१८) पो वः। (५८) अदातो यथादिषु वा।

## तल्त्वयोर्दात्तणौ[1] ॥ २२ ॥

**तल्-त्व-इत्येतयोः प्रत्यययोर्यथासंख्यं दा, त्तण इत्येतावादेशौ स्तः। पीणदा (२-४२ न्=ण)। मूढदा (१२-३ त्-द्)। पीणत्तणं। मूढत्तणं (५-३० बिं०) ॥ २२ ॥**

तल्त्वयोर्दात्तणौ—एतयोर्यथासंख्यमेतौ वा स्तः। रम्मदा, रम्मत्तणं, रम्मत्तं। तणुदा, तणुत्तणं, तणुत्तं ॥ २२ ॥

---

१. 'त्वतलोः प्पणः' ८।४।४३७। अपभ्रंश। इति हे०।

तल् और त्व प्रत्यय को क्रम से दा और त्तण आदेश होते हैं। अर्थात् तल्प्रत्यय को दा और त्वप्रत्यय को त्तण। ( रम्यता ) तल्प्रत्यय को दा आदेश। ४ से यलोप। ७ से द्वित्व। रम्मदा। ( रम्यत्वम् ) त्तण आदेश। रम्मत्तणं। पक्ष में-५ से वलोप, द्वित्व। रम्मत्तं। एवम्-( तनुता ) तणुदा। २५ से न को ण। ( तनुत्वम् ) तणुत्तणं। तणुत्तं॥ २२॥

## क्त्व ऊणः[1] ॥ २३ ॥

क्त्वा-प्रत्ययस्य ऊण इत्ययमादेशो भवति। घेऊण ( ८-१६ ग्रह = घेत् )। सोऊण ( ३-३ र्लोपः, २-४३ श् = स्, उ = ओ गुणेन[2] ) काऊण ( ८-१७ कृञ्=का )। दाऊण ( स्पष्टम् )। गृहीत्वा, श्रुत्वा, कृत्वा, दत्त्वा॥ २३॥

क्त्व तूण[3]—क्त्वा-प्रत्ययस्य तूण इत्ययमादेशः स्यात्। हंतूण। आणिऊण। काऊण। घेत्तूण। 'क्वापि क्त्वाप्रत्ययादेशो उआण इत्यपीष्यते'। घेत्तुआण। सोउआण। 'उं वाशब्दस्य वादेशः क्त्वास्थितस्य क्वचिद् भवेत्'। दट्ठुं। मोत्तुं। होउं। 'असमासे अआदेशः क्त्वेत्येतस्य प्रवर्तते'। जाणिअ। पडिअ। ओसरिअ। परिहरिअ॥ २३॥

क्त्वा प्रत्यय को तूण आदेश हो। ( हत्वा ) हन्+क्त्वा, क्त्वाप्रत्यय को तूण आदेश। नकार को अनुस्वार। हंतूण। ( आनीय ) आङ्पूर्वक नीधातु, क्त्वाप्रत्यय। धातु के ईकार को बहुलग्रहण से ह्रस्व इकार। २ से तूण आदेश के तकार का लोप। यह लोप प्रायिक है। अतः प्रयोगानुकूल कहीं होगा और कहीं नहीं। आणिऊण। ( कृत्वा ) कृञ् को 'कृञः का०' ( ७+१४ ) से का आदेश। काऊण। ( गृहीत्वा ) ग्रह्+क्त्वा। क्त्वा को तूण। ग्रह् को 'घेत्क्त्वातुमुन्०' ( ७+३३ ) से घेत् आदेश। घेत्तूण। कहीं क्त्वाप्रत्यय को उआण आदेश हो। ग्रह् को घेत् आदेश। घेत्तुआण। ( श्रुत्वा ) २६ से सकार। ५ से रेफलोप। बहुलग्रहण से उकार को ओकार। सो-उआण। क्त्वाप्रत्यय में विद्यमान वा को 'उं' आदेश विकल्प से हो। ( दृष्ट्वा ) वा को उं आदेश हुआ। २८ से ष्ट को ठ। ६ से द्वित्व। ७ से टकार। ९ से ऋ को अकार। दट्ठुं। ( मुक्त्वा ) १ से उ को ओकार। वा को उं आदेश। ३ से कलोप। ६ से तकारद्वित्व। मोत्तुं। ( भूत्वा ) भू को हो आदेश हो। २ से तकार का लोप। होउं। क्त्वाप्रत्यय को असमास में इअ आदेश हो। ( ज्ञात्वा ) ज्ञा धातु को 'ज्ञो जाणमुणौ' ( ७+२९ ) से जाण आदेश। जाणिअ। एवं मुणिअ। ( पतित्वा ) पडिअ। उपसर्ग के साथ समास में भी इअ होता है। ( अपसृत्य ) ओसरिअ। ( परिहृत्य ) परिहरिअ॥ २३॥

## तृण[4] इरः शीले ॥ २४ ॥

शीले यस्तृन्प्रत्ययो विहितस्तस्य इर इत्ययमादेशो भवति। भ्रमण-

---

१. का० पु० पा० 'उण्' पा०। २. 'युवर्णस्य गुणः' ८।४।२३७। धातोरिवर्णोवर्णस्य क्ङित्यपि गुणः। जेऊण, नेऊण, नेइ, नेन्ति, उड्डेइ, उड्डेन्ति, मोत्तूण, सोऊण। क्वचिन्न-नीओ उड्डीणो इति हेमच०। ३. संजीवनीसंमतः पाठः। ४. का० पा० तुन्।

शीलो भ्रमिरो[1]। हसनशीलो हसिरो ( ५-१ ओ, स्पष्टप्राये ) ॥ २४ ॥

तृनं[2] इर शीले—तच्छीलादिष्वर्थेषु तृन्-प्रत्ययस्य इर इति स्यात्। घोलिरं। जंपिरं। विविरं ॥ २४ ॥

तच्छील, तद्धर्म, तत्साधुकारी अर्थ में तृन्प्रत्यय को इर आदेश हो। ( घूर्णितृ ) घूर्णितुं शीलमस्य। तृन्प्रत्यय को इर आदेश। 'घूर्णो घोलघुम्मौ' ( ७+५ ) से घोल आदेश। घोलिरं। जल्पितुं शीलमस्य जंपिरं। वेपितुं शीलमस्य विविरं। १८ से पकार को वकार ॥ २४ ॥

नोट—नं० (४) अधो मनयाम् (६) शेषादेशयोर्द्वित्वमनादौ। (५) सर्वत्र लवराम्। (२५) नो णः सर्वत्र। (२) कगचजतदपयवां प्रायो लोपः। (२६) शषोः सः। (२८) ष्टस्य ठः। (७) वर्गेषु युजः पूर्वः। (९) ऋतोऽत् (१) उत ओत्तुण्डसमेषु। (३) उपरि लोपः कगडतदपषसाम्। (१८) पो वः।

## आल्विल्लोल्लालवन्तेन्ता मतुपः ॥ २५ ॥

आलु, इल्ल, उल्ल, आल, वन्त, इन्त, इत्येत आदेशा मतुपः स्थाने भवन्ति। आलुस्तावत्—ईसालू ( ३-३ रलोपः, २-४३ ष्=स्, आलुकृते, ५-१८ दीर्घः )। णिद्दालू ( २-४२ न्=ण्, ३-३ र्लोपः, ३-५० दृद्वि०, शे० पू० )। इल्लः—विआरिल्लो[3] ( २-२ अलोपः, इल्ले कृते, ५-१ ओ )। मालाइल्लो ( ५-१ ओ, शे० स्प० )। उल्लः—विआरुल्लो ( २-२ कलोपः, शे० स्प० )। आलः[4]—धणालो ( २-४२ न्=ण्, ५-१ ओ )। सद्दालो ( ३-३ व्लोपः, ३-५० द्वि०, ५-१ ओ )। वन्तः—धणवन्तो ( स्प० )। जोवणवन्तो ( २-३१ य्=ज्, प्राय इति वलेपो न, २-४२ न्=ण्, ५-१ ओ )। इन्तः[5]—रोसाइन्तो[6] ( २-४३ ष्=स्, ५-१ ओ )। पाणाइन्तो ( ३-३ र्लोपः, शे० पू०[7] )। यथादर्शनमेते प्रयोक्तव्याः, न सर्वे सर्वत्र। ईर्ष्यावत्, निद्रावत्, विकारवत्, मालावत्, धनवत्, शब्दवत्, यौवनवत्, रोषवत्, प्राणवत्,।

'क्वचिदा मतुपोऽन्त्यस्य मन्तो वा दृश्यते क्वचित्।'

हणुमा, हणुमन्तो ( २-४३ न्=ण्, मतुपोऽन्त्यस्यात्वपक्षे, मन्तादेशः, ५-१ ओ )।

'इल्लोल्लावपरे प्रायः शैषिकेषु प्रयुञ्जते'।

पौरस्त्यं=पुरोभवं, पुरिल्लं ( पुरस्—अत्र ४-५ सलोपे च, शैषिक इल्ल-प्रत्यये, ४-१ अलोपे, ५-३० बिं० )। आत्मीयम्=अप्पुल्लं (३-४८ त्म्=प्, ३-५० पद्वि०, ४-६ न्लोपः, ४-१ अलोपः, उल्लप्रत्ययः, ५-३० बिं० )।

---

१. क्वचिद् भमिरो पा०। २. संजीवनीसंमतः पाठः। ३. का० पा० विआरइल्लः। ४. का० पा० अल्लः। ५. का० पा० इतः। ६. का० पा० रोसः। ७. एषु सर्वत्र कोशादिकमज्ञिवशेषकार्यं ४-१ सूत्रेण बोध्यम्।

'परिमाणे किमादिभ्यो भवन्ति केद्दहादयः।'

केद्दहं, केत्तिअं। जेद्दहं, जेत्तिअं। तेद्दहं, तेत्तिअं। एद्दहं, एत्तिअं। ( किमः केद्दह, केत्तिअ। यदो जेद्दह, जेत्तिअ। तदः तेद्दह, तेत्तिअ। एतद् एद्दह, एत्तिअ-इत्यादेशाः भवन्तीत्यर्थः, ५-३० बिन्दुः सर्वत्र )।

'कृत्वसो हुत्तमित्यन्ये देशीशब्दः स इष्यते'।

सअहुत्तं ( २-४३ श् = स्, २-२ तलोपे, कृत्वसो हुत्तादेशे, ५-३० बिं० )। सहस्सहुत्तं ( ३-३ रलोपः, ३-५० सद्वि०, शे० पू० )।

'जातौ वा स्वार्थिकः कः[१]।'

[ जातौ स्वार्थे ककारः प्रयोक्तव्यः ][२]।

( पद्मं = पदुमअं, पक्षे-पदुमम्[३] )[४] ॥ २५ ॥

आल्विल्लोल्लालवन्तेन्ता मतुपः—तदस्यास्त्यस्मिन्नर्थे विहितानां मतुबादीनां प्रत्ययानां स्थाने यथादर्शनम्—आलु, इल्ल, उल्ल, आल, वन्त, इन्त इत्येते आदेशा भवन्ति। ईसालू। णेहालू। गहिल्लो। सणेहिल्लो। विआरुल्लं। विहारुल्लं। वणालं। चोरालं। जसवन्तो। धणवन्तो। घरइन्तो। पुत्तइन्ता। 'अर्थे तस्येदमित्यस्मिन्नुल्ल, इल्लस्तु तद्भवे'। अप्पुल्लं। गामेल्लिआ। पुरिल्लं। 'भवेतां मतुपोऽन्त्यस्य न्त आकारस्तथा क्वचित्'। हनुमन्तो, हनुमा। 'संख्यायाः कृत्वसो हुत्तं आभिमुख्येऽपि दृश्यते'। पञ्चहुत्तं। छहुत्तं। सअहुत्तं। पिअहुत्तं। घरहुत्तं। 'इष्टौ किंयत्तदेतेभ्यः परिमाणे त्तिअ-द्दहौ'। केत्तिअं, केद्दहं। जेत्तिअं, जेद्दहं। तेत्तिअं, तेद्दहं। एत्तिअं, एद्दहं ॥ २५ ॥

अस्य, अस्ति, अस्मिन् अर्थों में विहित मतुबादिक प्रत्ययों को प्रयोगानुकूल जैसा प्रयोग कविसंप्रदाय में मिले, तदनुकूल, आलु-इल्ल-उल्ल-आल-वन्त-इन्त आदेश होते हैं। क्रम से उदाहरण। आलु-(ईर्ष्यावान्) ईर्ष्या अस्य अस्ति, इस अर्थ में आलु-प्रत्यय। २६ से ष को स। ४ से य का, ५ से रेफ का लोप। सर्वत्र ३५ से अकार आकार का लोप जानना। ईसालू। 'ईर्ष्यालुः' इस संस्कृत शब्द से भी ईसालू हो सकता है। ( स्नेहवान् ) ३ से सकारलोप। २५ से न को ण। णेहालू। इल्ल-( ग्रहवान् ) इल्ल आदेश। ५ से रेफलोप। गहिल्लो। ( स्नेहवान् ) इल्ल आदेश। 'स्नेहे वा' (३+६२) से 'स्न' का विप्रकर्ष, अकार-स्वर। पूर्ववत् नकार को णकार। हकाराकार का लोप। सणेहिल्लो। उल्ल-( विकारवत् ) उल्ल आदेश। २ से ककार का लोप। विआरुल्लं। ( विहारवत्-विहारिन् ) उल्ल आदेश। विहारुल्लं। आल-( वनवान् ) २५ से न को ण। वणालो। ( चौरवत् ) १४ से औकार को ओकार। चोरालं। वन्त-( यशस्वी ) २४ से य को जकार। २६ से श को स। ६० से सकारलोप। जसवन्तो। (धनी-धनवान्) धणवन्तो। इन्त-( गृही-गृहवान् ) 'गृहस्य घरोऽपतौ' ( ४+३५ ) से गृह को घर

---

१. केचित् सूत्ररूपेण पठन्ति। २. क० पु० न दृश्यते [ ] कोष्ठकान्तर्गतः पाठः। ३. ( ) कोष्ठकान्तर्गतः पाठः प्रायस्त्रुटित एव। ४. अतोर्डेत्तुलः ८। ४। ४३५। अपभ्रंशे इदंकिंयत्तदेतद्भ्यः परस्य अतोः प्रत्ययस्य डेत्तुल इत्यादेशो भवति। एत्तुलो, केत्तुलो, जेत्तुलो, तेत्तुलो, एतत्तुलो। इति हेमः।

आदेश। घरइन्तो। (पुत्रवती) ५ से रेफलोप। ६ से द्वित्व। पुत्तइन्ता। 'तस्येदम्' इस अर्थ में उल्ल और तदुत्पन्न इस अर्थ में इल्ल होते हैं। (आत्मीयम्) 'आत्मनि पः' से त्म को पकार। ६ से पकारद्वित्व। ५८ से आ को अकार। ६० से न् का लोप। पूर्ववत् ३५ से अकारलोप। अप्पुल्लं। (ग्रामीणाः) तद्भव अर्थ में इल्ल आदेश। पूर्ववत् रेफलोप। गाम-इल्ल होने पर ३५ से अ-इ को एकार। एकवचन में गामेल्लो। कप्रत्यय में ३५ से लकाराकार को इकार। गामेल्लिओ। बहुवचन में गामेल्लिआ। पुरो भवम्-(पौरस्त्यम्) पुरस् से इल्ल। पूर्ववत् ६० से सलोप। पुरिल्लं। कहीं पर मतुप्-प्रत्यय के अन्त को न्त आदेश तथा कहीं आकार हो। (हनुमान्) त् को न्त आदेश। हनुमन्तो। एवम् (बलवान्) बलवन्तो। जहाँ आकार होगा वहाँ हनुमा। संख्यावाचक शब्द से पर कृत्वसुप्रत्यय को और आभिमुख्य अर्थ में हुत्तं आदेश हो। (पञ्चकृत्वः) पंचहुत्तं। (षट्कृत्वः) 'षट्शावक०' (२+३७) से छ आदेश। छहुत्तं। (शतकृत्वः) सअहुत्तं। (प्रियाभिमुखम्) पिअहुत्तं। (गृहाभिमुखम्) घरहुत्तं। अभिमत अर्थ में किम्-यद्-तद्-एतद् शब्दों से परिमाण अर्थ में विद्यमान प्रत्यय को त्तिअ इह आदेश हों। कियत् परिमाणमस्य (कियत्) किम् को कादेश। ३१ से एकार। केत्तिअं, केद्दहं। (यावत्) सर्वत्र ६० से अन्त्य द का लोप। ३१ से एकार। २४ से यकार को जकार। जेत्तिअं, जेद्दहं। (तावत्) तेत्तिअं, तेद्दहं। (एतावत्) एत्तिअं, एद्दहं। 'त्वथयो०' (५+७५) से तकारलोप॥ २५॥

नोट—नं. (२६) शषोः सः। (४) अधो मनयाम्। (५) सर्वत्र लवराम्। (३५) सन्धौ अज्लोपविशेषा बहुलम्। (३) उपरि लोपः कगडतदपषसाम्। (२५) नो णः सर्वत्र। (२) कगचजतदपयवां प्रायो लोपः। (१४) औत ओत्। (२४) आदेर्यो जः। (६०) अन्त्यस्य हलः। (६) शेषादेशयोर्द्वित्वमनादौ। (५८) अदातो यथादिषु वा। (३१) ए शय्यादिषु।

## (स्वार्थे को वा।)

**स्वार्थे को वा**—प्रातिपदिकात् स्वार्थे कप्रत्ययो वा स्यात्। भमरओ, भमरो। कसणओ, कसणो। चन्दओ, चन्दो। 'वेष्यते स्वार्थ इल्लोल्लौ, आभ्यां कः स्वार्थ एव वा'। सच्चं, सच्चिल्लं, सच्चिल्लअं। करहो, करहुल्लो, करहुल्लओ। भमरो, भमरुल्लो, भमरुल्लओ। 'स्वार्थे कः स्यात् डकारोऽपि को वा तस्मादपि स्मृतः'। पुत्तो, पुत्तडो, पुत्तडओ। वच्छो, वच्छडो, वच्छडओ। हत्था, हत्थडा, हत्थडआ। 'द्वित्वापन्नो लकारोऽपि क्वचित्स्वार्थ इतीष्यते'। एकल्लो, एकको, एकाकी, एको। णवल्लो, णवो। एते प्रत्ययाः पाणिनीयप्रपञ्चिते सर्वत्रैव कप्रत्ययार्थे द्रष्टव्याः। तेन—

अज्ञाते कुत्सिते चाल्पे तथा ह्रस्वानुकम्पयोः।
संज्ञायामपि विद्वद्भिः प्रत्ययोऽयं विधीयते॥

प्रातिपदिक से स्वार्थ में क-प्रत्यय विकल्प से हो। (भ्रमरकः) ५ से रेफलोप। २ से कलोप। ४२ से ओकार। भमरओ। पक्ष में-भमरो। साधुत्व पूर्ववत्। (कृष्णकः)

२. नेदं सूत्रं भामहे।

९ से ऋ को अकार। 'कृष्णे वा' (१+६०) षकार–णकार का विप्रकर्ष, षकार में ह्रस्वरता। कसणओ। पक्षे–कसणो। एवम् (चन्द्रकः) रेफ-ककार का पूर्ववत् लोप। चन्दओ। पक्ष में-चन्दो। स्वार्थ में विकल्प से इल्ल उल्ल हों, और उससे क-प्रत्यय विकल्प से हो। (सत्यम्) ३२ से त्य को चकार। ६ से द्वित्व। सच्चं। इल्ल–प्रत्यय होने पर सच्चुल्लं। लोकव्यवहार की बोलचाल में 'सचुला' प्रयोग होता है। अतः उल्ल-प्रत्यय होने पर सच्चुल्लं। कप्रत्यय होने पर सच्चिल्लअं। पुंल्लिङ्ग में सच्चो, सच्चुल्लो। एवम् (करभः) २३ से भ को हकार। करहो। उल्लप्रत्यय होने पर करहुल्लो। कप्रत्यय होने पर करहुल्लओ। एवम् (भ्रमरः) भमरो, भमरुल्लो, भमरुल्लओ। रेफ–ककार का लोप। ओकार पूर्ववत् जानना। ३५ से इल्ल, उल्ल प्रत्यय होने पर प्रातिपदिक के अकार का लोप सर्वत्र जानना। स्वार्थ में कप्रत्यय होता है और ड-प्रत्यय भी होता है और उस ड-प्रत्ययान्त से कप्रत्यय विकल्प से होता है। (पुत्रः) ५ से रेफलोप। ६ से द्वित्व। पुत्तो, पुत्तडो, पुत्तडओ। (वत्सः) ६४ से त्स को छ। ६ से द्वित्व। ७ से चकार। वच्छो, वच्छडो, वच्छडओ। (हस्तौ) २९ से स्त को थकार। द्वित्व, तकार ६+७ से। द्विवचन को बहुवचन। हत्था, हत्थडा, हत्थडआ। 'कहीं पर स्वार्थ में द्वित्वापन्न लकार भी होता है।' (एकः) ४१ से विकल्प से ककारद्वित्व। एको, एक्को, एकल्लो, एकको, एकाकी। (नवः) २५ से न को ण। णवो, णवल्लो। उक्त इल्लादिक प्रत्यय पाणिनि ने जिन-जिन अर्थों में क-प्रत्यय कहा है उन-उन अर्थों में होते हैं। जैसे—अज्ञात, कुत्सित, अल्प, ह्रस्व, अनुकम्पा और संज्ञा अर्थ में होते हैं॥

नोट—नं. (५) सर्वत्र लवराम्। (२) कगचजतदपयवां प्रायो लोपः। (६२) अत ओत्सोः। (९) ऋतोऽत्। (३२) त्यथ्यद्यां चछजाः। (६) शेषादेशयोर्द्वित्वमनादौ। (२३) खघथधभां हः। (३५) सन्धौ अज्लोपविशेषा बहुलम्। (६४) श्चत्सप्सां छः। (७) वर्गेषु युजः पूर्वः। (२९) स्तस्य थः। (२५) नो णः सर्वत्र।

## विद्युत्पीताभ्यां वा[1] लः॥ २६॥

विद्युत्पीतशब्दाभ्यां परतः स्वार्थे लप्रत्ययो भवति। विज्जू (३-२७ द्य्=ज्, ३-५० जद्वि०, ५-१८ दीर्घः)। विज्जुली (ईबन्तः स्त्रियां, शे० पू०)। पीअं (२-२ त्लोपः, ५-३० बिं०)। पीअलं[2] (स्प०)॥२६॥

विद्युत्पीतयोर्लः[3]—एतयोः स्वार्थे लप्रत्ययो वा स्यात्। विज्जुली, विज्जू। पीअलं, पीअं॥ २६॥

विद्युत् और पीत शब्द से स्वार्थ में ल-प्रत्यय विकल्प से हो। (विद्युत्) ३२ से द्य को जकार। ६० से अन्त्य त् का लोप। ६ से जकारद्वित्व। विज्जुली। ५२ से उकार-दीर्घ। विज्जू। (पीतम्) २ से तलोप, ल-प्रत्यय। पीअलं, पीअं॥ २६॥

## वृन्दे वो रः॥ २७॥

वृन्दशब्दे वकारात्परः स्वार्थे रेफो वा प्रयोक्तव्यः। व्रन्दं (१-२७

१. वेति सार्वत्रिको न। २. क० पु० विद्युत, पीतवर्ण इत्यर्थः। अ० पा०।
३. संजीवन्यादिसंमतोऽयं पाठः।

ऋ=अ, वकारात्परे रेफे कृते, ४-१७ वर्गान्तः, ५-३० विं०)। वंद्रं[1] (१-२७ ऋ=अ, शे० स्प०)॥ २७॥

वृन्दे दो वः[2]—वृन्दशब्दे दकारादनन्तरम् अकारात्पूर्वमित्यर्थः, वप्रत्ययः स्यात्। वन्द्वं। 'वृन्दे रः'। २८। इति केचित्। वन्द्रं॥ २७॥

वृन्दशब्द में दकार के अनन्तर अकार के पूर्व व-प्रत्यय हो। ९ से ऋकार को अकार। वन्द्वं। कोई र-प्रत्यय को मानते हैं। उनके मत से-वन्द्रं होगा॥ २७॥

## करेण्वां रणोः स्थितिपरिवृत्तिः॥ २८॥

**करेणुशब्दे रेफणकारयोः स्थितिपरिवृत्तिर्भवति। कणेरू। पुंसि न भवति,[3] करेणू (५-१८ दीर्घः)॥ २८॥**

करेण्वां रणोः स्थितिपरिवृत्तिः—करेणुशब्दे रेफणकारयोः स्थानव्यत्ययः स्यात्। एसा कणेरू। स्त्रीलिङ्गनिर्देशात्पुंसि न। एस करेणू। (हस्ती)॥ २८॥

करेणुशब्द में रेफ और णकार की स्थितिपरिवृत्ति हो अर्थात् रेफ के स्थान पर णकार और णकार के स्थान पर रेफ हो। (करेणुः) परिवृत्ति होने पर। कणेरू। हस्तिनी। 'करेण्वाम्' यह स्त्रीलिङ्ग का निर्देश है, अतः पुंलिङ्ग में नहीं होगा। एस करेणू=एष करेणुः। हस्ती॥ २८॥

## आलाने नलोः॥ २९॥

**आलानशब्दे लकारनकारयोर्हल्मात्रयोः स्थितिपरिवृत्तिर्भवति। आणालक्खम्भो (३-५७ सु० स्प०)॥ २९॥**

आलाने लनोः—आलानशब्दे लकारनकारयोः स्थानव्यत्ययः स्यात्। आणालं। 'स्थितयोः परिवृत्तिर्वा, हरिताले लरेफयोः'। हरिआलो, हलिआरो॥ २९॥

आलानशब्द में लकार और नकार की परिवृत्ति हो। (आलानम्) ल के स्थान पर न और न के स्थान पर ल हो गया। २५ से न को ण। आणालं। 'हरिताल' शब्द में रेफ और लकार का विकल्प से व्यत्यय होगा। (हरितालम्) २ से तलोप। हरिआलो, हलिआरो॥ २९॥

## (महाराष्ट्रे हरोः।)

महाराष्ट्रे हरोः[4]—अत्र हकाररेफयोर्व्यत्ययः स्यात्। मरहट्ठो॥

महाराष्ट्रशब्द में हकार-रेफ का व्यत्यय हो। ५ से रेफलोप। २८ से ष्ट को ठकार। ६ से द्वित्व। ७ से टकार। ५८ से दोनों आकारों को अकार। हकार-रेफ का व्यत्यय। मरहट्ठो॥

## बृहस्पतौ बहोर्भऔ॥ ३०॥

**बृहस्पतिशब्दे बकारहकारयोर्यथासंख्यं भकाराकारौ भवतः। भअप्फई[5] (१-१७ ऋ=अ, बह-इत्यस्य भअकृते, ३-३५ स्प=फ्, ३-५१ द्वि०, २-२ तलोपः, ५-१८ दीर्घः)॥ ३०॥**

---

१. 'वुन्दं विन्दं' क्वचित्पाठः। २. एष पाठः संजीवन्यनुसारी। ३. क्वचित् करेण्वामिति स्त्रीलिङ्गनिर्देशात। अ० पा०। ४. नेदं सूत्रं भामहे। ५. का० पा० भअप्फई। सूत्रे हयौ इति पाठे हयप्फई इत्युदाहार्यम्।

बृहस्पतौ बहोर्भपौ'—अत्र वकारहकारयोर्भपौ स्तः। भपप्फई। 'केचित्तु बकारहकारयोर्यथासंख्यं भकाराकारौ इच्छन्ति।' ततश्च 'भअप्फई' इति वदन्ति। केचित्-'कचित्सस्य कचित्पस्य लोपः शब्दस्य इष्यते'। ततश्च 'भपस्सई' इतीच्छन्ति ॥ ३० ॥

बृहस्पतिशब्द में वकार-हकार के स्थान पर भकार-पकार हों। ९ से ऋकार को अकार। वकार के स्थान पर भकार, हकार के स्थान पर पकार। ६६ से स्प को फ। ६ से द्वित्व। ७ से फ को पकार। २ से तलोप। भपप्फई। कोई आचार्य व को भ और हकार को अकार मानते हैं। उनके मत से 'भअप्फई' होगा, परन्तु पकारादेश करने पर यदि २ से पकार का लोप मान लें, तब भअप्फई, भपप्फई हो सकते हैं। अस्तु, कहीं स्प के स का और कहीं पकार का लोप होता है। तो जब पकार का लोप होगा तब ६ से सद्वित्व। भपस्सई होगा ॥ ३० ॥

नोट—नं. ( ३२ ) त्यथ्यद्यां चछजाः। ( ६० ) अन्त्यस्य हलः। ( ६ ) शेषादेशयोर्द्वित्वमनादौ। ( ५२ ) सुभिसुप्सु दीर्घः। ( ९ ) ऋतोऽत्। ( २५ ) नो णः सर्वत्र। ( २ ) कगचजतदपयवां प्रायो लोपः। ( ५ ) सर्वत्र लवराम्। ( २८ ) ष्टस्य ठः। वर्गेषु युजः पूर्वः। ( ६६ ) स्पस्य फः। ( ५८ ) अदातो यथादिषु वा।

## मलिने लिनोरिलौ वा ॥ ३१ ॥

**मलिनशब्दे लिकारनकारयोर्यथासंख्यमिकारलकारौ वा भवतः। मइलं, मलिणं ( पक्षे-२-४२ न् = ण्, ५-३० बिं० ) ॥ ३१ ॥**

मलिने लिनोरिलौ वा—मलिनशब्दे लि-इत्येतस्य नकारस्य च यथासंख्यम् इकारलकारौ भवतः। मइलं, मलिणं ॥ ३१ ॥

मलिनशब्द में लि और नकार को क्रम से इकार लकार हों अर्थात् 'लि' इस इकार-स्वर-सहित लकार को 'इ' और नकार को 'ल' हो। ( मलिनम् ) लकार को इकार, नकार को लकार। मइलं। पक्ष में-२५ से न को ण। मलिणं ॥ ३१ ॥

## गृहे घरोऽपतौ ॥ ३२ ॥

**गृहशब्दे घर इत्ययमादेशो भवति, पतिशब्दे परतो न भवति। घरं ( ५-३० बिं० ) = भवनम्। अपताविति किम्? गहवई[1] ( १-१८ ऋ = अ, २-१५ प्—व्, २-३ त्लोपः, ५-१८ दीर्घः ) ॥ ३२ ॥**

गृहस्य[3] घरोऽपतौ—गृहशब्दस्य घरादेशः स्यात्, न तु पतौ। घरं। राअघरं। घरसामी। पतौ तु-गहवई ॥ ३२ ॥

गृहशब्द को घर आदेश हो, पतिशब्द के परे न हो। ( गृहम् ) घर आदेश हो गया। घरं। ( गृहस्वामी ) ५ से वलोप। समास में द्वित्व न भी हो। घरसामी। 'स्वामी' यह पत्यर्थक है, परंतु पतिशब्द नहीं है। पतिशब्द के परे आदेश नहीं होगा-( गृहपतिः ) ९ से ऋ को अकार। १८ से पकार को वकार। २ से तलोप। गहवई ॥ ३२ ॥

१. संजीवनीसंमतः पाठः। २. गृहपतिः। ३. जीवन्यनुसारी पाठः।

नो—नं. ( २५ ) नो णः सर्वत्र । ( ५ ) सर्वत्र लवराम् । ( ९ ) अतोऽत् । ( १८ ) पो वः । ( २ ) कगचजतदपयवां प्रायो लोपः ।

## दाढादयो बहुलम् ॥ ३३ ॥

इति श्रीवररुचिविरचिते प्राकृतप्रकाशे चतुर्थः परिच्छेदः ।

दाढा-इत्येवमादयः शब्दा बहुलं निपात्यन्ते दंष्ट्रादिषु । दंष्ट्रा = दाढा । इदानीं-एण्हि । दुहिता = धीआ, धूदा[1] । चातुर्यं = चातुलिअं । मण्डूकः= मण्डूरो । गृहेनिहितं = घरेणिहितं । उत्पलं = कन्दोट्ठो । गोदावरी=गोला । ललाटं = णिडालं । भूः = भुमआ[2] । वैदूर्य्यं = वेलुरिअं । उभयपार्श्वं=अवहोवासं । चूतः = माइंदो, माअंदो । दंष्ट्रादिषु दाढादयो निपातसिद्धाः शब्दाः संस्कृतशब्दानुसारेण देशसंकेतप्रवृत्तभाषाशब्दानुसारेण च यथायथं लिङ्गेषु प्रयोज्याः, स्पष्टाश्चैतेऽतोऽलं विस्तरेण । आदिशब्दोऽयं प्रकारे, तेन सर्व एव देशसंकेतप्रवृत्तभाषाशब्दाः परिगृहीताः ॥ ३३ ॥

इति श्रीभामहविरचिते प्राकृतप्रकाशव्याख्याने संकीर्णविधिर्नाम चतुर्थः परिच्छेदः ।

दाढादयो बहुलम्—'श्रुतानुमित्यध्याहारैर्वाक्यार्थपरिकल्पन'मिति सिद्धान्तादयमर्थः-दंष्ट्रादीनां स्थाने दाढादयः शब्दा निपात्यन्ते । बहुलग्रहणाद् यथायथं प्रत्ययलोपागमवर्णविकाराः कल्पनीयाः । तथा च—

दंष्ट्रा-ललाट-पत्तीनां स्युर्भ्रुवो व्याकुलस्य च ।
दाढा-णिडाल-पाइक्क-भुमआ-वावलाः क्रमात् ॥ १ ॥
अधो-वैदूर्य-शुक्तीनां वधू-अमितशब्दयोः ।
हेट्ठं वेरुल्लिअं सुप्पी अउज्झा चाथ भामिअं ॥ २ ॥
दुहित्राकृष्टयोस्तद्वत् स्यात् श्वश्रूलेलिहानयोः ।
धूआ आअट्ठिअं चैव अत्ता लल्लक्कमेव च ॥ ३ ॥
मण्डलीसमयेदानींनिलयानां भवन्त्यमी ।
विचिल्लिअं च अच्छुकं एण्हि चाथ निहेलणं ॥ ४ ॥
कडसी अवहो आसं श्मशानोभयपार्श्वयोः ।
उत्पलस्य तु कंदोट्टं कोड्डं कौतूहलस्य च ॥ ५ ॥
स्यात् लज्जालुइणी चेति लज्जावत्या निपातनम् ।
शालिवाहनशब्दस्य हालो शालाहणो तथा ॥ ६ ॥

1. का० पा० धिपी, धिया, दिट्ठी, धुआ । 2. का० पा० भूमआ ।

गोदावर्याश्च गोला स्यादित्याद्याः पाक्षिकाः पुनः ।
अहो वेदुज्जअं सुत्ती बंह्वाया[1] एवमादयः ॥ ७ ॥
मातृष्वसृपितृष्वस्रोरत इत्वं सलुक् ततः ।
पक्षे च स्वसृशब्दस्य छा इत्येतन्निपात्यते ॥ ८ ॥

माउसी, माउच्छा–इत्यादि ।

दाढादयः इत्यत्र आदिशब्दग्रहात् एवंविधा ये शब्दा लोकव्यवहारप्रसिद्धाः महाकविप्रयुक्तास्तेऽपि प्रत्ययलोपागमवर्णविकाररूपतया कल्पनीयाः। एवं च—त्रिविधं प्राकृतमवगन्तव्यम्, अनुकारि–विकारि–देशीभेदात्। ते अनुकारिणः, ये संस्कृतप्राकृतयोः समाः, केवलं विभक्तिभेदतो भिन्नाः। यथा—

इह हि नववसन्ते मञ्जरीपुञ्जरेणु-
च्छुरितधवलदेहा बद्धवेला वसन्ति ।
तरलमणिमयूरा हारिहुंकारकण्ठाः
बहलपरिमलालीसुन्दराः सिन्धुवाराः ॥

अत्र विभक्तिमात्रकृतो भेदः। शब्दास्तु संस्कृतसमा एव। अपरे संस्कृतशब्देषु वर्णविकाराद् भिन्नाः। यथा—जह, जहा इत्यादि। तदुभयभिन्ना देशीशब्दाः इति।

प्राकृतेऽयं साधारणो नियमः—

ए-ऐ[2]-स्फ-ष्य-ऋ-ॠ-लृ-ॡ-प्लुतशषा बिन्दुश्चतुर्थी क्वचित्
प्रान्ते हल्ङञनाः पृथग् द्विवचनं नाष्टादश प्राकृते ।
रूपं चापि यदात्मनेपदकृतं यद्वा परस्मैपदे
भेदो नैव तयोश्च लिङ्गनियमस्तादृग् यथा संस्कृते ॥

इति श्री म० म० मथुराप्रसाददीक्षितकृतायां चन्द्रिकाख्य-
व्याख्यायां सङ्कीर्णविधिश्चतुर्थः परिच्छेदः ।

**दाढादिक आदेश हों। परं तु यहाँ स्थानी का निर्देश नहीं है, अर्थात् किसके स्थान पर हों, अतः श्रुत=लोकव्यवहार से तथा शब्दानुपूर्वी से एवम् अनुमान और अध्याहार से वाक्यार्थ की कल्पना कर लेना–इस सिद्धान्त से तो यह अर्थ होता है कि दंष्ट्रा आदि शब्दों को निपात से दाढा आदि शब्द होते हैं। बहुलग्रहण से प्रयोगानुकूल प्रत्यय, लोप, आगम, वर्णविकार आदि की कल्पना कर लेना। किसके स्थान पर क्या हुआ? दंष्ट्रा को दाढा। ललाट को णिडाल। पत्ति को पाइक। भ्रू को भुमआ। व्याकुल को वावला; आदेश होते हैं। तथा अधो को–हेट्ठं। वैदूर्य को–वेरुज्जिअं। शुक्ति को–**

---

१. बुह्वाया:—इति सुबोधिन्याम्, चन्द्रिकाकारैरपि सुबोधिनीस्थः पाठो मूले स्थापित आसीत्, परं विचारेण संजीवनीपाठ उचितः प्रतिभाति।

२. 'ऐ औ'—इति संजीवनीसुबोधिन्योः 'ए ऐ'—इत्यस्य स्थाने पाठो दृश्यते।

सुप्पी। वधू को–आउज्झा। भ्रमित को–भामिअ होते हैं। एवम्–दुहितृ को–धूआ। आकृष्ट को–आअड्ढिअं। श्वश्रू को–अत्ता। लेलिहान को–लल्लक्क होगा। मण्डली को–विचिल्लिय, समय को–अच्छुक्क, इदानीं को एण्हि, निलय को–निहेलण–आदेश होते हैं। श्मशानशब्द को कडसी, उभय को अवहो, पार्श्व को आस होता है। लोक में पार्श्व के अर्थ में 'आस-पास' का प्रयोग होता है। उत्पल को कंदोट्ट, कौतूहल को कोड्ड होता है। लज्जावती को लज्जालुइणी तथा शालिवाहन को हाल और शालाहण दो आदेश होते हैं। गोदावरी को गोला आदेश होता है। ये नित्य होते हैं। और पूर्वोक्त पाक्षिक भी हैं। जैसे—अधः का हेट्ठं होगा और ध को ह करने से अहो भी होगा, एवम् वैदूर्य का वेरुल्लिअं होगा और 'र्य' को जकारादेश, द्वित्व, दू को ह्रस्व उकार, ऐ को ए करने से वेदुज्जअं भी होगा। एवं शुक्ति का सुप्पी और कलोप, द्वित्व, त और सकार करने पर सुत्ती भी होगा। इस प्रकार यथानुकूल प्रयोग कर सकते हैं। मातृष्वसृ और पितृष्वसृ शब्द के अकार को इकार हो और इकार से पर सकार का लोप हो। (मातृष्वसृ) 'कगचज०' से तलोप। 'उदृत्वादिषु' से उकार। 'सर्वत्र लवराम्' से वलोप। उक्त निपात से स्व के अकार को इकार। उससे पर 'सृ'गत सकार का लोप। माउसिआ, एवम् पिउसिआ। 'अदातो यथा०' से ह्रस्व करने से स्त्रीलिङ्ग में ई–प्रत्यय अन्त में करने से मउसी, इति। पक्ष में–स्वसृ को छ आदेश निपात से होता है। माउच्छा, पिउच्छा। 'दाढादयः' इसमें आदिपद के ग्रहण से लोकव्यवहार में प्रसिद्ध, महाकविप्रयुक्त उनको भी प्रत्यय, लोप, आगम, वर्णविकार आदि की कल्पना से साधु बना लेना।

इस प्रकार तीन स्वरूप में प्राकृत विभक्त होता है। (१) अनुकारी। (२) विकारी। (३) देशी।

(१) जो शब्द संस्कृतशब्द के समान है, केवल सुप्–तिङादि–प्रत्यय–कृत भेद है, वह अनुकारी है। क्योंकि संस्कृतशब्द के समान है। उसमें ऐसे अक्षर नहीं होते हैं, जिनका आदेशादिजन्य परिवर्तन होता हो। वे शब्द संस्कृताभिज्ञ विद्वानों को सुगम हैं।

(२) दूसरे विकारी होते हैं, जिनके अक्षरों में आदेशजन्य विकार हो जाने से साधारणतया शब्दस्वरूप की प्रतीति नहीं होती है। परन्तु वाक्य में अनेक प्रातिपदिक-शब्दगत वर्ण रहते हैं, अतः उनमें विकार हो जाने से प्रातिपदिक शब्द का ज्ञान दुरूह हो जाता है। जैसे–रश्मयः का रस्सओ। विक्लवः का विक्कओ इत्यादि। और वाक्य में तिङन्त क्रियावाचक शब्द एक ही रहता है, उसकी प्रतीति प्रकरण से तथा अन्य शब्दों की सन्निधि से हो जायगी। अतः प्रातिपदिक शब्द किन-किन विकारों में होकर किस प्रकार के प्राकृत शब्दस्वरूप में परिवर्तित हुआ है यह जानना परमावश्यक है। यह प्राकृत शब्द देखने से शीघ्र साधारणतया नहीं प्रतीत होता है। इसके जानने के लिये मैंने केवल अट्ठाईस सूत्र प्राकृतप्रकाश से निकाले हैं, जिनसे जैनों के प्राकृत में कहे हुये समस्त आगम–ग्रन्थ और नाटकों में कहा हुआ अधमपात्रगत तथा स्त्रीपात्रादिगत प्राकृत का परिज्ञान हो जाता है। ये अट्ठाईस सूत्र व्यापकरूप से और बाईस सूत्र और हैं जो कि असाधारण प्रयोगों का भी परिज्ञान कराते हैं। इस प्राकृत-

प्रकाश की टीका करते हुए जो प्रयोग आया उसका साधुत्व उक्त सूत्रों से मैंने दिखाया है। और जिस सूत्र का उपयोग प्राकृतप्रकाशान्तर्गत उदाहरणों में आया है उसकी संख्या सूत्र के साथ दे दी है तथा तत्संख्यानुरूप ही सूत्रक्रम है। स्वल्प परिश्रम से मेरे बनाये हुये 'प्राच्यकरण' से पाली और प्राकृत में उत्तम ज्ञान प्राप्त कर सकते हैं। उसमें दोनों भाषाओं के लिये केवल उपयुक्त सूत्र हैं और उदाहरण सैकड़ों हैं, जिससे परिपक्व बोध तत्तद्भाषा का हो जायगा। अस्तु।

( ३ ) तीसरा देशी शब्द स्वरूप में है। उन देशी शब्दों का प्रयोग, जैसे-अन्तर्लापिका, बहिर्लापिका, गुप्ताशुद्धि आदि का क्वाचित्क प्रयोग होता है वैसे ही देशी शब्दों का प्रयोग होता है। उनका जैन-बौद्धागमों में प्रयोग नहीं के समान ही है।

प्राकृत में यह साधारण नियम है कि—एकार १ ऐकार २ स्फ ३ ष्य ४ ॠ ५ ॠ ६ लृ ७ लॄ ८ प्लुत ९ श १० ष ११ अन्त में विसर्ग १२ चतुर्थी विभक्ति १३, चतुर्थी के प्रयोग में षष्ठी होती है, जैसे-'णमोत्थु देवाहिदेवाणं' देवाधिदेवेभ्यः नमोऽस्तु। अन्त में हल् १४ अलग अपने वर्ग के संयोग से अतिरिक्त ङकार १५ ञकार १६ नकार १७ और द्विवचन १८ ये अठारह प्राकृत में नहीं होते हैं। आत्मनेपद और परस्मैपद का भेद नहीं अर्थात् आत्मनेपदी धातु का परस्मैपद में भी प्रयोग होता है, तथा परस्मैपदी धातु का आत्मनेपद में भी प्रयोग होता है। प्राकृत में आत्मनेपद परस्मैपद का कोई भेद नहीं है और पुंलिङ्ग, स्त्रीलिङ्ग, नपुंसकलिङ्ग का कोई भेद नहीं है, जैसा संस्कृत में भेद है। जैसे-कुलशब्द नपुंसकलिङ्ग ही होगा पुंलिङ्ग नहीं होगा। परन्तु प्राकृत में यह नियम नहीं है। इत्यादि ॥ ३३ ॥

इति श्री म० म० मथुराप्रसादकृतौ प्राकृतप्रकाशस्य प्रदीपनामक-
हिन्दीव्याख्यायां चतुर्थः परिच्छेदः।

# अथ पञ्चमः परिच्छेदः

## अत ओत् सोः ॥ १ ॥

अकारान्ताच्छब्दात्परस्य सोः स्थाने ओत्वं भवति । वच्छो ( १-३२ । ३-३० । ३-३१ सूत्रेषु स्पष्टम् ) । वसहो ( १-२७ । २-४३ सू० स्प० ) । पुरिसो ( १-२३ सू० स्प० ) । वृक्षः, वृषभः, पुरुषः ॥ १ ॥

अत ओत् सोः—अकारान्तात्प्रातिपदिकात् परस्य प्रथमैकवचनस्य सुप्रत्ययस्य ओकारादेशः स्यात् । इंदो । चंदो । कण्हो । भत्तारो । कत्तारो । वच्छो । वसहो । पुरिसो । 'परस्य क्वचिदीकारात् सोराकारः प्रवर्तते' । भणन्तीआ, हसंतीआ ॥ १ ॥

पूर्वार्द्ध के ये चार परिच्छेद अत्यन्त उपयोगी हैं, क्योंकि स्वर-व्यञ्जनों के आदेश कहे हैं । अतः शब्दस्वरूप के ज्ञान होने में साधक हैं और सुप्तिङ्ज्ञान तो वाक्य से स्वतः प्रतीत हो जायगा । उत्तरार्द्ध के ( ५ ) पञ्चम परिच्छेद में सुब्विधि है । ( ६ ) षष्ठ में तिङ्विधि । ( ७ ) सप्तम में धातुविधि । ( ८ ) अष्टम में निपात । अतः इनका ज्ञान अतिसरल है । किन्तु पूर्वार्द्ध के प्रयोगों का ज्ञान स्वरूपपरिवर्तन के कारण दुर्बोध होता है । अत एव सर्व-साधारण को सरलतया बोध होने के लिये मैंने अनुगम करके प्राकृतबोध के लिये केवल ( २८ ) अट्ठाईस, तथा व्यापक बोध के लिये ( २२ ) बाईस और, एवं पचास सूत्रों से उत्तम प्राकृत, तथा उससे किञ्चिन्मात्र विभिन्न पाली का बोध होने का उपाय निकाला है । यह मेरा पन्द्रह वर्ष का 'अभिधान राजेन्द्र' ( जैनइन्साइक्लोपीडिया ) बनाते समय प्राकृत जैनागमों के देखने का अनुभव है । उन सूत्रों का अनुगम करके उदाहरणों पर मैंने दिखा दिया है । और कौन कौन सूत्र पूर्वार्द्ध के (४) परिच्छेदों में कितनी बार प्रयोगों में उपयुक्त हुआ है यह संख्या भी देदी है । अस्तु-

अकारान्त प्रातिपदिक से पर सु को ओकार आदेश हो । ( चन्द्रः ) सु को ओकार । चंदो । २+७+४+२८+२३+१२+५+९ से सब प्रयोग सिद्ध होते हैं । ( कृष्णः ) कण्हो । ( भर्ता ) 'ऋत आरः सुपि' इससे आर आदेश । प्रकृत सूत्र से ओकार । भत्तारो । ( कर्ता ) कत्तारो । ( वत्सः ) वच्छो । ( वृषभः ) वसहो । ( पुरुषः ) 'इत्पुरुषे रोः' से इकार । पुरिसो । कहीं पर ईकार से पर सु को आकार आदेश होता है । ( भणन्ती ) भणंतीआ ( हसन्ती ) हसंतीआ ॥ १ ॥

## जश्शसोर्लोपः ॥ २ ॥

अत इत्यनुवर्तते । अकारान्तस्यानन्तरं यौ जश्शसौ तयोर्लोपो भवति । वच्छा सोहंति । 'जश्शस्ङस्यांसु दीर्घः' इति दीर्घे कृते पश्चाल्लोपो जसः ( १-२७ ऋ = अ, ३-३१ छत्वविकल्प[1], ३-५० द्वि०, ३-५१

---

१. वत्सशब्दप्रयोगे तु ३-४० त्स = छ ।

छ् = च्, ५-११ जसि दीर्घे कृते लोपः, सोहंति इति २-४३ श् = स्, २-२७ भ् = ह्, ७-४ न्ति )। वृक्षाः शोभन्ते। वच्छे णिअच्छह। 'ए च सुपी'त्येत्वे कृते शसो लोपः। ( पूर्ववत् वृक्ष = वच्छ, ५-१२ एत्वे कृते शसो लोपः, णिअच्छह इति २-४२ न्=ण्, २-२ यलोपः, ७-१८ त्=ह)। वृक्षान्नियच्छत ॥ २ ॥

जश्शसोर्लोपः—अकारात्परयोर्जश्शसोर्लोपः स्यात्। देवा। असुरा। माणुसा। पिअरा। मादरा। वच्छा सोहंति। 'अदन्ताद् यो विधिः प्रोक्तः, शेषादित्यतिदेशतः। आदन्तादिदुदन्तात् स ईदूदन्तादपीष्यते' ॥ ( आ ) माला, साला। ( इत् ) अग्गी। ( उत् ) वाऊ। ( ईदूत् ) णई। बहू। इत्यादि ॥ २ ॥

जश्शसोरिति। अकार से पर जस्-शस् का लोप हो। ( देवाः ) देव + जस्। इस सूत्र से जस् का लोप। 'जस्शस्ङस्यांसु दीर्घः' से दीर्घ। देवा। (असुराः) असुरा ( मनुष्याः ) माणुसा (४+५+६+२४+अं० द्वि० २) से सिद्ध होता है। ( पितरः ) ऋकार को अर आदेश। जस् का लोप। अकार को दीर्घ। पिअरा। ( भ्रातरः ) भादरा। इत्यादि। ( वत्साः ) वच्छा। उक्त अङ्कित सूत्रों से सब प्रयोग सिद्ध हैं। अकारान्त से जो लोपादि विधि कही है, वह अन्य स्वरान्त से भी होती है अर्थात् आकार-इ-ई-उ-ऊ और ऋ जिन शब्दों के अन्त पर हों उनमें भी लोपादि तथा वक्ष्यमाण अम् का लोप, टा-आम् को णकार आदेशादि जानना। ( मालाः ) जस् का लोप, माला। ( शालाः ) साला। (५+३+१+६+९+४+२३। २+'न्मो मः'। ३।४२ ) से सब उदाहरण सिद्ध हैं। ( अग्नयः ) अग्गी। ( वायवः ) वाऊ। ( नद्यः ) णई। ( वध्वः ) वहू। सर्वत्र जस् का लोप, अकारातिदेश मानकर दीर्घ होगा ॥ २ ॥

## अतोऽमः ॥ ३ ॥

अकारान्तस्यानन्तरं योऽम् द्वितीयैकवचनं तदकारस्य लोपो भवति। वच्छं पेक्खइ। 'मो बिन्दुः' ( ४-१२ ) इति बिन्दुः। वृक्षं पश्यति ॥ ३ ॥

अमोऽमः[1]—अकारात्परस्य अम्-प्रत्ययस्याकारस्य लोपः स्यात्। गामं। णामं। शेषादित्यतिदेशात् आकारान्तादिष्वपि। हेलं। लीलं। अग्गिं। वाउं। णइं। बहुं। वच्छं ॥

अमो-इति। अकार से पर अम्-प्रत्यय के अकार का लोप हो। ( ग्रामम् ) गामं। ( नाम ) णामं। अकारातिदेश से स्त्रीलिङ्ग दीर्घ में-( हेलाम् ) हेलं। 'अमि ह्रस्वः' से ह्रस्व। ( लीलाम् ) लीलं। ( अग्निम् ) अग्गिं। ( वायुम् ) वाउं। ( नदीम् ) णइं। ( वधूम् ) वहुं। वृष-वत्स का वच्छं ॥ ३ ॥

## टामोर्णः ॥ ४ ॥

अतोऽनन्तरं टामोस्तृतीयैकवचनषष्ठीबहुवचनयोर्णकारो भवति। वच्छेण। 'ए च सुपी'त्येत्वम्। ( ५-१२ एत्वे कृते, टा = ण )। वच्छाण 'जश्शस्ङस्यांसु दीर्घ' इति दीर्घः। वृक्षेण। वृक्षाणाम् ॥ ४ ॥

---

१. एष संजीवन्यादिसंमतः पाठः।

टामोर्णः—अकारात्परयोः 'टा-आम्' इत्येतयोर्णः स्यात्। धम्मेण। जम्मेण। वच्छेण। कत्तारेण। धम्माण। जम्माण। वच्छाण। कत्ताराण। 'अदन्तात् यो विधि'-रित्यतिदेशात् आदीदूदादिष्वपि। अण्णाण। कण्णाण। बुद्धीण। धेणूण। रमणीण। कंडूण। 'बिन्दु'ष्टामोर्ण' इत्यादौ सन्नसन्नपि वा क्वचित्'। धम्मेणं। जम्मेणं। कत्तारेणं। धम्माणं। जम्माणं। कत्ताराणं॥ ४॥

टामोरिति। अकार से पर टा-आम् को ण आदेश हो। (धर्मेण) धम्मेण। 'ए च सुप्यङिङसोः' से एकार। जन्मना-जम्मेण। वत्सेन-वच्छेण। कर्त्रा ऋ को आर। कत्तारेण। आम् के परे 'जश्शस्ङस्या०' से दीर्घ। धर्म्माणाम्-धम्माण। जन्मनाम्-जम्माण। वत्सानाम्-वच्छाण। कर्तॄणाम्-कत्ताराण। अदन्तातिदेश से आ-ई-ऊ में भी णादेश होगा। अन्यासाम्-अण्णाण। कन्यानाम्-कण्णाण। बुद्धीनाम्-बुद्धीण। धेनूनाम्-धेणूण। रमणीनाम्-रमणीण। कण्डूनाम्-कंडूण। टा-आम् के णादेश में बिन्दु भी होता है। धम्मेणं। जम्मेणं। कत्तारेणं। एवम्-धम्माणं। जम्माणं। कत्ताणं इत्यादि॥

## भिसो हिं॥ ५॥

**अतोऽनन्तरस्य भिसो हिं भवति। वच्छेहिं। 'ए च सुपी'त्येत्वम्, (५-१२ एत्वं, शे० स्प०) वृक्षैः॥ ५॥**

भिसो हिं—अकारात्परस्य भिसो हिं-इत्ययमादेशः स्यात्। धम्मेहिं। कम्मेहिं। वच्छेहिं। 'अदन्ताद्यो विधि'रित्यतिदेशात् बालाहिं। लोलाहिं। पाणीहिं। जाणूहिं। णईहिं। तणूहिं॥ ५॥

भिसो-इति। अकार से पर भिस् को हिं आदेश हो। 'ए च सुप्य०' से एकार। धर्मैः-धम्मेहिं। कर्मभिः-कम्मेहिं। वत्सैः-वच्छेहिं। अतिदेश के कारण आकारान्तादिक से भी पर भिस् को हिं होगा। बालाभिः-बालाहिं। लोलाभिः-लोलाहिं। पाणिभिः-पाणीहिं। जानुभिः-जाणूहिं। नदीभिः-णईहिं। तनूभिः-तणूहिं॥ ५॥

## ङसेरादोदुहयः॥ ६॥

**अतोऽनन्तरस्य ङसेः पञ्चम्येकवचनस्य स्थाने आ, दो, दु, हि-इत्येत आदेशा भवन्ति। वच्छा, वच्छादो, वच्छादु, वच्छाहि। जश्शस्-ङस्यांसु दीर्घत्वम् (स्पष्टः)। वृक्षात्॥ ६॥**

ङसेरादोदुहयः—अकारात्परस्य ङसेः स्थाने आ-ओ-उ-हि-इत्येते आदेशा भवन्ति। गामा, 'क्वचिदपि लोप' इत्यल्लोपः। गामाओ, गामाउ, गामाहि। सर्वत्र 'जस्शस्ङस्या'मित्यादिना दीर्घः। एवम्-वच्छा, वच्छाओ, वच्छाउ, वच्छाहि। सप्पा, सप्पाओ, सप्पाउ, सप्पाहि। 'ङसेरतः परस्येह हिन्तो इत्यपि दृश्यते'। सप्पा-हिन्तो। अदन्तातिदेशात् आतः-गंगाओ, गंगाउ, गंगाहि, गंगाहिन्तो। 'ङसेर्यदाऽऽ-हिरादेशौ नादन्तवदुतो विधिः'। गिरीओ, गिरीउ, गिरीहिन्तो। साणूओ, साणूउ, साणूहिन्तो। ईदूद्भ्याम्-तरुणीओ, तरुणीउ, तरुणीहिन्तो। बहूओ, बहूउ, बहूहिन्तो॥ ६॥

१. का० पा० जस्भ्यस्ङस्यांसु।

ङसेरिति। अकार से पर ङसि को आ-ओ-उ-हि, ये आदेश हों। ग्रामात्-गामा। 'क्वचिदपि लोपः' से अकारलोप। ओकारादि आदेश के परे 'जस्शस्०' इससे दीर्घ। गामाओ, गामाउ, गामाहि। पूर्वोक्त (४+२३+६+९+२+७+८+१८+१) से प्रातिपदिक के स्वरूप सिद्ध हैं। एवम्-वत्सात् का-वच्छा, वच्छाओ, वच्छाउ, वच्छाहि। सर्पात् का-सप्पा, सप्पाओ, सप्पाउ, सप्पाहि। अकार से पर ङसि को 'हिन्तो' भी होता है। सप्पाहिन्तो। गामाहिन्तो, इत्यादि। अदन्त उपलक्षण है, अतः आदन्त, इ-उ-ईकार-ऊकार-ऋकार में भी ये आदेश होते हैं। परन्तु आकारान्त में आ और इकारान्तादिकों में आ, हि ये नहीं होते हैं। गङ्गायाः-गंगाओ, गंगाउ, गंगाहि, गंगाहिन्तो। गिरेः-का गिरीओ, गिरीउ, गिरीहिन्तो। सानोः-का साणूओ, साणूउ, साणूहिन्तो। दीर्घ-ई-ऊ में-तरुण्याः का तरुणीओ, तरुणीउ, तरुणीहिन्तो। वध्वाः-का वहूओ, वहूउ, वहूहिन्तो ॥ ६ ॥

## भ्यसो हिन्तो सुन्तो ॥ ७ ॥

**अतोऽनन्तरस्य भ्यसो हिन्तो, सुन्तो, इत्येतावादेशौ भवतः। वच्छाहिन्तो, वच्छासुन्तो। 'ए च सुपी'(५-१२)ति चकारेण दीर्घत्वम्। (स्पष्टम्)। वृक्षेभ्यः ॥ ७ ॥**

भ्यसो हिन्तो सुन्तो—अकारात्परस्य भ्यसो हिन्तो सुन्तो इत्येतौ भवतः। चतुर्थ्याः षष्ठीविधानाद् तद्भ्यसो न ग्रहणम्। पंचाहिन्तो, पंचासुन्तो। सत्ताहिन्तो, सत्तासुन्तो। वच्छाहिन्तो, वच्छासुन्तो। अदन्तातिदेशात् आतः—रामाहिन्तो, रामासुन्तो। इदुद्भ्याम्-अच्छीहिन्तो, अच्छीसुन्तो। ऊरूहिन्तो, ऊरूसुन्तो। ईदूतः-जणणीहिन्तो, जणणीसुन्तो। चमूहिन्तो, चमूसुन्तो ॥ ७ ॥

भ्यसो-इति। अकार से पर भ्यस् को हिन्तो, सुन्तो हों। प्राकृत में चतुर्थी के स्थान पर षष्ठी होती है, अतः पञ्चमी का ही भ्यस् लेना। पञ्चभ्यः-पञ्चाहिन्तो, पंचासुन्तो। 'जस्शस्ङस्या०' से अकारदीर्घ। एवम्-सप्तन् तथा वत्स में भी जानना। अदन्त यह आकारादि का भी उपलक्षण है। अत एव रामाभ्यः का रामाहिन्तो, रामासुन्तो। अकार यह इकारादिक का भी उपलक्षण है, अतः अक्षिभ्यः का अच्छीहिन्तो, अच्छीसुन्तो। ऊरुभ्यः का ऊरूहिन्तो, ऊरूसुन्तो। दीर्घ ईकार-ऊकार में-जननीभ्यः का जणणीहिन्तो, जणणीसुन्तो। चमूभ्यः का चमूहिन्तो, चमूसुन्तो ॥ ७ ॥

## स्सो ङसः ॥ ८ ॥

**अतोऽनन्तरस्य ङसः स्स इत्यादेशो भवति। वच्छस्स (स्प०)। वृक्षस्य ॥ ८ ॥**

स्सो ङसः—अकारात्परस्य ङसः स्स इत्यादेशः स्यात्। णरस्स। तेअस्स। तमस्स। अदन्तातिदेशात्-मउलिस्स। हणुस्स ॥ ८ ॥

स्सो ङस-इति। अकार से पर ङस् को 'स्स' आदेश हो। नरस्य का णरस्स। तेजस्शब्द के सकार का 'अन्त्यस्य हलः' से लोप करने पर स्स आदेश हो जायगा। तेअस्स। अकार इकारादि का उपलक्षण है, अतः-मौलेः का मउलिस्स। हनोः का हणुस्स ॥ ८ ॥

## ङेरम्मी ॥ ९ ॥

अतोऽनन्तरस्य ङेः ए, म्मि इत्यादेशौ भवतः। वच्छे, वच्छम्मि। 'क्वचिन्ङसिङ्योर्लोपः' (५-१३) इत्यकारलोपः (स्प०)। वृक्षे ॥ ९ ॥

**ङेरम्मी**—अकारात्परस्य ङि इत्येतस्य ए म्मि-इत्यादेशौ भवतः। सरे, सरम्मि। चम्मे, चम्मम्मि। इकारान्तादिषु 'न ङिङस्यो'रित्येत्वप्रतिषेधात्, गिरिम्मि। तरुम्मि। पितरम्मि। कत्तारम्मि ॥ ९ ॥

ङेरम्मी-इति। अकार से पर ङि को ए, म्मि आदेश हों। शरे अथवा सरसि का सरे, सरम्मि। एकार होने पर अकारलोप। चर्मणि का चम्मे, चम्मम्मि। (द्वि० २२ तथा ५+६+४+२+२+२३+१९ से) सभी प्रातिपदिक सिद्ध होते हैं। गिरौ। इकारान्तादिकों में ङि ङसि के परे एकार नहीं होता है। गिरिम्मि। तरौ का तरुम्मि। ऋकार को अर आर कहेंगे। पितरि का पितरम्मि। कर्तरि का कत्तारम्मि ॥ ९ ॥

## सुपः सुः ॥ १० ॥

अतोऽनन्तरस्य सुपः सु इत्यादेशो भवति। वच्छेसु = वृक्षेषु। (एवं वत्सशब्दरूपाण्यपि बोध्यानि)। 'ए च सुपी' (५-१२)त्येत्वम् ॥ १० ॥

**सुपः सुः**—अकारात्परस्य सुप इत्येतस्य सुः स्यात्। सरेसु। कमलेसु। ङसः स्स-विधानं, सुपः सु-विधानं मन्दप्रयोजनमिति केचित् ॥ १० ॥

सुप इति। अकार से पर सुप को सु आदेश हो। सरःसु का सरेसु। कमलेषु का कमलेसु। कोई लोग ङस् को स्स-विधान, सुप् को सु-विधान निष्प्रयोजन कहते हैं। तात्पर्य यह कि-यलोप, सकारद्वित्व करने पर णरस्स सिद्ध हो ही जायगा? उत्तर-हरिस्स, मउलिस्स, हणुस्स के लिये स्स-विधान आवश्यक है। परन्तु सु-विधान चिन्त्यप्रयोजन ही है ॥ १० ॥

## जश्शस्ङस्यांसु दीर्घः ॥ ११ ॥

जसादिषु परतोऽतो दीर्घो भवति। वच्छा सोहन्ति। 'जश्शसोर्लोप' इति जसो लोपः (५-२ सू० स्पष्टम्)। वत्साः शोभन्ते। वच्छादो, वच्छादु, वच्छाहि आगदो। वत्सात्। 'ङसेरादोदुहयः' (५-६)। वच्छाण = वत्सेन। 'टामोर्णः' (५-४) ॥ ११ ॥

**जसङस्यांसु दीर्घः**[1]—एषु परेषु अकारस्य दीर्घः स्यात्। जसि-देवा। माणुसा। ङसि-देवाओ, देवाउ, देवाहि, देवाहिन्तो। एवम्—वच्छाओ, वच्छाउ, वच्छाहि, वच्छाहिन्तो। आमि-देवाणं। रक्खसाणं। देवाण। रक्खसाण वा। 'सर्वादिष्विदमो दीर्घो, नत्वन्येषां कदाचन'। इमाओ, इमाउ, इमाहि, इमाहिन्तो। इदम एव दीर्घः, तेनेह न-सव्वतो, सव्वदो। एवम्-तओ, तत्तो, तदो इत्यादि। अदन्तवदिकारादिष्वतिदेशात् जसि-गिरी। तरू। स्त्रियामपि-बुद्धी। धेणू। ङसौ-गिरीओ। तरूओ। बुद्धीओ। धेणूओ। आमि-गिरीणं। तरूणं। बुद्धीणं। 'शसटाङसिषु

---

१. संजीवनीसंमतः पाठः।

दीर्घत्वं वक्तव्यमिदुतोः स्त्रियाम्' । शसि-बुद्धीओ । धेणूओ । टा-ङस्-ङिषु बुद्धीए । बुद्धया, बुद्धेः, बुद्धौ । एवं-धेणूए । धेन्वा, धेनोः, धेनौ ॥ ११ ॥

जसिति । जस्-ङसि-आम् के परे अकार को दीर्घ हो । देवाः-जस् का लोप । अकार को इससे दीर्घ । देवा । एवं मनुष्याः का माणुसा । ङसि के परे अकार को दीर्घ होने से-देवाओ एवं वच्छाओ इत्यादिक सिद्ध होते हैं । एवम्-आम् के परे 'ण' तथा णं, फिर दीर्घ, देवाणं-इत्यादि । सर्वादिकों में इदम्शब्द को जसादिक ३ प्रत्ययों के परे दीर्घ होता है, अन्य सर्वादि शब्दों को नहीं । इमाओ, इमाउ, इमाहि, इमाहिन्तो । 'इदम इमः' से इम आदेश । ङसि के स्थान पर ओ, हि इत्यादि आदेश । दीर्घ । अन्य सर्वादिकों को दीर्घ न होगा । सव्वतो, सव्वदो । तत्-शब्द का तत्तो, तदो इत्यादि में दीर्घ नहीं होगा।'अतः' यह इकारादि का भी उपलक्षक है।अत एव-गिरि+जस् । जस् का लोप । गिरी=गिरयः । तरवः-तरू । साधुत्व पूर्ववत् । स्त्रीलिङ्ग में दीर्घ होता है, अतः बुद्धयः का बुद्धी । धेनवः का धेणू । पञ्चमी एकवचन ङसि में ओकारादि पूर्ववत् । दीर्घ-गिरीओ । तरूओ । स्त्रीलिङ्ग में पूर्ववत् ओकार ङसि के स्थान पर । दीर्घ । बुद्धीओ । धेणूओ । षष्ठीबहुवचन आम् को णं । इकार को दीर्घ । गिरीणं । तरूणं । स्त्रीलिङ्ग में बुद्धीणं । धेणूणं । शस्-टा-ङस्-ङि के परे स्त्रीलिङ्ग में इकार-उकार को दीर्घ होता है । बुद्धि-शस् । 'शस उदेतौ' से शस् को ओकार, दीर्घ । बुद्धीओ एवं धेणूओ । टा-ङस्-ङि को एकार आदेश । इससे दीर्घ । तो तीनों विभक्तियों में बुद्धीए एवम्-धेनु का धेणूए रूप होगा । बुद्धया, बुद्धेः, बुद्धौ के स्थान में बुद्धीए । एवम्-धेन्वा, धेनोः, धेनौ के स्थान पर धेणूए होगा ॥ ११ ॥

## ए च सुप्यङिङसोः ॥ १२ ॥

**अतोऽकारस्यैत्वं भवति सुपि परतो ङिङसौ वर्जयित्वा, चकाराद्दीर्घश्च । वच्छे ( वत्सान् ) पेक्खह । 'जश्शसोर्लोपः' ( ५-२ ) । ( १२-१८ दृश् = पेक्ख, ८-१९ थ् = ह, = पश्यत ) । वच्छेण । 'टामोर्णः' । वत्सेन । वच्छेहिं = वत्सैः । वच्छेसु = वत्सेषु । चकाराद्दीर्घश्चेति । वच्छाहिंतो, वच्छासुंतो = वत्सेभ्यः । भ्यसो हिंतो सुन्तो । अङिङसोरिति किम् ? वच्छम्मि = वत्से । वच्छस्स = वत्सस्य ॥ १२ ॥**

एं सुप्यङिङसोः—अकारस्य एत्वं स्यात्, नतु ङिङसोः । जणे । जणेण । जणेहिं । जणेसु । 'ए सुप्यङिङसोः सूत्रे नेष्टं शेषाददन्तवत्' । इति अदन्तवद्भावाभावात् इह न । शसि-रामाओ । सहीओ । बहूओ । 'स्त्रियां शसि उदोतौ' इत्योकारः । 'जसि दीर्घः शसि त्वेत्वं ष्णान्तां संख्यां विना भवेत्' । पंच, छ, सत्त ॥ १२ ॥

ए सुप्य-इति । ङि ङस् को छोड़ कर अन्यत्र अकार को एकार हो । जन+शस् । 'जश्शसोर्लोपः' इससे शस् का लोप । प्रकृत से एकार । ६ से णकार । जणे । जनेन का जणेणं । जनैः-जणेहिं । 'ए सुप्यङिङसोः' इस सूत्र में इकारादि का अतिदेश नहीं है । अतः रामा । स्त्रीलिङ्ग में एकार नहीं होगा । शस् को ओकार । रामाओ । सखीन् का सहीओ । वधूः का वहूओ । 'स्त्रियां शसि उदोतौ' से ओकार । षकारान्त-नकारान्त

---

१. संजीवनीसंमतः पाठः ।

संख्यावाचक शब्दों को जस् के परे दीर्घ और शस् के परे एकार नहीं होगा। पञ्च का पंच। पट का छ। सप्त का सत्त। साधुत्व पूर्व में गया है ॥ १२ ॥

## क्वचिद् ङसिङ्योर्लोपः ॥ १३ ॥

अतो ङसि, ङि-इत्येतयोः परतः क्वचिल्लोपो भवति। वच्छा आगदो। 'ङसेरादोदुह्वय' इति आ। (आगदो इति आङ्पूर्वकगमेः क्तान्तस्य १२-३ त = द्, ५-१ ओ)। वच्छे ठिअं = वत्से स्थितम्। 'ङेरेम्मी' (५-९) इत्येत्वम्, (ठिअं० स्था = ग्ठा = ठ, शेषं संस्कृतवद्) ॥ १३ ॥

क्वचिदपि लोपः—अजादौ सुपि परे अकारस्य लोपः स्यात्। जम्मो। सप्पा। णहे। क्वचिदित्युक्तेर्नेह-सप्पाउ, सप्पाओ ॥ १३ ॥

क्वचिदिति। अजादि सुप् के परे कहीं लक्ष्यानुरोध से अकार का लोप हो। जन्मन् + सु। सु को ओकार। अन्त्य हल-नकार का लोप करने के अनन्तर इससे 'न्म' के अकार का लोप हो गया। जम्मो। सर्पात् का सप्पा। नभसि का णहे। ङि को एकार होने के अनन्तर भकाराकार का लोप होगा। 'कहीं लोप हो' इससे सर्पशब्द से पञ्चमी में उ-ओ आदेश के परे लोप नहीं होगा। सप्पाउ, सप्पाओ। सर्पात् के रूप हैं ॥

## इदुतोः शसो णो ॥ १४ ॥

इदुदन्तयोः शसो णो भवति। अग्गिणो पेक्खह (४-१२ सूत्रे अग्गि इत्यत्र निष्ठादिनात् शसो णो। अग्नीन्। वाउणो पेक्ख (२-२३ यलोपः, शे० पू०) वायून्। ('पेक्ख' इति शौरसेन्यां दृशेः पेक्खादेशो भवति, तस्याश्च 'प्रकृतिः संस्कृतम्' इति संस्कृतवद् हेर्लुक् भवति) ॥१४॥

इदुतोः शसो णो—पञ्चम्यर्थे षष्ठी। इकारान्तादुकारान्ताच्च प्रातिपदिकात् परस्य शस्प्रत्ययस्य णो-इत्ययमादेशः स्यात्। सहिणो। अग्गिणो। भाणुणो। बाहुणो। 'इदुद्भ्यामुत्तरस्येष्टो वा णो इति ङसेरपि'। जलहिणो, जलहीओ। मेरुणो, मेरूओ ॥१४॥

इदुतोः-इति। इकारान्त उकारान्त प्रातिपदिकों से पर शस्प्रत्यय को 'णो' आदेश हो। सहिणो सखीन् का। अग्नीन् का अग्गिणो। भानून् का भाणुणो। बाहून् का बाहुणो। इकार-उकार से पर ङसि-पञ्चमी के एकवचन में णो विकल्प से हो। जलधेः का जलहिणो। पक्ष में-जलहीउ, जलहीओ इत्यादि। उकारान्त में मेरोः का मेरुणो। पक्ष में-मेरूओ इत्यादि ॥ १४ ॥

## ङसो वा ॥ १५ ॥

इदुदन्तयोर्ङसो वा णो भवति। अग्गिणो, अग्गिस्स (स्पष्टे)। वाउणो, वाउस्स (२-२ यलोपे कृते, ङसो णो, पक्षे ५-८=स्स)। अग्नेः, वायोः ॥ १५ ॥

ङसो वा—इदुद्भ्यामुत्तरस्य ङसो वा णो इत्ययमादेशः स्यात्। हरिणो, हरिस्स।

---

१. एष सञ्जीवनीसम्मतः पाठः।

भाणुणो, भाणुस्स । इंदुणो, इंदुस्स । अग्गिणो, अग्गिस्स । वाउणो, वाउस्स ॥ १५ ॥

ङसो-इति । इकार उकार से पर ङस् को णो विकल्प से हो । हरेः का हरिणो । पक्ष में-हरिस्स । अग्नेः का अग्गिणो, अग्गिस्स । उकारान्त, भानोः का भाणुणो, भाणुस्स । इन्दोः का इंदुणो, इंदुस्स । वायोः का वाउणो, वाउस्स ॥ १५ ॥

## जसश्च ओ यूत्वम्[1] ॥ १६ ॥

इदुदन्तयोर्जस ओकारादेशो भवति, इदुतोश्च ईत्वम्, ऊत्वं वा; चकाराद् णो च । अग्गीओ । वाऊओ । अग्गिणो । वाउणो ( स्पष्टानि ) । अग्नयः । वायवः ॥ १६ ॥

जस ओ वो वाऽत्वं च[2]—इदुद्भ्यामुत्तरस्य जसः ओ-वो-णो इति विकल्पेन आदेशाः स्युः । यत्र ओकारस्तत्रैव सह निर्दिष्टत्वात् इदुतोरकारः । रासओ, रासिवो, रासिणो । पक्षे-रासी । वेणओ, वेणुवो, वेणुणो, वेणू । ओत्वे दीर्घम् । अग्गीओ । वाऊओ—इति भामहः ॥ १६ ॥

जस-इति । इकार उकार से पर जस् को ओ, वो, णो विकल्प से आदेश हों और इ-उ को अकार हो । सूत्र में अनिर्दिष्ट णो का अनुवृत्ति से ग्रहण करना । जहाँ ओकार होगा वहीं साथ में निर्देश के कारण इ उ को अकार होगा । राशि+जस् । जस् को ओकार। इ को अकार। रासओ, रासिवो, रासिणो। पक्ष में-जस् का लोप । दीर्घरासी । उकारान्त-वेणओ, वेणुवो, वेणुणो । पक्ष में-वेणू। भामह-'जसश्च ओ यूत्वम्' ऐसा सूत्र मानकर इकार उकार को ई ऊ मानते हैं, तब-अग्गीओ, वाऊओ रूप होंगे ॥ १६ ॥

## टा णा ॥ १७ ॥

इदुदन्तयोष्टाविभक्तेः णा इत्ययमादेशो भवति । अग्गिणा । वाउणा ( स्पष्टे ) । अग्निना । वायुना ॥ १७ ॥

टा णा—इदुद्भ्यां परस्य टा इत्यस्य णा स्यात् । अग्गिणा । वाउणा ॥ १७ ॥

टा णा-इति । इकार उकार से पर टा को णा हो । अग्निना का अग्गिणा । वायुना का वाउणा ॥ १७ ॥

## सुभिस्सुप्सु दीर्घः ॥ १८ ॥

इदुदन्तयोः सु, भिस्, सुप् इत्येतेषु दीर्घो भवति । सु, अग्गी ( ३-२ नलोपः, ३-५० गद्वि०, ४-६ सोर्लोपः, शे० स्प० ) । अग्निः । वाऊ (२-२ यलोपः, शे० स्प० ) । वायुः । भिस्, अग्गीहिं ( ४-६ सोर्लोपः, ५-५ भिस् = हिं, ) । अग्निभिः । वाऊहिं (२-२ यलोपः, शे० पू०) । वायुभिः । सुप्, अग्गीसु ( ३-२ नलोपः, ३-५० गद्वि०, दीर्घः, २-४३ ष् = स् ) । अग्निषु । वाऊसु (२-२ यलोपः, दीर्घः, २-४३ ष् = स् ) । वायुषु ॥१८॥

---

१. जस ओ वो वाऽत्व यूत्वं च । इदुदन्तयोः शब्दयोर्जस ओ वो इत्यादेशौ भवतः । अत्वम्, ईत्वम्, ऊत्वं च विकल्पेन । चकारात् णोऽपि । पक्षे-अदन्तवत् । अग्गीओ, अग्गीवो, अग्गी । वाऊओ । जसश्च ओ यूत्वं । का० पा० । २. संजीवन्यादिषु पाठोऽयम् ।

**सुभिस्सुप्सु दीर्घः**—एषु इदुतोर्दीर्घः स्यात् । पंती । तणू । पंतीहिं । तणूहिं । पंतीसु । तणूसु । क्वचिदित्युक्तेः भूमिसु-इत्यादौ न ॥ १८ ॥

सुभीति । सु-भिस्-सुप् के परे इकार-उकार को दीर्घ हो । पङ्क्तिः-पंती । तनुः-तणू । पङ्क्तिभिः का पंतीहिं । तनुभिः का तणूहिं । पङ्क्तिषु का पंतीसु । तनुषु का तणूसु । कहीं पर दीर्घ न हो । तो भूमिशब्द में दीर्घ नहीं होगा । भूमिसु । (प्रतिपादित स्वरूप पूर्वोक्त ( ८+६+२०+१+९+४ ) से सिद्ध होते हैं ॥ १८ ॥

## स्त्रियां शस उदोतौ[1] ॥ १९ ॥

**स्त्रियां वर्तमानस्य शस उत् ओत् इत्येतावादेशौ भवतः । मालाउ, मालाओ । (स्पष्टे) । मालाः । णईउ, णईओ (२-३८ न्=ण् , २-२ दलोपः, शे० स्प०) । नदीः । बहूउ, बहूओ (२-२७ ध् = ह् , शे० स्प०) । वधूः ॥**

**स्त्रियां शस उदोतौ**—स्त्रीलिङ्गे वर्तमानात् प्रातिपदिकात् परस्य शस उत्वमोत्वं च स्याताम् । रामाउ-रामाओ । जुवईउ-जुवईओ । बहूउ, बहूओ ॥ १९ ॥

स्त्रियाम्-इति । स्त्रीलिङ्ग में वर्तमान प्रातिपदिक से पर शस् को उकार ओकार हों । रामाः का रामाउ, रामाओ । युवतीः का जुवईउ, जुवईओ । वधूः का बहूउ, बहूओ ॥ १९ ॥

## जसो वा[2] ॥ २० ॥

**जसः स्त्रियाम् उत् ओत् इत्येतावादेशौ वा भवतः । पक्षे-अदन्तवत् । मालाउ, मालाओ । माला ( स्प०, अदन्ते ५-२ जसो लोपः ) । मालाः ॥ २० ॥**

**जसो वा**—स्त्रीलिङ्गे वर्तमानात्प्रातिपदिकात् परस्य जस इत्येतस्य उ ओ इत्येतौ वा स्याताम् । रेहाउ, रेहाओ । मईउ, मईओ । धेणूउ, धेणूओ । देईउ, देईओ । बहूउ, बहूओ ॥ २० ॥

जसो-इति । स्त्रीलिङ्ग प्रातिपदिक से पर जस् को उ, ओ विकल्प से हों । रेखाः का रेहाउ, रेहाओ । पक्ष में-यथाप्राप्त । रेहा । मतीः का मईउ, मईओ । धेनूः का धेणूउ, धेणूओ । देवीः का देईउ, देईओ । वधूः का बहूउ, बहूओ ॥ २० ॥

## अमि ह्रस्वः ॥ २१ ॥

**अमि परतः स्त्रियां ह्रस्वो भवति । मालं ( ह्रस्वे जाते, ५-३ अकारलोपः, ४-१२ मकारबिन्दुः ) । मालाम् । णइं ( २-४२ न्=ण्, २-२ दलोपः, ४-१ अमोऽकारलोपः, ४-१२ बिं० ) । नदीम् । बहुं ( २-२७ ध्=ह्, शे० पूर्व० ) वधूम् ॥ २१ ॥**

**अमि ह्रस्वः**—अमि परे दीर्घस्य ह्रस्वः स्मात् । धारं । णइं । बहुं ॥ २१ ॥

अमीति । स्त्रीलिङ्ग में अम् के परे दीर्घ को ह्रस्व हो । धाराम् का धारं । नदीम् का णइं । वधूम् का बहुं ॥ २१ ॥

---

१. स्त्रियां जश्शसोरुदोतौ । का० पा० । २. जसो वा । का० पा० ।

## टाङसूङीनामिदेददातः[1] ॥ २२ ॥

टा, ङस्, ङि, इत्येतेषां स्त्रियाम् इत्, एत्, अत्, आत् इत्येत आदेशा भवन्ति । टा, णईइ, णईए, णईअ, णईआ कअं । ( ५-२१ सूत्रे नकारस्य णः, दलोपश्च दर्शितः, शे० स्प० ) । नद्या । कअं इति ( १-२७ सू० स्प० ) कृतम् । ङस्, णईइ, णईए, णईअ, णईआ, वणं । ( णई पूर्ववत्, अन्यत्स्पष्टम् ) । नद्याः । ( वणं इति ४-१२ सू० स्प० ) । ङि, णईइ, णईए, णईअ, णईआ, ठिअं ( पूर्ववत् णईशब्दः, शे० सुगमम् ) नद्याम् । ( ठिअं इति ५-१२ सू० स्पष्टम् । ) स्थितम् ॥ २२ ॥

टाङसूङीनामिदेददातः—स्त्रीलिङ्गात् प्रातिपदिकात्परेषां टा-ङस्-ङि-इत्येतेषाम् . इत्, एत्, अत्, आत्, इत्येते एकैकस्य चत्वार आदेशा भवन्ति । बुद्धीइ, बुद्धीए, बुद्धीअ, बुद्धीआ । धेणूइ, धेणूए, धेणूअ, धेणूआ ॥ २२ ॥

टाङसिति । स्त्रीलिङ्ग प्रातिपदिक से पर टा-ङस्-ङि इनमें प्रत्येक को इकार, एकार, अकार, आकार ये चारों आदेश होंगे । जैसे-बुद्धया तृतीया एकवचन में-बुद्धीइ, बुद्धीए, बुद्धीअ, बुद्धीआ । इन चारों आदेशों से चार रूप होंगे । एवम्-बुद्धयाः षष्ठी में, बुद्धौ सप्तमी में भी पूर्वोक्त बुद्धीइ, बुद्धीए, बुद्धीअ, बुद्धीआ-रूप होंगे । धेनु के भी धेन्वा, धेन्वाः, धेनौ में धेणूइ, धेणूए, धेणूअ, धेणूआ होंगे ॥ २२ ॥

## नातोऽदातौ ॥ २३ ॥

आत आकारान्तस्य स्त्रीलिङ्गस्यानन्तरं टा-ङस्-ङीनाम् अत्, आत्, इत्येतावादेशौ न भवतः । पूर्वेण प्राप्तौ निषिध्येते । मालाइ, मालाए कअं, वणं, ठिअं । ( ५-२२ सूत्रादिदेतावेव भवतः, अ० स्प० ) मालया ॥ २३ ॥

नातोऽदातौ—आकारान्तात्स्त्रीलिङ्गात्परेषां टादीनामदातौ न स्तः । किन्तु इत् एतौ एव भवतः । मालाइ, मालाए । रमाइ, रमाए ॥ २३ ॥

नातो-इति । आकारान्त स्त्रीलिङ्ग से पर टा-ङस्-ङि इनको अत् आत् नहीं होंगे । परिशेषात्-इकार, एकार होंगे । मालया का मालाइ, मालाए । एवं षष्ठी-सप्तमी में भी ये ही रूप होंगे । एवम्-रमाशब्द का तृतीया, षष्ठी, सप्तमी के एकवचन में रमाइ, रमाए होंगे ॥ २३ ॥

## आदीतौ[2] बहुलम् ॥ २४ ॥

स्त्रियामाकारान्तादातः स्थाने आत्, ईत् इत्येतौ बहुलं प्रयोक्तव्यौ । सहमाणा, सहमाणी ( २-४२ न् = ण्, शे० स्प० ) । हलद्दा, हलद्दी (१-१३ सूत्रे द्रष्टव्ये ) । सुप्पणहा, सुप्पणही ( ३-३ रलोपः, ३-५० पद्वि०,

---

१. टाङसिङसूङीनामिदेददातः । का० पा० । २. आदितौ-अदितौ । का० पा० ।

४-१ ह्रस्वः, २-४२ न् = ण्, २-२७ ख् = ह्, शे० स्प० )। छाहा, छाही। ( २-११ सू० द्रष्टव्यं, शे० स्प०' ) ॥ २४ ॥

आदीतौ बहुलम्—स्त्रीलिङ्गे वर्तमानात्प्रातिपदिकात् आ ई एत्येतौ भवतः। काइ, कीअ। जाइ, जीअ, जीआ, जीइ, जीए। इत्यादि। ताइ ताए। तीइ, तीए, तीअ, तीआ। एवं हलिद्दा, हलिद्दी। सुप्पणहा, सुप्पणही। बहुलग्रहणात् क्वचिदाकार एव—असहणा। कोवणा। क्वचिदीकार एव—माणिणी। मणंसिणी ॥ २४ ॥

आदीतौ इति। स्त्रीलिङ्ग में विद्यमान प्रातिपदिक से पर आ ई ये दो प्रत्यय 'टाप् ङीप्' के समान टादिक के परे होते हैं। काइ, एवं काए। 'नातोऽदातौ' से निषेध होने से अकार आकार टादिक को नहीं होंगे। ईकार में चारों होंगे। जैसे—कीइ, कीए, कीअ, कीआ इत्यादि। एवं यद्-शब्द को और तद्-शब्द को भी जानना। कया, कस्याः कस्याम्-इत्यादि में समान रूप होंगे। हरिद्रादिशब्दों में (२०+२५+६+९+१५+४+( द्वि० २०)।१+२६+३+१८+५+२+१६+१२। ११) से सभी प्रयोग सिद्ध होते हैं। आकार में हलिद्दा, ईकार में हलिद्दी। बहुलग्रहण से कहीं आकार ही होगा असहना, कोपना। कहीं ईकार ही होगा। मानिनी, मनस्विनी। प्रायः पाणिनीय व्याकरणानुसार आ-ई की व्यवस्था जानना ॥ २४ ॥

## न नपुंसके ॥ २५ ॥

**प्रथमैकवचने नपुंसके दीर्घत्वं न भवति। 'सौ दीर्घः पूर्वस्ये'त्यनेन इदुदन्तयोः प्राप्तं पूर्वस्य दीर्घत्वं 'न नपुंसके' इत्यनेन बाध्यते। दिहं (५-३० सोर्बिन्दुः, शे० स्प० )। महुं ( २-२७ ध् = ह्, शे० स्प० )। हविं ( ४-६ षलोपः, २-२ प्रायो-ग्रहणात् वलोपो न, शे० पू० )। दधि, मधु, हविः ॥ २५ ॥**

## इज्जश्शसोर्दीर्घश्च ॥ २६ ॥

**नपुंसके वर्तमानयोर्जश्शसोः स्थान इदादेशो भवति, पूर्वस्य च दीर्घः। वणाइ (२-४२ न्-ण्, जश्शसोरिदादेशः पूर्वस्य दीर्घः)। वनानि। दहीइ। महूइ ( पू० ) ॥ २६ ॥**

इं[3] जश्शसोर्दीर्घः—नपुंसके जस्-शसोः इं इत्यादेशः स्यात्, पूर्वस्य च दीर्घः। पुण्णाइं, रण्णाइं। जाइं। ताइं। दहीइं। महूइं। क्वचित् निकारोऽपि। अच्छीणि॥

इं जश्शसोरिति। नपुंसकलिङ्ग में जस् और शस् को इं आदेश हो और पूर्व को दीर्घ हो। पुण्यानि = पुण्णाइं। जस् को इं, पूर्व को दीर्घ। अन्य साधुत्व उक्त नंबरों

---

१. यत्तत्किमः। बहुलमित्यनुवर्तते। यत्तत्किमित्यनुवर्तते। यत्तत्किमित्येतेषु परतः आतः स्थाने ईत्ययमादेशो भवति। स्त्रियामित्यनुवर्तते। प्रथमैकवचनवर्जं ए आदेशश्च, बहुलवचनात्। जीए, तीए, कीए। जीहिं, तीहिं, कीहिं। पक्षे-जाए, ताए, जाहिं, काहिं। यस्याः, तस्याः, कस्याः। याभिः, ताभिः, काभिः। इति क्वचिदधिकः पाठः। का० पा०। २. नेदं सूत्रं मंजीर्यादौ, अतो नास्य चन्द्रिकाप्रदीपाख्ये सं० हि० टीके। ३. एष संजीवनीसंमतः पाठः।

से कर लेना। एवम्-अरण्यानि का रण्णाइं। 'लोपोऽरण्ये' से अकारलोप। यानि-जाइं। तानि-ताइं। दधीनि-दहीइं। मधूनि-महूइं। कहीं निकार भी हो। अक्षीणि का अच्छीनि ॥ २६ ॥

## नामन्त्रणे सावोत्वदीर्घबिन्दवः ॥ २७ ॥

आमन्त्रणे गम्यमाने सौ परत ओत्वदीर्घबिन्दवो न भवन्ति। 'अत ओत् सो'रित्योत्वं प्राप्तम्। 'सुभिस्सुप्सु दीर्घः' इति दीर्घः। 'सोर्बिन्दुर्नपुंसके' इति बिन्दुः प्राप्तः। हे वच्छ, हे अग्गि, हे वाउ, हे वण, हे दहि, हे महु (व्याख्यातप्रायाः पूर्वमेव, विशेषकृत्यं सुस्पष्टम्) ॥ २७ ॥

नामन्त्रणे सावोत्वदीर्घबिन्दवः—संबोधने सुप्रत्यये ओत्वादय आदेशा न स्युः। (ओ) हे वल्लह! (दीर्घः) हे ससि। अरे धण। क्वचिद्दीर्घत्वमपि। हे पहू। रे णिग्घणा ॥ २७ ॥

नामन्त्रणे इति। आमन्त्रण-संबोधन में सुप्रत्यय के परे ओत्वादिक आदेश नहीं होते हैं। जैसे-हे वल्लभ! यहाँ ओकार नहीं होगा। हे वल्लह! हे ससि! अरे धण! यहाँ दीर्घ, अनुस्वार नहीं होगा। कहीं दीर्घ भी हो जायगा। जैसे—हे प्रभो का हे पहू। रे णिग्घणा ॥ २७ ॥

## स्त्रियामात एत् ॥ २८ ॥

स्त्रियामामन्त्रणे आतः स्थाने एत्वं भवति सौ परतः। हे माले, हे साले। (स्पष्टे) 'अन्त्यस्य हल' इति सोर्लोपः ॥ २८ ॥

आत ए[1]—आमन्त्रणे सौ स्त्रियामाकारस्य एकारः स्यात्। हे बाले। आमन्त्रणे क्वचिदेत्वं न। हे माउच्छा। हे पिउच्छा। हे अत्ता ॥ २८ ॥

आत इति। स्त्रीलिङ्ग में संबुद्धि-सु के परे आकार को एकार हो। हे बाले। हे गंगे इत्यादि। कहीं आमन्त्रण में एकार न हो। जैसे मातृष्वसा का माउच्छा, संबोधन में भी ऐसा रहेगा। एवं हे पितृष्वसः का हे पिउच्छा, हे श्वश्रूः का हे अत्ता ॥ २८ ॥

## ईदूतोर्ह्रस्वः ॥ २९ ॥

आमन्त्रणे ईदूतोर्ह्रस्वो भवति। हे णइ, हे बहु ॥ २९ ॥

ईदूतोर्ह्रस्वः—आमन्त्रणे सौ परे स्त्रियामीकारस्योकारस्य च ह्रस्वः स्यात्। अयि माणिणि। हे बहु ॥ २९ ॥

ईदूतोरिति। संबोधन अर्थ में सु के परे स्त्रीलिङ्ग प्रातिपदिक के ईकार ऊकार को ह्रस्व हो। हे मानिनि का हे माणिणि। एवं हे वहु। हे णदि इत्यादि ॥ २९ ॥

## सोर्बिन्दुर्नपुंसके ॥ ३० ॥

नपुंसके वर्तमानस्य सोर्बिन्दुर्भवति। वणं, दहिं, महुं। (स्प०) ॥३०॥

नपुंसके सोर्बिन्दुः[2]—नपुंसके प्रातिपदिकात् सोर्बिन्दुरादेशः स्यात्। वअणं, रअणं, दहिं, महुं, धणुं ॥ ३० ॥

---

१. संजीवन्यादिसंमतः पाठः। २. संजीवन्यनुसारी पाठ एषः।

नपुंसके इति । नपुंसकलिङ्ग प्रातिपदिक से पर सो को बिन्दु हो । वचनम् का वअणं । रत्नम् का रअणं । दहिं । महुं । धणुं । स्पष्ट हैं ॥ ३० ॥

## ऋत आरः सुपि[1] ॥ ३१ ॥

ऋकारान्तस्य सुपि परत आर इत्यादेशो भवति। भत्तारो सोहइ (३-३ रलो०, ३-५० तद्वि, ५-१ ओ ) भर्ता । (२-४३ श् = स् , युवर्णस्य गुणः, २-२७ भ् = ह् , ७-१ त = इ) शोभते । भत्तारं पेक्खमु (५-३ अमोऽकार-लोपः, ४-१२ मबिं०, शे० पू० ) भर्तारम् । ( १२-१८ दृश = पेक्ख, ७-४ मु ) पश्यामः । भत्तारेण कअं ( ५-१२ एत्वं, ५ = ४ टा = ण ) ॥ ३१ ॥

ऋत आरः सुपि । स्वादौ विभक्तौ ऋकारस्य आरः स्यात् । भत्तारो । अदन्तवत् ॥

ऋत इति । स्वादिकविभक्ति के परे ऋकार को आर हो। भर्तृशब्द के ऋकार को आर होने के बाद अकारान्त शब्द की तरह 'अत ओत्सोः' से ओ । भत्तारो ॥ ३१ ॥

## मातुरात् ॥ ३२ ॥

मातृसम्बन्धिन ऋकारस्याकारो भवति । माआ ( २-२ तलोपः ) । सोहइ ( २-४३ श् = स् , सोहन्तिवत् गुणः, ७-१ इ ) शोभते । माअं पेक्खसु ( ३-३ तलोपः, ह्रस्वः, ५-३ अमोऽकारलोपः ४-१२ बिं० । अ० स्प०) । माआइ, माआए (२-२ तलोपः, ५-२२ अत्वे कृते) कअं ॥३२॥

मातुरा[1] । मातृशब्दे ऋकारस्य आ स्यात् । माआ । णणंदा । अत्र मण्डूकप्लुत्या पूर्वनकारस्य न णकारः ॥ ३२ ॥

मातुरिति । मातृशब्द के ऋकार को सब विभक्तियों के परे आकार हो । ( १ ) माआ, माआओ । ( २ ) माअं, माआओ । ( ३ ) माआइ, माआहिं । ( ४ ) चतुर्थी प्राकृत में नहीं होती । ( ५ ) माआउ, माआहिन्तो । ( ६ ) माआइ, माआणं । ( ७ ) माआए, माआसु । ( संबुद्धौ ) हे माए, हे माआओ—इत्यादि । मातृशब्द के समान ननान्द—शब्द को भी जानना । पूर्व नकार को णकार नहीं होगा । णणंदा, णणंदाओ इत्यादि मातृ के समान ॥ ३२ ॥

## उर्ज्जश्शस्टाङस्सुप्सु वा[3] ॥ ३३ ॥

जश्शस्टाङस्सुप्सु परत ऋकारस्य स्थाने उकारादेशो भवति वा । जस् , भत्तुणो ( ३-३ रलोपः, ३-५० तद्वि०, ५-१६ णो ) । भत्तारा (५-३१ ऋ = आर, णो, शे० पू० ) । भत्तारे ( ५-३१ आर, ५-१२ एत्वं, ५-२ शसो लोपः, शे० पू० ) । टा, भत्तुणा ( ५-१७ टा = णा, शे० पू० ) भत्तारेण (पू० व० रलोपादिकं, ५-३१ आर, ५-१२ एत्वं, ५-४ टा-ण) । ङस् , भत्तुणो ( ५-१५ णो, शे० पू० ) । भत्तारस्य ( रलोपे तद्वित्वे च

---

१. सौ । का० पा० । २. एष पाठः संजीवन्यादौ । ३. उण जश्शस्टाङसिङस्सु वा । का० पा० ।

कृते ५-३१ आर, ५-८ ङसः स्सः ) सुप्, भत्तूसु ( ५-११ दीर्घः, शे० स्प० )। भत्तारेसु ( ५-२२ एत्वं, शे० पू० ) ॥ ३३ ॥

उ जस्शस्टाङस्सु[1] वा—जस्-शस्-टा-ङस्-सु परतः ऋत उत्वं वा स्यात्। भत्तू, भत्तारो। भत्तूणो, भत्तारे। भत्तुणा, भत्तारेण। भत्तुणो, भत्तारस्स ॥ ३३ ॥

उ जसिति। जस्-शस्-टा-ङस् के परे ऋकार को उकार विकल्प से हो। पक्ष में-आर। ( १ ) भत्ता, भत्तू, भत्तारा। ( २ ) भत्तारं, भत्तुणो, भत्तारे। ( ३ ) भत्तुणा, भत्तारेण, भत्तारेहिं। ( ५ ) भत्ताराउ, भत्ताराओ, भत्तारेहिन्तो। ( ६ ) भत्तुणो, भत्तारस्स, भत्ताराणं। भत्तारे, भत्तारम्मि, भत्तारेसु। आर आदेश करने पर अकारान्त ग्रामशब्द के समान रूप होंगे और तत्तद्विभक्ति में उकार करने पर पूर्वोक्त सूत्रों से तथाकथित रूप होंगे ॥ ३३ ॥

## पितृभ्रातृजामातृणामरः ॥ ३४ ॥

पित्रादीनां सुपि परत ऋतोऽरो भवति। आरापवादः। पिअरं ( २-२ तलोपः, ५-३ अमोऽकारस्य लोपः, ४-१२ मो बिन्दुः )। पिअरेण ( ५-१२ एत्वं, ५-४ टा = ण, शे० पू० )। भाअरं, भाअरेण। जामाअरं, जामाअरेण ( पूर्ववत् ) ॥ ३४ ॥

पितृभ्रातृजामातृणामरः—एषां सुपि अरः स्यात्। सौ, पिआ। वक्ष्यमाणेन ( ३४ ) आकारः। जसि-पिअरा। जामाअरा। जस्शस्टाङस्सु पूर्वसूत्रानुवृत्तितः वा उकारः। पिऊ। भाऊ। जामाऊ। शसि, पिउणो। भाउणो। जामाउणो। पक्षे-पिअरे। भाअरे। जामाअरे। टाप्रत्यये, पिउणा। भाउणा। जामाउणा। पक्षे पिअरेण। भाअरेण। जामाअरेण। ङसि, पिउस्स। भाउस्स। जामाउस्स। पक्षे पिअरस्स। भाअरस्स। जामाअरस्स ॥ ३४ ॥

पितृ-इति। पितृभ्रातृजामातृ-शब्द के ऋकार को अर हो, सुप्-प्रत्याहार के परे। पिआ, वक्ष्यमाण ३४ सूत्र से आकार आदेश। जस् के परे अर आदेश। पिअरा। भ्रातृ का भाअरा, जामातृ का जामाअरा। इन शब्दों को जस्-शस्-टा-ङस् के परे उकार भी हो। पितृ + जस्। ऋ को उकार, 'कगचजतद०' से तलोप। उकार होने पर अदन्तभाव मानकर जस् का लोप, उकार को दीर्घ। पिऊ। इसी तरह भ्रातृ, जामातृ का जानना। शस् के परे उकार। पक्ष में-'इदुतोः शसो णो' से णो। पिउणो। पक्ष में-अर, शस् का लोप, 'ए सुप्यङि०' से एकार। टा-पिउणा, पक्ष में-पिअरेण इत्यादि। इसीतरह भ्रातृ, जामातृ का जानना ॥ ३४ ॥

## आ च सौ[2] ॥ ३५ ॥

पित्रादीनामाकारो भवति सौ परतः। चकारादरश्च। पिआ ( स्पष्टम् )। पिअरो (५-१ ओ, शे० स्प०)। भाआ, भाअरो। जामाआ, जामाअरो ॥३५॥

---

१. संजीवनीसमत एष पाठः। २. आच्च सौ। का० पा०।

आ च सौ—एषाम् ऋत आकारः स्यात्सौ परे। चकारादरश्च। पिआ, पिअरो। भाआ, भाअरो। जामाआ, जामाअरो। आमन्त्रणेऽप्येवम्। हे पिआ। हे भाआ। हे जामाआ। 'पित्रादिभ्यः परस्यापि सादाकार ऋतो मतः'। भत्ता। कत्ता। पोत्ता॥३५॥

आ च-इति। पितृ-भ्रातृ-जामातृ-शब्द के ऋ को आ हो, चकार से अर भी हो सु के परे। पिआ। अर होने पर अदन्त ग्रामशब्द की तरह 'अत ओत्सोः' से ओ। पिअरो। संबोधन में भी आकार होगा। हे पिआ, पक्ष में-हे पिअर। पित्रादिक के अतिरिक्त अन्य ऋकारान्त शब्द के भी ऋ को सु के परे आ होगा। भर्तृ-भत्ता। कर्तृ-कत्ता॥ ३५॥

## राज्ञश्च॥ ३६॥

**राजन्-शब्दस्य आ इत्ययमादेशो भवति सौ परतः। राआ (स्पष्टम्)॥**

राज्ञः[1]—राजन्-शब्दस्य सौ परे आकार आदेशः स्यात्। राआ॥ ३६॥

राज्ञ इति। राजन्-शब्द को सु के परे आकार आदेश हो। राआ। हल् स् का लोप॥ ३६॥

## आमन्त्रणे वा बिन्दुः॥ ३७॥

**राजन्-शब्दस्य आमन्त्रणे वा बिन्दुः स्यात्। हे राअं (४-६ नूलोपः, २-२ जलोपः, शेषमदन्तवत्)। हे राअ (५-२७ बिन्दुर्न)॥ ३७॥**

आमन्त्रणे बिन्दुर्वा[2]—राजन्-परस्य आमन्त्रणेऽर्थे सुप्रत्ययस्य वा बिन्दुः स्यात्। हेराअं, हेराआ, हेराअ। 'बिन्दुदीर्घौ विनाऽह्वाने राज्ञो हेराअ इत्यपि'। 'भवद्भगवतोर्बिन्दुः सावनामन्त्रणेऽपि च'। चकारादामन्त्रणेऽपि। भवं। भअवं। हेभवं। हेभअवं॥ ३७॥

आमंत्रणे इति। संबोधन में राजन्-शब्द से पर सुप्रत्यय को अनुस्वार विकल्प से हो। 'कगचज॰' से जकारलोप। सु को अनुस्वार। हे राअं। पक्ष में-हे राआ। संबोधन में बिन्दु और दीर्घ के बिना भी जब राजन्-शब्द होगा, तब हे राअ—यह प्रयोग होगा। 'भवत् और भगवत् शब्द को अनामन्त्रण में और चकार से आमन्त्रण में भी सु को बिन्दु हो। भवान्-भवं। भगवान्-भगवं। इसी तरह संबोधन में-हे भवं। हे भअवं॥ ३७॥

## जश्शसङसां णो॥ ३८॥

**राज्ञ उत्तरेषां जस्-शस्-ङस् इत्येतेषां णो इत्ययमादेशो भवति। राआणो (पूर्ववत् नलोपे कृते, ५-४४ ज = आ, शे॰ स्प॰)। पेक्खन्ति (पूर्ववत् दृशेः पेक्ख आदेशे, झिस्थाने ७-४ न्तिः) राजानः पश्यन्ति। राआणो पेक्ख (शसि रूपमेतत्, स्पष्टं पूर्ववत्), राज्ञः पश्य। राइणो धणं (४-६ नलोपः, २-२ जलोपः, ५-४३ इः)। राज्ञः। (रण्णो धणं २-**

---

१. संजीवनीस्थः पाठः। २. किञ्चिद्वैपरीत्येनायं पाठः संजीवन्याद्यनुसारी।

२ जलोपः, ५-४२ णद्वि०, अन्त्यलोपश्च, अलोपो, ह्रस्वश्च संयोगे ४-१ सूत्रे द्रष्टव्यम्) ॥ ३८ ॥

जश्शसङसां णो- राजन्शब्दात्परेषामेषां णो इत्ययमादेशः स्यात् जश्शसोः। जसि-राआणो होहिस्संति। शसि-राआणो पेच्छ। ङसि-राआणो पुत्तो ॥ ३८ ॥

जसिति। राजन्-शब्द से पर जस्-शस्-ङस् इनको णो आदेश हो और आकार आदेश हो। राजन्+जस्। जस् को णो आदेश और अकार को आकार। राआणो। एवं शस् और ङस् के परे भी राआणो होगा। केवल वाक्य में विभक्तिभेद मालूम होगा। जैसे, जस् में-राजानो भविष्यन्ति, राआणो होहिस्संति। शस् में-राज्ञः पश्य, राआणो पेच्छ। ङस् में-राज्ञः पुत्रः, राआणो पुत्तो। परंतु प्राकृत में राइणो यही होगा॥ ३८ ॥

## शस एत् ॥ ३९ ॥

राज्ञः परस्य शस ए इत्ययमादेशो भवति। राए पेक्ख (नजयोः पूर्ववल्लोपः, ४-१ आलोपः) राज्ञः। (पूर्ववत् पेक्खादेशः) पश्य। राआणो पेक्ख (पूर्वसूत्रे स्पष्टम्) ॥ ३९ ॥

शस एच्च[1]—राजन्-शब्दात्परस्य शस एकारः स्यात्। चकारात् णो अपि। राए। राआणो। अनेनैव आदेशद्वयसिद्धे पूर्वसूत्रे शसग्रहणमपार्थम् ॥ ३९ ॥

शस इति। राजन्-शब्द से पर शस्प्रत्यय को एकार हो। चकारग्रहण से ओकार भी हो। राए, राआणो। इसीसे णो आदेश भी सिद्ध था फिर पूर्वसूत्र में शस् का ग्रहण निरर्थक है॥ ३९ ॥

## आमो णं ॥ ४० ॥

राज्ञः उत्तरस्यामः षष्ठीबहुवचनस्य णं इत्ययमादेशो भवति। राआणं (४-६ नलोप, ५-४४ ज = आ)। राज्ञाम् ॥ ४० ॥

अमो[2] णं—राजन्-शब्दात्परस्य अमो णं इत्यादेशः स्यात्। राआणं। राजानम् ॥ ४० ॥

अमो-इति। राजन्शब्द से पर अम् को णं आदेश हो। इससे अम् को णं। वक्ष्यमाण-'आ णोणमो०' ४३ से आकार। राआणं ॥ ४० ॥

## टा णा ॥ ४१ ॥

राज्ञ उत्तरस्याः टाविभक्ते णा इत्ययमादेशः स्यात्। राइणा (४-६ नलोपे, ५-४३ ज = इ, शे० स्प०) राज्ञा ॥ ४१ ॥

टा णा—राजन्-शब्दात् परस्य टा इत्यस्य णा स्यात्। राइणा ॥ ४१ ॥

टा णा इति। राजन्-शब्द से पर टा को णा हो। इससे णा। इदृद्धित्वे ४२ से इकार। राइणा ॥ ४१ ॥

---

१. सुबोधिनीसंमतः पाठः। २. सुबोधिनीस्थः पाठः।

## ङसश्च द्वित्वं वान्त्यलोपश्च[1] ॥ ४२ ॥

**राज्ञ उत्तरस्य ङसादेशस्य टादेशस्य च वा विकल्पेन द्वित्वं भवति, अन्त्यस्य च लोपः। रण्णो (५-३८ सूत्रे स्पष्टम्)। राइणो धणं। (५-४१ सूत्रे स्प०)। रण्णा, राइणा कअं (४-६ नलोपः, ५-४१ टा = णा, द्वित्वे, अन्त्यजलोपे ह्रस्वे च) ॥ ४२ ॥**

ङसश्च द्वित्वं वा जलोपश्च[2]—राजन्शब्दात्परस्य ङसादेशस्य णो इत्यस्य द्वित्वं वा स्यात्, जलोपश्च। सहपठितत्वात् यत्र द्वित्वं तत्रैव जलोपः। 'कगचजे'ति-जलोपे सिद्धे सस्वरलोपार्थमयमारम्भः। चकारात् 'णा' इत्यस्यापि परिग्रहः। रण्णो, पक्षे-राइणो। टा-रण्णा, राइणा। ङसिं-'णो ङसेर्णत्वद्वित्वं स्यात्, राज्ञो लोपश्च जस्य वा'। रण्णो, राइणो, राआ, राआओ, राआउ, राआहिन्तो ॥ ४२ ॥

ङस इति। राजन्-शब्द से पर ङसादेशसम्बन्धी णो को विकल्प से द्वित्व हो और जकार का लोप हो। जहाँ द्वित्व होगा वहीं जकार का लोप होगा। 'कगचज०' से जलोप सिद्ध था फिर जलोप का विधान सस्वरजकार-ग्रहणार्थ है। 'जस्-शस्-ङसां०' से णो आदेश, इससे द्वित्व, जकारलोप। रण्णो। पक्ष में-'इदद्वित्वे' से इकार। राइणो। चकार से टा के णा को भी द्वित्व, जलोप। रण्णा। पक्ष में-राइणा। 'ङसि'-पञ्चमी के एकवचन ङसि को णो आदेश, णद्वित्व, जकार का लोप हो।' रण्णो, पक्ष में-राइणो। 'ङसेरादो०' से राआ, राआओ, इत्यादि होंगे। रण्णो इत्यादि में नं० ११ से ह्रस्व है ॥ ४२ ॥

## इदद्वित्वे ॥ ४३ ॥

**वेति निवृत्तम्। ङसादेशस्य टादेशस्य च अकृते द्वित्वे राज्ञ इत्वं भवति। राइणा, राइणो (स्प०)। कृते द्वित्वे त्वित्वं न भवति। रण्णा, रण्णो (५-४२ सू०, ५-२८ सूत्रे च स्पष्टम्) ॥ ४३ ॥**

इदद्वित्वे—राजन्शब्दस्य इत्वं स्यात्, नतु द्वित्वे। जसि शसि-राइणो। ङौ-राइम्मि, राअम्मि। अद्वित्वे सर्वत्रैवेकारे सिद्धे 'भिस्भ्यसोः आम्सुपोरित्वं राज्ञोऽकारस्य चेष्यते'। इति मन्दप्रयोजनम्। भिसि-राइहिं, राएहिं। इत्यादि ज्ञेयम्। 'ङसिङ्यो-र्जश्शसो राज्ञ इर्वाऽऽदेशोऽनजादिके'। जसि-राइणो। पक्षे-राआणो। एवं शसि अपि। ङसि-राइणो। पक्षे-रण्णो। ङौ-राइम्मि। पक्षे-राअम्मि ॥ ४३ ॥

इद्-इति। राजन्-शब्द के अकार को इकार हो द्वित्वविषय को छोड़ कर अर्थात् जहाँ णकार को द्वित्व हुआ होगा वहाँ इकार नहीं होगा। राइणा, राइणो इत्यादि। भिस्भ्यस्० इत्यादि के परे 'इदद्वित्वे' से इकार सिद्ध है फिर यह वार्तिक निरर्थक है।

---

१. ङस्-ङसि-टां णोणो ङण् २-२५९। राजन् शब्दस्य अना सहितस्य जस्य ङस्, ङसि, टावचनानां णो, णा, इत्यादेशौ, तयोः परयोर्ङण् इत्यादेशो वा भवति। टिलोपः। रण्णा, राजन् णा कृते 'अन्त्यहल' इति नकारलोपे जस्य ङण् राकारस्याकारस्य टिलोपे च कृते रण्णा इति रूपं भवति। इति वाल्मीकिः। २. सुबोधिनीस्थः पाठ एषः।

जस्-शस्-ङसि-ङि के परे राजन्-शब्द के अकार को इकार हो। जस्-शस् में, राइणो। पक्ष में-राआणो। ङसि में, राइणो। पक्ष में-रण्णो, राआ इत्यादि कह दिये हैं। ङि में, राइम्मि। पक्ष में-राअम्मि ॥ ४३ ॥

## आ णोणमोरङसि ॥ ४४ ॥

णोणमोः परयो राज्ञो जकारस्य आकारादेशः स्यात्, अङसि षष्ठ्येकवचने न भवति। राआणो पेक्खन्ति। राआणो पेक्ख (५-३८ सूत्रे व्याख्याताः)। राआणं धणं (५-४० सू० स्प०)। अङसीति किम्? राइणो, रण्णो धणं। शेषमदन्तवत्। राअं, राएहिं। राआ, राआदो, राआदु, राआहि (५-६ सूत्रेण आ-दो-दु-हयः ङसेः स्थाने प्रयुज्यन्ते, शे० स्प०)। राआहिंतो राआसुंतो (५-७ भ्यसः हिंतो सुंतो-आदेशौ)। राअम्मि, राए (५-९ ङेः ए-म्मि)। राएसु (५-१२ एत्वे, शे० स्प०)। राजानं, राजभिः, राज्ञः, राजभ्यः, राज्ञि, राजसु ॥ ४४ ॥

आ णोणमोरङसि—राजन्शब्दस्य आत्वं स्यात्, णो णं-इत्येतयोः परयोः। जस्-शसोः-राआणो। अमि-राआणं। अङसीति किम्? राइणो पुत्तो ॥ ४४ ॥

आ णो०-इति। णो, णं के परे राजन्शब्द को आकार हो, ङस् को छोड़ कर। अर्थात् ङस् के परे नहीं होगा। 'जस्शस्०' से णो आदेश, इससे आकार। राआणो। अम् के परे राआणं। ङस् के परे आकार नहीं होगा, 'इदद्वित्वे' से इकार। राइणो ॥ ४४ ॥

## आत्मनोऽप्पाणो वा ॥ ४५ ॥

आत्मनोऽप्पाण इत्यादेशो भवति वा। अप्पा, अप्पाणो (४-६ नूलोप०, शे० स्प०) ॥ ४५ ॥

आत्मनोऽप्पाणो वा—आत्मन्शब्दस्य सुपि परे अप्पाण इति वा निपात्यते। अप्पाणो। पक्षे-अप्पा ॥ ४५ ॥

आत्मन इति। आत्मन्-शब्द को सुप् के परे अप्पाण यह निपातरूप आदेश विकल्प से हो। अप्पाणो। पक्ष में-अप्पा ॥ ४५ ॥

## इत्वद्वित्ववर्जं राजवदनादेशे ॥ ४६ ॥

आत्मनोऽनादेशे राजवत्कार्यं स्यादित्वद्वित्वे वर्जयित्वा। अप्पा, अप्पाणो, अप्पणा, अप्पणो। (५-३८ सूत्रानुसारतः जसादीनां णोत्वादिकं सर्वं राजवत्)। आत्मा, आत्मनः, आत्मना, आत्मनः ॥ ४६ ॥

इद्[1]द्वित्ववर्जं राजवदनादेशे—आत्मन्शब्दस्य राजवत् कार्यं स्यात्, इदद्वित्वे वर्जयित्वा। 'इदद्वित्वे' 'ङसश्च द्वित्वं वे'त्यादि वर्जयित्वा अन्यासु विभक्तिषु राजवत्कार्यं स्यात्, नतु आदेशे। (१) 'अप्पाणो, अप्पाणा (२) अप्पाणं, अप्पाणे (३)

१. संजीवनीसंमतः पाठः।

अप्पाणेण, अप्पाणेहिं' इत्यादि अकारान्तवत् । पक्षे-अप्पा, अप्पाणो इत्यादि राजन्-शब्दवत् ॥ ४६ ॥

इदिति । आत्मन्-शब्द को राजन्-शब्द के समान कार्य हो, इद्, द्वित्व को छोड़ कर । अर्थात् 'इदद्वित्वे' 'ङसश्च द्वित्वं वा' इत्यादि को छोड़कर अन्य विभक्तियों में राजन् के समान कार्य हो, आदेश में नहीं । 'अत ओत्सोः' इत्यादि सब कार्य अकारान्तशब्द की तरह होंगे । ( १ ) अप्पाणो, अप्पाणा । ( २ ) अप्पाणं, अप्पाणा—इत्यादि । साधुत्व अकारान्त ग्रामशब्द के समान है । पक्ष में—जहाँ अप्पाण आदेश नहीं होगा, वहाँ 'आत्मनि पः' से पकार । 'शेषादेशयोर्द्वित्वमनादौ' से पकारद्वित्व । 'राज्ञः' से आकार, 'अदातो यथादिषु वा' ( १० ) से ह्रस्व । अप्पा । जस् के परे त्म को पूर्ववत् पकारद्वित्व । राजवत् होने से 'जस्-शस्-ङसां णो' से जस् को णो आदेश । 'आ णोणमोरङसि' से आकार । अप्पाणो । अम् के परे अप्पाणं । शस् के परे अप्पाणो । इसी प्रकार राजन्-शब्द के समान सब सूत्रों से सब कार्य होंगे, परन्तु इकारादेश और द्वित्व को छोड़ कर होंगे और जहाँ अप्पाण आदेश होगा, वहाँ भी राजवत् कार्य नहीं होगा । प्रथम उदाहरणों में दिखा दिया है ॥ ४६ ॥

## ब्रह्माद्या आत्मवत्[1] ॥ ४७ ॥

इति श्रीवररुचिविरचिते प्राकृतप्रकाशे पञ्चमः परिच्छेदः ।

ब्रह्माद्याः शब्दा लक्ष्यानुसारेणात्मवत् साधवो भवन्ति । बह्मा, बह्माणो ( ३-३ रलोपः, ४-६ नलोपः, शेषं लक्ष्यानुसारेणात्मनो राजवत्कार्यं भवत्यतः ५-३६ सू० आत्वम् ) । ब्रह्मा । ( एवमुत्तरत्रापि ) जुवा, जुवाणो ( २-३१ य् = ज्, ४-५ नलोपः, शेषमात्मवत् ) । अद्धा, अद्धाणो । ( ३-३ वलोपः, २-५० धद्वि०, ३-५१ ध् = द्, ४-६ नलोपः, शेषमात्मवत् ) । ब्रह्मन्, युवन्, अध्वन्, एवमादयो लक्ष्यानुसारेणावगन्तव्याः ॥ ४७ ॥

इति श्रीभामहविरचिते प्राकृतप्रकाशव्याख्याने लिङ्गविभक्त्यादेशः पञ्चमः परिच्छेदः ।

ब्रह्मादयोऽप्येवम्[2]—आत्मन्-शब्दस्य अप्पाण इति निपातवत् ब्रह्मन्शब्दादीनामपि 'बह्माण' इत्यादयो निपाता बोध्याः । बह्माणो, बह्माणा, इत्यादयोऽकारान्तशब्दवत् । पक्षे-बह्मा, बह्माणो—इत्यादयो राजन्शब्दवत् इदद्वित्ववर्जमुदाहरणीयाः ॥

१. पुंस्यन आणो राजवच्च ८।३।१६ । पुंलिङ्गे वर्तमानस्यान्नन्तस्य आण इत्यादेशो वा भवति । पक्षे यथादर्शनं राजवत् कार्यं भवति । हे० । २. संजीवन्यनुसारी पाठः ।

ब्रह्माणो ब्रह्मणो वा स्याद् यूनो जूआण इत्यपि।
राज्ञो राआण आदेशो ग्राव्णो गावाण इत्यपि॥
[1]अर्यम्णस्त्वज्जमाणो वा पूष्णः पूसाण इत्यपि।
अद्धाणो त्वध्वनः स्थाने ब्रह्माद्या एवमादयः॥

सर्वेष्वपि आदेशेषु अकारान्तत्वात् ग्रामशब्दवद् रूपाणि ज्ञेयानि। तत एव तेषां साधुत्वं कल्पनीयम्। अनादेशपक्षे तु इदद्वित्वे आत्मन्शब्दवत्, अन्यविभक्तिषु राजन्-शब्दवदविशेषेण साधनीयानि॥ ४७॥

इति 'चन्द्रिका' व्याख्यायां पञ्चमः परिच्छेदः।

ब्रह्मेति। आत्मन्-शब्द की तरह ब्रह्मादिकों को भी जानना, अर्थात् जैसे आत्मन्-शब्द को अप्पाण यह निपात आदेश होता है, ऐसे ही ब्रह्मन्-शब्द को भी बम्हाण आदेश होगा और बम्हाण-शब्द के रूप तत्साधुत्व अकारान्त ग्रामशब्द के समान जानना। ( १ ) बम्हाणो, बम्हाणा। ( २ ) बम्हाणं, बम्हाणा। बम्हाणेण, बम्हाणेहिं। इत्यादि। और जहाँ बम्हाण आदेश नहीं होगा, वहाँ राजन्-शब्द के समान इकारादेश और णकारद्वित्व के अतिरिक्त सब प्रक्रिया और रूप जानना। ब्रह्मादिक कौन-कौन हैं और किसको क्या आदेश होता है यह बताते हैं—बम्हाणो इति। ब्रह्मन्-शब्द को बम्हाण, युवन्-शब्द को जूआण, राजन् को राआण, ग्रावन् को गावाण, अर्यमन् को अज्जमाण, पूषन् को पूसाण और अध्वन् को अद्धाण आदेश होते हैं। ये ब्रह्मादिक बताये हैं। महाकवि-प्रयोगानुकूल तथा लोकव्यवहारानुकूल यह परिगणन कहा है। इन आदेशों में अकार अन्त पर है, अकारान्त शब्द के समान रूपसाधुत्व करना, जैसा प्रथम बता आये हैं। और जहाँ आदेश नहीं होगा वहाँ राजन्-शब्द के समान साधुत्व है। इति॥ ४७॥

टिप्पणी—भामह-व्याख्यानुकूल पञ्चम परिच्छेद समाप्त है। सर्वादिविभक्ति-सम्बन्धी कार्यविधायक षष्ठ परिच्छेद मानते हैं, परन्तु वस्तुतः सुब्विधि-सम्बन्धी यह परिच्छेद है, अतः चाहे सर्वादिगण के कार्यविधायक सूत्र हों चाहे इतर असर्वादि के सुब्विधिसम्बन्धी कार्य-विधायक सूत्र हों सब का सुब्विधि में परिगणन होगा। अतः अभी पञ्चम ही परिच्छेद है। उसकी समाप्ति भामह के षष्ठ परिच्छेद की समाप्ति के साथ है। अस्तु।

इति 'प्रदीप' नामकहिन्दीव्याख्यायां पञ्चमः परिच्छेदः।

१. 'उक्षण उच्छाण इत्येवं'-इति सुबोधिन्यां पाठः।

# अथ षष्ठः परिच्छेदः

## सर्वादेर्जस एत्वम् ॥ १ ॥

सर्वादेरुत्तरस्य जस एत्वं भवति[1]। सव्वे ( ३-३ रलोपः, ३-५० वद्वि० )। जे (२-२१ य = ज)। एवमग्रेऽपि ज्ञेयम्। ते (४-६ दलोपः)। के ( ६-१३ किम् = क )। कदरे ( १२-३ त = द )। सर्वे। ये। ते। के। कतरे ॥ १ ॥

[2]सर्वादेः—अधिकारोऽयम्, 'ङेर्दो' इति यावत्। अतः परं यत् कार्यं तत्सर्वादेरधिकृतं वेदितव्यम्। सर्व इत्यादिकाः सर्वादयः पञ्चत्रिंशत्प्रसिद्धाः ॥

जस एत्—सर्वादेः परस्य जस एत् स्यात्। 'क्वचिदपि लोप' इत्यल्लोपः। सव्वे। किमः कः। के। ये। ते। इमे। इतरे-इत्यादयः ॥

सर्वादेः-इति। 'सर्वादेः' यह अधिकार सूत्र है। इसके अनन्तर 'ङेर्दो' इस सूत्र तक जितने कार्य होंगे वे सर्वादिकों को होंगे। सर्व, विश्व इत्यादि सर्वादिक ३५ पैंतीस प्रसिद्ध हैं।

जस इति। सर्वादिक से पर जस को एकार हो। इससे एकार। 'क्वचिदपि लोपः' से अल्लोप। सव्वे। 'किमः कः' से क आदेश। के। यद् का ये। एवं ते, इमे, अण्णे, इतरे इत्यादिक जानना। व्यापक प्रातिपदिक रूप में ( २+२०+३+४+ द्वि० २१ ) से सिद्ध होंगे।

## ङेः स्सिम्मित्थाः[3] ॥ २ ॥

ङेः सप्तम्येकवचनस्य सर्वादिपरस्थितस्य स्थाने स्सि, म्मि, त्थ इत्येत आदेशा भवन्ति। सव्वस्सि, सव्वम्मि, सव्वत्थ ( पूर्ववत् रलोपो वद्वित्वं च, शे० स्प० )। इअरस्सि, इअरम्मि, इअरत्थ ( २-२ तुलोपः, शे० स्प० )। सर्वस्मिन्, इतरस्मिन् ॥ २ ॥

ङेः स्सिम्मित्थाः—सर्वादेः परस्य ङिप्रत्ययस्य स्सि-म्मि-त्थ इत्येते त्रय आदेशा भवन्ति। सव्वस्सि, सव्वम्मि, सव्वत्थ। एवं-जस्सि, जम्मि, जत्थ। तस्सि, तम्मि, तत्थ। कौ स्मिन्प्रयोगे-स्सि, म्मि प्रयोज्यौ। त्रलि-यत्र तत्रादिषु त्थ इति। यत्र=जत्थ, तत्र=तत्थ। इति विवेकः ॥ २ ॥

ङेरिति। सर्वादिक से पर ङिप्रत्यय को स्सि, म्मि, त्थ ये तीन आदेश होते हैं। सर्वस्मिन् में सव्वस्सि, सव्वम्मि, सव्वत्थ। इसी प्रकार सभी सर्वादिकों में जानना।

---

१. अकारान्ताद्भवति। तथा च हेमः—अतः सर्वादेर्डे जसः। ८।३।५८। अतः किम्? सव्वाओ रिद्धीओ इति। २. मामहे तु सूत्रद्वयमिदं मिलित्वा सूत्रमेकं दृश्यते। ३. ङेः स्सि-म्मि-त्थाः, ङेः स्सं। का० पा०।

परंतु ङि को स्सिं, म्मि होंगे। जैसे यस्मिन् में जस्सिं, जम्मि होंगे और त्रल् के विषय में त्थ होगा। जैसे सर्वत्र का सव्वत्थ। यत्र का जत्थ इत्यादि॥ २॥

## इदमेतत्कियत्तद्भ्यष्टा इणा वा ॥ ३ ॥

इदम्, एतद्, किम्, यद्, तद् इत्येतेभ्यः टा इत्यस्य इणादेशो भवति वा। इमिणा (६-१४ इदम् = इम, ४-१ अलोपः, शे० स्प०)। एदिणा (४-६ दलोपः, १२-३ त् = द्, ४-१ अलोपः)। किणा (६-१३ किम् = कः, ४-१ अलोपः)। जिणा, तिणा (२-३१ य् = ज्, ४-६ दलोपः)। पक्षे-इमेण, एदेण, केण, जेण, तेण। (६-१४ इदम् = इद, ५-४ सूत्रोदाहृत-(वच्छेण)वददन्तकार्य्याणि पक्षान्तरे ज्ञेयानि)। एवमुत्तरत्रापि। अनेन, एतेन, केन, येन, तेन ॥ ३ ॥

इदमेतत्कियत्तद्भ्यष्टा इणा वा—एभ्यः परस्य टा-इत्यस्य इणा वा स्यात्। इमिणा, इमेण। एदिणा, एदेण। विकल्पेन 'कगचजे'ति लोप इत्येके। ततः-एइणा, एएण। किणा, केण। जिणा, जेण। तिणा, तेण ॥ ३ ॥

इदमिति। इदम्-एतद्-किम्-यद्-तद् इन शब्दों से पर टा को इणा आदेश विकल्प से हो। इससे इणा आदेश। 'अन्त्यस्य हलः' से हल्-लोप। 'क्वचिदपि लोपः' से अल्लोप। इमिणा। पक्ष में 'टामोर्णः'। 'ए च सुप्यङिङसोः'। इमेण। एतद्-शब्द में (२४ से) त को द। एदिणा, एदेण। यदि (१ से) तलोप कर देंगे तो एइणा, एण्णा होंगे। एवं किम्, यद्, तद् के जानना॥ ३॥

## आम एसिं ॥ ४ ॥

इदमादिभ्य उत्तरस्य आम एसिं इत्ययमादेशो वा भवति। इमेसिं (पूर्ववददन्तत्वं, ४-१ अलोपः, शे० स्प०)। इमाण (५-४ आम = ण, ५-११ दीर्घः, शे० स्प०)। एदेसिं (४-६ दलोपः, एत इति जाते १२-३ त् = द्, शे० स्प०)। एदाण (५-४ आम् = ण, ५-११ दीर्घः)। केसिं (६-१३ किम् = क, ४-१ अलोपः, शे० स्प०)। काण (५-४ आम् = ण, ५-११ दीर्घः)। जेसिं (२-३१ य-ज, ४-६ दलोपः, ४-१ अलोपः, शे० स्प०)। जाण (५-४ आम् = ण, ५-११ दीर्घः)। तेसिं (पूर्ववददन्तत्वमकारलोपश्च, शे० स्प०)। ताण[1] (५-४ आम्=ण, ५-११ दीर्घ०, शे० पू०)। एषाम्-आसाम्। एतेषाम्-एतासाम्, केषाम्-कासाम्, येषाम्-यासाम्, तेषाम्-तासाम् ॥ ४ ॥

आम एसिं—इदमादिभ्यः परस्य आम इत्यस्य एसिं वा स्यात्। इमेसिं, इमाण। एदेसिं, एदाण। केसिं, काण। जेसिं, जाण। तेसिं, ताण ॥ ४ ॥

---

१. स्त्रीलिङ्गेऽप्येतानि रूपाणि। इमासि। एदासि। कासि। जासि। तासि। तथा च वाल्मीकिः-कियत्तदोऽस्वमामि सुपि० ७-७-३० सु, अम्, आम्-वर्जिते सुपि परे कियत्तद्भ्यो ङीब् वा स्यात्। पक्षे यद्। तेनैतानि रूपाणि सिद्ध्यन्ति। वा०।

आम इति। इदमादिक से पर आम को एसिं आदेश विकल्प से हो। पूर्व की तरह लोप। इमेसिं। पक्ष में-'टामोर्णः' से ण, 'जस्ङस्यांसु' से दीर्घ। इमाण। इसी प्रकार एतद् किम्, यद्, तद् के रूप सिद्ध होंगे ॥ ४ ॥

## किंयत्तद्भ्यो ङस आसः ॥ ५ ॥

**किम्, यद्, तद्, एभ्य उत्तरस्य ङस आस इत्ययमादेशो भवति वा। कास, कस्स। जास, जस्स। तास, तस्स[1]। (५-८ स्स,एवमुत्तरत्रापि, अदन्तत्वमकारलोपादिकं च पूर्ववत्कार्यम्) ॥ ५ ॥**

**किंयत्तद्भ्यो ङस आसः[2]**—एभ्यः परस्य ङस इत्यस्य आस इति वा स्यात्। कास, कस्स। जास, जस्स। तास, तस्स ॥ ५ ॥

किम्-इति। किमादिक से पर ङस् को आस हो। कास, पक्ष में-कस्स। यद् का जास। 'अन्त्यस्य हलः' से हल्-लोप। 'क्वचिदपि॰' से अल्लोप। पक्ष में-जस्स। तद् का तास, तस्स ॥ ५ ॥

## ईद्भ्यः स्सासे[3] ॥ ६ ॥

**ईकारान्तेभ्यः किमादिभ्यः उत्तरस्य ङसः स्सा से इत्येतावादेशौ भवतः। किस्सा, कीसे, कीआ, कीए, कीअ, कीइ। जिस्सा, जीसे, जीआ, जीए, जीअ, जीइ। तिस्सा, तीसे, तीआ, तीए, तीअ, तीइ। (स्त्रियां ४-६ किम्=कः, स्त्रीप्रत्यये आपि जाते, ५-२४ बाहुलकात् आत्वे ईत्वे च कृते, ङसः स्सा, संयोगे ह्रस्वः, एवमेव यत्तद्भ्यामपि, पक्षे-५-२२ सूत्रेण ङसः स्थाने इदादयो यथायथं प्रत्येकं योज्याः)। कस्याः, यस्याः, तस्याः ॥ ६ ॥**

**ईद्भ्यः स्सासे**—ईप्रत्ययान्तेभ्यः किंयत्तद्भ्यः परस्य ङसः स्सा-से इत्यादेशौ वा स्तः। किस्सा, कीसे। 'आदीतौ बहुल'मिति ईप्रत्ययः। पक्षे-कीइ, कीए, कीअ, कीआ। एवं यत्तदोरपि। जिस्सा, जीसे। जीइ, जीए, जीअ, जीआ। तिस्सा, तीसे। तीइ, तीए, तीअ, तीआ। आकारान्तेभ्यः-'किंयत्तद्भ्यो भवत्याद्भ्यः स[4] इत्येव तु वा ङसः।' कास, काइ, काए। जास, जाइ, जाए। तास, ताइ, ताए ॥ ६ ॥

ईद्भ्य इति। ईप्रत्ययान्त किं-यत्-तत् शब्दों से पर जो ङस् है, उसको स्सा से विकल्प से आदेश हों। 'आदीतौ बहुलम्' से ईप्रत्यय, स्सादेश में (द्वि॰ ३ 'इदीतः पानी॰' से) इकार। किस्सा, कीसे। पक्ष में-कीइ, कीए इत्यादि पूर्वप्रक्रिया। इसी प्रकार यद् तद् के जानना। 'आद्भ्यः=आकारान्तेभ्यः' आकारान्त किं-यद्-तद् शब्द से स आदेश ङस् को विकल्प से हो। कास, जास, तास इत्यादि। पक्ष में-

---

१. किंयत्तदोऽस्यमामि ८। ३। ३३-सिम्-अम्-आम्-वर्जिते स्यादौ परे एभ्यः स्त्रियां ङीर्वा भवति। हे॰। २. आसः-इति भामहानुसारी पाठः। ३. ङसः स्सा सो स्त्रियाम्। इकारान्तेभ्यश्चाकारान्तेभ्यश्च स्त्रियां किमादिभ्य उत्तरस्य ङसः स्सा सो इत्यादि। ङस्ग्रहणेन ङसि-ङि-ग्रहणम्। का॰ अ॰ पा॰। ४. 'स इ ए वा ङसस्तथा'-इति प्रबोधिनीस्थः पाठः।

'नातोऽद्रातौ' के निषेध से आ और अ नहीं होगा, किंतु इ-ए होगा। अतः काइ, काए। कोई आचार्य, स इ ए तीन आदेश मानते हैं, परन्तु उनके मत से पक्ष में क्या होगा? यह चिन्त्य है ॥ ६ ॥

## ङेर्हिं ॥ ७ ॥

**किमादिभ्य उत्तरस्य ङेः हिं इत्ययमादेशो भवति वा। कहिं, कस्सिं, कम्मि, कत्थ,। जहिं, जस्सिं, जम्मि, जत्थ। तहिं, तस्सिं, तम्मि, तत्थ (६-२ ङि = स्सिं, म्मि, त्थ)। कस्मिन्, यस्मिन्, तस्मिन् ॥ ७ ॥**

ङेर्हिं—किमादिभ्यः परस्य ङेरित्यस्य हिं वा स्यात्। कहिं। जहिं। तहिं। पक्षे—कस्सिं, कम्मि, कत्थ। यत्तदोरप्येवम्। 'अन्यशब्दात्परस्यापि हिंकारो ङेर्विकल्प्यते'। अण्णेहिं। पक्षे-अण्णस्सिं, अण्णम्मि, अण्णत्थ ॥ ७ ॥

ङेरिति। किमादिक से पर ङि को हिं आदेश विकल्प से हो। कहिं, जहिं, तहिं। पक्ष में स्सिं-म्मि-त्थ होंगे। कस्सिं, कम्मि, कत्थ। इसी तरह यत् तत् के होंगे। अन्य-शब्द से पर ङि को हिं होगा। अण्णेहिं। पक्ष में-अण्णस्सिं-इत्यादि होंगे ॥ ७ ॥

## आहे इआ काले ॥ ८ ॥

**कियत्तद्भ्यो ङेः काले आहे, इआ इत्यादेशौ वा भवतः। काहे, जाहे, ताहे,। कइआ, जइआ, तइआ (पूर्ववददन्तत्वं, ४-१ अकारलोपः, शे० स्प०)। कहिं-इत्यादयोऽपि। कदा, यदा, तदा ॥ ८ ॥**

आहे इआ काले—कियत्तद्भ्यः परस्य ङिप्रत्ययस्य कालेऽर्थे आहे, इआ, इत्यादेशौ वा स्तः। काहे, कइआ। पक्षे-कहिं, कस्सिं, कम्मि, कत्थ। एवं यत्तदोरप्यूह्यम्। 'आला इत्यपि यत्तद्भ्यां काले वाच्ये वदन्ति ते'। जाला, ताला। 'काले ङेरेतदस्याहे एकशब्दादिया तु वा।' एत्ताहे। एतस्मिन् काले। पक्षे-यथाप्राप्तम् एतस्सिं इत्यादयः। एक्कइआ। पक्षे-एक्कम्मि इत्यादिकाः। 'आदेशः सर्वशब्दस्य काले ङेराइ इष्यते'। सव्वाइ। पक्षे-पूर्ववत् ॥ ८ ॥

आहे इति। समय अर्थ में किं-यद्-तद् शब्दों से आहे इआ आदेश विकल्प से होते हैं। काहे, कइआ। पक्ष में-कहिं, कस्सिं, कम्मि, कत्थ। इसी तरह यद्-तद्-शब्दों के जानना। यद्-तद्-शब्दों से काल अर्थ में विकल्प से 'आला' प्रत्यय भी होगा। जाला, ताला। काल अर्थ में ङि को एतत् शब्द से आहे और एक शब्द से इया विकल्प से होगा। पूर्ववत् अन्त्यहल् का और 'क्वचिदपि लोपः' से अलोप होगा। नीडादित्व से तकार-ककार को द्वित्व। एत्ताहे। एक्कइआ। पक्ष में-स्सिं म्मि इत्यादि होंगे। सर्व-शब्द से काल अर्थ में ङि को विकल्प से आइ आदेश हो। सव्वाइ। पक्ष में-सव्वम्मि इत्यादि पूर्ववत् ॥ ८ ॥

## त्तो दो ङसेः[1] ॥ ९ ॥

---

१. ङसेर्म्हा ८।३।६६। कियत्तद्भ्यः परस्य ङसेः स्थाने म्हा इत्यादेशो वा भवति। कम्हा। जम्हा। पक्षे-काओ, जाओ, ताओ। हेमः।

**कियत्तद्भ्यो ङसेः त्तो, दो इत्येतावादेशौ भवतः। कत्तो, कदो। जत्तो, जदो। तत्तो, तदो। स्पष्टान्येतानि पदानि। ( ६-७। ६-२ ) सूत्रविहिताः प्रत्यया अपि काले प्रयोक्तव्याः, यथा=कस्मिन् काले कदा, कहिं, कस्सि-इत्यादि ज्ञेयम् ॥ ९ ॥**

**ओत्तोदो ङसेरनिदमः**[1]—इदम्-शब्दरहितात्सर्वादेः परस्य ङसिप्रत्यय ओ-त्तो-दो इति त्रय आदेशा भवन्ति। 'ङसेरादोदुहयः' इत्यस्यापवादः। सव्वओ, सव्वत्तो, सव्वदो। अण्णओ, अण्णत्तो, अण्णदो। तओ, तत्तो, तदो। अनिदम इति किम्? इमाओ, इमाउ, इमाहि। अस्मादित्यर्थः। 'सर्वादिष्विदमो दीर्घो नत्वन्येषां ङसौ भवेत्'। इमाहिन्तो। 'ङसेरतः परस्येह हिन्तो इत्यपि दृश्यते'। इति ङसेर्हिन्तो आदेशः। 'तो इत्यपि तदः प्राहुरादेशं ङसिना सह'। तो। तस्मादिति ॥ ९ ॥

ओ त्तो दो-इति। इदम्-शब्द से रहित अन्य सर्वादिक से पर ङसिप्रत्यय को ओ-त्तो-दो ये तीन आदेश हों। 'ङसेरादोदुहयः' का बाधक है। सर्व-शब्द का सव्वओ, सव्वत्तो, सव्वदो। इसी प्रकार अन्य-शब्द का भी। अण्णओ, अण्णत्तो, अण्णदो। तत् का तओ, तत्तो, तदो। इदम्शब्द को ये आदेश नहीं होंगे किन्तु 'ङसेरादो०' से ओ उ हि ये होंगे। इमाओ, इमाउ, इमाहि। 'सर्वादिगण में ङसि के परे इदम्शब्द को दीर्घ हो और सर्वादि को नहीं। इमाहिन्तो। अकारान्त इदम्-शब्द से पर ङसि को हिन्तो आदेश हो। इससे हिन्तो आदेश। पूर्वोक्त से दीर्घ। ङसि-प्रत्ययसहित तद्-शब्द को 'तो' आदेश हो। तो। तस्मात् का तो हो गया ॥ ९ ॥

## तद ओश्च ॥ १० ॥

**तद उत्तरस्य ङसेरोकारादेशो भवति वा। तो ( अदन्तत्वे त इति जाते, ४-१ अलोपः, ततो ङसेः ओत्वे ) तो। तत्तो, तदो ( ६-९ ङसेः त्तो, दो ) ॥ १० ॥**

## ङसा से ॥ ११ ॥

**वेति वर्तते। तदो ङसा सह से इत्ययमादेशो भवति। पक्षे यथाप्राप्तम्। से[2] ( स्प० )। तास ( ६-५ ङस आसादेशः, ४-१ त इत्यस्याकारलोपः ) ॥ ११ ॥**

**तदो ङसा से वा स्त्रियामपि**[3]—अपि शब्दात्पुंनपुंसकयोः परिग्रहः। ङसा सह तच्छब्दस्य से वा स्यात्। से। तस्य, तस्याः वा। पक्षे-तस्स, ताइ, तीए-इत्यादयः। 'एतदोऽपि ङसा से वा त्रिलिङ्गयामिष्यते बुधैः'। से। पक्षे-एअस्स। एआइ ॥ १०-११ ॥

तदो इति। तीनों लिङ्गों में ङस्-प्रत्ययसहित तत्-शब्द को से आदेश विकल्प

---

१. संजीवनीस्थः पाठ एषः। २. तस्य तस्याः। स्त्रियामपि से, तिस्सा। ङस्ग्रहणे ङसिग्रहणं-से, तत्तो। का० पा०। ३. संजीवन्यादिसंमतः पाठः। भामहे तु तत्र सूत्रद्वयम्।

से हो। तस्य तस्याः को 'से' हो गया। से मुहं। तस्य, तस्या वा मुखम्। पक्ष में-तस्स। स्त्रीलिङ्ग में ताइ, तीए इत्यादि होंगे। ङस् के सहित एतत्-शब्द को भी तीनों लिङ्गों में 'से' आदेश हो। एतस्य, एतस्याः को 'से' होगा। पक्ष में-एअस्स, एआइ। इत्यादि॥ १०-११॥

## आमा सिं[1] ॥ १२ ॥

**तद आमा सह सिं इत्ययमादेशो वा भवति। सिं (स्प०)। ताण[2] (६-४ सू० स्प०)। तेषाम्, तासाम्॥ १२॥**

आमः सिं[3]—आम्-प्रत्ययेन सह तच्छब्दस्य सिं वा स्यात् स्त्रियां पुन्नपुंसकयोश्च। सिं। पक्षे-ताण। 'अमूटाभिस्सु तदः स्थाने ण इत्येष स्त्रियामपि'। णं तम्। णेण। णेहिं। 'स्त्रियामपि सहैवामा स्याच्च सिं इदमोऽपि वा'। सिं। आसाम्, एषां वा॥ १२॥

आम इति। आम्-प्रत्यय के सहित तद् को सिं आदेश विकल्प से हो। सिं। पक्ष में-ताणं। तेषां, तासाम् का रूप सिं यह होगा। सिं-तासामित्यर्थः। अम्-टा-भिस् में भी विभक्तिसहित तद्शब्द के तीनों लिङ्गों में णं आदेश हो। णं पेच्छ (तं पश्य)। णेण-तेन। णेहिं-तैः। स्त्रीलिङ्ग में आम् के सहित इदम्-शब्द को विकल्प से सिं हो। सिं। पक्ष में यथाप्राप्त। एषाम्, आसां वा॥ १२॥

## किमः कः[4] ॥ १३ ॥

**किंशब्दस्य सुपि परतः क इत्ययमादेशो भवति। को (४-१ अलोपः, ५-१ ओ)। के (४-१ अलोपः, ३-१ एत्वम्)। केण (५-१२ एत्वं, ५-४ टा=ण)। केहिं (५-१२ए, ५-५ भिस्=हिं)। कः, के, केन, कैः॥१३॥**

किमः कः—सुपि परे किमः कः स्यात्। को, के। स्त्रियाम्-काइ, कीए। कया, कस्याः, कस्यामित्यर्थे। 'नपुंसके स्वमोः कत्वं न किमः स्यादलुप्तयोः'। किं, काइं इत्यादि॥ १३॥

किम इति। सुप् के परे किम् को क आदेश हो। को, के। सर्व्वशब्द के समान रूप हैं 'नपुंसकलिङ्ग में किम्-शब्द को सु, अम् के परे क आदेश न हो और सु अम् का लोप न हो'। किं। काइं। स्त्रीलिङ्ग में काइ, कीए॥ १३॥

## इदम इमः ॥ १४ ॥

**सुपि परत इदम इम इत्ययमादेशो भवति। इमो (४-१ अलोपे, ५-१ ओ)। इमे (६-१ जस्=ए, शे० पू०)। इमं (५-३ अमोऽकार-लोपः, ४-१२ बिं, शे० स्प०)। इमेण (४-१२ अ=ए, ५-४ टा=ण)। इमेहिं (५-५ भिस्=हिं, शे० पू०)॥ १४॥**

---

१. वेदं तदेतदोः ङसाम्भ्यां से-सिमौ ८।४।८१। इति हेमस्तु इतमेतदोरपीच्छति। २. ताण। स्सिताणा। सिंताण, तेसिं। हेमचं० सिं इत्येव। का० पा०। ३. संजीवनीस्थः पाठः। ४. किमः किम् ८।३।८० किमः क्लीबे वर्तमानस्य स्यम्भ्यां सह किं भवति। किं कुलं तुह। हेमः।

**इदम इमः**—सौ परतः इदम इमः स्यात्। इमो। स्त्रियाम्–इमा। 'आदेशा-विदमश्चान्यौ सौ पुंस्यअमिअं स्त्रियाम्'। अअं। स्त्रियाम्–इअं॥ १४॥

**इदम इति। इदम्–शब्द को इम आदेश हो। इमो, इमे। सर्वशब्द की तरह जानना। इदम्–शब्द को सु के परे पुंलिङ्ग में अअं आदेश हो और स्त्रीलिङ्ग में इअं आदेश हो। अअं रामो। स्त्रीलिङ्ग में–इअं कला = इयं कला॥ १४॥**

## स्सस्सिमोरद्वा॥ १५॥

**स्स–स्सिमोः परत इदमोऽदादेशो वा भवति। अस्स। इमस्स। (५–८ ङस्=स्स, शे० स्प०)। अस्सि। इमस्सि (६–२ स्सि, शे० स्प०)॥१५॥**

**अं स्सिंस्सयोर्वा**[1]—ङिङसादेशयोः स्सिंस्सयोः परयोरिदमः अ इति वा स्यात्। अस्सिं, इमस्सिं। इमम्मि, इमत्थ–इत्याद्यपि। अस्स, इमस्स। 'स्यात्प्रत्य-यान्तरेऽप्यत्वं स्त्रियामन्यत्र चेदमः'। एहिं, इमेहिं। एसु, इमेसु। स्त्रियाम्–आहिं, इमाहिं। आसु, इमासु। 'इदमोऽत्वं स्त्रियामात्वं सह स्सा च ङसस्तु वा'। अस्सा। पक्षे–इमाइ, इमाए॥ १५॥

**अं स्सिं–इति। ङि–ङस्प्रत्यय के आदेश स्सिं और स्स के परे 'अ' आदेश विकल्प से हो। अस्सिं, पक्ष में–इमस्सिं। इमम्मि, इमत्थ–इत्यादि भी होंगे। षष्ठी में अस्स, इमस्स। स्त्रीलिङ्ग से अन्य प्रत्यय के परे अर्थात् षष्ठी सप्तमी के बिना इदम्–शब्द को विकल्प से अकार हो। 'ए सुप्य०' से एकार, एहिं, इमेहिं। एसु, इमेसु। स्त्रीलिङ्ग में आहिं, इमाहिं। आसु, इमासु। इदम्–शब्द के अकार को आकार हो और वहीं ङस् को विकल्प से 'स्सा' आदेश हो। अस्सा। पक्ष में–इमाइ, इमाए (५+२२) से इकार, एकार॥ १५॥**

## ङेर्देन हः॥ १६॥

**इदमा दकारेण सह ङेः स्थाने हकारादेशो वा भवति। इह (स्प०)। पक्षे–अस्सि, इमस्सि, इमस्मि (पूर्ववद्)॥ १६॥**

**ङेर्मेन हः**[2]—इदमो मकारेण सह ङिप्रत्ययस्य ह इत्यादेशः स्यात्। इह। पक्षे–अस्सिं, इमस्सिं, इमम्मि॥ १६॥

**ङेरिति। इदम्–शब्द के मकार के सहित ङिप्रत्यय को 'ह' आदेश हो। इह। पक्ष में–अस्सिं, इमस्सिं, इमम्मि॥ १६॥**

## न त्थः॥ १७॥

**इदमः परस्य ङेः त्थ इत्ययमादेशो न भवति। 'ङेः स्सिम्मित्था' इति प्राप्ते प्रतिषिध्यते। इह, अस्सि, इमस्सि, इमस्मि, (शे० ६–१६ सू० द्रष्टव्यानि)॥ १७॥**

**न त्थः**—इदमः परस्य ङेः त्थ आदेशो न स्यात्। इमस्सिं, इमम्मि–इत्येव॥१७॥

**न त्थः। इदम्–शब्द से पर ङि को त्थ आदेश न हो। तो इमस्सिं, इमम्मि ही होंगे॥**

---

१. संजीवनीसंमतः पाठः। २. संजीवन्यादिस्थः पाठः।

## नपुंसके स्वमोरिदमिणमिणमो ॥ १८ ॥

नपुंसकलिङ्गे इदमःस्वमोः परतः सविभक्तिकस्य इदं, इणं, इदमो-इत्येते त्रय आदेशा भवन्ति । इदं, इणं, इणमो धणं (स्पष्टानि) । इदं धनम् ॥१८॥

नपुंसके स्वमोरिदमिणमिणमो—नपुंसके स्थितस्य इदम्‌शब्दस्य स्वमोः परयोः इदं, इणं, इणमो इति त्रय आदेशा भवन्ति । इदं वणं । एवम्-इणं, इणमो वणं । 'नपुंसक इमश्च स्यात् चतुर्थ इदमः स्वमोः' । इमं वणं ॥ १८ ॥

नपुंसेति । नपुंसकलिङ्ग में सु अम् के परे इदम्-शब्द को इदं-इमं-इणमो ये तीन आदेश हों । इदं वणं । एवम्-इणं, इणमो भी होगा । इदम् को नपुंसकलिङ्ग में सु अम् के परे 'इम' आदेश भी होगा । इमं वणं ॥ १८ ॥

## एतदः सावोत्वं वा ॥ १९ ॥

एतच्छब्दस्य सौ परतः ओत्वं वा भवति । नित्ये प्राप्ते विकल्प्यते । एस । एसो ( ४-६ दलोपः, ६-२२ त् = स् ) एषः ॥ १९ ॥

एतदः सोरोत्वं वा[1]—एतच्छब्दात्परस्य सुप्रत्ययस्य ओत्वं वा स्यात् । एसो । पक्षे-एस ॥ १९ ॥

एतद इति । एतद्-शब्द के सुप्रत्यय को ओकार विकल्प से होगा । एसो पुरिसो । पक्ष में-एस, होगा ॥ १९ ॥

## त्तो[2] ङसेः ॥ २० ॥

एतदः परस्य ङसेः त्तो इत्ययमादेशो भवति । एत्तो ( संस्कृतानुसारं, ४-६ सूत्राद्वा दलोपे, एत इति जाते, ६-२० ङसि = त्तो, ६-२१ तलोपः ) । एदादो, एदादु, एदाहि ( ४-६ दलोपः, १२-३ त् = द्, ५-११ दीर्घः, ५-६ ङसि = दो, दु, हि ) । एतस्मात् ॥ २० ॥

त्तो ङसेः—'ओत्तोदो' इति सिद्धत्वान्नियमार्थम् । एतच्छब्दात्परस्य ङसेः त्तो इत्येवादेशः स्यात् । एत्तो । सामान्यतस्तु प्राप्ता न बाध्यन्ते । तेन एसा, एसाओ, एआउ, एआहि, एआहिन्तो-भवन्त्येव ॥ २० ॥

त्तो इति । 'ओत्तोदो' से त्तो आदेश सिद्ध था फिर 'त्तो' आदेश नियम करता है कि एतद्-शब्द से पर ङसिप्रत्यय को 'त्तो' यही आदेश हो । अतः 'ओ दो' ये दो आदेश नहीं होंगे । एत्तो । यह साथ में पठितों का ही निषेध करेगा, अतः सामान्यतः प्राप्त 'ङसेरादो०' ( ५+६ ) से आकारादि होंगे । एसा-एसाओ-एआउ-एआहि-एआहिन्तो-इनका बाध नहीं करेगा ॥ २० ॥

## त्तोत्थयोस्तलोपः ॥ २१ ॥

एतदस्तकारस्य त्तोत्थयोः परतो लोपो भवति । एत्तो । एत्थ ( ६-२ ङि = त्थ, अन्यत् पू० ) । एतस्मिन् ॥ २१ ॥

---

१. संजीवन्यनुसारी पाठः । २. तो—एतो का० पा० ।

त्तत्थयोस्तस्य लोपः—त्तोत्थयोः परयोरेतदस्तकारस्य लोपः स्यात् । एत्तो। एत्थ ॥
त्तत्थयोरिति । त्तोत्थ के परे एतद्-शब्द के तकार का लोप हो। एत्तो, एतस्मात्। एत्थ, एतस्मिन् ॥ २१ ॥

## तदेतदोः सः सावनपुंसके ॥ २२ ॥

**तच्छब्दस्य एतच्छब्दस्य च यस्तकारस्तस्य सकारादेशो भवति, अनपुंसके सौ परतः। सो पुरिसो। सो महिला[1]। एस, एसो। एसा (४-६ दलोपे, ६-१९ ओत्वविकल्पः, स्त्रीत्वे-५-२४ आत्वं, महिला-शब्दस्तत्समः)। साविति किम्? एदे। ते (४-६ दलोपः, १२-३ त=द, ६-१ जस्=ए) एते। ते। एदं। तं (४-६ दलोपः, ५-३ अमोऽकारलोपः, ४-१२ बिं०)। एतम्, एनम्। तम्। अनपुंसक इति किम्? तं एदं धणं (नपुंसकत्वान्न तकारस्य सकारः, ५-३० सोर्बिन्दुः, पूर्ववदन्यत्) तदेतद्धनम् ॥ २२ ॥**

तदेतदोः सः सावनपुंसके—तदेतच्छब्दयोस्तकारस्य अनपुंसकलिङ्गे सौ परे सकारः स्यात्। सो। एसो। स्त्रियाम्-सा, एसा। 'एस इत्येव सावाहुः स्त्रियामप्येतदः परे'। एस कला ॥ २२ ॥

तदे-इति। नपुंसकलिङ्ग के अतिरिक्त अर्थात् पुंलिङ्ग और स्त्रीलिङ्ग में सु के परे तद्-एतद्-शब्द के तकार को सकार हो। सो एसो देवो। स्त्रीलिङ्ग में। सा, एसा। कोई आचार्य एतद्-शब्द का स्त्रीलिङ्ग में भी 'एस' यही कहते हैं। एस कला। इति ॥

## अदसो दो मुः ॥ २३ ॥

**अदसो दकारस्य सुपि परतो मु इत्ययमादेशो भवति। अमू पुरिसो। अमू महिला[3] (४-६ स्लोपे, अमु जाते, ५-१८ दीर्घः, ४-६ सोर्लोपः)। अमूओ पुरिसा। अमूओ महिलाओ[4] (५-१६ जस्=ओ, स्त्रियाम् ५-२० जस ओत्वं, पूर्ववत् दीर्घादि)। अमुं वणं, अमूइ बणाइ (५-३ अमोऽकारस्य लोपः, ४-१२ बिं०, ५-२६ जस्=इ, पूर्वस्य दीर्घः)। अदो वनम्। अमूनि वनानि ॥ २३ ॥**

अदसो दो मुः—अदस्-शब्दसम्बन्धिनो दकारस्य मु इत्ययमादेशः स्यात्। अमू। अमूओ। अमूइं। अमी, अमूः, अमूनि ॥ २३ ॥

अदस इति। अदस्-शब्द के दकार को 'मु' आदेश हो। अमू। भानुशब्द की तरह, जस् का लोप, दीर्घ। अमू-देवा। स्त्रीलिङ्ग में 'जसो वा' से ओकार। अमूओ। नपुंसकलिङ्ग में 'इं जस्-शसोर्दीर्घश्च' से इकार, दीर्घ। अमूइं। इत्यादि ॥ २३ ॥

---

१. संजीवन्यादिसंमतः पाठः। २. सः पुरुषः। सा महिला। ३. असौ पुरुषः। असौ महिला। ४. अमी पुरुषाः। अमूर्महिलाः।

## हश्च सौ[1] ॥ २४ ॥

अदसो दकारस्य सौ परतो हकारादेशो भवति। अह पुरिसो। अह महिला। अह वणं[2]। (४-६ अदसः सलोपः)। हादेशोऽयमोत्वात्वबिन्दून् त्रिष्वपि लिङ्गेषु परत्वाद् बाधते ॥ २४ ॥

हश्च सौ—अदसो दकारस्य सौ परे वा हकारः स्यात्। पक्षे-यथाप्राप्तम्। अह पुरिसो। पक्षे-अमू। स्त्रियाम्-अह, अमू। नपुंसके-अह, अमुं ॥ २४ ॥

हश्चेति। अदस् शब्द के दकार को विकल्प से हकार हो सु के परे। पक्ष में यथाप्राप्त। अह पुरिसो। पक्ष में-अमू। स्त्रीलिङ्ग में अह, अमू। नपुंसक लिङ्ग में अह, अमुं॥

## पदस्य ॥ २५ ॥

अधिकारोऽयम् आशब्दविधानात्[3]। यदित ऊर्ध्वमनुक्रमिष्यामः, पदस्य तद्भवतीत्येवं वेदितव्यम्। तच्च[4] तत्रैवोदाहरिष्यामः ॥ २५ ॥

पदस्य—अधिकारोऽयम्। 'द्वेर्दो' इत्यतः प्राक् यत्कार्यं तत्सुबन्तस्य पदस्य स्थाने भविष्यतीत्यधिकृतं वेदितव्यम् ॥ २५ ॥

पदस्येति। 'पदस्य' यह अधिकार सूत्र है, 'द्वेर्दो' इस सूत्र पर्यन्त जितने कार्य होंगे, वे सिद्ध पद को होंगे ॥ २५ ॥

## युष्मदस्तं तुमं[5] ॥ २६ ॥

सावित्येव। युष्मदः पदस्य सौ[6] परतः तं तुमं इत्येतावादेशौ भवतः। तं आगदो। तुमं आगदो[7] (आङ्पूर्वकक्तान्तस्य गमेः १२-३ त् = द्, शौरसेन्यां २-२ सूत्रबाधेन न लोपः, ५-१ ओ) ॥ २६ ॥

युष्मदस्तं तुमं—सुप्रत्यये सिद्धस्य युष्मदः त्वमित्यस्य स्थाने तं तुमं इत्यादेशौ भवतः। तं, तुमं ॥ २६ ॥

युष्मेति। सुप्रत्यय के परे सिद्ध युष्मद्-शब्द को अर्थात् त्वं को 'तं, तुमं' ये दो आदेश हों। तं आगओ, तुमं आगओ। त्वम् आगतः ॥ २६ ॥

## तुं चामि ॥ २७ ॥

युष्मदः पदस्य अमि परतः तुं इत्यादेशो वा भवति, तुमं च। तुं

---

१. म्मावयेऔ वा ८।३।८९। अदसोऽन्त्यव्यञ्जनलुकि दकारान्तस्य स्थाने ङ्यादेशे म्मौ परत अय-इअ इत्यादेशौ वा भवतः। अयम्मि, इअम्मि। पक्षे-अमुम्मि। हे०। अमुष्मिन्। अन्यत्र ६।२३ मुक्ते यथाप्राप्तं विभक्त्यादेशाः। २. असौ पुरुषः। असौ महिला। अदो वनम्। ३. 'द्वेर्दो' ५४ सूत्रात्प्रागित्यर्थः। तदुक्तम्—'पदस्येत्यधिकारोऽयं द्विशब्दस्य विधेरधः'। ४. तत्र तत्र विधिसूत्रेषूदाहरणानि द्रष्टव्यानीत्यर्थः। ५. युष्मदस्तं, तुं, तुवं, तुह, तुम सिना ८।३।९०। सिना सह एते पञ्च आदेशा भवन्ति। हे०। ६. 'सौ' इति सप्तम्यन्तनिर्देशस्तु विषयविभागार्थम्। एवमुत्तरत्रापि। ७. त्वम् आगतः।

पेक्खामि, तुमं पेक्खामि' ( १२-१ दृश् = पेक्ख, ७-३० आत्वम् ) ॥२७॥

तुं चामि—अमि परे सिद्धस्य युष्मदस्त्वामित्यस्य तुं स्यात् । चकारात् तं तुमं अपि । तुं, तं, तुमं । 'युष्मदोऽमि पदस्य स्याच्चतुर्थस्तु तुमे इति' । तुमे । त्वामित्यर्थः ॥

तुमिति । अम् के परे सिद्ध युष्मद् को अर्थात् 'त्वाम्' के स्थान पर 'तुं' आदेश हो और चकार से तं, तुमं ये भी होंगे। जणो तुं-तं-तुमं पेच्छइ = जनस्त्वां प्रेक्षते । युष्मद्-शब्द को तीन आदेशों के अतिरिक्त चौथा 'तुमे' आदेश भी होगा अर्थात् बाध्य-बाधक भाव नहीं होगा । तुमे पासइ । त्वां पश्यति ॥ २७ ॥

## तुज्झे तुह्मे जसि ॥ २८ ॥

**युष्मदः पदस्य जसि परतः तुज्झे, तुह्मे इत्येतावादेशौ भवतः । तुज्झे आगदा, तुह्मे आगदा[2] ॥ २८ ॥**

तुज्झे तुज्झ तुम्हे जसि[3]—जसि यूयमित्यस्य उक्तास्त्रय आदेशा भवन्ति । तुज्झे, तुज्झ, तुम्हे पंडिआ । 'तज्झे तव्वे तम्हे चैव त्रयोऽन्ये युष्मदो ङसि' । तज्झे, तव्वे, तम्हे गुरू ॥ २८ ॥

तुज्झे इति । युष्मद्-शब्द के जस् के परे सिद्ध 'यूयम्' इसको तुज्झे, तुज्झ, तुम्हे ये तीन आदेश हों । 'तुज्झे पंडिआ' = यूयं पण्डिताः । युष्मद् को ङस् के परे सिद्ध तव को तज्झे, तव्वे, तम्हे ये आदेश हों । तज्झे गुरु = तव गुरुः ॥ २८ ॥

## वो च शसि ॥ २९ ॥

**शसि युष्मदः पदस्य वो इत्यादेशो भवति, चकारात् तुज्झे तुह्मे च । वो पेक्खामि । तुज्झे, तुह्मे पेक्खामि[4] (पेक्खामि ६-२७ सू० स्प०) ॥ २९ ॥**

वो च शसि—शसि युष्मानित्यस्य वो स्यात् । चकारात् पूर्वोक्ताः षडपि । वो, तुज्झे, तुज्झ, तुम्हे, तज्झे, तव्वे, तम्हे कहेइ । युष्मान् कथयति ॥ २९ ॥

वो च इति । शस् के परे सिद्ध युष्मान् को 'वो' आदेश हो । चकार से पूर्वोक्त भी छः आदेश होंगे । तम्हे कहेइ । युष्मान् कथयति ॥ २९ ॥

## टाङ्योस्तइ तए तुमए तुमे ॥ ३० ॥

**युष्मदुत्तरयोः टा, ङि-इत्येतयोः तइ, तए, तुमए, तुमे इत्येत आदेशा भवन्ति । टा-तइ, तए, तुमए, तुमे कअं[5] । ङि-तइ, तए, तुमए, तुमे ठिअं[6] । पूर्ववत् स्पष्टानि ॥ ३० ॥**

टाङ्योस्तइ तए तुमइ तुमए तुमे[7]—टाप्रत्यये ङौ च सिद्धयोस्त्वया-त्वयी-त्येतयोः तइ, तए, तुमइ, तुमए, तुमे इति पञ्च आदेशा भवन्ति । तइ, तए, तुमइ, तुमए, तुमे जुज्झइ । त्वया, त्वयि च युध्यते ॥ ३० ॥

टाङ्योः-इति । टा के परे सिद्ध त्वया और ङि के परे सिद्ध त्वयि को तइ-तए

---

१. त्वां पश्यामि । २. यूयम् आगताः । ३. एष पाठः संजीवनीसंमतः । ४. युष्मान् पश्यामि । ५. त्वया कृतम् । ६. त्वयि स्थितम् । ७. संजीवन्यनुसारी पाठ एषः ।

इत्यादि पाँच आदेश होते हैं। त्वया में भी पाँचों और त्वयि में भी पाँचों होंगे ॥ ३० ॥

## ङसि तुमो तुह तुज्झ तुह्म तुम्माः ॥ ३१ ॥

**युष्मदः पदस्य ङसि तुमो, तुह, तुज्झ, तुह्म, तुम्म इत्येत आदेशा भवन्ति। तुमो पदं। तुह, तुज्झ, तुह्म, तुम्म पदं[1] ॥ ३१ ॥**

**ङसि तुमो-तुह-तुज्झ-तुव-तुम्हाः[2]**—ङसि सिद्धस्य युष्मदः पदस्य तवेत्यस्य पञ्चादेशाः स्युः। तुमो धणं। तुज्झ पिआ। तव धनम्। तव पिता। इत्यादि।

तज्झ, तम्बे, दिए, तुज्झ, तुमाइ, तु, तुमे, तुमाः।

युष्मदो ङसि सिद्धस्य स्युरष्टावपरेऽप्यमी ॥

तज्झेत्यादयः। तव ॥ ३१ ॥

ङसीति। युष्मद्-शब्द का ङस् के परे सिद्ध तव इस पद को तुमो इत्यादि पाँच आदेश हों। उदाहरण स्वयं बना लेना। 'ङस् के परे सिद्ध' तव को, तज्झ-तम्बे-दिए इत्यादि आठ आदेश और होंगे। तज्झ-तम्बे-दिए-तुज्झ (इत्यादि) धणं। तव धनमिति ॥ ३१ ॥

## आङि च ते दे ॥ ३२ ॥

**आङि तृतीयैकवचने चकाराद् ङसि च परतो युष्मदः पदस्य ते, दे इत्येतावादेशौ भवतः। ते कअं। दे कअं[3]। ते धणं, दे धणं[4] ॥ ३२ ॥**

**आङि च ते दे**—आङि टाप्रत्यये सिद्धस्य त्वयेत्यस्य, ङसि सिद्धस्य तवेत्यस्य च ते, दे इत्यादेशौ भवतः। ते, दे किअं। त्वया कृतम्। ते, दे धणं। तव धनम् ॥३२॥

आङीति। टाप्रत्यय के परे सिद्ध त्वया इसको तथा ङस् के परे सिद्ध तव इसको ते-दे ये आदेश हों। ते-दे-किअं। त्वया कृतम्। त्वया को ते, दे आदेश हुये। एवम् ते-दे-धणं। तव धनम्। तव को ते, दे आदेश हो गये ॥ ३२ ॥

## तुमाइ च ॥ ३३ ॥

**आङि युष्मदः पदस्य तुमाइ इत्ययमादेशो भवति। तुमाइ कअं[5] ॥३३॥**

**तुमाइ च**—टाप्रत्यये सिद्धस्य त्वयेत्यस्य तुमाइ इति स्यात्। तुमाइ। 'आहुः ए-दि-तु-इत्यन्यानादेशानाङि युष्मदः'। ए, दि, तु पढिअं। त्वया पठितम् ॥ ३३ ॥

तुमाइ इति। टाप्रत्यय के परे सिद्ध त्वया इसको तुमाइ आदेश हो। 'युष्मद् शब्द के आङ् अर्थात् टा के परे सिद्ध त्वया इसको ए-दि-तु ये तीन आदेश और हों। तुमाइ ए दि तु पढिअं। त्वया पठितम्। त्वया को उक्त आदेश हुये ॥ ३३ ॥

## तुज्झेहिं तुह्मेहिं तुम्मेहिं भिसि ॥ ३४ ॥

**भिसि परतो युष्मदः पदस्य तुज्झेहिं, तुह्मेहिं, तुम्मेहिं इत्येत आदेशा भवन्ति। तुज्झेहिं, तुह्मेहिं, तुम्मेहिं कअं[6] ॥ ३४ ॥**

---

१. तव पदम्। पदशब्दः संस्कृतसमो विकाराभाववान् महिला-शब्दवत् 'तत्समास्ते येषु न विकारः' इति प्राकृतव्याकरणनियमः। २. संजीवनीसंमतः पाठः। ३. त्वया कृतम्। ४. तव धनम्। ५. त्वया कृतम्। ६. युष्माभिः कृतम्।

तुज्झेहि तुब्भेहि तुम्हेहि भिसि[1]—भिसि सिद्धस्य युष्माभिरित्यस्य त्रय आदेशा भवन्ति । तुज्झेहि, तुब्भेहि, तुम्हेहि । 'तज्झेहि, तब्भेहि, तम्हेहि त्रयोऽन्ये युष्मदो भिसि' । तज्झेहि, तब्भेहि तम्हेहि । युष्माभिरिति ॥ ३४ ॥

तुज्झेहीति । भिस् के परे सिद्ध 'युष्माभिः' को तुज्झेहि तुब्भेहि तुम्हेहि ये तीन आदेश होते हैं । युष्माभिः को तज्झेहि, तब्भेहि, तम्हेहि, ये तीन आदेश और होंगे । युष्माभिरिति ॥ ३४ ॥

## ङसौ तत्तो तइत्तो तुमादो तुमादु तुमाहि ॥ ३५ ॥

**ङसौ परतो युष्मदः पदस्य तत्तो, तइत्तो, तुमादो, तुमादु, तुमाहि इत्येत आदेशा भवन्ति । तत्तो आगदो । तइत्तो, तुमादो, तुमादु, तुमाहि आगदो । त्वदागतः[2] ॥ ३५ ॥**

ङसौ तत्तो तइत्तो तुमाओ तुमाइ तुमाहि वा[3]—ङसि सिद्धस्य त्वदित्यस्य तत्तो, तइत्तो इत्यादयः पञ्च आदेशाः स्युः । तत्तो=त्वत् । 'तुम्हाहिन्तो तम्हाहिन्तो तुहिन्तो युष्मदो ङसौ । अमी अपि त्रयः प्रोक्ताः पृथगादेशपञ्चकात्' ॥ एवम्-अष्ट रूपाणि भवन्ति । तुम्हाहिन्तो, तम्हाहिन्तो तुहिन्तो, तुडिओ । त्वत् त्रुटितः ॥ ३५ ॥

ङसाविति । ङसि के परे सिद्ध 'त्वत्' इस पद को तत्तो, तइत्तो, तुमाओ, तुमाइ, तुमाहि ये पाँच आदेश हों । त्वत् इति । युष्मद् के ङसि के परे तुम्हाहिन्तो, तम्हाहिन्तो, तुहिन्तो, ये तीन आदेश और होंगे । इस प्रकार त्वत् के स्थान पर आठ रूप होंगे । तत्तो तुडिओ । त्वत् त्रटित इति ॥ ३५ ॥

## तुह्माहिन्तो तुह्मासुन्तो भ्यसि ॥ ३६ ॥

**युष्मदः पदस्य पञ्चमीबहुवचने भ्यसि तुह्माहिंतो, तुह्मासुन्तो इत्येतावादेशौ भवतः । तुह्माहिंतो, तुह्मासुन्तो आगदो[4] ॥ ३६ ॥**

तुज्झाहिन्तो तुज्झासुन्तो भ्यसि[5]—पञ्चमीबहुवचने भ्यसि सिद्धस्य युष्मद् इत्यस्य एतावादेशौ स्तः । तुज्झाहिन्तो, तुज्झासुन्तो अण्णो देवो । युष्मद् अन्यो देवः । तुज्झेहिन्तो, तुम्हेहिन्तो, तुम्हासुन्तो, तुम्हेत्तो, तुम्हाहिन्ती, तुज्झन्तो, तुहेहि, तुम्हेहि, तुज्झेहि, तुब्भासुन्तो इति दशान्ये युष्मदो भ्यसि प्रख्याताः ॥ ३६ ॥

तुज्झेति । पञ्चमीबहुवचन भ्यस् के परे सिद्ध 'युष्मद्' को तुज्झाहिन्तो, तुज्झासुन्तो ये आदेश हों । तुज्झाहिन्तो, तुज्झासुन्तो अण्णो देवो । युष्मद् अन्यो देवः । युष्मद् शब्द के भ्यस् के परे 'युष्मद्' इस सिद्ध पद को, तुज्झेहिन्तो तुम्हेहिन्तो, तुम्हासुन्तो, तुम्हेत्तो, तुम्हाहिन्तो, तुज्झन्तो, तुहेहि, तुम्हेहि, तुज्झेहि, तुब्भासुन्तो ये दश आदेश और होते हैं । उदाहरण पूर्व के समान कल्पना कर लेना । युष्मद् इति ॥ ३६ ॥

## वो भे तुज्झाणं तुह्माणमामि ॥ ३७ ॥

---

१. संजीवनीसंमतः पाठः । २. त्वत्-आगतः । ३. संजीवनीस्थः पाठः । ४. युष्मदागतः । ५. संजीवनीसंमतः पाठः ।

आमि परतो युष्मदः पदस्य वो, भे, तुज्झाणं, तुह्माणं इत्येत आदेशा भवन्ति। वो धणं। भे धणं। तुज्झाणं, तुह्माणं धणं[1] ॥ ३७ ॥

वो ते तुज्झाणं तुम्हाणं आमि[2]—आमि सिद्धस्य युष्माकमित्यस्य एते चत्वार आदेशाः स्युः। तुम्हाणं, वो, ते, तुज्झाणं वा गामो। युष्माकं ग्रामः। 'तुज्झ, तुब्भ, तुम्म इति त्रयोऽन्ये चापि युष्मदः'। युष्माकमित्यस्य एतेऽपि त्रयो भवन्ति ॥ ३७ ॥

वो ते इति। आम् के परे सिद्ध युष्मद्-शब्द के 'युष्माकम्' को वो, ते, तुज्झाणं, तुम्हाणं ये चार आदेश हों। तुज्झाणं गामो। युष्माकं ग्रामः। अन्य उदाहरण भी ऐसे ही होंगे। युष्माकं को तुज्झ, तुब्भ, तुम्ह ये तीन आदेश और होंगे। सब में युष्माकम् यह जानना ॥ ३७ ॥

## ङौ तुमम्मि ॥ ३८ ॥

युष्मदः पदस्य ङौ परतः तुमम्मि इत्यादेशो भवति। तुमम्मि ठिअं[3]। पूर्वोक्ताश्च तइ-प्रभृतयश्चत्वारोऽप्यादेशा भवन्ति ॥ ३८ ॥

तुमम्मि च ङौ[4]—ङौ सिद्धस्य त्वयीत्यस्य पदस्य तुमम्मि इत्यादेशः स्यात्। तुमम्मि। त्वयि ॥ ३८ ॥

तुमम्मीति। ङि के पर सिद्ध त्वयि को तुमम्मि होगा। स्पष्ट उदाहरण है ॥ ३८ ॥

## तुज्झेसु तुह्मेसु सुपि ॥ ३९ ॥

युष्मदः पदस्य सप्तमीबहुवचने तुज्झेसु, तुह्मेसु इत्येतावादेशौ भवतः। तुज्झेसु ठिअं। तुह्मेसु ठिअं[5] ॥ ३९ ॥

तुज्झेसु तुब्भेसु तुम्हेसु सुपि[6]—सुपि सिद्धस्य युष्मासु इत्यस्य एते त्रय आदेशाः स्युः। तुज्झेसु ठिअं। युष्मासु स्थितम् ॥ ३९ ॥

तुज्झेसु इति। युष्मद्-शब्द के सुप् के परे सिद्ध 'युष्मासु' पद को तुज्झेसु, तुब्भेसु, तुम्हेसु ये तीन आदेश हों। तुज्झेसु ठिअं। युष्मासु स्थितम् ॥ ३९ ॥

## अस्मदो हमहमहअं सौ ॥ ४० ॥

अस्मदः पदस्य सौ परतो हं, अहं, अहअं इत्येत आदेशा भवन्ति। हं, अहं, अहअं करेमि[7] (१२-१५ कृञ् = कर, ७-३ मि, ७-३४ एत्वम्) ॥

अस्मदो हं अहं अहअं सौ—सुप्रत्यये सिद्धस्य अस्मदः अहमित्यस्य हं, अहं, अहअं एते त्रय आदेशा भवन्ति। हं जाणामि। अहं जानामि ॥ ४० ॥

अस्मदो-इति। सुप्रत्यय के परे सिद्ध-अस्मद्-शब्द के अहं पद को हं, अहं, अहअं ये तीन आदेश हों। हं जाणामि। अहं जानामि ॥ ४० ॥

## अहम्मिरमि च ॥ ४१ ॥

---

१. युष्माकं धनम्। २. संजीवनीसंमतः पाठः। ३. त्वयि स्थितम्। ४. संजीवनीसंमतः पाठोऽयम्। क्रमेऽपि भेदः। ५. युष्मासु स्थितम्। ६. पाठः संजीवनीस्थः, क्रमस्तु न तथा। ७. अहं करोमि।

अमि परतोऽस्मदः पदस्य अहम्मि इत्ययमादेशो भवति, सौ च। अहम्मि पेक्ख। अहम्मि करेमि। मां प्रेक्षस्व। अहं करोमि॥ ४१॥

अम्मिरमि च[1]—अम्मि सुप्रत्यये च सिद्धस्य अस्मदः पदस्य 'माम्, अह'-मित्येतयोः अम्मि इत्यादेशः स्यात्। अम्मि पाससि। मां पश्यसि। अम्मि कहेमि। अहं कथयामि। 'सावस्मदो भवत्यत्र 'म्मि' इत्येष च पञ्चमः'। म्मि = अहम्॥ ४१॥

अम्मीति। अम् और सुप्रत्यय के परे सिद्ध अस्मद् शब्द के 'माम्' और 'अहम्' को अम्मि आदेश हो। उदाहरण स्पष्ट है। अस्मद्-शब्द के सु के परे सिद्ध 'अहं' पद को 'म्मि' आदेश हो। इस प्रकार अहं को पाँच आदेश होंगे॥ ४१॥

## मं ममं॥ ४२॥

अमीति वर्तते। अस्मदः पदस्य अमि परतो मं ममं-इत्येतावादेशौ भवतः। मं, ममं पेक्ख[2]॥ ४२॥

मं ममं च[3]—अमि सिद्धस्य 'मा'मित्यस्य एतावादेशौ स्तः। मं, ममं = मामित्यर्थः। 'चत्वारोऽन्येऽस्मदोऽमि स्युर्मिमं णो अम अम्ह च'। मिमं, णो, अम, अम्ह रक्खउ। मां रक्षतु॥ ४२॥

मं-इति। अम् के परे सिद्ध 'मां' पद को मं, ममं ये आदेश हों। अस्मद्-शब्द को अम् के परे और चार मिमं, णो, अम, अम्ह आदेश हों। अम्ह रक्खेउ। मां रक्षतु॥४२॥

## अह्मे जश्शसोः॥ ४३॥

अस्मदः पदस्य जश्शसोः परतः अह्मे इत्ययमादेशो भवति। अह्मे आगदा[4]। अह्मे पेक्ख[5]॥ ४३॥

अम्हे जश्शसोः—जसि शसि सिद्धस्य अस्मदः पदस्य वयमित्यस्य अस्मानित्यस्य च अम्हे इत्यादेशो भवति। अम्हे=वयम्, अस्मानिति वा। 'अम्हो, अम्ह तथैवैतौ जश्शसोरस्मदो मतौ'। अम्हो, अम्ह = वयम्, अस्मानिति वा॥ ४३॥

अम्हे इति। अस्मद्-शब्द के जस् के परे सिद्ध 'वयं' पद को और शस् के परे सिद्ध 'अस्मान्' पद को अम्हे आदेश हो। अम्हे। वयं के स्थान में और अस्मान् में भी होगा। और वयम्, अस्मान् को अम्हो, अम्ह ये भी होंगे। अम्हो, अम्ह=वयम्, अस्मान् वा। वयं को दोनों एवम् अस्मान् को भी दोनों होंगे॥ ४३॥

## णो शसि॥ ४४॥

अस्मदः पदस्य शसि परतो णो इत्ययमादेशो भवति। णो पेक्ख = अस्मान् प्रेक्षस्व॥ ४४॥

णो च शसि[6]—शस्प्रत्यये अस्मदः पदस्य णो इति स्यात्। णो हसइ = अस्मान् हसति॥ ४४॥

---

१. संजीवनीसंमतः पाठः। २. मां प्रेक्षस्व। ३. संजीवनीसंमतः पाठः। ४. वयमागताः। ५. अस्मान् प्रेक्षस्व, पश्य वा। ६. संजीवनीसंमतः पाठः।

णो चेति। शस् के परे सिद्ध अस्मद्-शब्द को अर्थात् 'अस्मान्' पद को णो आदेश हो। णो हसइ। अस्मान् हसति ॥ ४४ ॥

## आङि मे ममाइ ॥ ४५ ॥

**अस्मदः पदस्य आङि परतो मे, ममाइ इत्येतावादेशौ भवतः। मे कअं, ममाइ कअं[1] ॥ ४५ ॥**

**आङि मे ममाइ**—टाप्रत्यये सिद्धस्य अस्मदः पदस्य मे, ममाइ इत्यादेशौ स्तः। मे, ममाइ किअं। मया कृतमित्यर्थः ॥ ४५ ॥

आङीति। अस्मद्-शब्द के टाप्रत्यय के परे सिद्ध 'मया' इसको मे, ममाइ ये आदेश हों। मे किअं। मया कृतम्। अथवा-ममाइ किअं। मया कृतम्। इति ॥ ४५ ॥

## ङौ च मइ मए ॥ ४६ ॥

**अस्मदः पदस्य ङौ परतो मइ, मए इत्येतावादेशौ भवतः। चकारात्तृतीयैकवचने च। मइ, मए ठिअं[2]। मइ, मए कअं[3] ॥ ४६ ॥**

**ङौ च मइ मए**—टाप्रत्यये ङिप्रत्यये सिद्धस्य अस्मदः पदस्य एतौ स्तः। मइ, मए। मया, मयि वा। 'टा प्रत्ययेऽस्मदो णे, मि स्यातां द्वावपरावपि'। णे, मि=मया॥

ङौ चेति। टाप्रत्यय के परे सिद्ध 'मया' पद को और ङि के परे सिद्ध 'मयि' पद को मइ, मए ये आदेश हों। मया, मयि दोनों में मइ, मए दोनों होंगे। टाप्रत्यय में सिद्ध 'मया' को णे, मि ये दो और भी होंगे। णे, मि। मया के स्थान में ॥ ४६ ॥

## अह्मेहिं भिसि ॥ ४७ ॥

**अस्मदः पदस्य भिसि अह्मेहिं इत्ययमादेशो भवति। अह्मेहिं कअं[4] ॥**

**अम्हेहिं भिसि**—भिसि सिद्धस्य अस्मदः पदस्य अम्हेहिं इत्यादेशः स्यात्। अम्हेहिं। 'णे, अम्हे, अम्ह, अम्हाण चत्वारोऽन्येऽस्मदो भिसि'। णे, अम्हे, अम्ह, अम्हाण इति। अस्माभिरिति ॥ ४७ ॥

अम्हे-इति। अस्मद्-शब्द के भिस् के परे सिद्ध 'अस्माभिः' को अम्हेहिं आदेश हो। एवं णे, अम्हे, अम्ह, अम्हाण ये चार और होंगे। अम्हेहिं, णे, अम्हे, अम्ह, अम्हाण = अस्माभिः को होंगे ॥ ४७ ॥

## मत्तो मइत्तो ममादो ममादु ममाहि ङसौ ॥ ४८ ॥

**अस्मदः पदस्य ङसौ परत एत आदेशा भवन्ति। मत्तो गदो। मइत्तो, ममादो, ममादु, ममाहि गदो[5]। (स्पष्टानि, क्तान्तस्य गमेः १२=३ त्-द्, ५-१ ओ) ॥ ४८ ॥**

**मत्तो मइत्तो ममाओ ममाउ[6] ममाहि ङसौ**—ङसौ सिद्धस्य अस्मदः पदस्य एते पञ्च स्युः। मत्तो, मइत्तो-इत्यादयः। मद् इत्यर्थः ॥ ४८ ॥

---

१. मया कृतम्। २. मयि स्थितम्। ३. मया कृतम्। ४. अस्माभिः कृतम्। ५. मत् गतः। ६. संजीवनीसंमतः पाठः।

मत्तो इति । अस्मद्शब्द के ङसि के परे सिद्ध 'मत्' को मत्तो, मइत्तो, ममाओ, ममाउ, ममाहि ये पाँच आदेश हों । 'मत्' के स्थान पर पाँचों होंगे ॥ ४८ ॥

## अह्माहिन्तो अह्मासुन्तो[1] भ्यसि ॥ ४९ ॥

अस्मदः पदस्य भ्यसि परतो अह्माहिन्तो, अह्मासुन्तो इत्येतावादेशौ भवतः । अह्माहिन्तो, अह्मासुन्तो गदो[2] ॥ ४९ ॥

अम्हाहिन्तो अम्हासुन्तो भ्यसि—'अस्मभ्य'मित्यस्य एतौ स्तः । अम्हाहिन्तो अम्हासुन्तो अण्णो । 'अम्हेहिन्तो च अम्हेहि अम्हेन्तो वाऽस्मदो भ्यसि' । अस्मदित्यर्थः ॥ ४९ ॥

अम्हा०–इति । अस्मद्शब्द के भ्यस् के परे सिद्ध 'अस्मभ्यम्' पद को अम्हाहिन्तो, अम्हासुन्तो ये आदेश हों । 'अस्मद्' को, अम्हेहिन्तो, अम्हेहि, अम्हेन्तो ये तीन आदेश और हों । अस्मद् के स्थान पर पूर्वोक्त पाँचों का प्रयोग होगा ॥ ४९ ॥

## मे मम मह मज्झ ङसि ॥ ५० ॥

अस्मदः पदस्य ङसि परत एत आदेशा भवन्ति । मे धणं । मम, मह, मज्झ धणं[3] ॥ ५० ॥

मे मम मह मज्झ ङसि—ङसि अस्मदः सिद्धस्य 'ममे'त्यस्य एते स्युः । मे, मम, मह, मज्झ पुत्तो । मम पुत्रः ॥ ५० ॥

मे इति । अस्मद्शब्द के ङस् के पर सिद्ध 'मम' पद को मे, मम, मह, मज्झ ये आदेश हों । मम को चारो आदेश यथाप्रयोग में होंगे । मज्झ पुत्तो=मम पुत्रः ॥ ५० ॥

## मज्झणो[4] अह्म अह्माणमह्मे आमि ॥ ५१ ॥

अस्मदः पदस्य आमि परत एत आदेशा भवन्ति । मज्झणो, अह्म, अह्माणं, अह्मे धणं । अस्माकं धनम् ॥ ५१ ॥

णो अम्ह अम्हाण अम्हे आमि[5]—आमि अस्मदः सिद्धस्य 'अस्माक'मित्यस्य एते स्युः । णो, अम्ह, अम्हाण, अम्हे वल्लहो । अस्माकं वल्लभः ॥ ५१ ॥

णो इति । अस्मद्-शब्द के आम् के परे सिद्ध 'अस्माकम्' को णो, अम्ह, अम्हाण, अम्हे ये आदेश हों । अम्हे वल्लहो=अस्माकं वल्लभः । इसीप्रकार णो, अम्ह, अम्हाण भी 'अस्माकं' के स्थान पर होंगे ॥ ५१ ॥

## ममम्मि ङौ ॥ ५२ ॥

अस्मदः पदस्य ङौ परतौ ममम्मि इत्यादेशो भवति । ममम्मि ठिअं[6] । पूर्वोक्तौ मइ, मए इत्येतौ च ॥ ५२ ॥

ममम्मि च[7]—ङिप्रत्यये सिद्धस्य अस्मदः पदस्य मयीत्यस्य ममम्मि इति स्यात्, चकारात् पूर्वोक्तावपि । मइ, मए, ममम्मि । मयि इति ॥ ५२ ॥

---

१. अम्हेहिन्तो अम्हेसुन्तो । का० पा० २. अस्मद् गतः । ३. मम धनम् । ४. मज्झाणो । का० पा० । ५. संजीवनीसंमतः पाठः । ६. मयि स्थितम् । ७. संजीवनीसंमतः पाठः ।

## अह्मेसु सुपि ॥ ५३ ॥

अस्मदः पदस्य सप्तमीबहुवचने सुपि परतः अह्मेसु इत्ययमादेशो भवति। अह्मेसु ठिअं[1] ॥ ५३ ॥

अम्हेसु सुपि—सुपि सिद्धस्य अस्मदः पदस्य अम्हेसु इति स्यात्। अम्हेसु मई ठिआ। 'अम्हासु इति चादेशो द्वितीयोऽप्यस्मदः सुपि'। अम्हासु सद्धा। युष्मदस्मदव्ययमलिङ्गम्। त्रिष्वपि लिङ्गेषु साम्यम्। 'विन्दुष्टामोर्ण इत्यादौ सन्नसन्नपि वा क्वचित्'। धम्मेणं, धम्मेण। जम्माणं, जम्माण। कम्मेहिं, कम्मेहि। गामाउं, गामाउ। सरेसुं, सरेसु। तुज्झं, तुज्झ। अम्हेहिं, अम्हेहि। महं, मह। इत्यादौ लक्ष्यानुसारेण अविन्दुष्वपि बिन्दुसद्भावोऽवगन्तव्यः ॥ ५३ ॥

अम्हेसु इति। अस्मद्शब्द के सप्तमीबहुवचन में सिद्ध 'अस्मासु' को अम्हेसु आदेश हो। अह्मेसु मई ठिआ। अस्मासु मतिः स्थिता। अस्मासु को दूसरा अम्हासु भी आदेश होता है। अह्मासु सद्धा = अस्मासु श्रद्धा। युष्मद्, अस्मद् और अव्यय अलिङ्ग हैं, अर्थात् पुंलिङ्ग-स्त्रीलिङ्ग-नपुंसकलिङ्गादिकृत इनके रूपों के आदेश में किसी प्रकार का भेद नहीं है। अत एव तीनों लिङ्गों में समान रूप होंगे। टा, आम् के परे वैकल्पिक सिद्ध अनुस्वार, तृतीयाबहुवचन, षष्ठी, सप्तमी, पञ्चमी आदि विभक्तिओं में असिद्ध अनुस्वार लक्ष्यानुरोध से कहीं-कहीं विकल्प से होगा। धम्मेणं, धम्मेण। गामाउं, गामाउ। महं, मह। इत्यादि ॥ ५३ ॥

## द्वेर्दो ॥ ५४ ॥

पदस्येति निवृत्तम्। सुपीति वर्तते। द्विशब्दस्य दो इत्ययमादेशो भवति सुपि परतः। दोहिं (प्राकृते द्विवचनं नास्तीति नियमात्[2] द्विशब्दात् भिसः स्थाने ५-५ हिं, शे० स्प०)। दोसु। द्वाभ्याम्, द्वयोः ॥ ५४॥

द्वेर्दो—द्विशब्दस्य सुपि परे दो इत्यादेशः स्यात्। दोहिं, दोसु ॥ ५४ ॥

द्वेर्दो इति। द्विशब्द को सुप् के परे दो आदेश हो। तृतीयाबहुवचन में दोहिं। हिं आदेश ॥ ५४ ॥

## त्रेस्ति ॥ ५५ ॥

त्रिशब्दस्य सुपि परतः ति इत्यादेशो भवति। तीहिं। तीसु (५-१८ दीर्घः, ५-५ भिस् = हिं)। त्रिभिः। त्रिषु ॥ ५५

त्रेस्ती[3]—त्रिशब्दस्य सुपि परे ती इत्यादेशः स्यात्। तीहिं, तीसु ॥ ५५ ॥

त्रेरिति। त्रिशब्द को सुप् के परे ती आदेश हो। तीहिं = त्रिभिः। सप्तमी में तीसु = त्रिषु ॥ ५५ ॥

## तिण्णि[4] जश्शस्भ्याम् ॥ ५६ ॥

---

१. अस्मासु स्थितम्। २. एवं सर्वत्रबोध्यम् ३. संजीवन्यादिसंमताः पाठाः। ४. तिस्मि तिणा-तिणि-तिस्सि-तिणि। का० पा०।

त्रिशब्दस्य जश्शस्भ्याम् सह तिण्णि इत्यादेशो भवति । तिण्णि आगदा । तिण्णि पेक्ख (स्पष्टानि) । त्रय आगताः । त्रीन् प्रेक्षस्व ॥ ५६ ॥

तिणि[1] जश्शस्भ्याम्—जसा शसा च सह त्रिशब्दस्य तिणि स्यात् । तिणि २, त्रयः, त्रीन् वा ॥ ५६ ॥

तिणीति । जस्-शस् के सहित त्रिशब्द को तिणि आदेश हो । त्रयः का और त्रीन् का तिणि होगा ॥ ५६ ॥

## द्वेर्दुवे दोणि वा ॥ ५७ ॥

द्विशब्दस्य जस्शस्भ्यां सह दुवे, दोणि इत्येतावादेशौ वा भवतः । दुवे कुणन्ति । दोणि कुणन्ति । पक्षे-दो कुणन्ति । द्वौ कुरुतः । दुवे पेक्ख । दोणि पेक्ख । दो पेक्ख । ( ८-१३ कृञ् = कुण, द्विवचनाभाव-नियमात् ४७-४ झि = न्ति, कुणन्ति, शे० स्प० ) । द्वौ प्रेक्षस्व ॥ ५७ ॥

द्वेर्दुवे दोणि[2]—जसा शसा च सह द्विशब्दस्य दुवे, दोणि इत्यादेशौ भवतः । 'द्वेर्जश्शस्भ्यां सह स्यातां द्वावन्यौ वेणि, वे इति' । दुवे, दोणि, वेणि, वे । द्वौ इति ॥

द्वेरिति । जस्-शस् के सहित द्विशब्द को दुवे, दोणि ये दो आदेश हों । प्राकृत में द्विवचन नहीं होता है, अतः द्विशब्द के साथ जस्-शस् का ग्रहण है । एवं जस् के सहित द्विशब्द को 'वेणि, वे' ये दो आदेश और भी होंगे । चारों प्राकृतप्रयोगों में संस्कृत के द्वौ २, द्वे २ को होंगे ॥ ५७ ॥

## चतुरश्चत्तारो चत्तारि ॥ ५८ ॥

चतुश्शब्दस्य जश्शस्भ्यां सह चत्तारो, चत्तारि इत्येतावादेशौ भवतः । चत्तारो, चत्तारि पुरिसा कुणन्ति[3] ( १-२३ ऋ = रि, ५-११ दीर्घः, ५-२ जसो लोपः ) । चत्तारो पुरिसे पेक्ख[4] ( ५-१२ अ-ए, ५-२ शसो लोपः, अन्यत् पूर्ववत् ) ॥ ५८ ॥

चतुरश्चत्तारो चत्तारि—चतुर्-शब्दस्य जश्शस्भ्यां सह एतौ स्तः । स्पष्टम् ॥

चतुरिति । जस्-शस् के सहित चतुर्-शब्द को चत्तारो, चत्तारि ये होंगे । चत्वारः, चतुरः । चतस्रः २, चत्वारि २ ॥ ५८ ॥

## एषामामो ण्हं ॥ ५९ ॥

एषां द्वित्रिचतुःशब्दानामामः स्थाने ण्हं इत्ययमादेशो भवति । दोण्हं धणं ( ६-५४ द्वि = दो, शे० स्प० ) । तिण्हं धणं ( ६-५५ त्रि=ति, शे० स्प० ) । चतुण्हं[5] धणं ( ४-६ रलोपः, शे० स्प० ) ॥ ५९ ॥

एषामामो ण्हं—द्वि, त्रि, चतुर्-शब्दानाम् आम्प्रत्ययस्य ण्हं स्यात् । दोण्हं ।

---

१. संजीवनीसंमतः पाठः । २. संजीवनीसंमतः पाठः । ३. चत्वारः पुरुषाः कुर्वन्ति । भिसादौ रेफतकारयोर्लोपः । तेन-चऊहिं । का० पा० । ४. चतुरः पुरुषान् पश्य । ५. चतुण्हं-चउण्हं । का० पा० ।

तिण्हं । चउण्हं । 'कतिपञ्चादिशब्दानाम् आमो ण्हं नैव दीर्घता' । कइण्हं, पंचण्हं, छण्हं, सत्तण्हं । इत्यादि ॥ ५९ ॥

एषामिति । द्वि, त्रि, चतुर्-शब्द से पर आम् को ण्हं हो । उक्त सूत्रों से दो, ति आदेश इनको होंगे । दोण्हं । तिण्हं । चउण्हं । कतिशब्द एवं पञ्चन् आदि शब्दों से पर आम् को ण्हं होगा । कइण्हं, पंचण्हं-इत्यादि ॥ ५९ ॥

## शेषोऽदन्तवद् ॥ ६० ॥

शेषः[1] सुब्विधिरदन्तवद्भवति । अकारान्ताद् 'भिसो हिं' इत्ययमादेश उक्त इकारोकारान्तादपि भवति । अग्गीहिं । वाऊहिं (५-१८ सू० स्प०) । एवं मालाहिं । णईहिं । बहूहिं । अग्गिस्स ( ३-२ नलोपः, ३-५० गद्वि०, ५-८ ङस्=स्स ) । वाउस्स (२-२ यलोपः, शे० पू०) । अग्गीदो । वाऊदो ( ५-६ ङसि = दो ) । अग्गीसु । वाऊसु ( पूर्ववत् यलोपदीर्घौ ) । एवं दोहिं (६-५४ द्वि = दो, ५-५ भिस् = हिं) । तीहिं (६-५५ त्रि=ति, ५-१८ दीर्घः) । चऊहिं (४-६ रलोपः, २-२ तलोपः, ५-१८ दीर्घः, शे० पू०) ॥६०॥

शेषाददन्तवत्[2]—अदन्ताद् यो विधिः प्रोक्तः स शेषात् अदन्तातिरिक्तशब्दादपि स्यात् । तेन अदन्तात् विहितः शसो लोप आदन्तादिदुदन्ताच्च भवति । बाला, बालाओ । गिरीओ, गिरीउ । साणूओ, साणूउ । 'ए सुप्यङिङसोः-सूत्रे नेष्टं शेषाददन्तवत्' । रामाओ । सालिणो । पीलुणो । सहीओ । बहूओ । 'अकारलोपसूत्रेऽपि नेष्टं शेषाददन्तवत्' । सव्वाओ । बुद्धीओ । धेणूओ । सहीओ । बहूओ ॥ ६० ॥

शेषादिति । अदन्त से जो कार्य कहे गये हैं वे आदन्त से तथा इदन्त, उदन्त से भी होंगे । जैसे 'जश्शसोर्लोपः' से लोप । बाला, गिरि, साणु शब्दों से भी होगा । परन्तु 'ए सुप्यङिङसोः' सूत्र में 'शेषाददन्तवत्' अभिमत नहीं है, अतः रामा, शालि, पीलु, सखी, वधू शब्दों में एकार नहीं होगा । किन्तु रामाओ में 'जसो वा' से जस् को ओकार । सालिणो, पीलुणो में 'इदुतोः शसो णो' से णो आदेश । सहीओ, बहूओ में 'स्त्रियां शस उदोतौ' से ओकार होगा । एवं अकारलोपविधायक सूत्र में भी अदन्तवद्भाव नहीं होगा । इससे सव्वाओ, बुद्धीओ, धेणूओ, सहीओ, बहूओ, इत्यादिकों में 'क्वचिदपि लोपः' से लोप नहीं होगा, किंतु अदन्तवद्भाव होने से 'जस्-ङस्याम्सु दीर्घः' से दीर्घ होगा ॥ ६० ॥

## न ङिङस्योरेदातौ ॥ ६१ ॥

इकारोकारान्तानां ङिङस्योरदन्तवद् एकाराकारौ न भवतः । अग्गिम्मि (६-५२ ङि = म्मि, शे० अग्गिस्सेतिवत् ) । वाउम्मि (२-२ यलोपः, शे० स्प० ) । अग्गीदो, वाऊदो । अग्गीदु, वाऊदु । अग्गीहि, वाऊहि ( ५-६ ङसि = दो, दु, हि, शे० पू० स्प० ) ॥ ६१ ॥

---

१. शेषेषु विधि । का० पा० । २. पाठ एष संजीवन्यादिसंमतः ।

न ङिङस्योरेदातौ—अकारान्तरहितात् प्रातिपदिकात्परयोः ङि-ङसिप्रत्यययोरेत् आच्च न स्तः । गिरिम्मि, गिरीउ, गिरीओ ॥ ६१ ॥

न ङिङस्योरिति । अकारान्त से रहित प्रतिपदिक से पर ङि-ङसि-प्रत्ययों को एकार और आकार न हों । गिरिम्मि, गिरीउ, गिरीओ । ङि में म्मि और ङसि में उ, ओ ॥ ६१ ॥

## ए भ्यसि ॥ ६२ ॥

नेत्यनुवर्तते । भ्यसि परत इकारोकारान्तयोरदन्तवदेत्वं न भवति । अग्गीहिन्तो, वाऊहिन्तो, अग्गीसुन्तो वाऊसुन्तो (५-६, १२ सूत्रयोर्बाधः, ५-११ दीर्घः, ५-७ भ्यस्=हिन्तो, सुन्तो, शे० पू० ) ॥ ६२ ॥

ए भ्यसि—भ्यसि नकारान्तस्य एकारो न स्यात् । पञ्चाहिन्तो, पञ्चासुन्तो । अग्गीहिन्तो । वाऊहिन्तो ॥ ६२ ॥

ए भ्यसीति । भ्यस् के परे नकारान्त को एकार नहीं होगा । पञ्चाहिन्तो इत्यादि । परन्तु वस्तुतः नकारान्त के नकार का लोप होने पर अदन्त प्रातिपदिक नहीं है, और 'ए भ्यसि' में नकारान्त इस अर्थ का बोधक पद भी नहीं है और अदन्तातिदेश सजातीय अच् में होगा, नकारान्तादि में नहीं । अतः इसके उदाहरण अग्गीसुन्तो, वाऊसुन्तो होंगे । सदानन्द तथा वसन्तराज दोनों भ्रम खागये हैं ॥ ६२ ॥

## द्विवचनस्य बहुवचनम् ॥ ६३ ॥

सर्वासां विभक्तीनां सुपां तिङां च द्विवचनस्य बहुवचनं प्रयोक्तव्यम् । वृक्षौ, वच्छा । वृक्षाभ्याम्, वच्छेहिं, वच्छाहिन्तो । वृक्षयोः, वच्छेसु, वच्छाण । ( स्पष्टं, पञ्चमपरिच्छेदे व्याख्याताः ) । तिङां यथा-तिष्ठतः, चिट्ठन्ति ( १२-१६ स्था = चिट्ठ, ७-४ झि = न्ति) ॥ ६३ ॥

द्विवचनस्य बहुवचनम्—सुप्तिङ्सम्बन्धिनो द्विवचनस्य नित्यं बहुवचनं स्यात् । दो हत्था । दो होन्ति ॥ ६३ ॥

द्विवचनेति । सुप्तिङ् के द्विवचन को बहुवचन हो । प्राकृत में द्विवचन नहीं होता । दो हत्था = द्वौ हस्तौ । दो होंति = द्वौ भवतः ॥ ६३ ॥

## चतुर्थ्याः षष्ठी ॥ ६४ ॥

इति प्राकृतसूत्रेषु षष्ठः परिच्छेदः ॥

चतुर्थीविभक्तेः स्थाने षष्ठीविभक्तिर्भवति[1] । बह्मणस्स देहि ( ३-२

[1]. तादर्थ्यङेर्वा ८।३।१३२ तादर्थ्यविहितस्य ङेश्चतुर्थ्येकवचनस्य स्थाने षष्ठी वा भवति । देवस्स देवाय । देवार्थमित्यर्थः । ङेरिति किम् ? देवाण ।

वधाड्डाइश्च वा ८।३।१३३ वधशब्दात्परस्य तादर्थ्यङेर्डिद् आइः षष्ठी च वा भवति । वहाइ, वहस्स, वहाय । वधार्थमित्यर्थः ।

रलोपः, ५-१० ङस् = स्स, देहीति संस्कृतसमः)। बह्मणाणं देहि। ब्राह्मणाय देहि। ब्राह्मणेभ्यो देहि (५-११ आमि दीर्घः, ५-४० आम् = णं, शे० स्प०) ॥ ६४ ॥

इति प्राकृतप्रकाशे सर्वनामविधिर्नाम षष्ठः परिच्छेदः ॥

**चतुर्थ्याः षष्ठी**—चतुर्थ्या विभक्तेः स्थाने षष्ठी विभक्तिः स्यात्। बम्हणस्स देसु, ब्राह्मणाय देहि ॥ ६४ ॥

**चतुर्थ्या इति। चतुर्थी विभक्ति के स्थान में षष्ठी होगी। जैसे ब्राह्मणाय का बम्हणस्स-इति ॥ ६४ ॥**

## ( क्वचिन्न तादर्थ्ये ॥ )

**क्वचिन्न तादर्थ्ये'**— तादर्थ्ये विहितायाश्चतुर्थ्याः क्वचित् षष्ठीविभक्तिर्न स्यात्। घरात्र दारु। क्वचिद्-ग्रहणान्न सर्वत्र। तेन-देवाणं बली=देवेभ्यो बलिः, इत्यादौ षष्ठ्येव। 'व्यत्ययोऽप्यासाम्'। अच्छीसु पिज्जसि। अक्षिभ्यां पीयसे। अत्र तृतीयास्थाने सप्तमी। रत्तिं दिट्ठो। रात्रौ दृष्टः। अत्र सप्तमीस्थाने द्वितीया। 'अन्यादृश्यपि वीप्सायां द्विरुक्तिः क्वापि दृश्यते'। अंगमगाइं। अङ्गानि अङ्गानि। अंगमंगाणं। अङ्गानामङ्गानाम्। अंगमंगेसु। अंगेषु २। वच्च, वच्चह। व्रजत २। होहोइ। भवति भवतिइत्यादिषु बोध्यम् ॥

इति श्री म० म० मथुराप्रसादकृतौ चन्द्रिकाव्याख्यायां षष्ठः परिच्छेदः।

---

क्वचिद् द्वितीयादेः ८।३।१३४। द्वितीयादीनां विभक्तीनां स्थाने षष्ठी भवति क्वचिद्। सीमाधरस्स वन्दे। तिस्सा मुहस्स भरिमो। अत्र द्वितीयायाः षष्ठी। धणस्स लद्धो, धनेन लब्ध इत्यर्थः। चिरस्स मुक्का। चिरेण मुक्तेत्यर्थः। अत्र तृतीयायाः। चोरस्स बीहइ। चोराद्बिभेतीत्यर्थः। अत्र पञ्चम्याः। पिट्ठीए केसभारो। अत्र सप्तम्याः ॥

पञ्चम्यास्तृतीया च ८।३।१३६। पञ्चम्याः स्थाने क्वचित् तृतीयासप्तम्यौ भवतः। चोरेण बीहइ। चोराद्बिभेतीत्यर्थः। अन्तेउरे रमिउमागओ राया। अन्तःपुराद् रन्त्वागतो राजा-इत्यर्थः॥

द्वितीयातृतीययोः सप्तमी ८।३।१३५। द्वितीयातृतीययोः स्थाने क्वचित्सप्तमी भवति। नयरे न जामि। अत्र द्वितीयायाः। तिसु तेसु अलं किआ पुहवी। अत्र तृतीयायाः ॥

सप्तम्या द्वितीया-८।३।१३७। सप्तम्याः स्थाने क्वचिद् द्वितीया भवति। विज्जोअं भरइ रत्तिं ॥

आर्षे तृतीयाऽपि दृश्यते। तेणं कालेणं, तेणं समयेणं। तस्मिन् काले, तस्मिन् समय इत्यर्थः। प्रथमाया अपि द्वितीया दृश्यते। चउवीसं पि जिणवरा। चतुर्विंशतिरपि जिनवरा इत्यर्थः। इति हेमः।

१. नेदं सूत्र भामहवृत्तौ।

क्वचिदिति । तादर्थ्य में विहित चतुर्थी को षष्ठी नहीं होगी । जैसे 'घराअ दारु' यहाँ 'गृहस्य घरोऽपतौ' ( ४+२४ ) से घर आदेश, 'कगचज०' ( नं. १ ) से यलोप, घराअ होगा । षष्ठी नहीं हुई । 'क्वचित् ग्रहण से बहुतों के तादर्थ्य में निषेध नहीं होगा, किन्तु षष्ठी ही होगी । जैसे देवाणं बली । देवेभ्यः बलिः प्राप्त था । वस्तुतः प्रकृति-विकृतिभाव में ही तादर्थ्य यहाँ माना गया है, अत एव पाणिनि ने 'चतुर्थी तदर्थार्थ' सूत्र में बलिहित-इत्यादि पृथक् पढ़े हैं, और जहाँ प्रकृति की विकृति नहीं है, वहाँ षष्ठी ही होगी । जैसे 'अश्वस्य घासः' यही होगा, 'अश्वाय घासः' नहीं होगा । क्योंकि यहाँ प्रकृति-विकृतिभाव नहीं है । परन्तु अनुभूतिस्वरूपाचार्यादि जो तदर्थमात्र में तादर्थ्य मानते हैं उनके यहाँ अश्वेभ्यः, अथवा अश्वाय घासः यही होगा । उसी व्यापक तादर्थ्य को लेकर यह सूत्र है । अस्तु, 'व्यत्ययोऽप्यासाम्' इन विभक्तियों का व्यत्यय भी होता है अर्थात् अन्य विभक्ति के अर्थ में अन्य विभक्ति । जैसे 'अच्छीसु पिअसि' अक्षिभ्यां यह करण पीने का है, अतः तृतीया प्राप्त थी, सप्तमी हो गई । रत्तिं दिट्ठो । यहाँ रात्रौ इस सप्तमी के स्थान में द्वितीया हो गई । एवं वीप्साद्विरुक्ति में भी पूरे पद को द्वित्व न होकर केवल पदांश को ही द्वित्व हो जायगा । जैसे अङ्गानि का अंगाइं होता है, वीप्सा में अंगाइं को द्वित्व प्राप्त था, परन्तु अंग-पद को द्वित्व और अनुस्वार । अंगमंगाइं । एवम् अङ्गानाम्-अङ्गानाम् का अंगमंगाणं । अङ्गेषु-अङ्गेषु का अंगमंगेसु होगा । एवं धातुओं में भी कहीं अवयवमात्र को द्वित्व होगा । जैसे 'व्रजत' को द्वित्व प्राप्त था । व्रज को वच्च आदेश । त को हकार । वच्चह को द्वित्व प्राप्त था, किंतु केवल वच्च को द्वित्व हुआ । 'वच्च वच्चह' हुआ । एवं भवति का होइ सिद्ध होता है । भवति को वीप्सा में द्वित्व होने पर जैसे भवति भवति होता है वैसे ही होइ को भी द्वित्व प्राप्त था, किन्तु हो मात्र को द्वित्व हुआ, अतः हो-होइ सिद्ध होगा । परन्तु यह क्वाचित्क नियम है, सार्वत्रिक नहीं । अतः 'चिनोतु' का वीप्सा में चिणउ-चिणउ होगा । इति ॥

इति श्री म० म० मथुराप्रसादकृते लोकभाषानुवादे षष्ठः परिच्छेदः ।

# अथ सप्तमः परिच्छेदः

## ततिपोरिदेतौ ॥ १ ॥

त, तिप्-इत्येतयोरेकस्य स्थाने इत्, एत् इत्येतावादेशौ भवतः। पढइ (२-२४ ठ्=ढ, शे० स्प०), पढए। सहइ, सहए। (यथाक्रमं तिप इः, तस्य ए) पठति। पठतः। सहति। सहते ॥ १ ॥

ततिपोरिदेतौ—आत्मनेपदपरस्मैपदयोः प्रथमपुरुषैकवचनयोः ततिबित्येतयोः प्रत्येकम् इ, ए इत्येतावादेशौ स्तः। तकारोऽसंदेहार्थ। रमइ, रमए। विरमइ, विरमए। ततिपोर्व्यत्ययेन ग्रहणाद् यथासंख्यं न। 'शौरसेन्यां विभाषासु भवेद् दिरपि तिप्तयोः'। यथा-'चित्ते विहुट्टदि न तुट्टदि सा गुणेसु' इत्यादि। सिद्धावस्थायां साध्यावस्थायां वा लक्ष्यवशात् परिभाषेयम्। ततिपोरिदेतावित्यादिना 'एकाचो हीअ' इत्येवमन्येन प्रकारेण ये न तिबादीनामादेशा विधास्यन्ते ते सिद्धावस्थायां भूतकाले साध्यावस्थायां वर्तमानकाले लक्ष्यवशाद् भवन्तीति परिभाष्यते। भूते- हसइ, हसए। अहसत्, अहसीत्, जहास। वर्तमानेऽपि-हसइ, हसए। हसति। पेच्छइ, पेच्छए। प्रैक्षत, प्रैक्षिष्ट, प्रेक्षांचक्रे ॥ १ ॥

ततिपोरिति। आत्मनेपद तथा परस्मैपद के प्रथमपुरुष एकवचन के त, तिप् को इ, ए ये आदेश हों। इत्-एत् में तकार असंदेहार्थ है। रम्-ति। 'शेषाणामदन्तता' (७+७८) से अदन्तता। रमइ, रमए। विपूर्वक परस्मैपदी है। विरमइ, विरमए। 'शौरसेनी में तिप् त को दि भी होता है'। घुट परिवर्तने (९ से) घ को ह। सिद्धावस्था में अथवा साध्यावस्था में लक्ष्यानुरोध से यह नियामक सूत्र है, अर्थात् भूतकाल के प्रत्ययों की सिद्धावस्था में और वर्तमानकाल के प्रत्ययों की साध्यावस्था में। 'ततिपो०' इससे और 'एकचो हीअ' इससे या अहसीत्, जहास भूतकाल में, एवं हसति वर्तमानकाल में। तथा ईक्ष-आत्मनेपदी-पेच्छइ, पेच्छए-प्रैक्षत, प्रैक्षिष्ट, प्रेक्षांचक्रे भूतकाल में। एवं प्रेक्षते वर्तमानकाल में होंगे ॥ १ ॥

## थास्सिपोः सि से ॥ २ ॥

थास्, सिप्-इत्येतयोरेकैकस्य स्थाने सि, से इत्येतावादेशौ भवतः। पढसि। पढसे। सहसि। सहसे। (पूर्ववत् ठ्=ढ, अन्यत्सुगमम्) ॥२॥

सिप्थासोः[1] सि से—सिप्थासोः सि, से इत्येतौ स्तः। जाणासि, जाणासे। जानासि। वेवसि, वेवसे। वेपसे ॥ २ ॥

सिबिति। सिप् को सि-से, एवं थास् को सि-से होते हैं। उदाहरणों में स्पष्ट है ॥ २ ॥

(सं० ६ से णकार। १५ से प को व। १८ से क्ष को छकार। ४ से रेफलोप)

---

१. संजीवनीसंमतः पाठः।

## इड्मिपोर्मिः ॥ ३ ॥

**इट्, मिप्–इत्येतयोः स्थाने मिर्भवति । पढामि । हसामि[1] । सहामि ( ७–३० आत्वम् ) ॥ ३ ॥**

इण्[1]मिपोर्मिः– इट्–मिप् इत्येतयोर्मिरेव स्यात् । उत्तमपुरुषे परस्मैपदमेव । जंपामि, जाणामि, वदामि । मिपो मि-विधानं भणेमि करेमीत्यादौ लादेशो वेति एत्वार्थम् ॥

**इट् इति । इट् मिप् इनको मि हो अर्थात् उत्तमपुरुष में परस्मैपद ही हो । जंपामि, जाणामि, वदामि इत्यादि उदाहरणों से स्पष्ट है । मिप् को मि–विधान 'लादेशो वा' इससे एत्व के लिये ॥ ३ ॥**

## न्तिहेत्थामोमुमा बहुषु[2] ॥ ४ ॥

**बहुषु वर्तमानानां तिङां स्थाने न्ति, ह, इत्था, मा, मु, म इत्येत आदेशा भवन्ति । प्रथमपुरुषस्य, रमंति । पढंति । हसंति (२–२४ ठ्=ढ, झि = न्ति कृते, ४–१७ बिं०, अ० स्प०) । मध्यमस्य–रमह, पढह, हसह, पढित्था[4] (मध्य० थ=ह, इत्थ इति द्वावादेशौ, शे० स्प०) । उत्तमस्य— पढामो, पढमु पढम ( उत्तमस्य मो, मु, म इत्येत आदेशाः, ७–३० आत्व-विकल्पः, शे० स्प० ) ॥ ४ ॥**

न्तिहेत्थामोमुमा बहुषु—बहुत्वर्थेषु विहितानां परस्मैपदात्मनेपदसम्बन्धिनां झिझयोः न्तिः स्यात्, न्ते इत्यपि; थध्वमोः ह इत्था च, मस्–महिङोश्च मो, मु, म इति त्रय आदेशाः स्युः । लहन्ति, लहन्ते = लभन्ते । भवह, भवित्था = भवथ । जुज्झह, जुज्झित्था = युध्यध्वम् । बीहामो, बीहामु, बीहाम = बिभीमः, विभिमो वा । वड्ढामो, वड्ढामु, वड्ढाम = वर्धामहे । 'इरे इत्यपि वाऽऽदेशस्तिपो झेर्झस्य च स्मृतः' । सुसइरे सुहं । शुष्यति सुखम् । 'इवे' इत्यादेश इति सदानन्दः । यथा–सुसइवे, शुष्यति । पहुव्विवे, प्रभवन्ति । दूसइवे, दूष्यन्ते । 'भुवः प्रादेः परस्य स्यादादेशो हुव्व इत्यपि' । पहुव्विरे रिउणो । प्रभवन्ति रिपवः ॥ ४ ॥

**न्तिहेत्था इत्यादि । परस्मैपद आत्मनेपद सम्बन्धी बहुवचन के प्रत्ययों को ये हों अर्थात् झि–झ को न्ति और न्त, एवं थ-ध्वम् को ह–इत्था, मस्–महिङ् को मो-मु–म ये तीन आदेश हों । तिप्, झि–झ को 'इव' भी आदेश हो । लभते के ते को न्ति–न्त आदेश हो गये । लहन्ति–लहन्ते । ( ९ से ह ) थ-ध्वम् को ह–इत्था । मस्-**

---

१. अदन्ताद्धातोर्म्मौ परे अत आत्वं वा भवति ५ । ५ । प्राकृतव्याकरणम्, तथाच तत्रैव अकारान्ताद्धातोर्मोमुमेषु परेषु अत इत्वम् आत्वञ्च भवति, कचिदेत्वमपि ५।६ । हसिमो, हसामो, हसेमो, हसिमु, हसेमु, इत्यादि । इति अत्वम्, इत्वम्, आत्वम्, एत्वं च प्रतिपादित-मकारान्तधातोः । २. संजीवनीसंमतः पाठोऽयम् । ३. प्रथमपुरुषस्य न्ति, मध्यमस्य ह, इत्था, उत्तमस्य मो, मु, म, इति विवेकः । तथाच हेमः—बहुष्वाद्यस्य न्ति, न्ते, इरे ८।३।१४२। मध्यमस्येत्था, हचौ ८।३।१४३। तृतीयस्य मो, मु, माः । ८।३।१४४ इति । ४. पढीत्था, पढित्थ । का० पा० ।

महिङ् को मो-मु-म उदाहरणों में स्पष्ट है। तिप्-झि-म्न को इरे यह भी आदेश होगा। शुष्-सुसइरे। सदानन्दने इरे के स्थान में 'इवे' आदेश माना है। वह प्रतीत नहीं होता है। प्रादि उपसर्गसे पर भूधातु को हुव्व आदेश हो। पहुव्विरे। प्रभवन्ति॥

## अत ए से ॥ ५ ॥

नित्यार्थं वचनं यतो विशेषणम्। ततिपोः सिप्थासोः ए से इत्यादेशावत एव परौ[1] भवतो, नान्यस्मात्। ततिपोः, रमए, पढए। सिप्थासोः रमसे, पढसे (रम्-त = ए—रमए। २-२४ ठ् = ढ, पढ-ति = ए पढए। रम्-थास् = से = रमसे। पढ-सिप् = से = पढसे)। अत इति किम्? होइ (८-१ भू-हो, ७-१ ति = इ)। भवति ॥ ५ ॥

अत ए से—तितयोर्य ए इत्यादेशः, सिप्थासोर्यः से इत्यादेशस्तौ च अदन्तादेव स्तः। करए। गिण्हसे। अत इति किम्? होइ, होसि। 'अकारान्तान्नियम्येते न्तमाणौ क्वापि पण्डितैः'। हुवन्ते-भवन्ति। हुवमाणो-भवन्॥ ५॥

अत इति। तिप् त को जो ए आदेश हो और सिप्-थास् को जो से हो वह अकारान्त से ही होगा। जैसे-करए, गिण्हसे। जहाँ अकारान्त नहीं होगा वहाँ नहीं होगा। जैसे-होइ, होसि। न्त और माण भी अकारान्त से कहीं होते हैं। जैसे हुवन्ते, हुवमाणो। भवन् के अर्थ में न्त और माण हैं॥ ५॥

## [2]अस्तेर्लोपः ॥ ६ ॥

अस्तेर्धातोः थास्सिपोरादेशयोः परतो[3] लोपो भवति। सुत्तो सि (७-२ सिप् = सि, शे० ३-१ सू० स्प०)। पुरिसो सि (१-२३ सू० स्प०)। सुप्तोऽसि। पुरुषोऽसि॥ ६॥

अस्तेर्लोपः—तिबादौ अस्धातोर्लोपः स्यात्, तुमं सि। पुत्तो सि। लक्ष्यानुसारी लोपः। तेनेह न-अत्थि। संति। प्रायः कर्त्रादिपूर्वपदे लोप इति भावः॥ ६॥

अस्तेरिति। तिबादिक प्रत्ययों के परे अस् धातु का लोप हो। त्वम्-असि। तुमं सि। लक्ष्यानुकूल लोप है, अतः कहीं न भी होगा। अत्थि। संति। प्रायः कर्त्रादिक के पूर्वपद हो लेने पर ही लोप होगा—यही व्यवस्था है॥ ६॥

## मिमोमुमानामधो हश्च ॥ ७ ॥

मिमोमुमानामस्तेः परेषामधो हकारः प्रयोक्तव्यः। अस्तेश्च लोपः। गओ म्हि, गअ म्हो। गअ म्हु, गअ म्ह (२-२ तलोपः, ५-१ ओ), (७-२ मिप् = मि, ७-३ मस् = मा, मु, म, ५-२ जसो लोपः) गतोऽस्मि। गताः स्मः॥ ७॥

मिमोमुमानामधो हश्च—अस्तेः सम्बन्धिनामेषामधः हकारः प्रयोज्यः। चकारा-

---

१. नित्यं भवतः। का० पा०। २. असेर्लोपः। का० पा०। ३. परयोः। असेर्धातोः परतः थास्सिपोर्लोपः। का० पा०।

दुक्तधातुलोपश्च। आणत्त म्हि, आज्ञप्तोऽस्मि। आणत्त म्हो, आणत्त म्हु, आणत्त म्ह, आज्ञप्ताः स्मः॥ ७॥

मिमो इति। अस्-धातु से पर मि-मो-मु-म इनके अधोभाग में हकार का योग होता है। आज्ञप्तः अस्मि। अस् का लोप 'मिमोमुमा०' इससे हकार का योग। म्हि। एवं बहुवचन में आणत्त म्हो। आणत्त म्हु। आणत्त म्ह। आज्ञप्ताः स्मः। 'सन्धा-वज्लोप०' इससे आणत्ता के आकार को ह्रस्व॥ ७॥

## यक ईअइज्जौ॥ ८॥

**यकः स्थाने ईअ इज्ज इत्यादेशौ भवतः। पढीअइ। पढिज्जइ। सही-अइ। सहिज्जइ। ( स्प० ) पठ्यते। सह्यते॥ ८॥**

यक इअइज्जौ[1]—भावे कर्मणि च विहितस्य यकः इअ इज्ज इत्यादेशौ भवतः। अकर्मकात् धातोर्भावे, सकर्मकात्कर्मणि। भावे तावत्-णच्चिअइ, णच्चिअए। णच्चिज्जइ, णच्चिज्जए-इत्यादि। कर्मणि-अम्हेहिं गीअं, गाइअइ, गाइअए, गाइज्जइ, गाइज्जए॥८॥

यक इति। अकर्मक धातु से भाव में और सकर्मक धातु से कर्म में विहित यक् के स्थान में इअ इज्ज ये आदेश हों। णच्चिअइ, णच्चिअए। 'ततिपोरिदेतौ ६।१ से त-प्रत्यय को इ-ए होगा। 'च्चो व्रजिनृत्योः' ७।५१ इससे तकार को च्च आदेश। 'सन्धावज्लोप०' ४।१ से च्च के अकार का लोप। णच्चिअइ, णच्चिअए। एवम्-णच्चिज्जइ, णच्चिज्जए=नृत्यते। कर्म में—गाइअइ, गाइअए, गाइज्जइ, गाइज्जए। मया गीयते॥८॥

## नान्त्यद्वित्वे॥ ९॥

**धातोरन्त्यद्वित्वे सति यक ईअ इज्ज इत्यादेशौ न भवतः। हस्सइ। गम्मइ[2] ( ८-५८ गमादीनां द्वित्वम् )। हस्यते। गम्यते। गमादीनां विकल्पेन [ द्वित्वविधानात्[3], ] द्वित्वविधाने उक्तावादेशौ न भवतः, द्वित्वाविधाने तु भवत एव। गमीअइ, गमिज्जइ ( पक्षे-७-८ ईअ इज्ज-आदेशौ, शे० पू० स्प० )॥ ९॥**

नान्त्यद्वित्वे—भावे कर्मणि च धातेरन्त्यवर्णद्वित्वे इअ-इज्जौ एतौ न स्तः। भावे-सक्कइ, सक्कए। सुप्पइ, सुप्पए। कर्मणि-गम्मइ, गम्मए। अयं योगो विभज्यते। तेन, अन्यत्रापि यकोऽभावः। हीरइ, कीरइ, तीरइ। ह्रियते, क्रियते, तीर्यते॥ ९॥

नान्त्येति। भाव अथवा कर्म में धातु के अन्त्य वर्ण द्वित्व से पर इअ इज्ज आदेश नहीं होते हैं। भाव में-सक्कइ मए। 'शकादीनाम्०' ७।५६ इससे ककारद्वित्व। 'ततिपो०' ६।१ इससे इकार, एकार। 'शषोः सः' २।३९ से सकार। 'शेषाणामदन्तता' ७।७८ इससे धातु को अदन्तत्व। एवम्-सक्कइ, सक्कए। मया कर्तुं शक्यते। एवम्-सुप्पइ, सुप्पए। मया सुप्यते। कर्म में—गम्मइ, गम्मए-'गमादीनाम्०' ७।६२ इससे मकार को द्वित्व। अन्य कार्य पूर्ववत्। गम्यते ग्रामः। एवम् लब्भइ, लब्भए।

---

१. संजीवनीसंमतः पाठः। २. 'त्यादेः' ८।१। ९ तिवादीनां स्वरस्य स्वरे परे सन्धिर्न। हेम०। एवं सर्वत्र सन्ध्यभावो बोध्यः। ३. [ ] अयं पाठो न सार्वत्रिकः।

गमादित्वाद् द्वित्व। 'वर्गेषु युजः०' ३।५१ से बकार। लब्भइ, लब्भए। देवः लभ्यते। 'नान्त्यद्वित्वे' का विभाग करें। 'न' यह पृथक् सूत्र है। इसका यह अर्थ होगा कि अन्यत्र भी कहीं भाव अथवा कर्म में प्रत्यय होने पर यक् नहीं होता। जैसे ह्रियते-हीरइ। क्रियते-कीरइ। तीर्यते-तीरइ ॥ ९ ॥

## न्तमाणौ शतृशानचोः ॥ १० ॥

**शतृ—शानच् इत्येतयोरेकैकस्य न्त, माण इत्येतावादेशौ भवतः। पढन्तो। पढमाणो। हसन्तो। हसमाणो ( पूर्ववत् पढ, शतृ = न्तजाते ५-१ ओ, एवं शानचोऽपि माण आदेशः, ५-१ ओत्वं च ) ॥ १० ॥**

**न्तमाणौ शतृशानचोः**—एतयोः न्त-माण एतौ स्तः। कुप्पन्तो, कुप्पमाणो। खमन्तो, खममाणो। 'लस्य क्रियातिपत्तौ वा न्तमाणावपि च क्वचित्'। जइ पढन्तो पंडिओ होन्तो। जइ पढमाणो पंडिओ होमाणो। पक्षे-पढेज्ज पंडिओ होज्ज ॥ १० ॥

न्तमाणौ-इति। शतृ-शानच् प्रत्ययों को न्त, माण आदेश होते हैं। कुप्यत्-कुप्पन्तो अथवा कुप्पमाणो। कुप क्रोधे। शतृप्रत्यय को न्त अथवा माण आदेश। 'शेषाणामदन्तता' ७।७८ से धातु को अदन्तत्व, 'शकादीनां द्वित्वम्' ७।५७ से पकार-द्वित्व। 'अत ओत् सोः' ५।१ से सु को ओकार। कुप्पन्तो, एवम् कुप्पमाणो। कुप्यतीति कुप्यन्। क्षमते-इति खममाणः। क्षमूष् सहने। उक्त सूत्र से शानच् को न्त, माण आदेश होंगे। 'ष्कस्कक्षां खः' ३।२९ से क्ष को ख आदेश। धातु को अदन्तता, सु को ओकार पूर्ववत् होंगे। क्रिया के द्वारा क्रिया की सिद्धि में 'ल' के स्थान में कहीं-कहीं न्त, माण आदेश होते हैं। उदाहरण-जइ इति। यदि अपठिष्यत् तदा पण्डितः अभविष्यत्। पठ् धातु। ल के स्थान में न्त एवं माण आदेश। 'ठो ढः' २।२२ से ढकार। अन्य कार्य पूर्ववत्। जइ पढन्तो, एवं पढमाणो पंडिओ होमाणो। पक्षे-'क्रियातिपत्तिकालेऽपि ज्ज-ज्जा वेति न्तमाणवत्'। इससे दो में से कोई भी एक आदेश होगा। तो पक्ष में-पढेज्ज, पढेज्जा होगा। 'लादेशे वा' ६।३४ से एकार होगा ॥१०॥

## ई च स्त्रियाम् ॥ ११ ॥

**स्त्रियां वर्तमानयोः शतृशानचोरीकारादेशो भवति, न्तमाणौ च। हसई, हसन्ती, हसमाणा। वेवई, वेवन्ती, वेवमाणा ( वेप० २-१५ प = व, शे० स्प०, ई, न्ती, माणा ) ॥ ११ ॥**

**ई च स्त्रियाम्**—स्त्रीलिंगे वाच्ये शतृशानचोरीकारादेशः स्यात्, चकारात् न्तमाणावपि। कुणई। पक्षे-कुणन्ती, कुणमाणा ॥ ११ ॥

ई चेति। स्त्रीलिङ्ग वाच्य रहते शतृ-शानच् को ईकार आदेश हो। चकारग्रहण से न्त माण भी होंगे। कृ धातु, शतृ अथवा शानच्। 'कृञः कुण च' ७।१० से कुण आदेश। शतृ या शानच् को ईकार। कुणई। कुर्वन्ती कुर्वाणा वा। हृ धातु का हरई हरन्ती, हरमाणा। पक्ष में कुणन्ती, कुणमाणा ॥ ११ ॥

## धातोर्भविष्यति हिः ॥ १२ ॥

भविष्यति काले धातोः परो हिशब्दः प्रयोक्तव्यः । होहिइ[1] (८-१ भू = हो, ७-१ ति = इ)। हसिहिइ (७-३३ अ = इ, शे० पूर्ववत्)। होहिन्ति । हसिहिन्ति (७-४ झि = न्ति, ४ = २७ बिं०, शे० पूर्व०)। भविष्यति । हसिष्यति । भविष्यन्ति । हसिष्यन्ति ॥ १२ ॥

धातोर्भविष्यति हिः—भविष्यत्काले विहितेषु लकारेषु धातोर्हिर्विकरणः स्यात् । काहिइ । लृट्-लुट्-लिङो भविष्यन्ति । करिष्यति, कर्ता, क्रियाद् । करिष्यते, कर्ता, कृषीष्ट वा ॥ १२ ॥

धातोरिति । भविष्यत्काल में विहित लकार के परे 'हि'विकरण का आगम हो। प्रकृति-प्रत्यय के मध्य में जो आगम होता है, उसे विकरण कहते हैं। कृधातु 'कृञः का भूतभविष्यतोश्च' ७।१४ से का आदेश। 'ततिपोरिदेतौ' ६।१ से तिप् को इकार आदेश। हि विकरणागम। काहिइ। यह भविष्यत् काल लृट् के विषय में, आशिष अर्थ में लिङ् के विषय में एवम् अनद्यतनार्थक लुट् में होगा। काहिइ-करिष्यति, कर्ता, क्रियात्। आत्मनेपद में भी पूर्ववत् साधुत्व। काहिइ = करिष्यते, कर्ता, कृषीष्ट ॥

## उत्तमे स्सा हा च ॥ १३ ॥

भविष्यत्युत्तमे स्सा हा इत्येतौ प्रयोक्तव्यौ चकाराद् हिश्च। होस्सामि, होहामि, होहिमि। होस्सामो, होहामो, होहिमो[2] (७-३ मिप् = मि, मस् = मो, शे० स्सा, हा, हि आदेशाः, ७-३० इ, आ, शे० सुगमम्) इत्यादि। भविष्यामि, भविष्यामः ॥ १३ ॥

उत्तमे स्सा हा च—भविष्यत्काले लृट्-लिङ्-लुटां सम्बान्धनि उत्तमपुरुषे धातोः स्सा हा इत्येतौ विकरणौ स्तः। चकारात् हिरपि। जाणिस्सामो, जाणिहामो, जाणिहिमो। जाणिस्सामु, जाणिहामु, जाणिहिमु। जाणिस्साम, जाणिहाम, जाणिहिम। लृट्-ज्ञास्यामः, ज्ञास्यामहे। लुट्-ज्ञातास्मः, ज्ञातास्महे। लिङ्-ज्ञेयास्म, ज्ञातास्महे। 'ज्ञो जाणमुणौ' ७।१९ इति वक्ष्यमाणेन जाणादेशे 'न्तिहेत्थे०'४।६ त्यादिना मस्-महिङोरन्यतरस्य मो-मु-म इति त्रय आदेशाः। 'ए च क्त्वे०'ति भविष्यति काले इत्वे जाणिस्सामो इत्यादयः सिद्ध्यन्ति ॥ १३ ॥

उत्तमे इति। भविष्यत्-काल में विहित लृट्-लिङ्-लुट्-सम्बन्धी उत्तमपुरुष के प्रत्यय के परे धातु से स्सा हा ये विकरण विकल्प से होते हैं। पक्ष में हि-विकरण भी होगा। ज्ञा अवबोधने। 'ज्ञो जाणमुणौ' से जाण, 'ए च क्त्वा०' ६।३३ से इकार आदेश, 'न्तिहेत्थ' ४।६ सूत्र से परस्मैपद में मस्प्रत्यय को और आत्मनेपद में महिङ्प्रत्यय को विकल्प से मो, मु, म ये तीन आदेश होंगे। इस प्रकार मो प्रत्यय के परे स्सा हा, हि-विकरण होने पर जाणिस्सामो, जाणिहामो, जाणिहिमो। ज्ञास्यामः, ज्ञेयास्मः, ज्ञातास्मः। एवम्-मु आदेश के परे तीनों विकरण होने पर जाणिस्सामु, जाणिहामु, जाणिहिमु। साधुत्व पूर्ववत् जानना। और म-प्रत्यय के परे जाणिस्साम, जाणिहाम,

---

१. होहीइ। का० पा०। २. म, मु, होस्सामु। का० पा०।

जाणिहिम। आत्मनेपद में भी ज्ञास्यामहे, ज्ञासीमहि, ज्ञातास्महे को होंगे। पूर्ववत् सब कार्य होंगे॥ १३॥

## मिना स्सं वा ॥ १४ ॥

**भविष्यत्युत्तमे मिना सह धातोः परः स्संशब्दः प्रयोक्तव्यो वा। होस्सं। पक्षे-होस्सामि, होहामि, होहिमि' (८-१ भू = हो धातोः मिना सह स्सं, पक्षे-धातोः उत्तमे परे ७-१४ सू० स्प०)॥ १४॥**

मिना स्सं वा—भविष्यति काले विहितानां लृट्-लिङ्-लुटां सम्बन्धिनोः इण्-मिपोः स्थाने यो मिस्तेन सह स्सं इति वा विकरणागमः स्यात्। पक्षे यथाप्राप्तम्। 'धातोर्भविष्यति हिः' इति हिः। उत्तमे-स्सा, हा, स्सं इति त्रयोऽपि भविष्यन्ति। अहं चेष्यामि, चीयासम्, चेतास्मि। त्रिष्वपि-अहं चिणिस्सं। चिञ् चयने, 'चिञश्चिणः' ७।३२ इति चिणादेशः। 'इण्मिपोर्मिः' ६।३ इति मिः, तेन सह तस्य स्थाने स्सं आदेशः। चिणिस्सं॥ १४॥

मिनेति। भविष्यत्-काल में विहित लृट-लिङ्-लुट्-सम्बन्धी इण्-मिप् के स्थान में जायमान जो मि आदेश उसको विकरण के साथ स्सं यह विकरण विकल्प से हो। पक्ष में यथाप्राप्त विकरण होंगे। अतः भविष्यत्काल के उत्तमपुरुष में स्सा हा हि ये भी तीनों होंगे। लृट् में चेष्यामि के स्थान में, लिङ् चीयासम् में, लुट् चेतास्मि में अहं चिणिस्सं होगा। चिञ् धातु को 'चिञश्चिणः' ७।२३ से चिण आदेश, 'इण्मिपोर्मिः' ६।३ इससे आत्मनेपद परस्मैपद दोनों में मि आदेश होगा। 'ए च क्त्वा०' ६।३३ से धातु के अकार को इकारादेश। अहं चिणिस्सं॥ १४॥

## मोमुमैर्हिस्सा हित्था ॥ १५ ॥

**भविष्यति काल उत्तमे बहुवचनादेशस्य मो, मु, म-इत्येतैः सह हिस्सा, हित्था, इत्येतावादेशौ वा भवतः। होहिस्सा, होहित्था। हसिहिस्सा, हसिहित्था। एवं मुमयोरपि, इत्यादि (७-४ सूत्रविहितैर्मोमुमैः सह, शे०स्प०)। भविष्यामः, हसिष्यामः। पक्षे-होहिमो, होस्सामो', होहामो। हसिहिमो, हसिस्सामो, हसिहामो। (पक्षे-७-१३ सूत्रविहितरूपाणि द्रष्टव्यानि। सेट्हस्धातोरपि तथैव हि, स्सा, हा इत्येते प्रयोक्तव्याः। एवं ७-४ सूत्रे शिष्टयोर्मुमयोरपि प्रयोगः। यथा-होहिमु, होहिम इत्यादयः)॥**

मोमुमैर्हिस्सा हित्था—वेत्यनुवर्तते। भविष्यत्कालविहितयोर्लृट्-लिङ्-लुट्-सम्बन्धिनोः उत्तमपुरुषबहुवचनयोर्मस्-महिङोर्ये मो-मु-म इत्येते त्रय आदेशा उक्तास्तैः सह धातोः परतः हिस्सा, हित्था, इत्येतौ विकरणौ स्तः। अम्हे किणिहिस्सा। अम्हे किणिहित्था। वयं क्रेष्यामः, क्रेयास्मः, केतास्मः। आत्मनेपदे-वयं क्रेष्यामहे, क्रेषीमहि। क्रेतास्महे। 'लृटो यन्मध्यमैकत्वं हित्था तेन समं कृञः'। कृधातोः सिप्

---

१. हसिस्स इत्यादयः। का० पा०। २. होहिस्सामो। का० पा०।

थास् वा प्रत्ययौ । 'सिप्थासोः सि से' इति सिः । तेन सह हित्था इति विकरणः । त्वं करिष्यसि = तुमं काहित्था । आत्मनेपदेऽपि करिष्यसे = काहित्था ॥ १५ ॥

मोमुमेति । भविष्यत्काल में विहित लृट्-लिङ्-लुट्-सम्बन्धी आत्मनेपद एवं परस्मैपद के उत्तमपुरुष बहुवचन में विद्यमान मस्-महिङ्-प्रत्यय के स्थान में जो मो, मु, म ये तीन आदेश होते हैं, उनके सहित प्रत्यय के स्थान में हिस्सा, हित्था ये आदेश होते हैं । अम्हे किणिहिस्सा, आत्मनेपद-परस्मैपद दोनों में समानरूप होगा । एवम् अम्हे किणिहित्था । वयं क्रेष्यामः, क्रेष्यामहे । क्रेयास्मः, क्रेषीमहि । क्रेतास्मः, क्रेतास्महे । जहाँ हिस्सा, हित्था आदेश नहीं होंगे, वहाँ पक्ष में मो-मु-म होंगे । अम्हे किणिस्सामो, किणिहामो । किणिस्सामु, किणिहामु । किणिस्साम, किणिहाम—इत्यादि होंगे । साधुत्व पूर्ववत् जानना । 'लृटो' इति । कृधातु के लृट्लकार में मध्यमपुरुष के एकवचन में प्रत्यय के साथ हित्था विकरण होगा । कृ धातु । सिप् अथवा थास् प्रत्यय । 'सिप्थासोः सि से' इससे अन्यतर को सि आदेश । 'कृञः का भूतभविष्यतोश्च' ७।१४ से का आदेश । सिप्रत्ययसहित को हित्था आदेश । तुमं काहित्था = करिष्यसि, करिष्यसे वा ॥ १५ ॥

**कृदाश्रुवचिगमिरुदिदृशिविदिरूपाणां काहं दाहं सोच्छं वोच्छं गच्छं रोच्छं दच्छं वेच्छं ॥ १६ ॥**

**भविष्यति काल उत्तमैकवचने कृआदीनां स्थाने यथासंख्यं काहं प्रभृतय आदेशा भवन्ति । काहं, करिष्यामि । दाहं, दास्यामि । सोच्छं, श्रोष्यामि । वोच्छं, वक्ष्यामि । गच्छं, गमिष्यामि । रोच्छं, रोदिष्यामि । दच्छं, द्रक्ष्यामि । वेच्छं, वेत्स्यामि । इत्यादि[1] ॥ १६ ॥**

कृदाश्रुवचिगमिरुदिदृशि[2]रूपाणां काहं दाहं सोच्छं वोच्छं गच्छं रोच्छं दच्छं—उत्तमे इति अनुवर्तते । निपातसामर्थ्यात् एकवचनं लभ्यते । अत्र कृप्रभृतयो ये उक्तास्तत्सदृशानां भविष्यदुत्तमपुरुषे स्थितानां पदस्य यथासंख्येन काहं इत्यादय आदेशा निपात्यन्ते । डुकृञ् करणे । काहं, करिष्यामि । दाहं, दास्यामि । सोच्छं, श्रोष्यामि । वोच्छं, वक्ष्यामि । गच्छं, गमिष्यामि । रोच्छं, रुदिष्यामि । दच्छं, द्रक्ष्यामि । 'रूपशब्दस्य सादृश्यादन्येऽन्येषां निपातिताः' । यथा—मोच्छं, मोक्ष्यामि । छेच्छं, छेत्स्यामि । भोच्छं, भोक्ष्ये, भोक्ष्यामि वा । विच्छं, वेदिष्यामि । इत्यादि ॥ १६ ॥

कृदेति । भविष्यत्काल में उत्तमपुरुष के एकवचन में कृ इत्यादि धातुओं के सिद्ध पद के स्थान में क्रम से काहं, दाहं इत्यादिक आदेश होते हैं, अर्थात् करिष्यामि का काहं । दास्यामि का दाहं । श्रोष्यामि का सोच्छं । वक्ष्यामि का वोच्छं । गमिष्यामि का गच्छं । रुदिष्यामि का रोच्छं । द्रक्ष्यामि का दच्छं आदेश होंगे । 'दृशिरूपाणाम्' यहाँ रूपग्रहण से पूर्वोक्त धातुओं के सदृश अन्य धातु को भी तत्सदृश निपातस्वरूप आदेश जानना । जैसे मोक्ष्यामि का मोच्छं । छेत्स्यामि का छेच्छं । भोक्ष्ये, भोक्ष्यामि

---

१. रूपग्रहणादन्यत्रापि । यथा—मोच्छं, पेच्छं । मोक्ष्यामि, प्रेक्ष्यामि । का० पा० ।

२. संजीवन्यादिमतः पाठः ।

का भोच्छं। वेदिष्यामि का विच्छं-इत्यादिक आदेश जानना। यद्यपि पूर्वोक्त क्रमानुसार वेदिष्यामि का वेच्छं होना चाहिये परन्तु काव्यानुसार पूर्वाचार्यों के आदेशानुसार विच्छं होगा ॥ १६ ॥

**श्वादीनां त्रिष्वप्यनुस्वारवर्जं हिलोपश्च वा ॥ १७ ॥**

**श्रु इत्येवमादीनां प्रथममध्यमोत्तमेषु त्रिष्वपि पुरुषेषु परतो भविष्यति काले सोच्छं इत्यादय आदेशा भवन्ति, अनुस्वारं विहाय हिलोपश्च वा। सोच्छिइ, सोच्छिहिइ। श्रोष्यति। सोच्छिंति, सोच्छिहिंति। श्रोष्यन्ति ( सोच्छादेशे ७-३३ अ = इ, ७-१ ति, त = इ, पक्षे ७-१२ हि, ७-४ झि = न्ति, ४-७ बिं०, शे० पू० )। सोच्छिसि, सोच्छिहिसि। श्रोष्यसि (७-२ सिप्, थास् = सि, शे० पू०)। सोच्छित्था, सोच्छिहित्था। श्रोष्यथ ( ७-४ थ = इत्था, पूर्ववत् हि )। सोच्छिमि, सोच्छिहिमि। श्रोष्यामि (७-३ मिप् = मि, शे० पू०)। सोच्छिमो, सोच्छिहिमो, सोच्छिमु, सोच्छिहिमु, सोच्छिम, सोच्छिहिम, सोच्छिस्सामो, सोच्छिस्सामु, सोच्छिस्साम[1]। श्रोष्यामः ( ७-४ मस = मा, मु, म, एवं ७-१२ हि प्रयोगः, ७-१३ स्साप्रयोगे, मोमुमानां प्रयोगश्चाऽन्ते कार्यः )। एवं वोच्छादिरपि ॥ १७ ॥**

श्वादीनां त्रिष्व[2]नुस्वारवर्जं हिलोपश्च वा—अनुस्वारवर्जमिति क्रियाविशेषणम्। पूर्वोक्तेषु श्र्वादिषु श्रु–वचि–गमि–रुदि–दृशीनां पञ्चानां त्रिषु प्रथममध्यमोत्तमेषु यथाक्रमं पूर्वसूत्रोक्ता एवादेशा अनुस्वारवर्जं भवन्ति, हिलोपश्च वा। धातोर्भविष्यति विकरणो यो हिः विहितः तस्य विकल्पेन लोपो भवति। श्रोष्यति, श्रु श्रवणे लृट्-प्रथमपुरुषैकवचनम्-तिप्। उक्तसूत्रेण अनुस्वाररहितः सोच्छ आदेशः। 'ततिपोरिदेता'वितीकारः। 'ए च क्त्वा' ६।२२ इति प्रकृतेः धातोः इकारः। सोच्छिइ, सोच्छिहिइ। प्रथमपुरुषबहुवचने 'न्तिहित्थे'त्यादिना न्तिः। सोच्छिन्ति, सोच्छिहिन्ति। मध्यमपुरुषैकवचने 'सिप्थासोः सि से' ६।२। इति सिः। 'अत ए से' इति नियमात् अत्र से इत्यादेशो न भवति। सोच्छिसि, सोच्छिहिसि। बहुवचने मस्य 'न्तिहेत्था०' ६।४। इत्यादिना ह इत्था इत्यादेशौ। 'सन्धावज्लोप०' इति इत्था इत्यस्य इकारलोपः। सोच्छिह, सोच्छिहिह। सोच्छित्था, सोच्छिहित्था। उत्तमपुरुषबहुवचने मस्, तस्य 'न्तिहेत्था०' इति मो–मु–मा इत्यादेशाः। सोच्छिमो, सोच्छिहिमो। एवं वचेर्वोच्छादेशे, गमेर्गच्छादेशे, रुदेः रोच्छादेशे, दृशेर्दच्छादेशे, विदेर्विच्छादेशेऽपि ऊह्यम्। लिङ्लोटोरप्येवमेव बोध्यम् ॥ १७ ॥

श्र्वादीनामिति। 'अनुस्वारवर्जं' यह क्रियाविशेषण है। पूर्वोक्त श्रु इत्यादिक

१. सोच्छिहामो, मु, म, सोच्छिस्सा सोच्छिहित्था, बोच्छिहिस्सा। का० पा०।
२. संजीवनीसुबोधिनीसंमतः पाठः।

धातुओं में अर्थात् कृ, दा को छोड़ कर श्रु, वच्, गम्, रुद्, दृश्-धातुओं को भविष्यत्-काल में प्रथमपुरुष, मध्यमपुरुष, उत्तमपुरुष तीनों में अनुस्वार-रहित सोच्छ, वोच्छ, गच्छ, रोच्छ, दच्छ इत्यादिक आदेश होते हैं। और हि विकरण का विकल्प से लोप होता है। श्रु धातु सुनने के अर्थ में है। श्रु धातु से भविष्यत्काल में तिप्-प्रत्यय। पकार इत्। उक्त सूत्र से सोच्छ आदेश, विकल्प से हि विकरण का लोप, 'ततिपोरिदेतौ' से तिप् को इकार, 'ए च क्त्वा०' इससे धातु के अकार को इकार आदेश। सोच्छिइ। पक्ष में-जहाँ हि-विकरण का लोप नहीं होगा, वहाँ सोच्छिहिइ। साधुत्व पूर्ववत्। प्रथमपुरुष बहुवचन में 'न्तिहेत्थ०' इससे न्ति आदेश। सोच्छिन्ति, सोच्छिहिन्ति। मध्यमपुरुष एकवचन में सिप्, 'सिप्थासोः सि से' इससे उभयत्र=आत्मनेपद—परस्मैपद में सि आदेश होगा। अकारान्त से ही सि आदेश होता है, अतः यहाँ 'से' आदेश नहीं होगा। सोच्छिसि, सोच्छिहिसि। मध्यम-पुरुष बहुवचन में 'थ' प्रत्यय होगा। उसको न्ति 'स्मृतो न्ति झिझयोः स्थाने, हइत्था वेति थध्वमोः'। 'न्तिहेत्था०' इससे ह और इत्था आदेश। 'सन्धौ अज्लोपविशेषा बहुलम्' से इत्थाप्रत्यय के इकार का लोप। एवं श्रोष्यथ का सोच्छिह, सोच्छिहिह, सोच्छित्था, सोच्छिहित्था ये रूप होंगे। उत्तमपुरुष के एकवचन में सोच्छं, वोच्छं इत्यादिक होते हैं यह प्रथम कह आये हैं। उत्तमपुरुष बहुवचन में मस् को 'न्तिहेत्था' से मो, मु, म आदेश होंगे। सोच्छिमो, सोच्छिहिमो। श्रोष्यामः। एवं जहां मु आदेश होगा, वहाँ सोच्छिमु, सोच्छिहिमु। जहाँ म आदेश होगा, वहाँ सोच्छिम, सोच्छिहिम रूप होंगे। ये छ रूप श्रोष्यामः इस लृट्-लकार के कहे। इसी प्रकार विध्यादिक अर्थों में लिङ्, लोट् के भी तीनों वचनों में रूप जानना ॥ १७ ॥

## उ सु मु विध्यादिष्वेकस्मिन् ॥ १८ ॥

**विध्यादिष्वेकस्मिन्नुत्पन्नस्य प्रत्ययस्य यथासंख्यम् उ, सु, मु इत्येत आदेशा भवन्ति। हसउ। हससु। हसमु (स्पष्टं, ७-१ सूत्रस्य बाधः)। हसतु। हस। हसानि ॥ १८ ॥**

उ सु मु विध्यादिष्वेकस्मिन्—विध्यादिष्वर्थेषु वर्तमानस्य लिङः एकवचनस्य उ सु मु इति त्रय आदेशा भवन्ति। 'लोट् चे'ति निर्देशात् लिङ्-लोटोर्ग्रहणम्, विधिनि-मन्त्रणामन्त्रणाभीष्टसंप्रश्नप्रार्थनाः विध्यादयो ग्राह्याः। लोटो लिङश्च एकवचने ततिपोः उः, थास्सिपोः सुः, इड्मिपोः मुः। 'ततिपोरिदेतौ' इत्यस्य, 'सिप्थासोः सिसे' इत्यस्य, 'इण्मिपोर्मिः' इत्यस्य च बाधः। करोतु, कुरुताम् इत्यत्र, कुर्यात्, कुर्वीत इत्यत्र च कुणउ इति। डुकृञ् करणे। 'कृञः कुण च' ७।१० इति कुण आदेशः, लिङ्लोटोस्त-तिपोरन्यतरस्य उ इत्यादेशः। सो कुणउ। मध्यमपुरुषस्य लिङ्लोटोरुभयत्र एकवचने सिप्थासोः अन्यतरस्य सु इत्यादेशः, कुणादेशः पूर्ववत्। तुमं कुणसु। त्वं कुर्याः, कुरुथाः। लोटि-कुरु, कुरुष्व वा। उत्तमपुरुषैकवचने इण्मिपोरन्यतरस्य मु इत्यादेशः। हं कुणमु। अहं करवाणि, करवै। कुर्याम्, कुर्वीय वा। 'विध्याद्यर्थेषु सिप्थासोरुआ-देशो विधीयते'। 'भिदिच्छिदोरन्त्यस्य न्दः' ७।४२। इति भिदिच्छिदोरन्यतरस्य

दकारस्य न्दः। तुमं भिन्द। तुमं छिन्द। त्वं भिन्धि, भिन्द्याः वा। त्वं छिन्धि, छिन्द्याः वा। विध्याद्यर्थेषु विहितस्य अकारादेशस्य वैकल्पिकत्वात् पक्षे-भिन्दसु, छिन्दसु इत्यपि बोध्यम्। एवं लभ्धातोः 'खघथधभां हः' इति भकारस्य हः। तुमं लह, लहसु वा। लभस्व, लभेथाः-इत्यर्थः। 'विध्यादौ प्रथमैकत्वे शौरसेन्यां दुरिष्यते'। एदु एदु पिअसही। इण्धातोः लोटि लिङि च ततिपोः 'अडादेशा बहुलम्' ७।८० इति इकारस्य एकारः। एतु, इयाद् वा प्रियसखी। एवं पअट्टदु अज्जो। प्रवर्तताम्, प्रवर्तेत वा आर्यः। 'सर्वत्र लवराम्' इति प्रोपसर्गस्य रस्यलोपः, 'तस्य टः' इति टः। 'शेषादेशयोर्द्वित्वमनादौ' इति टकारस्य द्वित्वम्, 'कगचजे०'त्यादिना वकारलोपः। पअट्टदु इति ॥ १८ ॥

विध्यादिक के एकवचन में विशेष है, वह कहते हैं—

उ सु मु इति। विध्यादिक अर्थों में विद्यमान लिङ् लकार के एकवचन को उ, सु, मु ये तीन आदेश होते हैं। 'लोट् च' लोट् लकार भी विध्यादिक अर्थों में होता है। इस कथन से लिङ्-लोट् दोनों का ग्रहण होगा। विधि-प्रेरणा=आज्ञा देना, 'अहरहः सन्ध्यामुपासीत' प्रतिदिन सन्ध्योपासन अथवा सायं-प्रातः इष्टदेव की उपासना करे इस विधिवाक्य में क्यों का प्रश्न नहीं होता। निमन्त्रण-भोजन के लिये बुलाना, आमन्त्रण-साधारण बुलाना, यदि अत्यावश्यक प्रतिबन्धक कार्य न हो तो अवश्य आना, अभीष्ट-सत्कारपूर्वक कहना, संप्रश्न-पूछना, प्रार्थना-सत्कारपूर्वक किसी कार्य के लिये कहना। ये विध्यादिक जानना। कृधातु से लोट् अथवा लिङ् लकार के आत्मनेपद त-प्रत्यय अथवा परस्मैपद में ति-प्रत्यय। उक्त 'उसुमु' इससे उभयत्र लोट्-लिङ् में और आत्मनेपद-परस्मैपद में उ आदेश होगा। 'ततिपोः०' इत्यादिकों का बाधक है। 'कृञः कुण च' इससे कुण आदेश। कुणउ। करोतु, कुरुताम्, कुर्यात्, कुर्वीत में कुणउ होगा। मध्यमपुरुष में सु आदेश, साधुत्व पूर्ववत्। तुमं कुणसु। कुर्याः, कुरुथाः, कुरु, कुरुष्व के स्थान पर कुणसु होगा। उत्तमपुरुष के एकवचन में मु आदेश होगा। हं कुणमु। करवाणि, करवै, कुर्याम्, कुर्वीय के स्थान पर कुणमु। विध्यादिक अर्थों में मध्यमपुरुष के एकवचन में अकारादेश भी विकल्प से होगा। छिद् अथवा भिद् धातु से सिप् या थास् करने पर 'भिदिच्छिदोः' से द को 'न्द' आदेश। सिप्, थास् को अकारादेश। तुमं भिन्द, छिन्द। भिन्धि, भिन्द्याः। छिन्धि, छिन्द्याः। पक्ष में-भिन्दसु, छिन्दसु इत्यादि। लभ् धातु के 'खघथध०' इससे भकार को हकारादेश। तुमं लह, लहसु। त्वं लभस्व अथवा लभेथाः इति। विध्यादिक अर्थों में शौरसेनी भाषा के प्रयोग में प्रथमा के एकवचन में दु आदेश। एदु पियसही। इण् धातु। णकार इत्। लोट्-लिङ् में त अथवा तिप् के स्थान में दु आदेश। 'अडादेशा बहुलम्' से अट्। ट् इत्। 'सन्धौ०' इससे अकार इकार मिलकर एकार। एदु। एतु, इयात् प्रियसखी। एवम्-पअट्टदु अज्जो। पअट्टदु का साधुत्व मूल में स्पष्ट है। अज्जो इति। आर्यः। 'र्यशय्याभिमन्युषु जः' इससे 'र्य' को जकार। 'शेषादेशयोर्द्वित्वमनादौ' इससे आदेशज-जकार को द्वित्व, 'अदातो यथादिषु वा' इससे अथवा पाली-प्राकृत-व्याकरणस्थ 'युक्ते ओत उत् आदीदूतां ह्रस्वश्चे'ति से ह्रस्व। 'अत ओत् सोः' से ओकार। अज्जो ॥ १८ ॥

## न्तु ह मो बहुषु ॥ १९ ॥

**विध्यादिषु बहुषूत्पन्नस्य प्रत्ययस्य यथासंख्यं न्तु ह मो इत्येत आदेशा भवन्ति । हसन्तु, हसह, हसमो ( ७-४ सूत्रस्य बाधः, शे० स्प० ) ॥ १९ ॥**

न्तु ह मो बहुषु—विध्यादिष्वर्थेषु त्रयाणां प्रथममध्यमोत्तमानां बहुष्वर्थेषु लिङ्-लोटोः सम्बन्धिनां झिथमसां झध्वंमहिङां च यथासंख्यं न्तु-ह-म इत्यादेशा भवन्ति । तूसन्तु । तुष् तुष्टौ । 'शषोः सः' इति सः । 'शेषाणामदन्तता' इत्यदन्तता । 'रुषादीनां दीर्घः' इति दीर्घः । लिङो लोटो वा परस्मैपदे झि इत्यस्य उक्तसूत्रेण न्तु इत्यादेशे तूसन्तु । तुष्येयुः, तुष्यन्तु वा । मध्यमपुरुषे बहुवचने ह-इत्यादेशे-तुम्हे तूसह । यूयं तुष्येत, तुष्यत वा । उत्तमपुरुषे म-आदेशे अम्हे तूसामो । वयं तुष्येम, तुष्याम वा । आत्मनेपदे- ग्रसु अदने, उकार इत्, 'ग्रसेर्विसः' । ७।२० इति विस् । विसन्तु । ग्रसेरन्, ग्रसन्तां वा । तुम्हे विसह । यूयं ग्रसेध्वम्, ग्रसध्वं वा । अम्हे विसिमो । 'इच्च बहुषु' ७।३१ इतीकारः, पक्षे-आकारः, विसामो । वयं ग्रसेमहि. ग्रसामहे लोटि ॥ १९ ॥

न्तु ह मो० इति । विध्यादिक अर्थों में विद्यमान तीनों पुरुषों के अर्थात् प्रथमपुरुष के बहुवचन को एवं मध्यमपुरुष के और उत्तमपुरुष के बहुवचन को लोट्-लिङ् लकार के परस्मैपदसम्बन्धी झि-थ-मस् को एवम् आत्मनेपदसम्बन्धी झ-ध्वं-महिङ् को क्रम से न्तु ह म ये आदेश होते हैं। अर्थात् झि-झ को न्तु । थ-ध्वं को ह । मस्-महिङ् को म आदेश । तूसन्तु, तूसह, तूसम । मूल में साधुत्व स्पष्ट है । ग्रसु धातु, उकार इत है । 'ग्रसेर्विसः' से विस् आदेश । विसन्तु । यूयं ग्रसेध्वम् लिङ्-ग्रसध्वम् लोट् । विसिमो विसामः । लिङ् में ग्रसेमहि के स्थान में, 'इच्च बहुषु' से इकार । अम्हे विसिमो इकारादेश में । पक्ष में-विसामो । एवम्-लोट् लकार के बहुवचन में विसिमो, विसामो । उक्त साधुत्व से दोनों रूप होंगे ॥ १९ ॥

## वर्तमानभविष्यदनद्यतनयोर्ज्ज ज्जा वा ॥ २० ॥

**वर्तमाने भविष्यदनद्यतने विध्यादिषु चोत्पन्नस्य प्रत्ययस्य ज्ज, ज्जा इत्येतावादेशौ वा भवतः । पक्षे-यथाप्राप्तम् । वर्तमाने तावत् , होज्ज, होज्जा । हसेज्ज, हसेज्जा । पक्षे-होइ, हसइ—इत्यादि ( ८-१ भू = हो, पक्षे ७-१ ति = इ, एवं हस्धातोरपि ज्ञेयम् ) । भविष्यदनद्यतने, होज्ज, होज्जा । पक्षे-होहिइ इत्यादि । विध्यादिष्वेवम्[1] । ( भविष्यत्यपि होज्जेत्यादि पूर्व०, पक्षे ७-१२ सू० स्प०, विध्यादिष्वपि होज्ज, होज्जा । पक्षे-हो उ, सु, मु इत्या० ) ॥ २० ॥**

वर्तमानभविष्यदनद्यतनयोश्च[2] ज्ज ज्जा वा—वर्तमानं च भविष्यदनद्यतनं चेति द्वन्द्वः, वर्तमाने उत्पन्नस्य लटः, भविष्यदनद्यतने चोत्पन्नस्य लुटः, विध्यादिषु

१. पुरुषत्रयेऽपि एकवचनबहुवचनरूपाणि बोध्यानि । का० पा० ।

२. संजीवन्यादिसंमतः पाठः ।

लोट्लिङोश्च सर्वत्र तिबादीनां ज्ज, ज्जा वा। पक्षे-एसो मुणइ। ज्ञा अवबोधने, ज्ञा-धातोर्लटि, तिपि 'ज्ञो जाणमुणौ' इति मुणादेशः, 'लादेशे वा' इति अकारस्य एकारः। मुणेज्ज एवं मुणेज्जा। पक्षे-'ततिपोरिदेतौ' इति इकारः, मुणादेशः। एसो मुणइ। एष जानाति। एदे मुणेज्ज, मुणेज्जा मुणन्ति। एते जानन्ति। तुमं मुणेज्ज, मुणेज्जा, मुणसि। त्वं जानासि। तुह्मे मुणेज्ज, मुणेज्जा, मुणह। यूयं जानीथ। आत्मनेपदेऽपि एवमेव बोध्यम्। एसो णच्चावेज्ज, णच्चावेज्जा। पक्षे-णच्चावेहिइ, एष नर्तयिता। नृती गात्रविक्षेपे, 'ऋतोऽत्' इत्यकारः। 'नो णः' इति णः। 'चो वृजिनृत्योः' इति तकारस्य च इत्यादेशः। 'णिच आवे च' इति आवे इत्यादेशः, उक्तसूत्रेण ज्ज अथवा ज्जा इत्यादेशः। पक्षे-'धातोर्भविष्यति हिः' इति हिविकरणम्। णच्चावेहिइ। बहुवचने, एद्द णच्चावेज्ज, णच्चावेज्जा, पक्षे णच्चावेहिन्ति। 'न्तिहेत्थ०' इति झिझयोरन्यतरस्य न्ति इत्यादेशः। एते नर्तयितारः। तुमं णच्चावेज्ज, णच्चावेज्जा, णच्चावेहिसि। त्वं नर्तयितासि। यूयं नर्तयिYितास्थ, नर्तयिताध्व। ज्ज ज्जा-आदेशौ सर्वत्र पूर्ववत्, पक्षे-'न्तिहेत्थे'ति इत्थादेशः। 'सन्धावज्लोप०' इतीकारलोपः-णच्चावेहित्था। प्राकृते आत्मनेपदे परस्मैपदे च समानम्। पक्षे-'इण्मिपोर्मिः' इति मिः। 'मिना स्सं वे'ति स्सं-णच्चावेस्सं। 'स्सं'-इत्यादेशपक्षे 'धातोर्भविष्यति हिः' इति हिः। 'उत्तमे स्सा हा' इति स्सा हा इत्यादेशौ। एवं त्रयोऽप्येत आदेशा भवन्ति। कृञ् धातोः-कुणेज्ज, कुणेज्जा, कुणउ। करोतु, कुरुताम्। कुर्यात्, कुर्वीत। एवं सर्वत्र बोध्यम्। 'क्रियातिपत्तिकालेऽपि ज्जज्जावेति न्तमाणवत्।' जइ भुञ्जेज्ज, भुञ्जेज्जा वा। न्त थिप्पेज्ज, थिप्पेज्जा वा। यदाऽभोक्ष्यत् तदाऽतृप्स्यत्। भुज् धातोः भुञ्ज आदेशः। तस्य 'लादेशे वे'ति एत्वम्-भुञ्जेज्ज ज्जा वा एवं तृप् धातोरपि थिप्प आदेशः। एत्वम्। थिप्पेज्जा। पक्षे-जइ भुञ्जन्तो ता थिप्पन्तो। 'लस्य क्रियातिपत्तौ वा न्तमाणावपि वा क्वचित्।' इति भुञ्जंतो भुञ्जमाणो वेत्यपि। 'ज्जहि ज्जो नैव दृश्येते विध्यादिष्वपि वा क्वचित्'। कुणेज्जहि, कुणेज्जा। करोतु, कुरुतां वा। कुर्यात्, कुर्वीत वा। 'कृञः कुण चे'ति कुणादेशः, 'ततिपोरिदेतौ' इति एत्वम्। सर्वत्र पूर्वलकारेषु सर्ववचनेषु सर्वपुरुषेषु एतौ एव। पक्षे-कुणउ, कुणन्तु एवमादयः। 'पक्षे हिश्च सह स्यातां धातूनां लृटि कर्मणि'। मए सो सुमरिज्जिहिइ। 'स्मरतेर्भरसुमरौ' इति सुमरः। एवं तुमं सुमरिज्जिहिसि। 'सिप्थासोः सिसे' इति सिपः सिरेव। एवम्-तुए हं सुमरिज्जिहिमि। त्वया अहं स्मरिष्ये। एवं बहुवचनेषु। सुमरिज्जिहिन्ति। सुमरिज्जिहिह। सुमरिज्जिहिमो-इत्यादयो बोध्याः॥ २०॥

वर्तमानेति। प्रथम भविष्यत्-शब्द का और अनद्यतन-शब्द का कर्मधारय समास, तदनन्तर वर्तमान और भविष्यदनद्यतन शब्द का द्वन्द्व करना। इस प्रकार 'अनद्यतनयोः' का द्विवचन उपपन्न होता है। तो यह अर्थ होता है—वर्तमान अर्थ में उत्पन्न लट् के स्थान में और भविष्यदनद्यतन अर्थ में उत्पन्न लुट् के स्थान में एवं लोट्-लिङ् में सर्वत्र तिबादिकों को विकल्प से ज्ज और ज्जा आदेश होते हैं। पक्ष में यथाप्राप्त जो जहाँ प्राप्त होगा वह होगा। एसो मुणेज्ज, मुणेज्जा, मुणइ। एष जानाति। एवं

बहुवचन में एते जानन्ति। त्वं जानासि, यूयं जानीथ के स्थान में भी जानना। साधुत्व मूल में सबका प्रदर्शित है। आत्मनेपद में भी इसी प्रकार आदेश और साधुत्व जानना। एसो णच्चावेज्ज, णच्चावेज्जा। पक्ष में–णच्चावेहिइ होगा। अनद्यतन-भविष्यत्-काल में उक्त ज्ज, ज्जा आदेश पक्ष में हि–विकरण है। एष नर्तयिता। वह कल नचावेगा। साधुत्व प्रयोगों का मूल में स्फुट है। क्रियातिपत्तीति। क्रिया के अतिपत्तिकाल में अर्थात् यदि यह कार्य हो तो यह भी कार्य ( क्रिया ) हो जायगा। जैसे यदि भोजन करेगा तो तृप्त हो जायगा। यहाँ भोजन के साथ तृप्ति का हेतुहेतुमद्भाव है। भुज पालनाभ्यवहारयोः। भुज्धातु को भुज्ज आदेश। 'लादेशे वा' ६।२४ इससे एकार। भुज्जेज्ज। इस प्रकार से जहाँ ज्जा आदेश, वहाँ भुज्जेज्जा होगा। तृप् प्रीणने। प्रीणन का अर्थ तृप्त होना। 'तृपः थिप्पः' ७।१८ इससे थिप्प आदेश। अन्य कार्य पूर्ववत् जानना। लस्य क्रियेति। लकार की क्रियातिपत्ति में अर्थात् पूर्वोक्त लृङादिक के विषय में ल के स्थान पर न्त-माण ये भी आदेश होते हैं। जैसे–जइ भुज्जन्तो भुज्जमाणो वा, ता तिप्पन्तो तिप्पमाणो वा। साधुत्व पूर्ववत् जानना। 'अत ओत् सोः' ५।१ से ओकार। ज्जहि ज्जो इति। विध्यादिक अर्थों में अर्थात् लोट्लिङादिक के विषय में लकार के स्थान में कहीं कहीं ज्जहि, ज्ज आदेश विकल्प से होते हैं। जैसे कृधातु। 'कृञः कुण च' ७।१० इससे कुण आदेश। अकार को एकार। कुणेज्जहि। कुणेज्ज। पक्ष में–कुणउ=करोतु। सभी लोट्-लिङ् इत्यादिक लकारों में सभी वचनों में अर्थात् एकवचन, बहुवचन में और सभी पुरुषों में प्रथमपुरुष, मध्यमपुरुष, उत्तमपुरुष में समानरूप होंगे, क्योंकि लकार को ही ज्जहि ज्ज आदेश हो जाते हैं। पक्षे–हिश्चेति। धातुओं को लृट्लकार में कर्म में प्रत्यय करने पर ज्जहि ज्ज के साथ अर्थात् पक्ष में 'हि' भी होता है। मए सो सुमरिज्जिहिइ। स्मृधातु 'स्मरतेर्भरसुमरौ' ७।१५ इससे सुमर आदेश। 'ततिपोरिदेतौ' से इकारादेश। 'यक इअइज्जौ' ६।८ से यक्विकरण को इज्ज आदेश। 'सन्धौ अज्लोप०' ४।१ से धात्वादेश के अकार का लोप। इज्ज के अकार को 'ए च क्त्वा०' ६।३३ से इकारादेश। सुमरिज्जिहिइ। मया स स्मरिष्यते। एवम्–मए तुमं सुमरिज्जिहिसि। 'सिप्थासोः सिसे' ६।२ से सि आदेश, अन्य कार्य पूर्ववत्। मया त्वं स्मरिष्यसे। तुए हं सुमरिज्जिहिमि। 'इण्मिपोर्मिः' ६।३ से मि आदेश, अन्य कार्य पूर्ववत्। त्वया अहं स्मरिष्ये। बहुवचन में भी साधुत्व पूर्ववत् जानना॥ २०॥

## मध्ये च॥ २१॥

वर्तमानभविष्यदनद्यतनयोर्विध्यादिषु च धातुप्रत्यययोर्मध्ये ज्ज ज्जा इत्येतावादेशौ वा भवतः। वर्तमाने–होज्जइ, होज्जाइ। पक्षे-यथाप्राप्तम्। विध्यादिषु–होज्जउ, होज्जाउ ( विकरणस्थाने अत्रादेशौ बोध्यौ, शे० स्पष्टम् )। भवेदित्यादि॥ २१॥

मध्ये च—तिबादीनां धातूनां च मध्ये ज्ज ज्जा इति विकरणौ वा स्तः। पूर्वसूत्रेण तिबादीनां ज्ज ज्जा इति विधीयेते। इह तु विकरणौ इति भेदः। पक्षे यथाप्राप्तम्। देज्जइ, देज्जाइ, देज्ज, देज्जा, देइ। ददाति, दत्ते इति। 'एकाचां क्रियायोर्मध्ये ज्ज लक्ष्यवशाद् भवेत्।' तत्र प्रायः ज्ज एव। ते देज्जन्ति। ददति, ददते वा। भूधातोः

लुटि-होज्जइ, होज्जाइ, होज्ज, होज्जा, होहिइ । भविता इति । लाधातोर्लोटिलिङि । लेज्जइ लेज्जाइ, लेज्ज, लेज्जा, लेउ । लातु लायाद् वा । एवमन्यत्राप्यूह्यम् ॥ २१ ॥

मध्ये इति । तिवादिक प्रत्ययों के और धातु के मध्य में ज्ज ज्जा ये विकरण होते हैं । पूर्व सूत्र से तिवादिक प्रत्ययों को ज्ज ज्जा होते हैं, इससे प्रकृति = धातु के और प्रत्यय के मध्य में होते हैं । पक्ष में-तिवादिक के स्थान में होंगे । दोनों के पक्ष में-देइ । एकाचामिति । बहुवचन में लक्ष्यानुरोध से ज्ज यह ह्रस्व ही विकरणागम होता है । जैसे ददति, ददते के स्थान में देज्जन्ति । भूधातु, लुट् लकार । 'भुवो होहुवौ' इससे भूधातु को हो आदेश । 'मध्ये च' इससे ज्ज, ज्जा विकरण । पक्ष में 'वर्तमान०' ६।२० से तिबादिकों को ज्ज ज्जा आदेश । दोनों के पक्ष में हि-विकरणागम । इस प्रकार पूर्वोक्त पाँच रूप होंगे । ला आदाने, दाने च । 'ए च क्त्वा०' ६।४३ से एकार । पूर्वोक्त प्रक्रिया से ज्ज ज्जा विकरण आदेश । 'उ सु मु' ६।२६ से उकारादेश ॥ २१ ॥

## नानेकाचः ॥ २२ ॥

**वर्तमानभविष्यदनद्यतनयोर्विध्यादिषु चानेकाचो धातोः प्रत्यये परे मध्ये ज्ज ज्जा इत्येतावादेशौ न भवतः, किन्त्वन्त एव भवतः । हसइ (७-१ सूत्रे स्प०) । तुवरइ (८-४ त्वरा = तुवर, ७-१ त = इ) । अन्ते यथा-हसेज्ज । हसेज्जा । तुवरेज्ज । तुवरेज्जा ( ७-३४ अ, ए, इ, से, एवमेव भविष्यद्विध्यादिषु ज्ञेयम् ) । एवमन्येऽप्युदाहर्तव्याः ॥ २२ ॥**

नानेकाचः—लटो लुटो लोटो लिङो वा प्रत्ययस्य अनेकस्वरस्य धातोर्मध्ये ज्ज ज्जा इति विकरणौ न स्तः । पूर्वसूत्रेण अविशेषात् प्राप्तौ निषेधः । घोलेज्ज, घोलेज्जा । पक्षे—घोलइ, घोलए । घूर्णते इति । 'अनेकाचोऽपि विध्यादौ ज्ज ज्जा मध्ये तिङां क्वचित्' । कुणेज्जसु, कुणेज्जासु । कुरु, कुरुष्व, कुर्याः कुर्वीथाः इति ॥ २२ ॥

नाने० इति । अनेकाच् धातु से मध्य में ज्ज ज्जा विकरण नहीं होते । घूर्ण धातु को 'घूर्णो घोलघुम्मौ । ६।५ से घोल आदेश । 'ए च क्त्वा०' से एकार । अन्य कार्य पूर्ववत् । विध्यादिक अर्थों में अनेकाच् धातु से भी तिङादिकों के मध्य में कहीं-कहीं ज्ज ज्जा होते हैं । 'कृञः कुण च' इससे कुण आदेश, अन्य कार्य पूर्ववत् । कुणेज्जसु, कुणेज्जासु ॥२२॥

## ईअ भूते ॥ २३ ॥

**भूते काले धातोः प्रत्ययस्य ईअ इत्ययमादेशो भवति । हुवीअ । असीअ (८-१ भू = हुव, ति = ईअ, एवमग्रे) । अभवत् । अहसत् ॥ २३ ॥**

ईअ भूते—भूते इति सामान्यभूतग्रहणम् , तेन-अद्यतनानद्यतनपरोक्षकालस्य ग्रहणम् । भूते = अतीते काले उत्पन्नानाम् अनेकाचो धातोः परेषां तिबादीनाम् 'ईअ' इत्यादेशो भवति । हुवीअ । भूधातोः लङि, लुङि, लिटि, तिबाद्यादेशे 'भुवो होहुवौ' इति हुवादेशे, उक्तसूत्रेण तिप ईअ आदेशः । 'क्वचिदपि लोपः' ५।१२ इत्यल्लोपः ।

---

१. इअं, ईअं । इअभूते-भूते वर्तमानाद्धातोः प्रत्ययस्य ईअ आदेशः स्यात् । आसीअ, गहीअ, हसीअ, पढीअ । आसीत् , अग्रहीत् , अहसत् , अपठत्-इत्यादयः । का० पा० ।

अभूत्, अभवत्, बभूव इत्यर्थः। लहीअ। अलब्ध, अलभत, लेभे इति। लभ् धातोः 'शेषाणामदन्तता' ७।७८ इति अदन्तत्वम्। ईअ आदेशे, 'क्वचिदपि लोपः' इत्यल्लोपे, 'खघथधफभां हः' २।२४ इति हः ॥ २३ ॥

ईअ इति। भूत-पद से सामान्य भूतकाल का ग्रहण होगा। अतः अद्यतन, अनद्यतन, परोक्ष इन तीनों का ग्रहण होगा। तो यह अर्थ होगा—अतीत काल में उत्पन्न, अनेकाच् धातु से पर तिबादिक प्रत्ययों को 'ईअ' यह आदेश होता है। भू धातु से लङ्-लुङ्-लिट् लकार में तिबादिक आदेश। 'भुवो हो हुवौ' इससे भूधातु को हुव आदेश। 'हुव' यह अनेकाच् है, अतः तिबादिकों को ईअ आदेश होगा। 'क्वचिदपि लोपः' इससे हुव के अकार का लोप। हुवीअ। अभवत्, अभूत्, बभूव इन तीनों में हुवीअ यही होगा। एवम्-लहीअ। लभ्-धातु से अतीत काल में तिबादिक होने पर 'शेषाणामदन्तता' इससे अदन्त होने पर भकार सस्वर हो जायगा। तब अनेकाच् होने से ई आदेश। 'क्वचिदपि लोपः' इससे अकार का लोप। 'खघथधफभां हः' इससे भकार को हकार, लहीअ। अलब्ध, अलभत, लेभे-इन तीनों में लहीअ यही होगा ॥ २३ ॥

## एकाचो हीअ ॥ २४ ॥

**भूते काले एकाचो धातोः प्रत्ययस्य हीअ इत्ययमादेशो भवति। होहीअ। (स्पष्टम्) अभूत् ॥ २४ ॥**

**एकाचो हीअ**—एकाचो धातोः परेषां भूतकालप्रत्ययानां हीअ इत्यादेशः स्यात्। होहीअ। अभुत्, अभवत्, बभूव। काहीअ। अकार्षीत्, अकृत। अकरोत्, अकुरुत। चकार, चक्रे। 'स्यात्तिङां हीअ एकाचो वर्तमानेऽपि भूतवत्'। वर्तमाने— सोहीअ। शृणोति ॥ २४ ॥

एकाचो-इति। एकाच् धातु से पर भूतकालसम्बन्धी प्रत्ययों को 'हीअ' आदेश हो। भूधातु से लङ्-लुङ्-लिट् इन तीनों लकारों में 'भुवो होहुवौ' इससे हो आदेश। उक्त सूत्र से हीअ आदेश। होहीअ। तीनों लकारों में सर्वत्र प्रथमपुरुष, मध्यम-पुरुष, उत्तमपुरुष एवं तीनों वचनों में यही होगा। कृधातु, 'कृञः का भूतभविष्यतोश्च' इससे कृधातु को 'का' आदेश, उक्त सूत्र से तिबादिक को हीअ आदेश होगा। काहीअ। तीनों लङ्-लुङ्-लिट् में समान रूप होगा। एकाच् धातु से पर तिङादिकों को भूतकाल के सदृश वर्तमान काल में भी 'हीअ' आदेश होगा। सोहीअ। श्रुधातु से वर्तमानकाल में तिबादिकों को हीअ आदेश, रेफलोप, उकार को ओकार। श्रृणोति, श्रृण्वन्ति, श्रृणोषि, श्रृणुथ-इत्यादिकों में सर्वत्र सोहीअ यही होगा। वर्तमान में 'हीअ' आदेश क्वाचित्क है ॥ २४ ॥

## अस्तेरासिः ॥ २५ ॥

**अस्तेर्भूते काले एकस्मिन्नर्थे आसि इति निपात्यते[1]। आसि राआ।**

---

१. तेनास्तेरास्यहेसी ८।३।१६४ अस्तेर्धातोस्तेन भूतार्थेन प्रत्ययेन सह आसि, अहेसि इत्यादेशौ भवतः। आसि सो, तुमे, अहं वा। जे आसि, ये आसन्नित्यर्थः। अहं अहेसि। हे०।

आसि बहू। (राआ ५-३७ सू० स्प०, बहू ४-१९ सू० स्प०, शे० सुगमम्)। आसीद्राजा। आसीद्वधूः ॥ २५ ॥

आसिरस्ते:[1]—अस्धातोर्भूतेऽर्थे तिङा सह, सिद्धस्य रूपस्येत्यर्थः, आसि इत्यादेशो निपात्यते। आसि रामो। एवं द्विवचनबहुवचनेष्वपि बोध्यम् ॥ २५ ॥

आसिरिति। अस्-धातु को भूतकाल में तिङादिक प्रत्ययों के साथ अर्थात् आसीत् इत्यादि सिद्ध रूप को 'आसि' यह आदेश निपात होता है। आसि रामो। आसीत् रामः। सभी वचनों, सभी पुरुषों में 'आसि' यही होगा। वयम् आस्म। आसि अम्हाणो ॥ २५ ॥

## णिच एदादेरत आत् ॥ २६ ॥

**णिच्प्रत्ययस्य एकारादेशो भवति धातोरादेरकारस्य च आत्वं भवति। कारेइ, हासेइ, पाढेइ (८-१२ कृञ्=कर, णिच्=ए, ७-१ ति=इ, शे० स्प०, एवं हासेइ-प्रभृतयः)। कारयति। हासयति। पाठयति ॥ २६ ॥**

णिच एदादेरात्[2]—धातोः परस्य णिच्प्रत्ययस्य एकारः स्यात्, धातोः सम्बन्धी य आदिस्तस्य आकारः। कारेइ। कुर्वन्तं प्रयुङ्क्ते। णिचि णिचः उक्तसूत्रेण एकारः। 'ततिपोरिदेतौ' इति तिपः तप्रत्ययस्य वा इकारः। 'कृञः कुण चे'ति कृधातोः ऋकारस्य अर। करेइ इति जाते-आदिभूतस्य अकारस्य उक्तसूत्रेण आकारः। कारेइ। कारयति, कारयते वेत्यर्थः। एवम्-पठ्धातोर्णिच एकारः, आदिभूतस्य अकारस्य आकारः, 'ठो ढः' इति ठस्य ढः। पाढेइ। पाठयति, पाठयते वा ॥ २६ ॥

णिच इति। धातु से पर णिच्प्रत्यय को एकार हो और धातु के आदि में विद्यमान स्वर को आकार हो। कृधातु से प्रेरणा अर्थ में णिच्। उक्त सूत्र से णिच् को एकार, 'ततिपो०' इससे तिप् को इकार। 'कृञः कुण च' इससे ऋकार को अर, उक्त सूत्र से आदिस्थ अकार को आकार। कारेइ। कारयति, कारयते। इसी प्रकार पाढेइ, पठ्धातु, 'ठो ढः' इससे ठ को ढ आदेश। अन्य सब कार्य पूर्ववत् होंगे ॥ २६ ॥

## आवे च ॥ २७ ॥

**णिच आवे इत्ययमादेशो भवति चकारात् पूर्वोक्तं च। करावेइ। हसावेइ। पढावेइ। कारावेइ इत्यादि (णिच आवे कृते, धातोरादेरकारस्यात्वं वा भवति, उदाहृतपदेषु तादृशकार्यदर्शनात्। शे० स्प०) ॥२७॥**

आवे वा[3]—धातोः परस्य णिच्प्रत्ययस्य आवे इत्यादेशो वा स्यात्। करावेइ। योगविभागः आयादेशनिवृत्त्यर्थम्। एवम्-पढावेइ। पक्षे-कारेइ, पाढेइ ॥ २७ ॥

आवे इति। धातु से पर णिच्प्रत्यय को 'आवे' यह आदेश विकल्प से हो। योगविभाग=पृथक् सूत्र करना आयादेश की निवृत्ति के लिये है। करावेइ, पढावेइ। साधुत्व पूर्वोक्तानुसार जानना। पक्ष में-कारेइ, पाढेइ। कारयति, पाठयतीत्यर्थः ॥२७॥

---

१, २, ३. सञ्जीवनीसंमताः पाठा एते।

## आविः क्तकर्मभावेषु वा ॥ २८ ॥

णिच आविरादेशो भवति वा क्तप्रत्यये परतो भावकर्मणोश्च। कराविअं। हसाविअं। पढाविअं (८-१२ कृञ्=कर, णिच् आवि, २-२ तलोपः, ५-३० सोर्बिन्दुः, कारितम्,-एवमग्रेऽपि)।कारिअं। हासिअं। पाढिअं। पक्षे-संस्कृतानुसारं कारितमिति सिद्धे, २-२ तलोपः, ५-३० बिं०, पढितमत्र २-२४ ठ=ढ, शे० पू०)। भावकर्मणोश्च-कराविज्जइ। हसाविज्जइ। पढाविज्जइ (णिच् आवि, ७-१ त=इ कृते, ७-२१ यकः स्थाने ज्ज-एवमग्रे)। कारिज्जइ। हासिज्जइ। पाढिज्जइ (णिचि=कारितिजाते, ७-२१ यकः-ज्ज, एवमग्रे)। कारितम्। हासितम्। पाठितम्। कार्यते। हास्यते। पाठ्यते ॥ २८ ॥

आविः क्तभावकर्मसु वा[1]—क्तप्रत्यये भावे कर्मणि चार्थे णिचः आविरित्यादेशो वा स्यात्। पक्षे–'नैदावे' इति वक्ष्यमाणेन निषेधात् तौ न स्तः। हस्–धातोर्णिच्, तस्य आविरित्यादेशः। हसाविओ, हासिओ। हासितः। कराविओ, कारिओ। कारितः। एवम्–पढाविओ, पाढिओ। पाठितः। केचित्तु लक्ष्यवशाद् यत्र आविरादेशस्तत्र धातोरादेः आत्वमपीच्छन्ति। तेन हासाविओ, काराविओ, पाढाविओ–इत्यपि भवन्ति। भावे कर्मणि वा चोराविअइ। अनेनैव सूत्रेण आविरादेशः। 'अडादेशा बहुलम्' ७।८० इति मध्ये अट्। ट् इत्। चोराविअइ। यत्र 'मध्ये चे'ति ज्जः, तत्र चोराविज्जइ। एवम्–चिन्ताविअइ, चिन्ताविज्जइ। धृधातोः कर्मणि लकारे 'ततिपोरिदेता'वितीकारः। णिच्, तस्य आविः। ततः 'अन्ते अरः' इति ऋकारस्य अर्। 'णिच एदादेरात्' इति आदिस्थस्याकारस्य आकारः। 'अडादेशा बहुल'मिति अडागमः। 'यक इअ–इज्जौ' इति यक्प्रत्ययस्य इअ। 'सन्धौ अज्लोपविशेषा०' इतीकारलोपः। धाराविअइ, धाराविज्जइ। पक्षे–चोरिअइ, चोरिज्जइ। चिन्तिअइ, चिन्तिज्जइ। धारिअइ, धारिज्जइ। स्वप्धातोः भावे–सुप्पाविअइ, सुप्पाविज्जइ। पक्षे–सुप्पिअइ, सुप्पिज्जइ। त्वर त्वरणे। 'आहुरोत्वं णिचः स्थाने स्यादाविर्युगपत् क्वचित्'। इति ओत्वम्, 'सन्धौ अज्लोप०' इत्याकारलोपः। तुरोविअं। पक्षे–तुरिअं। लक्ष्यानुसारेण ओत्वमवगन्तव्यम् ॥ २८ ॥

आविः क्त०–इति। क्तप्रत्यय के परे और भाव अथवा कर्म में णिच्प्रत्यय को आवि आदेश हो। हसाविओ। हस्धातु से णिच्, क्त-प्रत्यय। उक्त सूत्र से आवि आदेश। ककार इत्। 'कगचज०' से तकारलोप। 'अत ओत् सोः' इससे ओकार। पक्ष में–हासिओ। वक्ष्यमाण 'नैदावे' इससे एकार। आवादेश का निषेध हो जायगा। हासितः, पाठितः। यहाँ 'णिच एदादेरात्' इससे आकार। केचित्तु–इति। कोई-कोई आचार्य लक्ष्यानुरोध से जहाँ आवि आदेश होता है वहाँ भी धातु के आदि

---

१. संजीवनीसंमतः पाठः।

को आकार मानते हैं। अतः हस्‌धातु के आदिस्थ अकार को आकार हो जायगा। हासाविओ। अन्य कार्य पूर्ववत्। एवं-काराविओ, पाढाविओ इत्यादिकों में भी जानना। भावे-इति। अकर्मक धातु से भाव में और सकर्मक से कर्म में उक्त सूत्र से णिच्‌प्रत्यय को विकल्प से आवि आदेश। 'अडादेशा बहुलम्' इससे मध्य में अट् का आगम, टकार इत्। 'ततिपोरिदेतौ' इससे तिप् को अथवा त-प्रत्यय को इकार, चोराविअइ। और जहाँ पर 'मध्ये च' इससे ज्ज-विकरण होगा वहाँ अट् नहीं, किन्तु ज्ज-विकरण विकल्प से होगा। अन्य कार्य पूर्ववत्। चोराविज्जइ। एवम्-चिन्ताविअइ, चिन्ताविज्जइ में भी जानना। धृधातु मे कर्म में तिप्। णिच्, उसको आवि आदेश। अर, आदिस्थ अकार को आकार। अडागम। यक्‌प्रत्यय को इय्, संधिकार्य, धारा-विज्जइ। पक्ष में-जहाँ आवि नहीं होगा, वहाँ चोरिअइ 'यक इयइज्जौ' ६।८ से इय इज्ज आदेश होंगे। चोरिअइ, चोरिज्जइ। एवं चिन्तिअइ, चिन्तिज्जइ। धारिअइ, धारिज्जइ। साधुत्व सर्वत्र पूर्ववत् होगा। स्वप्‌धातु से भाव में तिबादिक, 'आविः क्तभावकर्म०' इससे णिच् के स्थान में आवि आदेश। 'शकादीनां द्वित्वम्' ७।५६ से तकार को द्वित्व। 'यक इअइज्जौ' इससे यक् को इअ आदेश। 'सन्धौ अज्लोप०' इससे इकारलोप। अन्य कार्य पूर्ववत्। सुप्पाविअइ, एवं सुप्पाविज्जइ। पक्ष में जहाँ आवि आदेश नहीं होगा, वहाँ सुप्पिअइ, सुप्पिज्जइ। साधुत्व पूर्ववत्। आहुरिति। तुर धातु से णिच्। कोई आचार्य णिच् के स्थान में ओकार और आवि दोनों कार्य मानते हैं। 'सन्धौ अज्लोप०' से आवि के आकार का लोप। तुरोविअं। पक्ष में-तुरिअं: रुषादित्व से दीर्घ-तूरिअं। जो वसन्तराजकृत सञ्जीविनीटीका में त्वरधातु का 'तुरिअं' माना है, वह भ्रममूलक है। क्योंकि 'त्वरस्तुवरः' ७।४ सूत्र में स्पष्ट ही सन्देह किया है, 'कथं तर्हि तुरिअं ? तुर त्वरणे इत्यस्य ज्ञेयम्।' इससे स्पष्ट है-यहाँ तुर धातु है। ओत्व आदेश लक्ष्यानुरोध से जानना। यह ओत्वादेश अत्यन्त क्वाचित्क है ॥ २८ ॥

## नैदावे ॥ २९ ॥

**क्तभावकर्मसु णिच्प्रत्ययस्य एत् आवे इत्येतावादेशौ न भवतः। कारिअं ( णिचि = कारि, २-२ तलोपः, ५-३० बिं० )। कराविअं (७-२८ सूत्रे द्रष्टव्यम्)। कारिज्जइ। काराविज्जइ (७-२७ सूत्रात् चकारानुकर्षणात्, पक्षे-तत्पूर्वसूत्रानुसारं धातोरादेरकारस्यात्वं भवति, शेषं ७-२८ सू० द्रष्टव्यम्)॥ २९ ॥**

नैदावे—क्तप्रत्यये भावे कर्मणि चार्थे णिचः ए, आवे इत्यादेशौ न स्तः। हसाविअइ, हसाविज्जइ। 'णिच एदादेरात्' ६।२६ इति आदेः आत्वम्। हासिअइ, हासिज्जइ। पूर्ववत् ॥ २९ ॥

नैदावे इति। क्तप्रत्यय के परे एवं भाव-कर्म में तिङादिकों के विषय में ए और आवे आदेश नहीं होते हैं। हस् धातु से भाव में तिप्, णिच्, 'आविः क्त भाव०' इससे आवि। 'यक इअइज्जौ' से इय इज्ज आदेश। 'णिच एदा०' से एकार-आकार प्राप्त था, परंतु उक्त सूत्र से एकार का निषेध होगा, वैकल्पिक आकार होगा ही। अतः हसाविअइ, हसाविज्जइ। पक्ष में—हासिअइ, हासिज्जइ। पूर्व प्रयोग में आत्व करने पर हासाविअइ, हासाविज्जइ होंगे। साधुत्व प्रथम सूत्र में दिखा आये हैं ॥ २९ ॥

## अत आ मिपि वा ॥ ३० ॥

**अकारान्ताद्धातोर्मिपि परत आकारादेशो भवति वा। हसामि, हसमि। ( स्पष्टे ) ॥ ३० ॥**

अत आ मिपि वा—अकारान्तस्य धातोरुत्तमपुरुषैकवचने ( मिपि ) परतः आकारादेशो वा स्यात्। जाणामि। पक्षे—जाणेमि। सहामि, सहेमि ॥ ३० ॥

अत इति। अकारान्त धातु को उत्तमपुरुष के एकवचन में अर्थात् मिप् के परे आकारादेश विकल्प से हो। पक्ष में-'लादेशे वा' इससे एकार। ज्ञा धातु, 'ज्ञो जाणमुणौ' ७।१९ इससे जाण आदेश। उक्त सूत्र से आकार। पक्ष में-एकार। जाणामि धम्मं जाणेमि वा ॥ ३० ॥

## इच्च बहुषु ॥ ३१ ॥

**मिपो बहुषु परतोऽत इकारादेशो भवति चकारादाकारश्च। हसिमो, हसामो। हसिमु, हसामु[1] ( ७-४ झि = मो, मु, शे० स्प० ) ॥ ३१ ॥**

इच्च बहुषु—बह्वर्थेषु उत्तमपुरुषे परे धातोरत आकार इकारश्च वा स्यात्। लहामो, लहिमो। णिअच्छामो, णिअच्छिमो। सहामो, सहिमो। इत्यादि ॥ ३१ ॥

इच्चेति। उत्तमपुरुषसम्बन्धी बहुवचन के परे धातु के अकार को आकार और इकार हो। लभ् धातु से उत्तम-बहुवचन, महिङ्प्रत्यय। 'न्तिहेत्थामोमु०' इससे मो आदेश। 'शेषाणामदन्तता' से अदन्तत्व। 'खघथधफभां हः' इससे भकार को हकार। उक्त सूत्र से आकार। एवं पक्ष में इकार। लहामो, लहिमो। एवं दृश धातु से मस् प्रत्यय। 'न्तिहेत्था०' से मो आदेश। 'दृशेः पुलअणिअच्छ०' ७।७५, से णिअच्छ आदेश। उक्त सूत्र से आकार एवं इकार। णिअच्छामो, णिअच्छिमो। वसन्तराज ने दृश धातु को णिअक्क आदेश मान कर णिअक्कामो, णिअक्किमो—उदाहरण दिये हैं, वे चिन्त्य हैं, क्योंकि 'दृशेः पुलअ०' सूत्र में 'णिअच्छ' ही पाठ है और स्वयं भी उसकी व्याख्या करते हुये 'णिअच्छइ' उदाहरण दिया है—इति। सह धातु, 'शेषाणामदन्तता'। सहामो, सहिमो। साधुत्व पूर्ववत् ॥ ३१ ॥

## क्ते ॥ ३२ ॥

**क्तप्रत्यये परतोऽत इर्भवति। हसिअं ( २-२ तलोपः, शे० स्प०, ५-३० बिं० )। पढिअं[2] ( २-२४ ठ = ढ, शे० पू० ) ॥ ३२ ॥**

क्ते—'अत इदि'त्यनुवर्तते। अकारान्तस्य धातोरिकारादेशो भवति क्तप्रत्यये परतः। भरिअं। जाणिअं। पढिअं ॥ ३२ ॥

क्ते इति। उक्त सूत्रों से अतः और इत् की अनुवृत्ति होती है, तो यह अर्थ होता है, कि अकारान्त धातु को इकार आदेश होता है। भरिअं। स्मृ चिन्तायाम्। क्तप्रत्यय। 'स्मरतेर्भरसुमरौ' से भर आदेश। आदिस्थ भकार है, इससे, अथवा भकारोच्चारण सामर्थ्य से 'खघथधफभां हः' इससे हकार नहीं होगा, अन्यथा 'हर' आदेश पड़ते।

---

१. हसामः। २. हसितं, पठितम्।

उक्त सूत्र से इकार। 'कगचज०' से तकारलोप। 'नपुंसके सोर्बिन्दुः' से अनुस्वार। भरिअं। ज्ञा धातु, 'ज्ञो जाणमुणौ' से जाण आदेश। उक्त सूत्र से इकार। जाणिअं। पढिअं। पठ धातु। 'शेषाणामदन्तता' से अदन्तत्व, 'ठो ढः' से ढ आदेश। पढिअं ॥३२॥

## ए च क्त्वातुमुन्तव्यभविष्यत्सु ॥ ३३ ॥

क्त्वा, तुमन्, तव्य इत्येतेषु भविष्यति काले च अत एत्वं भवति चकारादित्वं च। हसेऊण। हसिऊण (४-२३ क्त्वा = ऊण, शे० स्प०)। हसेउं। हसिउं (२-२ तुमः तलोपः, ४-१२ मबिं०, शे० पू०)। हसेअव्वं हसिअव्वं (२-२ तलोपः, ३-५० वद्वि०, ५-३० सोर्बिन्दुः, शे० स्प०)। हसेहिइ, हसिहिइ[1] (७-१२ धातोः परो हि-प्रयोगः, शे० स्प०) ॥ ३३ ॥

ए च क्त्वा-तुमुन्-तव्य-भविष्यत्सु—भविष्यदित्यनेन तत्कालविहितो लृडादिर्गृह्यते। क्त्वा-तुमुन्-तव्य-इत्येतेषु भविष्यदर्थे विहितेषु प्रत्ययेषु च परतः अकारान्तस्य धातोरेकारः स्यात् इकारश्च। हरेऊण, हरिऊण। हृधातोः क्त्वा-प्रत्ययः, तस्य 'क्त्वा तूण' इति तूण आदेशः, 'कगचजे'ति तलोपः। 'अन्ते अरः' इति ऋकारस्य अरः। हृत्वा। एवं तुमुनादिषु। हरेउं, हरिउं। हर्तुम्। हरेअव्वं, हरिअव्वं। हर्तव्यम्। हरेहिइ, हरिहिइ। हरिष्यति, हरिष्यते वा। एवमन्येऽपि बोध्याः ॥ ३३ ॥

ए च क्त्वेति। भविष्यत् इस पद से भविष्यदर्थ में लुट् लृट् दोनों का ग्रहण होगा। तो यह अर्थ होगा—क्त्वा-तुमुन्-तव्य-प्रत्ययों के परे और भविष्यत् अर्थ में विहित आशिष अर्थ में लिङ्-लुट्-लृट्सम्बन्धी प्रत्ययों के परे अकारान्त धातु को एकार और इकार हो। अर्थात् अन्त्य अकार को एकार, इकार होगा। हरेऊण, हरिऊण। हृधातु से क्त्वाप्रत्यय। उसको 'क्त्व तूण' इससे तूण आदेश। 'कगचज०' इससे तकार-लोप। 'अन्ते अरः' इससे सस्वर अर आदेश। उक्त सूत्र से एकार होने पर हरेऊण। और इकार होने से हरिऊण। एवम्-तुमुन् के परे हरेउं, हरिउं। 'कगचज०' से तकार-लोप। 'मो बिन्दुः' से अनुस्वार। हरेउं, हरिउं। हर्तुम्। तव्यप्रत्यय के परे हरेअव्वं, हरिअव्वं। पूर्ववत् अर और एकार। 'कगचजतद०' से तकार का और 'अधो मनयाम्' से यकार का लोप। 'शेषादेशयोर्द्वित्वमनादौ' से वकारद्वित्व, पूर्ववत् अनुस्वार। हरेअव्वं, हरिअव्वं। हर्तव्यम्। आशिष अर्थ में लिङ्, अनद्यतन भविष्यत् में लुट् भविष्यत् में लृट्, एतत्संबन्धी त अथवा तिप् करने पर, 'ततिपोरिदेतौ' से इकार, पूर्ववत् अर। 'धातोर्भविष्यति हिः' से प्रकृति-प्रत्यय के मध्य में 'हि' विकरण। उक्त सूत्र से एकार एवम्-इकार। हरेहिइ, हरिहिइ। हर्ता, हरिष्यति, हरिष्यते, ह्रियात्, हृषीष्ट इत्यादि। इसी प्रकार अन्य धातुओं में भी जानना ॥ ३३ ॥

## लादेशे वा ॥ ३४ ॥

इति वररुचिकृतप्राकृतसूत्रेषुः सप्तमः परिच्छेदः ॥

---

१. हसित्वा, हसितुम्, हसितव्यम्।

**लकारादेशे वा परतोऽत एत्वं भवति वा। हसेइ, हसइ। पढेइ, पढइ ( ७-१ ति = इ, शे० स्प० )। हसेन्ति, हसन्ति ( ७-४ झि = न्ति, ४-१७ बिं० )। हसेउ, हसउ[1] ( ७-१८ ति = उ, शे० स्प० ) ॥ ३४ ॥**

इति श्रीभामहविरचितायां प्राकृतप्रकाशव्याख्यायां मनोरमायां
तिङ्विधिर्नाम सप्तमः परिच्छेदः ॥

लादेशे वा—लकारादेशे परतः अकारान्तस्य धातोरेकारादेशो वा भवति। हसेइ, हसइ। हस हसने, 'ततिपोरिदेतौ' ६।१ इति तिपः इकारः। 'शेषाणामदन्तता' इति अदन्तत्वम्। विकल्पेन एकारः। हसतीत्यर्थः। एवम्-रमेइ, रमइ। रमते। वड्ढेन्ति, वड्ढन्ति। वर्धन्ते। खमेन्तो, खमन्तो। क्षममाणः। विरमेउ, विरमउ। विरमतु। एवं-विरमेसु, विरमसु। त्वं विरम। विरमेमु, विरममु। अहं विरमामि इति ॥

इति श्री म० म० मथुराप्रसादकृतायां चन्द्रिकाव्याख्यायां सप्तमः परिच्छेदः ॥

**लादेशे इति। लकार के स्थान में जायमान प्रत्यय के परे अकारान्त धातु को अर्थात् अन्त्य अकार को एकारादेश विकल्प से होता है। हस् धातु। 'शेषाणामदन्तता' से अकारान्त। 'ततिपोरिदेतौ' से तिप् को इकार। उक्त सूत्र से विकल्प से एकार। हसेइ, पक्ष में-हसइ। हसति। इसी प्रकार सब कार्य पूर्ववत्। रमेइ रमइ। रमते इत्यर्थः। रमु क्रीडायाम्। तप्रत्यय को 'ततिपोरिदेतौ' से इकार होगा। तात्पर्य यह है कि चाहे आत्मनेपदी चाहे परस्मैपदी हो, इकार, एकार, दोनों परस्मैपद, आत्मनेपद में होंगे। क्योंकि प्राकृत में आत्मनेपद और परस्मैपद का भेद नहीं है इति। वड्ढेन्ति, वड्ढन्ति। वर्धन्ते-इत्यर्थः। वृधु वृद्धौ। वृध् धातु से 'वृधेर्ड्ढः' ७।४८। से धकार को ड्ढ आदेश। 'ऋतोऽत्' से ऋकार को अकार। 'न्तिहेत्था०' से झ को न्ति आदेश। एत्व उक्त सूत्र से। वड्ढन्ति। एवं वड्ढेन्तो। खमेन्तो, खमन्तो। क्षम धातु से शानच्, 'न्तमाणौ शतृशानचोः' ६।१० से न्त आदेश, 'शषाणामदन्तता' से अकार। उक्त सूत्र से विकल्प से एकार। 'अत ओत्सोः' से ओकार। 'ष्कस्कक्षां खः' से खकार। खमेन्तो, खमन्तो। क्षममाणः। विरमेउ, विरमउ। वि-पूर्वक रम् धातु, लोट्। 'उ.सु.मु.' ७।१८ से प्रथमपुरुष में उ। मध्यमपुरुष में सु। उत्तमपुरुष में मु आदेश। 'शेषाणा०' से अदन्तता। उक्त सूत्र से एकार, पक्ष में अकार। सो विरमेउ, विरमउ। स विरमतु। एवम्-मध्यमपुरुष में-विरमेसु, विरमसु। विरम। उत्तमपुरुष में-मु आदेश-विरमेमु, विरममु। हं विरमेमु। अहं विरमानि। इत्यादिक जानना ॥ ३४ ॥**

**इति श्री म० म० मथुराप्रसादकृतायाः प्राकृतप्रकाशस्य प्रदीपटीकायाः
सरलाहिन्दीव्याख्यायां सप्तमः परिच्छेदः।**

---

१. हसति, पठति, हसन्ति, हसतु।

# अथ अष्टमः परिच्छेदः

## भुवो हो हुवौ ॥ १ ॥

भू सत्तायाम्, एतस्य धातोर्हो, हुव इत्येतावादेशौ भवतः। होइ (७-५ सू० स्प०)। हुवइ (७-१ ति = इ)। होन्ति, हुवन्ति[1] (७-४ झि = न्ति, ४-१७ बिं०, शे० स्प०) ॥ १ ॥

भुवो होहुवौ[2]—सत्तार्थकस्य भूधातोः हो हुव इत्यादेशौ भवतः। होइ, हुवइ। 'ततिपोरिदेतौ'। भवति। होन्ति, हुवन्ति। भवन्ति। साधुत्वं पूर्वोक्तैरेव सूत्रैः कार्यम् ॥

भुवो-इति। भू सत्तायाम्। सत्तार्थक भूधातु को हो हुव ये आदेश होते हैं। 'ततिपो०' से तिप् को इकार। होइ, हुवइ। साधुत्व सर्वत्र पूर्ववत् जानना। भवति ॥१॥

## क्ते हुः ॥ २ ॥

भुवः क्तप्रत्यये परतो हु इत्यादशो भवति। हुअं[4] (२-२ तलोपः, ५-३० बिं०) ॥ २ ॥

क्ते हू[5]—क्तप्रत्यये परतः भूधातोः हू इत्यादेशः स्यात्। हूअं। 'कगचजे०'ति तलोपः। भूतम्। 'उपसर्गात् परस्यापि भुवो हूरदुरुत्समः'। दुरुत्संभ्यो निषेधार्थमिदमिति फलति। अणुहूओ = अनुभूतः। अहिहूओ = अभिभूतः। परिहूअं=परिभूतम्। अदुरुत्सम इति किम्? दुब्भूओ-दुर्भूतः, उब्भूओ-उद्भूतः। संभूओ,-संभूतः। 'भूओ इति पिशाचे स्यात् तत्र क्ते हू भुवो नहि'। भूओ=भूतः। पिशाच इत्यर्थः ॥ २ ॥

क्ते हू-इति। क्तप्रत्यय के परे भू धातु को 'हू' यह आदेश हो। हो हुव के अपवाद से। 'कगचज' से तकारलोप। हूअं। उपसर्ग से भी पर भूधातु को हू आदेश हो, परंतु दुर्-उत्-सम् उपसर्ग से पर होने पर नहीं हो। अणुहूओ, 'नो णः' से णकार। तलोप, ओत्व पूर्ववत्। अनुभूतः। अहिहूओ। 'खघथध०' से भकार को हकार। अभिभूतः। परिहूअं, परिभूतम्। दुर्-उत्-सम् का निषेध क्यों? दुब्भूओ। दुर्भूतः। 'सर्वत्र लवराम्' से रेफ का लोप, 'शेषादेशयोः०' से भकारद्वित्व। 'वर्गेषु युजः पूर्वः' से भकार को बकार। दुब्भूओ। उद्भूतः, 'उपरि लोपः०' से दकारलोप। अन्य कार्य पूर्ववत्। उब्भूओ। संभूओ। अनुस्वार से पर भकार है, अतः 'खघथध०' से हकार नहीं होगा। पिशाच अर्थ में भू को 'क्ते हू' इससे हू आदेश नहीं होगा। अतः भूओ यही होगा। भूतः = पिशाच इत्यर्थः ॥ २ ॥

## प्रादेर्भवः ॥ ३ ॥

प्रादेरुत्तरस्य भुवो भव इत्ययमादेशो भवति। पभवइ (३-३ रलोपः, ७-१ ति = इ)। उब्भवइ (३-१ दलोप०, ३-५० भद्वि०, ३-५१ भ् = व्,

---

१. भवति, भवन्ति। २. संजीवनीसंमतः पाठः। ३. क्ते हूः ८।४६४। हूअं, अणुहूअं, पहूअं। अविति हुः ८।४।६१ विन्द्वर्जे। हुन्ति-हुतो। हेम०। ४ भूतम्, भूतः। ५. संजीवनीसंमतः पाठः।

शे० पू० ) । सम्भवइ । परिभवइ[1] ( ४–१७ वर्गान्त०, शे० स्प० ) ॥ ३ ॥

प्रादेर्भवः—प्रादेरुपसर्गात् परस्य भुवः भव इत्यादेशः स्यात् । पहवेइ, पहवइ । प्रभवति । अणुहवेइ, अणुहवइ । अनुभवति । अनुस्वारात्परत्वात् 'खघथधे०'ति न हकारः । संभवेइ, संभवइ । संभवति । 'अप्रादेरपि तथा दृश्यते भवतेर्भवः ।' भवेइ, भवइ । भवति । 'भुवः प्रादेः परस्य स्यादादेशो हुव्व इत्यपि' । पहुव्वेइ, पहुव्वइ । प्रभवति–इति ॥ ३ ॥

प्रादेरिति । प्रादिक उपसर्ग से पर भूधातु को भव आदेश हो । पहवेइ, पहवइ । रेफलोप, हकारादेश पूर्ववत् । 'लादेशे वा' से एकार । प्रभवति । अणुहवेइ, अणुहवइ । अनुभवति । संभवेइ, संभवइ । संभवति । प्रादि उपसर्ग के बिना भी कहीं-कहीं भू को भव आदेश होता है । भवेइ, भवइ । भवति । प्रादिक से पर भूधातु को 'हुव्व' भी आदेश होता है । पहुव्वेइ, पहुव्वइ । एकार-इकारादिक पूर्ववत् जानना । प्रभवति ॥३॥

## त्वरस्तुवरः ॥ ४ ॥

ञित्वरा सम्भ्रमे, अस्य धातोस्तुवर इत्ययमादेशो भवति । तुवरइ[2] ( ७–१ त = इ, शे० स्प० ) ॥ ४ ॥

त्वरस्तुवरः—ञित्वरा संभ्रमे–इत्यस्य तुवर इत्यादेशः स्यात् । तुवरेइ, तुवरइ । त्वरते । कथं तर्हि तुरिअं ? तुर त्वरणे इत्यस्य बोध्यम् । 'तूरिअं' इति तु 'रुषादीनां वा' इति दीर्घे सेत्स्यति ॥ ४ ॥

त्वर इति । घबड़ाने जल्दीकरने के अर्थ में त्वर-धातु को तुवर आदेश हो । तुवरेइ । त्वरते । यदि त्वर को तुवर आदेश सर्वत्र होगा तो 'तुरिअं' कैसे होगा ? इसका उत्तर-तुर धातु से तप्रत्यय । 'शेषाणामदन्तता' से अकारान्त । 'क्ते' ६।२२ से इकार । 'कग-चज०' से तलोप । तुरिअं । तूरिअं । तूरिअं–में 'रुषादीनां दीर्घः' से दीर्घ ॥ ४ ॥

## क्ते तुरः[3] ॥ ५ ॥

क्तप्रत्यये तुर इत्ययमादेशो भवति । तुरिअं[4] ( ७–३२ अ = इ, २–२ तलोपः, ५–३० बिं० ) ॥ ५ ॥

## घुणो घोलः ॥ ६ ॥

घुण, घूर्ण भ्रमणे, अस्य धातोर्घोल इत्ययमादेशो भवति । घोलइ[5] ( ७–१ ति = इ ) ॥ ६ ॥

घुर्णो घोलघुम्मौ[6]—घुण, घुर्ण भ्रमणे–इत्यस्य घोल, घुम्म इत्यादेशौ भवतः । घोलन्तो, घोलमाणो । घुम्मन्तो घुम्ममाणो । लटि–घोलइ, घोलेइ । घुम्मइ, घुम्मेइ । 'ततिपो'रिति एत्वे, घोलए, घुम्मए ॥ ६ ॥

घुर्णो–इति । घुर्ण धातु को घोल घुम्म ये आदेश होते हैं । 'घूर्णो' यह दीर्घ पाठ

---

१. प्र, उद्, सम् , परि, भवति । २. त्वरते । ३. नेद सूत्र सञ्जीवन्यादिषु । ४. त्वरितम् । ५. घोर्णते—घूर्णते । ६. संजीवनीसंमतः पाठः ।

'वोरुपधाया दीर्घं इकः' से दीर्घ, घूर्ण है। घोलन्तो। 'न्तमाणौ शतृशानचोः' से न्त-माण शतृ-शानच् को होंगे। 'अत ओत्सोः' से ओकार। घोलन्तो, घोलमाणो। घूर्णमानः। घोलइ, घोलए। घुम्मइ, घुम्मेइ-इत्यादि का साधुत्व पूर्ववत्॥ ६॥

## णुदो णोल्लः[1] ॥ ७ ॥

णुद प्रेरणे, अस्य धातोर्णोल्ल इत्ययमादेशो भवति। णोल्लइ। पणोल्लइ[2] (३-३ प्र-इत्यस्य रेफलोपः, शे० पू० स्प०)॥ ७॥

नुदो णोल्ल:—प्रेरणे इत्यर्थकस्य णुद्धातोर्णोल्ल इत्यादेशः। णोल्लइ, णोल्लेइ। पणोल्लिअं[3]॥ ७॥

नुदो-इति। नुद धातु को णोल्ल आदेश हो। णोल्लइ, णोल्लेइ। 'लादेशे वा' इससे विकल्प से एकार। नुदति। पणोल्लिअं। 'क्ते' से इकार। 'कगचज०' से तलोप। 'नपुंसके सोर्बिन्दुः' से अनुस्वार। प्रणोदितम्॥ ७॥

## दूङो दूमः[4] ॥ ८ ॥

दूङ् परितापे, अस्य धातोर्दूमादेशो भवति। दूमइ[5] (स्पष्टम्)॥ ८॥

## पटेः फलः ॥ ९ ॥

पट गतौ, अस्य धातोः फल इत्ययमादेशो भवति। फलिअं (७-३२ अ = इ, २-२ तलोपः, ५-३० विं०) हिअअं[6] (१-२८ सू० स्प०)॥ ९॥

पाटेः फालः[7]—अट पट गतौ, णिजन्तस्य पट्धातोः फाल इत्यादेशः स्यात्। फालइ, फालेइ, फालावेइ। फालेन्ति, फालावेन्ति। पाटयन्ति। क्त-प्रत्यये फालाविअं[8]॥ ९॥

पाटेरिति। णिजन्त पटधातु को फाल आदेश हो फालावेइ। बहुवचन में 'न्तिहेत्था०' से न्तिआदेश। अन्य कार्य पूर्ववत्। फालेन्ति, फालावेन्ति। पाटयन्ति। क्तप्रत्यय के परे फालाविअं। पाटितम् इत्यर्थः॥ ९॥

## पदेः पालः[9] ॥ १० ॥

पद गतौ, अस्य धातोः पाल इत्ययमादेशो भवति। पालेइ[10] (७-३४ अ = ए, ७-१ ति = इ)॥ १०॥

## वृषकृषमृषहृषामृतोऽरिः ॥ ११ ॥

वृषादीनामृतः स्थाने अरि इत्यादेशो भवति। वरिसइ। करिसइ।

---

१. नुदो छोणः। नुद प्रेरणे अस्य धातोर्ल्लोण इत्यादेशो भवति। छोणइ पल्लोणइ। नुदेर्लोणा-लोणाइ पल्लोणाइ। णुदो णोलः-णोलइ, णोल्लइ। गमादित्वात् द्वित्वं-नुदो ल्लोणः। लोणइ, पलोणइ का० पा०। २. नुदति-नुदते। ३. प्रणुन्नम्-इति संजीवन्याम्। ४. नेदं सूत्रं संजीवन्यादिषु। ५. दूयते— दुनोति। ६. पाटितं हृदयम्। ७. संजीवनीसंमतः पाठः। ८. पाटितम्-इत्यर्थः। ९. नेदं सूत्रं संजीवन्यादिषु। १०. पद्यते।

मरिसइ। हरिसइ[1] ( २-४२ ष = स, ७-४ ति = इ, एवमुत्तरत्रापि कृष, मृष, हृष ) ॥ ११ ॥

वृषादीनामृतोऽरिः[2]—वृषादीनां धातूनां सम्बन्धिन ऋकारस्य अरिः स्यात्। ऋकारस्य उपधास्थत्वेन वृषादित्वम्। वृषादिग्रहणात् नृत्यतीत्यादौ न भवति। वरिसउ, वरिसेउ। वरिसिऊण, वरिसेऊण। हरिसिऊण, हरिसेऊण। करिसिऊण, करिसेऊण। करिसइ, करिसेइ। कथं तर्हि कर्षतीत्यस्य कट्ठइ इति ? बहुलग्रहणात् पक्षे ट्ठआदेशः। नृत्धातोः-नच्चइ ॥ ११ ॥

वृषादीति। वृषादिक धातुओं के ऋकार को अरि आदेश हो। जिनके मध्य में ऋकार होगा वे प्रायः वृषादिक हैं। परन्तु वृषादि का ग्रहण है अतः नृत्यति-इत्यादिक में नहीं होगा। वरिसतु। 'शषोः सः' से सकार। वर्षतु। वरिसिऊण। 'क्त्वा तूण' से तूण आदेश। 'कगचज' से तलोप। 'ए च क्त्वा०' इससे इकार, एकार। वरिसेऊण। वर्षित्वा। इसी प्रकार हरिसिऊण इत्यादिक भी जानना। प्रश्न यह होता है कि—कृष धातु का 'कट्टइ' कैसे होगा ? बहुलग्रहण से ट्ठ आदेश हो जायगा। 'ऋतोऽत्' से अकार। कट्ठइ। नृत् धातु में 'च्चो व्रजिनृत्योः' से च्च आदेश। 'ऋतोऽत्' से अकार। नच्चइ। नृत्यति ॥ ११ ॥

## ऋतोऽरः ॥ १२ ॥

ऋकारान्तस्य धातोर्ऋतः स्थाने अर इत्यादेशो भवति। मृ, मरइ। सृ, सरइ। वृ, वरइ[3] ( ७-१ = इ, शे० स्प० ) ॥ १२ ॥

अन्ते अरः[4]—धातोरन्ते वर्तमानस्य ऋतः अरः स्यात्। हरए, हरेइ, हरइ। अम्हे हरामो, हरिमो। वयं हरामः। एवं धरइ, वरइ इत्यादयः ॥ १२ ॥

अन्ते इति। धातु के अन्त में विद्यमान ऋकार को अर् हो। हृ धातु, 'ततिपोरिदेतौ' से एकार। हरए। इकार होने में 'लादेशे वा' इससे एकार। हरेइ, हरइ। उत्तम-पुरुष बहुवचन में। 'न्तिहेत्थामोमुमा' इत्यादि से मो आदेश। अम्हे हरामो, हरिमो। 'इच बहुषु' से आत्व, इत्व। वयं हरामः। इसी प्रकार धृ-वृ इत्यादिकों में जानना॥१२॥

## कृञः कुणो वा ॥ १३ ॥

डुकृञ् करणे, अस्य धातोः प्रयोगे कुणो वा भवति। कुणइ, करइ[5] ( पूर्ववत् स्प० ) ॥ १३ ॥

कृञः कुण च[6]—कृधातोः कुण इत्यादेशः स्यात्, चकारात् अर इत्यपि। कुणइ, कुणेइ, कुणए, पक्षे-करेइ, करइ। करए। करोति, कुरुते ॥ १३ ॥

कृञ इति। कृधातु को कुण आदेश हो चकार से अर भी हो। कुणेइ। पक्ष में—करेइ। साधुत्व पूर्ववत् ॥ १३ ॥

---

१. वर्षति। कर्षति। मृष्यति। हृष्यति। भौवादिकस्य हर्षति। २. संजीवन्यादिसंमतः पाठः। ३. म्रियते। सरति-ससर्ति। वरति। सानुबन्धकयोः वृणोति-वृणुते। वृणीते। ४. संजीवन्यादिसंमतः पाठः। ५. करोति-कुरुते। ६. संजीवन्यादिसंमतः पाठः।

## जृभो जम्भाअः ॥ १४ ॥

जभि, जृभी गात्रविनामे, अस्य धातोर्जम्भाअ इत्ययमादेशो भवति। जम्भाअइ[1] ( स्पष्टम् ) ॥ १४ ॥

जृभेर्जम्भा[2]—जृभी गात्रविनामे, जृभधातोः जम्भा इत्यादेशः स्यात्। जम्भाइ, जम्भाअइ। जृम्भते। 'जृभेर्जम्भेति नादेशः सोपसर्गस्य दृश्यते।' विअंभइ, विजृम्भते ॥ १४ ॥

जृभेरिति। गात्रविनाम-शरीर का फैलाना, जृम्भा लेना। जृभ धातु को जम्भा यह आदेश हो। जृभ को जम्भा आदेश। 'अनदन्तानामद् वा' इससे अकारागम। जम्भाइ-जम्भाअइ। जृम्भते। जृभेरिति। उपसर्ग-सहित जृभधातु को जम्भादेश नहीं होगा। विअंभइ। 'कगचज०' से जलोप। 'ऋतोऽत्' से अकार। 'मो बिन्दुः' से म को बिन्दु। विजृम्भते ॥ १४ ॥

## ग्रहेर्गेण्हः ॥ १५ ॥

ग्रह उपादाने, अस्य धातोर्गेण्हो भवति। गेण्हइ[3] ( स्पष्टम् ) ॥ १५ ॥

ग्रहेर्गेण्ह:—उपादानार्थे ग्रह्धातोर्गेण्ह इत्यादेशः स्यात्। गेण्हइ। गृह्णाति। कर्मणि-गेण्हिअइ, गेण्हिज्जइ। गृह्यते ॥ १५ ॥

ग्रहेरिति। ग्रह धातु को गेण्ह आदेश हो। गेण्हइ। गृह्णाति। कर्म में प्रत्यय के परे गेण्ह आदेश। 'यक इअइज्जौ' इससे यक् को इअइज्ज। 'क्वचिदपि लोपः' से अल्लोप। गेण्हिअइ, गेण्हिज्जइ। गृह्यते इत्यर्थः ॥ १५ ॥

## घेत् क्त्वातुमुन्तव्येषु ॥ १६ ॥

ग्रहेर्घेत् इत्ययमादेशो भवति क्त्वातुमुन्तव्येषु परतः। घेत्तूण ( ४-२३ क्त्वा = ऊण, ३-५० तद्वि० )। घेत्तुं ( ३-५० तद्वि०, २-१२ मबिं० )। घेत्तव्वं[4] ( पूर्ववत्तलोपतद्वि०, ३-२ यलोपः, ३-५० वद्वि०, ५-३० बिं० ) ॥ १६ ॥

घेत्त[5] क्त्वातुमुन्तव्येषु—ग्रहेर्घेत्त इत्यादेशः स्यात् क्त्वा-तुमुन्-तव्येषु परतः। घेत्तूण, गृहीत्वा। घेत्तुं, ग्रहीतुम्। घेत्तव्वं, ग्रहीतव्यम् ॥ १६ ॥

घेत्तेति। क्त्वा-तुमुन्-तव्य-प्रत्यय के परे ग्रह धातु को घेत्त आदेश हो। 'अल्लोपः' से अकार का लोप। 'कगचज०' से तलोप। घेत्तूण इति। घेत्तव्वं। 'अधो मनयाम्' से यलोप। 'शेषादेशयो०' से वकारद्वित्व, घेत्तव्वं ॥ १६ ॥

## कृञः का भूतभविष्यतोश्च ॥ १७ ॥

भूतभविष्यतोः कालयोः कृञः का इत्ययमादेशो भवति, चकारात् क्त्वातुमुन्तव्येषु परतः। काहीअ ( ७-२४ भूते क्तक्तवतोः स्थाने अथवा

---

१. जम्भते-जृम्भते। २. सजीवन्यादिसम्मतः पाठः। ३. गृह्णाति—गृह्णीते।
४. गृहीत्वा, ग्रहीतुम्, ग्रहीतव्यम्। ५. संजीवन्यादिसंमतः पाठः।

भूतभविष्यदर्थकलस्थाने हीअ इत्यादेशः)। काहिइ (७-१२ भवि० धातोः परः हिर्भवति, ७-१ ति = इ)। काऊण (४-२३ क्त्वा = ऊण)। काउं (२-२ तलोपः, ४-१२ मबिं०)। काअव्वं[1] (२-२ तलोपः-३-२ मलोपः, ४-१२ मबिं०)॥ १७॥

कृञः का भूतभविष्यतोश्च—भूते भविष्यति च यः प्रत्ययस्तस्मिन् परे क्त्वा-तुमुन्-तव्येषु परतः कृधातोः का इत्यादेशः स्यात्। काहीअ। अकरोत्, अकार्षीत्, चकार। काहिइ। करिष्यति, क्रियात्, कर्ता। काऊण, कृत्वा। काउं, कर्तुम्। काअव्वं, कर्तव्यम्॥ १७॥

कृञ इति। भूत अर्थ लङ्-लुङ्-लिट् में, भविष्यत्-लृट्-लुट् में, आशीर्लिङ् में और क्त्वा, तुमुन्, तव्य प्रत्यय के परे कृञ् धातु को का आदेश हो। भूत अर्थ में 'एकाचो हीअ' से हीअ आदेश। काहीअ। 'धातोर्भविष्यति हिः' से हिविकरण। काहिइ इति। काऊण, काउं, काअव्वं-का साधुत्व पूर्ववत्॥ १७॥

## स्मरतेर्भरसुमरौ॥ १८॥

स्मृ चिन्तायाम्, अस्य धातोर्भर-सुमरौ भवतः। भरइ, सुमरइ[2] (७-१ ति = इ, शे० स्प०)॥ १८॥

स्मरतेर्भरसुमरौ—स्मृधातोर्भर-सुमर इत्यादेशौ भवतः। स्मृ चिन्तायाम्-भरइ, सुमरइ। स्मरति। भरिस्सं, भरिहिमि। सुमरिस्सं, सुमरिहिमि। स्मरिष्यामि॥ १८॥

स्मरतेरिति। स्मृ धातु को भर, सुमर आदेश होते हैं। स्मृ धातु चिन्ता के अर्थ में है। भर आदेश। भरइ। एवं-सुमरइ। भविष्यद् में, उत्तमपुरुष, 'इण्मिपोर्मिः' से मि। 'मिना स्सं वा' से स्सं-विकरण। 'ए च क्त्वा०' से इकार। भरिस्सं। भरिहिमि। एवं-सुमरिस्सं॥ १८॥

## भियो भावीहौ॥ १९॥

ञिभी भये, अस्य धातोर्भा-वीहौ भवतः। भाइ, वीहइ[3] (पू० ति = इ, शे० स्प०)॥ १९॥

भियो भावीहौ—ञिभी भये, भीधातोर्भा-वीह इत्यादेशौ स्तः। भाइ, वीहइ। प्रयोगानुसारात् क्तप्रत्यये वीहादेशो वा। वीहिओ, भीओ। भीतः॥ १९॥

भियो-इति। भी धातु को भा, वीह ये दो आदेश होते हैं। भाइ, वीहइ। स्पष्ट हैं। प्रयोगानुकूल क्तप्रत्यय के परे वीह आदेश विकल्प से होगा। 'के' इससे इकार, वीहिओ। पक्ष में-भीओ॥ १९॥

## जिघ्रतेः पापाऔ[4]॥ २०॥

---

१. चकार—चक्रे, कृतम्, कृतवान्, अकार्षीत्-अकृत, करिष्यति-करिष्यते, कृत्वा, कर्तुम्, कर्तव्यमित्यादि। २. स्मरति—स्मृणोति ३. बिभेति—बिभीते। ४. नेदं सूत्रं संजीवन्यादिषु।

घ्रा गन्धग्रहणे, अस्य धातोः पा, पाअ इत्यादेशौ भवतः। पाइ, पाअइ ( स्प० ) ॥ २० ॥

## म्लै वावाऔ ॥ २१ ॥

म्लै हर्षक्षये, अस्य धातोर्वा—वाऔ भवतः। वाइ, वाअइ[1] (पू० स्प० ) ॥ २१ ॥

म्लो वा वाआ[2]—म्लैधातोर्वा वाअ इत्यादेशौ भवतः। वाइ, वाअइ। म्लायति। 'अनदन्तानामद् वा' इत्यकरागमेनैव वाअइ-इति सिद्धेः, वाअ इत्यादेशः प्रपञ्चार्थः ॥२१॥

म्लो वा इति। म्लै धातु को वा-वाअ, ये दो आदेश होते हैं। वाइ, वाअइ। म्लायतीत्यर्थः। 'अनदन्तानाम् अद्वा' इससे अकारागम हो जाने से वाअइ इत्यादि हो जायगा, फिर सूत्र में वाअग्रहण प्रपञ्चार्थ है ॥ २१ ॥

## तृपस्थिपः ॥ २२ ॥

तृप् तृप्तौ, अस्य धातोस्थिपो भवति। थिंपइ[3] (पू० स्प० ) ॥ २२ ॥

तृपस्थिप्पः[4]—तृप्धातोः थिप्प इत्यादेशः स्यात्। तृप् प्रीणने, थिप्पइ। थिप्पन्तो, थिप्पमाणो। तृप्यति। तृप्यन्, तृप्यमाणः ॥ २२ ॥

तृप-इति। तृप धातु को थिप्प आदेश हो। तृप धातु तृप्त करने के अर्थ में है। थिप्पइ। तृप्यति। शतृ में 'न्तमाणौ शतृशानचोः' न्त-माण, शतृप्रत्यय को होंगे। थिप्पन्तो, थिप्पमाणो ॥ २२ ॥

## ज्ञो जाणमुणौ ॥ २३ ॥

ज्ञा अवबोधने, अस्य धातोर्जाण—मुणौ भवतः। जाणइ, मुणइ[5]। ( पू० स्प० ) ॥ २३ ॥

ज्ञो जाणमुणौ—ज्ञाधातोः जाण-मुण इत्यादेशौ भवतः। ज्ञा अवबोधने। जाणइ, मुणइ। जानाति। जाणह, जाणित्था। मुणह, मुणित्था। 'अज्ञा-दिनेह सूत्रेण ज्ञो ण इत्यपि दृश्यते।' णाइ, जानाति ॥ २३ ॥

ज्ञो इति। ज्ञा धातु को जाण मुण आदेश हों। ज्ञाधातु जानने के अर्थ में है। जाण एवं मुण आदेश होने पर—जाणइ, मुणइ। जानातीत्यर्थः। 'ज्ञञ्पञ्चा०' ३।४३ से णकारादेश। 'अड़ादेशा बहुलम्' से आकार अथवा अकारागम, 'सन्धौ अज्लोप' से दीर्घ, णाइ ॥ २३ ॥

## ( घटेर्गढः। )

घटेर्गढः[6]—घटधातोर्गढ इत्यादेशः स्यात्। घट चेष्टायाम्। गढइ। घटते ॥

घटेरिति। घटधातु को गढ आदेश हो। गढइ। घटते। स्पष्ट है ॥

---

१. म्लायति। २. सञ्जीवनीसमतः पाठः। ३. तृप्यति-तुप्पेति—तुपति—तुप्यति। ४. संजीवनीसंमतः पाठः। ५. जानाति। ६. इत आरभ्य 'पिबतेर्घोट्टः' इति यावत् सप्त सूत्राणि न सन्ति भामहवृत्तौ।

## ( समो गलः । )

समो गलः—समुपसर्गात् परस्य घटधातोः गल इत्यादेशः स्यात् । संगलइ । संघटते ॥

समो-इति । सम् उपसर्ग-पूर्वक घटधातु को गल आदेश हो । संगलइ । संघटित होता है ॥

## ( स्रंसो ल्हसः । )

स्रंसो ल्हसः—स्रंस इत्यस्य ल्हस इत्यादेशः स्यात् । स्रंसु अधःपतने । ल्हसइ । स्रंसते ॥

स्रंसो-इति । स्रंस् धातु को ल्हस आदेश हो । स्रंस् धातु नीचे गिरने के अर्थ में है । ल्हसइ । स्रंसते । नीचे गिरता है ॥

## ( नेः सदः सज्जः । )

नेः सदः सज्जः—नेरुपसर्गात्परस्य सद्धातोः सज्ज इत्यादेशः स्यात् । षद्लृ विशरणगत्यवसादनेषु । निसज्जइ । निषीदति ॥

नेः सद इति । निर् उपसर्ग से पर सद् धातु को सज्ज आदेश हो । निसज्जइ । बैठता है ॥

## ( आङो रभेर्ढवः । )

आङो रभेर्ढवः—आङ्पूर्वकस्य रभ्धातोः ढव इत्यादेशः स्यात् । आढवइ, आढवेइ । आरभते । आढविअं । आरब्धम् । कथं तर्हि 'आढत्तं' आरब्धमिति ? उच्यते । 'क्तेन दिण्णादयः' इति निपातनात् आढत्तादेशः ॥

आङो-इति । आङ्पूर्वक रभ धातु को ढव आदेश हो । आढवइ । आरभते । क्त-प्रत्यय के परे उक्त सूत्र से ढव आदेश । 'क्ते' सूत्र से इकार । 'कगचज०' से तलोप । आढविअं । क्तप्रत्यय में 'आढत्तं' कैसे होता है ? यह प्रश्न है—'क्तेन दिण्णादयः' इससे निपात से 'आ-रभ्-त' इस समुदित को आढत्त आदेश हो जायगा । आढत्तं । आरब्धमित्यर्थः ॥

## ( उदि शलेः थल्लो वा । )

उदि शलेः थल्लो वा—उद्-उपसर्गात् परस्य शलधातोः थल्ल इत्यादेशः स्यात् । शल आशुगतौ । उत्थल्लइ । पक्षे-उच्छलइ । उच्छलति ॥

उदीति । उत्-उपसर्गपूर्वक शल धातु को थल्ल आदेश विकल्प से हो । शल धातु जल्द चलने के अर्थ में है । थल्ल आदेश । 'उपरि लोपः कगडतद०' से तकारलोप । 'शेषादेश०' से थकारद्वित्व । 'वर्गेषु युजः०' से थ को त । उत्थल्लइ, पक्षे-उच्छलइ । उच्छलतीत्यर्थः ॥

## ( पिबतेर्घोटः । )

पिबतेर्घोटः—पाधातोः वा घोट इत्यादेशः स्यात् । पा पाने । घोटइ । पक्षे—पिबइ । पिबति ॥

पिबतेरिति। पाधातु को विकल्प से घोट आदेश हो। पाधातु पीने के अर्थ में है। घोटइ जलं। पानी घुटकता है। पक्ष में-पिबइ। वलोप होने से-पिअइ। पिबतीत्यर्थः॥

## जल्पेर्लो मः॥ २४॥

**जल्प व्यक्तायां वाचि, अस्य धातोर्लकारस्य मकारो भवति। जम्पइ[1]॥**

जल्पेर्लो मः—जल्पधातोर्यो लकारस्तस्य स्वररहितो मः स्यात्। सूत्रे 'मः' इति अकार उच्चारणार्थः। जल्प व्यक्तायां वाचि। जंपइ। जल्पति। जंपिरो। जंपिऊण॥२४॥

जल्पेरिति। जल्पधातु के लकार को स्वर-रहित मकार हो। 'मः' इसमें अकार उच्चारणार्थ है। स्पष्ट बोलने के अर्थ में जल्प धातु है। लकार को मकार। 'मो बिन्दुः' से अनुस्वार। जंपिइ, जल्पति। जंपिरो। 'तृण इर शील' से इर। जंपिरो-जल्पिता। जल्पी, बकवादी। जंपिऊण, जल्पित्वा। 'क्त्वा तूण' से तूण। 'कगचज' से तलोप। 'शेषाणामदन्तता' से अकार। 'ए च क्त्वा०' से इकार। अन्य कार्य पूर्ववत्॥ २४॥

## ष्ठाध्यागानां ठाअ-झाअ-गाआः॥ २५॥

**ष्ठा गतिनिवृत्तौ, ध्यै चिन्तायां, गै शब्दे—एतेषां ठाअ, झाअ, गाअ इत्येत आदेशा भवन्ति। ठाअन्ति, झाअन्ति, गाअन्ति[2]॥ २५॥**

ष्ठाध्यागानां ठाअ-झाअ-गाआः—ष्ठा गतिनिवृत्तौ, ध्यै चिन्तायाम्, गै शब्दे, इत्येतेषां त्रयाणां क्रमात् ठाअ, झाअ, गाअ इत्यादेशा भवन्ति। ठाअइ-तिष्ठति। झाअइ-ध्यायति। गाअइ गायति। ठाइअ-स्थित्वा। 'असमासे अ आदेशः क्त्वेत्यस्य प्रवर्तते'। एवं-झाइअ, गाइअ इत्यादयः॥ २५॥

स्थाध्येति। स्था-ध्या-गा इन धातुओं को क्रम से ठाअ, झाअ, गाअ ये आदेश होते हैं। स्था को 'ठाअ' आदेश। 'ठाअइ' इत्यादिक समान है। असमासे इति। समास के बिना भी क्त्वा को 'अ' आदेश होता है। इससे क्त्वा को 'अ' आदेश। 'ए च क्त्वा०' से 'ठाअ' आदेश के अकार को इकार। ठाइअ=स्थित्वा। झाइअ=ध्यात्वा। गाइअ=गात्वा॥ २५॥

## ठाझागाश्च वर्तमानभविष्यद्विध्याद्येकवचनेषु॥ २६॥

**ष्ठाध्यागानां ठा, झा, गा इत्यादेशा भवन्ति, चकारात् पूर्वोक्ताश्च वर्तमानभविष्यद्विध्याद्येकवचनेषु परतः। ठाइ, ठाअइ। ठाहिइ, ठाअहिइ। ठाउ, ठाअउ। झाइ, झाअइ। झाहिइ, झाअहिइ। झाउ, झाअउ। गाइ, गाअइ। गाहिइ, गाअहिइ। गाउ, गाअउ[3]॥ २६॥**

ठाझागाश्च भविष्यद्वर्तमानविध्याद्येकवचने—भविष्यद्वर्तमानविध्यादि-सम्बन्धिन्येकवचने परतः ष्ठा-ध्या-गा इत्येतेषां त्रयाणां क्रमात् ठा, झा, गा इत्येते त्रय आदेशा भवन्ति। चकारात् पूर्वोक्ता ठाअ-झाअ-गाअ इत्यपि भवन्ति। ठाहिइ, ठाअहिइ। स्थास्यति, स्थेयात्, स्थाता। त्रिष्वपि भविष्यत्सु एवम्। एवं झाहिइ,

---

१. जल्पति। २. तिष्ठन्ति। ध्यायन्ति। गायन्ति। इत्यादूह्यम्। ३. तिष्ठति—स्थास्यति—तिष्ठतु—तिष्ठेत्, एवं—ध्यै-गै इत्यादीनामपि।

झाअहिइ । गाहिइ, गाअहिइ । वर्तमाने-ठाइ, ठाअइ । तिष्ठति । झाइ, झाअइ । गाइ, गाअइ । ध्यायति । गायति । विध्यादौ-ठाउ, ठाअउ । झाउ, झाअउ । गाउ, गाअउ । तिष्ठतु, तिष्ठेत् । ध्यायतु, ध्यायेत् । गायतु, गायेत् । एकवचने इति किम् ? ठाअन्ति । झाअन्ति । गाअन्ति । इह बहुवचने ठा-झा-गा आदेशा न भवन्ति, किन्तु पूर्वेण ठाअ, झाअ गाअ आदेशा भवन्ति । तिष्ठन्ति, ध्यायन्ति, गायन्तीत्यर्थः ॥२६॥

ठाझेति । भविष्यत्-वर्तमान-विधि अर्थों में एकवचनसम्बन्धी प्रत्यय के परे उक्त धातुओं को क्रम से ठा-झा-गा ये आदेश होते हैं और चकार से पूर्वोक्त ठाअ-झाअ-गाअ-ये भी होते हैं । स्था को ठा आदेश । 'धातोर्भविष्यति हिः' से हि । 'ततिपोरिदेतौ' से इकार । ठाहिइ । पक्ष में-'ठाअ' आदेश । ठाअ । हिन्दू-ठहरेगा । यही तीनों लकारों के एकवचन में होगा । मध्यमपुरुष में-तू ठहरेगा । उत्तमपुरुष में-मैं ठहरूंगा । यह तीनों भविष्यदर्थों में, लृट्-आशीर्लिङ् और लुट् में एकसा रूप होगा । इसी प्रकार ध्या-गा-धातु में भी जानना । झाहिइ, झाअहिइ । ध्यास्यति, ध्येयात् , ध्याता । सर्वत्र ध्यान करेगा-यही अर्थ होगा । एवं गा का भी जानना । वर्तमान अर्थ में-ठाइ, ठाअइ । साधुत्व पूर्ववत् । विध्यादिक अर्थों में, 'उसुमु विध्या०' इससे उकार । ठा आदेश । पक्ष में ठाअ आदेश । ठाउ, ठाअउ । तिष्ठतु, तिष्ठेत्, समानरूप । संभावनार्थक लिङ् में भी यही रूप होगा, अर्थ में वैषम्य रहेगा । ठहरे अथवा कदाचित् या संभवतः ठहरेगा । सूत्र में एकवचनग्रहण क्यों ? सामान्यतः सर्वत्र ठा-झा-गा आदेश हों ? उत्तर यह है कि बहुवचन में पूर्वोक्त आदेश न हों, एतदर्थ एकवचन का ग्रहण है । ठाअंति । ठा आदेश नहीं होगा, किन्तु 'स्थाध्यागा' से प्राप्त 'ठाअ' आदेश होगा । ठाअन्ति । झाअन्ति । गाअन्ति । पूर्ववत् साधुत्व है ॥ २६ ॥

## खादिधाव्योः खाधौ ॥ २७ ॥

**खाद भक्षणे, धावु जवे, एतयोर्धात्वोः खा-धा इत्यादेशौ भवतो वर्त्तमानभविष्यद्विध्याद्येकवचनेषु । खाइ ( ७-१ ति = इ ) । खाहिइ ( ७-१२ धातोः परो हिः, शे० पू० ) । खाउ । धाइ । धाहिइ । धाउ[1] ( ७-१८ ति = उ, शे० स्प० ) ॥ २७ ॥**

खादिधाव्योः खा धा[2]—भविष्यति वर्तमाने विध्यादौ एकवचने परतः खाद-धाव्-धात्वोः यथासंख्यं खा, धा इत्यादेशौ भवतः । खाहिइ-खादिष्यति । खाइ-खादति । एवम्—धाहिइ-धाविष्यति । धाइ-धावति । तुमं खासि । त्वं खादसि । तुमं धासि । त्वं धावसि । विध्यादौ-खाउ, खादतु । धाउ, धावतु । अहं खामु । अहं धामु । खादानि । धावानि । 'एकत्वेऽपि भवेत् क्वापि धावतेर्धा विभाषया' । धाहिइ, धाविहिइ । धाइ, धावइ । धाउ, धावउ ॥ २७ ॥

---

१. तिष्ठन्ति—ध्यायन्ति—गायन्ति । खादधावोर्लुक् ८।४।२२८ इत्यत्र बहुलाधिकारा द्वर्तमानभविष्यद्विध्याद्येकवचन एव भवति । तेनेह न भवति । खादन्ति, धावन्ति । क्वचिन्न भवति-धावइ पुरओ इति । हे० । खादति-खादिष्यति-खादतु-खादेत् । एवं धावतीत्यादीनि ।
२. संजीवनीसम्मतः पाठः ।

खादिधाव्योरिति। भविष्यद्, वर्तमान, विधि अर्थ में एकवचन के परे खाद्, धावु धातुओं को क्रम से अर्थात् भक्षणार्थक खाद् धातु को खा, एवं गत्यर्थक-शुद्ध्यर्थक धाव् धातु को धा आदेश हो। खाहिइ। साधुत्व पूर्ववत् जानना। तुमं 'खासि' 'सिप्थासोः सिसे' इस सूत्र से सि आदेश। पूर्वोक्तसूत्र से खाद् को खा आदेश। खासि। खादसि। एवं-धासि। धावसि। विध्यादिक के एकवचन में 'उसुमु विध्या०' इससे प्रथमपुरुष में उ, मध्यमपुरुष में सु, उत्तमपुरुष में मु होंगे। सो खाउ, स खादतु। वह खाय। तुमं खासु। त्वं खाद। अहं खामु। अहं खादानि। इसी प्रकार धाव् को धादेश में भी जानना। धाउ, धासु, धामु। एकत्वे इति। कहीं पर एकवचन में धाव् धातु को 'धा' आदेश विकल्प से हो। तो जहाँ धा आदेश होगा वहाँ 'धाहिइ' होगा, परन्तु पक्ष में-'शेषाणा०' से अकारान्तत्व। धावइ, धावउ। 'ए च क्त्वा' से इकार। धाविहिइ ॥ २७ ॥

## ग्रसेर्विसः ॥ २८ ॥

**ग्रसु-ग्लसु अदने, अस्य धातोर्विसो भवति। विसइ[1] ( ७-१ ति = इ, स्प० ) ॥ २८ ॥**

ग्रसेर्विसः—ग्रसेः विस इत्यादेशः स्यात्। ग्रसु अदने। विसइ। ग्रसते। अम्हे विसिस्सामो, विसिहामो वा। वयं ग्रसिष्यामहे ॥ २८ ॥

ग्रसेरिति। ग्रसधातु को विस आदेश हो। ग्रस धातु भोजन करने के अर्थ में है। विसइ। ग्रसते। विसिस्सामो। 'न्तिहेत्था०' से मो आदेश। 'उत्तमे स्सा हा' से 'स्सा'-'हा'-विकरण। 'ए च क्त्वा०' से इकार। विसिस्सामो, विसिहामो। पक्ष में-विसिहिमो-ग्रसिष्यामहे ॥ २८ ॥

## चिञश्चिणः ॥ २९ ॥

**चिञ् चयने, अस्य धातोश्चिणो भवति। चिणइ[2] ( स्प० ) ॥ २९ ॥**

चिञश्चिणः—चिञ इत्यस्य चिण इत्यादेशः स्यात्। चिञ् चयने। चिणेइ, चिणइ। चिनोति। 'आदिश्यते चिञो धातोश्चेय इत्येष वा क्वचित्'। उच्चेअइ, उच्चिनोति। पक्षे-उच्चिणइ। उच्चेअउं, उच्चिणेउं, उच्चिणिउं। उच्चेतुम् ॥ २९ ॥

चिञ इति। चिञ्धातु चयन-इकट्ठे करने के अर्थ में है। चिञ् को चिण आदेश हो। चिणेइ। 'लादेशे वा' से एकार। पक्ष में-चिणइ, चिनोति। कहीं पर चिञ् धातु को 'चेय' यह आदेश विकल्प से होता है। उत् उपसर्ग। उच्चेअइ। पक्ष में-चिण आदेश। उच्चिणइ। उच्चेअउं। चेय आदेश। पक्ष में-चिण आदेश। 'ए च क्त्वा तुमुन्०' इससे एकार, इकार। उच्चिणेउं, उच्चिणिउं। उच्चेतुम् इत्यर्थः ॥ २९ ॥

## क्रीञः किणः ॥ ३० ॥

**डुक्रीञ् द्रव्यविनिमये, अस्य धातोः किणो भवति। किणइ[3] ( ७-१ ति = इ, स्प० ) ॥ ३० ॥**

---

१. ग्रसते-ग्लसते। २. चिनोति-चिनुते। ३. क्रीणाति-क्रीणीते।

क्रीञः किणः— क्रीञः किण इत्यादेशः स्यात् । डुक्रीञ् द्रव्यविनिमये । किणइ, किणए । क्रीणाति–क्रीणीते । क्ते परतः-किणिअं–क्रीतम् ॥ ३० ॥

क्रीञ इति । क्रीञ्धातु को किण आदेश हो । क्रीधातु–एक वस्तु, द्रव्य अथवा पदार्थ देकर दूसरी वस्तु को लेने के अर्थ में है । 'ततिपोरिदेतौ' से इकार, एकार । किणइ, किणए । क्रीणाति । खरीदता है । क्तप्रत्यय में 'क्ते' से इकार । किणिअं, क्रीतम् ॥

## वेः क्के च ॥ ३१ ॥

**वेरुत्तरस्य क्रीञः क्के आदेशः किणादेशश्च भवति । विक्केइ, विक्किणइ ( पू० स्प० ) । विक्रीणीते ॥ ३१ ॥**

वेः के च[1]—विरित्युपसर्गात्परस्य क्रीञः के इत्यादेशः स्यात् चकारात् किणादेशोऽपि । विक्केइ, विक्किणइ । विक्रीणीते । सेवादित्वात् ककारस्य द्वित्वम् ॥ ३१ ॥

वेरिति । वि उपसर्ग से पर क्री धातु को 'के' आदेश हो । चकार से किण आदेश भी हो । 'सेवादिषु च' से ककारद्वित्व । 'लादेशे वा' से एकार । विक्केइ । पक्ष में– विक्किणइ । विक्रीणीते । बेचता है इत्यर्थः ॥ ३१ ॥

## उद्ध्म उद्धुमा ॥ ३२ ॥

**ध्मा शब्दाग्निसंयोगयोः, अस्य धातोरुत्पूर्वस्य उद्धुमा भवति । उद्धुमाइ[2] ( ७-१ ति = इ ) ॥ ३२ ॥**

उद्ध्मो धुमा[3]—उदुपसर्गात्परस्य ध्माधातोः धुमादेशः स्यात् । ध्मा शब्दाग्निसंयोगयोः । उद्धुमाइ, उद्धमति । सदानन्दमते धूमा इति पाठः । ततो धूमाइ–इति ॥

उद्ध्मो इति । उत् उपसर्ग से पर ध्मा धातु को धुमा आदेश हो । ध्माधातु शब्द और अग्निसंयोग के अर्थ में है । उद्धुमाइ । सदानन्द 'धूमा' आदेश मानते हैं । अतः उनके मत से उद्धूमाइ यह दीर्घ-ऊकारयुक्त होगा ॥ ३२ ॥

## श्रदो धो दहः ॥ ३३ ॥

**श्रच्छब्दादुत्तरस्य डुधाञ् धारणपोषणयोः, अस्य धातोर्दहादेशो भवति । सद्दहइ ( २-४३ श् = स, ३-३ रलोपः, ३-१ त्लोपः, ३-५० दद्धि०, ७-१ त = इ ) । सद्दहिअं[4] ( सद्दहेति पूर्ववत्, ७-३२ अ = इ, २-२ तलोपः, ५-३० सोर्बिं० ) ॥ ३३ ॥**

श्रदो धो दहः—श्रदः परस्य धा–धातोः दह इत्यादेशः स्यात् । सद्दहइ । श्रद्धाति । सद्दहिअं । सेवादित्वात् दकारस्य द्वित्वम् । श्रद्धितम् ॥ ३३ ॥

श्रदो–इति । श्रद् से पर 'धा' धातु को दह आदेश हो । 'सर्वत्र लवराम्' से रेफलोप । 'शषोः सः' से सकार । 'सेवादौ च' से दकारद्वित्व । 'अन्त्यस्य हलः' से श्रद् के दकार का लोप । सद्दहइ । श्रद्धाति । श्रद्धा करता है । सद्दहिअं में 'क्ते' से इकार । श्रद्धितम् ॥ ३३ ॥

---

१. संजीवनीसंमतः पाठः । २. उद्धमति । ३. श्रद्धत्ते । श्रद्धितम् । ४. संजीवनीसंमतः पाठः ।

## अवाद् गाहेर्वाहः ॥ ३४ ॥

गाहृ विलोडने, अस्य धातोरवादुत्तरस्य वाहादेशो भवति । ओवाहइ[1] (४-२१ अव=ओ, ७-१ ति=इ, शे० स्प०) । पक्षे[2]—अववाहइ (प्रायोग्रहणात् २-२ वलोपो न, शे० स्प०) ॥ ३४ ॥

अवाद् गाहेर्वाहः—अवोपसर्गात् परस्य गाहेः वाहादेशः स्यात् । ओवाहइ, अववाहइ । अवादिति किम् ? गाहइ ॥ ३४ ॥

अवादिति । अव उपसर्ग से पर गाहधातु को वाह आदेश हो । गाह धातु मथने में मझाने अर्थ में है । 'ओदवापयोः' से अव को ओकार । पक्ष में-अववाहइ । अवगाहते । केवल धातु को वाहादेश न हो, किन्तु अवोपसर्ग में ही हो-अतः अवग्रहण है । गाहइ, गाहते । यहाँ वाहादेश नहीं होगा ॥ ३४ ॥

## कासेर्वासः ॥ ३५ ॥

अवादित्यनुवर्त्तते । कासृ शब्दकुत्सायाम्, अस्य धातोरवादुत्तरस्य वासो भवति । ओवासइ, अववासइ[3] (४-२१ अव=ओ, शे० पू० स्प०) ॥ ३५ ॥

काशेर्वासः[4]—अवोपसर्गात्परस्य काशृ दीप्तावित्यस्य वास इत्यादेशः स्यात् । ओवासइ, अववासइ, ओवासए, अववासए । अवकाशते । ओवासिउं, अववासिउं । अवकाश्य । 'वाशब्दस्य उं आदेशः क्त्वास्थितस्य क्वचिद् भवेत्' । इति उं-आदेशः । अवादिति किम् ? कासइ ॥ ३५ ॥

काशेरिति । काशृ-धातु दीप्ति अर्थ में है । अव उपसर्ग से पर काश् धातु को वास आदेश हो । 'ओदवापयोः' से ओकारादेश । ओवासइ । पक्ष में-अववासइ । 'ततिपो०' से एकार होने से ओवासए, अववासए । अवकाशते इत्यर्थः । क्त्वाप्रत्यय के विषय में 'कगचज०' से तकारलोप । क्त्वाप्रत्ययसम्बन्धी 'वा' को कहीं उं आदेश हो । इससे उं आदेश । उक्त सूत्र से वास आदेश । पूर्ववत् ओकार । ओवासिउं । 'ए च क्त्वा०' से इकार । ओकारादेश के पक्ष में । अववासिउं । अवग्रहण सूत्र में क्यों ? जिससे केवल को वास आदेश न हो । कासइ, काशते ॥ ३५ ॥

## निरो माङो माणः ॥ ३६ ॥

माङ् माने, अस्य धातोर्निरुत्तरस्य माणादेशो भवति । णिम्माणइ[5] (३-३ रलोपः, ३-५० मद्वि०, शे० पू०) ॥ ३६ ॥

निरो माङो माणमवौ[6]—निरुपसर्गात् परस्य माङः माण-मव इत्यादेशौ स्तः । माङ्माने । निम्माणेइ, निम्माणइ, निम्माणए । निम्मवए, निम्मवेइ, निम्मवइ । निर्मिमीते । ननु कथं सम्माणेइ (सम्मानयति)? मान पूजायामिति धात्वन्तरस्य

---

१. अवगाहते । २. ओत्वाऽभावपक्षे इत्यर्थः । ३. अवकासते । ४. संजीवनीसंमतः पाठः । ५. निर्मिमीते । ६. संजीवनीसंमतः पाठः ।

तत् । 'निरः परस्य माङो वा स्यातां मणमरौ क्वचित्' । निम्मणिऊण । निम्मारिऊण । 'अडादेशा बहुलम्' इति आत्वम् । सर्वत्र 'ए च क्त्वा' इति इत्वम्, एत्वं च । निम्मणेऊण, निम्मारेऊण । निम्मणिऊण, निम्मारिऊण । निर्माय ॥ ३६ ॥

निर इति । निर् उपसर्ग से पर माङ्धातु को 'माण' 'मव' आदेश हों । माङ्-धातु मान अर्थ में है । माण आदेश । 'सर्वत्र लवराम्' से रेफलोप, 'शेषादेशयो॰' से मकारद्वित्व । 'लादेशे वा' से एकार । निम्माणेइ, निम्माणइ । 'ततिपो॰' से एकार । पक्ष में-निम्माणए । इसी प्रकार मव आदेश में भी जानना । 'सम्माणेइ' यहाँ संपूर्वक में मान आदेश कैसे ? उत्तर—यहाँ माङ्धातु नहीं है, किन्तु मानधातु है । निर इति । निर से पर माधातु को कहीं मण, मर आदेश विकल्प से हों । निम्मणिऊण । 'ए च क्त्वा॰' से इकार, एकार । निम्मारिऊण में 'अडादेशा बहुलम्' से आकार । एवं निम्मारिऊण । निर्माय ॥ ३६ ॥

## ( पदेर्व्वलः । )

पदेर्व्वलः[1]—निरुपसर्गात् परस्य पद गतौ, इत्यस्य वलादेश स्यात् । निव्वलइ । निष्पद्यते ॥

पदेरिति । निर् उपसर्ग से पर पद धातु को वल आदेश हो । पूर्ववत् रेफलोप, वकारद्वित्व । निव्वलइ । निष्पद्यते ॥

## क्षियो झिज्जः ॥ ३७ ॥

**क्षि क्षये, अस्य धातोर्झिज्जो भवति । झिज्जइ[2] ( स्पष्टम् ) ॥ ३७ ॥**

क्षियो झिज्जः—क्षि क्षये, इत्यस्य झिज्ज इत्यादेशः स्यात् । झिज्जइ । क्षीयते ॥ ३७ ॥

क्षिय इति । क्षि धातु क्षय के अर्थ में है । क्षि धातु को झिज्ज आदेश हो । झिज्जइ, क्षीयते ॥

## भिदिच्छिदोरन्त्यस्य न्दः ॥ ३८ ॥

**भिदिर्[3], छिदिर्[4], एतयोरन्त्यस्य न्दो भवति । भिन्दइ । छिन्दइ[5] ( ४-१७ वर्गान्त, ७-१ ति = इ ) ॥ ३८ ॥**

भिदिच्छिदोरन्त्यस्य न्दः—भिदिर् विदारणे, छिदिर् द्वैधीकरणे, अनयोर्धात्वोर्योऽन्त्यो वर्णः तस्य न्द इत्यादेशः स्यात् । भिन्दइ, भिनत्ति । छिन्दइ, छिनत्ति । तुमं भिन्दसु । त्वं भिन्धि । छिन्दसु, छिन्धि । 'त्त इति क्वचिदादेशो विकल्पेन भिदिच्छिदोः ।' भेत्तूण, छेत्तूण । भित्त्वा, छित्त्वा । 'अडादेशा बहुल'मिति इकारस्य एकारः । पक्षे—भिन्दिऊण, छिन्दिऊण । 'ए च क्त्वा॰' इत्यादिना इत्वम्, एत्वं च । भिन्देऊण, छिन्देऊण ॥ ३८ ॥

भिदीति । फाड़देना इस अर्थ में भिद, फाड़कर दो टुकड़े कर देना अथवा चीर देना इस अर्थ में छिद् । इन धातुओं के अन्त्य वर्ण को अर्थात् दकार को न्द आदेश

१. इदं सूत्रं भामहवृत्तौ नास्ति । २. क्षिणोति, क्षयति । ३. पूर्वापरशैलीदर्शनात् ( विदारणे ) इत्यर्थनिर्देशो लेखकभ्रमात्त्रुटितः स्याद् इति प्रतीयते । ४. अत्रापि ( छेदने ) इत्युचितः । ५. भिनत्ति, भिन्ते । छिनत्ति, छिन्ते ।

हो। भिन्दइ, भिनत्ति। लोट् मध्यमपुरुष एकवचन में 'उसुमु विध्या०' से सुआदेश, भिन्दसु, भिन्धि। एवं छिन्दसु, छिन्धि। त्त इति। भिद् छिद् धातु को कहीं विकल्प से द को त्त आदेश हो। 'क्त्व तूण' से तूण आदेश। 'कगचज०' से तलोप। 'अद्यादेशा बहुलम्' से एकार। भेत्तूण, छेत्तूण। पक्ष में-'ए च क्त्वा' से एकार, इकार। भिन्देऊण, भिन्दिऊण। भित्त्वा। एवं छिद् धातु में भी रूप होंगे। छित्त्वा ॥ ३८ ॥

## कथेर्ढः ॥ ३९ ॥

**कथ निष्पाके, अस्य धातोरन्त्यस्य ढो भवति। कढइ[1] ( पू० स्प० ) ॥**

कथेढः—कथ धातोरन्त्यस्य ढः स्यात्। कथ निष्पाके कढइ, कढए। 'खघथधे'-त्यस्य बाधः। कथयति। 'क्वचित् क्त्वा-प्रत्ययस्येह उआण इत्यपीष्यते'। कढुआण। 'सन्धावज्लोप०' इति अकारलोपः। कथित्वा ॥ ३९ ॥

कथेरिति। कथधातु के अन्त्य वर्ण को ढकार हो। कथ धातु पकाकर अष्टमांश अवशिष्ट रखना = काढा करने के अर्थ में है। कढइ, कढए। कथयति। कथ धातु से पर क्त्वाप्रत्यय को कहीं 'उआण' आदेश होता है। 'सन्धावज्लोप०' से अकारलोप। कढुआण। कथित्वा ॥ ३९ ॥

## वेष्टश्च[2] ॥ ४० ॥

**वेष्ट् वेष्टने, अस्य धातोरन्त्यस्य ढो भवति। वेड्ढइ[3] ( ष्ट् = ढ, आदेशत्वात् ३-५० ढद्वि०, ३—५१ ढ् = ड्, ७—१ ति = इ )। योगविभाग उत्तरार्थः ॥ ४० ॥**

वेष्टश्च—वेष्ट वेष्टने, इत्यस्य योऽन्त्यो वर्णस्तस्य ढः स्यात्। वेढइ, वेढए। वेष्टते। योगविभाग उत्तरार्थः ॥ ४० ॥

वेष्टश्चेति। बिस्तरादि के लपेटने के अर्थ में विद्यमान वेष्ट धातु के अन्त्य वर्ण ष्ट को ढ आदेश हो। वेढइ। 'ततिपो' से इकार, एकार। वेढए। वेष्टते। योगविभाग पृथक्-पृथक् दो सूत्र पढ़ना, उत्तरार्थः = अग्रिम सूत्र में केवल वेष्ट की ही अनुवृत्ति के लिये है ॥ ४० ॥

## उत्समोर्लः ॥ ४१ ॥

**उत्सम्भ्यामुत्तरस्य वेष्टेरन्त्यस्य लो भवति। उव्वेल्लइ, संवेल्लइ[4] ( ३-१ तलोपः, ३-५० वद्वि०, ष्ट = ल, आदेशत्वात् ३-५० लद्वि०, शे० पू० ) ॥ ४१ ॥**

उत्समोर्ल्लः—उत्पूर्वस्य संपूर्वस्य च वेष्टेरन्त्यवर्णस्य 'ल्ल' इत्यादेशः स्यात्। उव्वेल्लइ। उद्वेष्टते। संवेल्लइ। संवेष्टते। 'शेषादेशयोः०' इति द्वित्वेन द्विलकारे सिद्धे पुनर्द्विलकारविधानं क्वचिदन्त्यस्यादेशे न द्वित्वम्। तेन, वेढइ-इत्यादि सिद्धम्। अत्र संयुक्तस्य ष्ट-इत्यस्य ढकारादेशे न द्वित्वम् ॥ ४१ ॥

---

१. कथयति। २. क्वचित् चकारात् ठो भवति, टश्च। वेढइ, वेठइ, वेटइ-इत्युदाहरणानि-इत्यधिकः। ३. वेष्टते। ४. उद्वेष्टते, संवेष्टते।

उत्समोरिति। उत्पूर्वक, संपूर्वक वेष्टधातु के अन्त्य वर्ण 'ष्ट' को द्विलकारात्मक ल्ल आदेश हो। उव्वेल्लइ। 'उपरि लोपः कगडतद०' इससे दलोप। 'शेषादेशयो०' से वकारद्वित्व। उद्वेष्टते। एवं संवेल्लइ, संवेष्टते। प्रश्न यह है कि एक लकारात्मक 'ल' आदेश पढना था, 'शेषादेशयो०' से ल को द्वित्व करने से द्विलकारात्मक हो जाता। फिर द्विलकारात्मक 'ल्ल' आदेश ग्रहण व्यर्थ होकर यह सूचित करता है कि—संयुक्त वर्ण के स्थान में विहित अन्त्य वर्ण आदेश को द्वित्व नहीं होता है। अतः वेढइ में 'ढ' को द्वित्व न होगा॥ ४१॥

## रुदेर्वः॥ ४२॥

रुदिर् अस्य धातोरन्त्यस्य वो भवति। रुवइ[1] (इरित्, द् = व्, ७-१ ति = इ)॥ ४२॥

रुदो वः[2]—रुदोऽन्त्यस्य दस्य वः स्यात्। रुवइ। केचित्तु-रोवइ, इत्युदाहरन्ति। तन्मते 'अडादेशा बहुल'मिति उकारस्य ओकारः। रुइरा। 'तृन इर शीले' इति इरः। 'आदीतौ बहुल'मिति आप्रत्ययः। रोदनशीला॥ ४२॥

रुदो व इति। रुदधातु के अन्त्य दकार को वकार आदेश हो। रुवइ। रोदिति। कोई आचार्य रोवइ प्रयोग करते हैं, उनके मत से 'अडादेशा बहुलम्' से उकार को ओकार होगा। रुइरा। 'तृन् इर शीले' से इर। 'कगचज०' से वलोप। 'सन्धौ अज्लोप०' से अकारलोप। 'आदीतौ बहुलम्' से आकारप्रत्यय। 'क्वचिदपि लोपः' से अलोप। रोदनशीला॥ ४२॥

## उदो विजः॥ ४३॥

उत्पूर्वस्य विजेरन्त्यस्य वकारो भवति। उव्विवइ[3] (२-२ तलोपः, ३-५० वद्वि०, शे० पू० स्प०)॥ ४३॥

उदो विजेः[3]—उदुपसर्गात्परस्य विजेरन्त्यवर्णस्य वकारः स्यात्। उव्वेवइ, उव्वेवए। 'अडादेशा बहुल'मिति एकारः। उद्विजते॥ ४३॥

उद इति। ओविजी भयचलनयोः, उत् उपसर्ग से पर भयचलनार्थक विज धातु के अन्त्य वर्ण को वकार हो। इससे व आदेश। 'अडादेशा बहुलम्' से एकार। 'उपरि लोपः कगड' से दलोप। 'शेषादेशयोर्द्वित्व०' इससे वकार को द्वित्व। उव्वेवइ। 'ततिपो०' से ए। उव्वेवए। उद्विजते॥ ४३॥

## वृधेर्ढः॥ ४४॥

वृधु वर्धने, अस्य धातोरन्त्यस्य ढो भवति। वड्ढइ[4] (१-२७ ऋ अ, ध् = ढ, तस्य आदेशत्वात् ३-५० द्वि०, शे० पू०)॥ ४४॥

वृधेर्ड्ढः—वृधेरन्त्यस्य धस्य ड्ढः स्यात्। ऋतोऽत्। वड्ढइ, वड्ढए। वर्धते॥४४॥

वृधेरिति। वृध वृद्धौ, वृधधातु के अन्त्य को 'ड्ढ' होय। 'ऋतोऽत्' से अकार। वड्ढइ। वर्धते॥ ४४॥

---

१. रोदिति। २. संजीवनीसंमतः पाठः। ३. उद्विजते। ४. संजीवन्यादिसंमतः पाठः। ५. वर्द्धते।

## हन्तेर्म्मः ॥ ४५ ॥

**हन्तेरन्त्यस्य म्मो भवति । हम्मइ[1] ( स्पष्टम् ) ॥ ४५ ॥**

हन्तेर्म्मः—हिंसागत्यर्थकस्य हन्-धातोरन्त्यवर्णस्य म्म इत्यादेशः स्यात् । हम्मइ, हम्मए । हन्यते । कर्तरि तु नायमादेशः । तथा चोक्तम्—'क्वचित्तु हन्तेर्म्म इति आदेशो नेष्यते बुधैः' । हणइ—हन्ति । हन्तव्वं-हन्तव्यम् । हंतूण-हत्वा । हओ-हतः । 'खनेः क्वापि म्म इत्येष स्यादन्त्यस्य हनेरिव ।' खम्मइ । खायते, खन्यते । 'नान्त्यद्वित्वे' इति इअइज्जयोरभावः । क्वापीति वचनादिह न भवति । खणिअइ, खणिज्जइ । हणिअइ, हणिज्जइ ॥ ४५ ॥

हन्तेरिति । हिंसा-गत्यर्थक हन्‌धातु के अन्त्य वर्ण को 'म्म' यह आदेश हो । हम्मइ । यह 'म्म' आदेश कर्ता अर्थ में नहीं होता है । कहा भी है—'क्वचिदिति' । हन् धातु को 'म्म' आदेश कहीं-कहीं नहीं भी होता है । हणइ । 'शेषाणामदन्तता' । 'नो णः' । हणइ । हन्ति । क्वचिद्-ग्रहण से कर्त्रर्थक प्रत्यय के अतिरिक्त भी होता है । जैसे हंतव्वं, हंतूण—इत्यादि । साधुत्व पूर्ववत् । 'खनेरिति' । खन्‌धातु के अन्त्य को 'म्म' यह आदेश हन्‌धातु के सदृश होता है । खम्मइ । 'नान्त्यद्वित्वे' से इअ-इज्ज का निषेध हो जायगा । खायते, खन्यते इत्यर्थः । क्वापि ग्रहण है, इससे कहीं-कहीं 'म्म' आदेश नहीं भी होगा । यक्‌प्रत्यय को 'यक इअइज्जौ' से इय । खणिअइ । हणिअइ । 'नो णः' । खन्यते, हन्यते । एवं खणिज्जइ, हणिज्जइ में इज्ज आदेश होगा ॥ ४५ ॥

## रुषादीनां दीर्घता ॥ ४६ ॥

**रुषादीनां दीर्घता भवति । रूसइ । तूसइ । सूसइ ( २-४३ ष = स, एवं सर्वत्र, शे० स्प० पू० ) । रुष्यति । तुष्यति । शुष्यति ॥ ४६ ॥**

रुषादीनां दीर्घः[2]—रुष रोषे, रुष-इत्यादीनां धातूनाम् उपधाया उकारस्य दीर्घः स्यात् । रूसइ, रूसेइ, रूसए । रुष्यति । सूसइ, सूसेइ । शुष्यति । 'रुषादीना'मिति किम् ? रुवइ । रोदिति ॥ ४६ ॥

रुषेति । रुषादिक धातुओं के उपधाभूत उकार को दीर्घ होता है । इससे दीर्घ । 'ततिपोरिदेतौ', 'शेषाणामदन्तता', 'शषोः सः', 'लादेशे वा' इससे विकल्प से एकार । रूसेइ, रूसइ । रुष रोषे । रुष्यति । एवं शुष शोषणे । सूसेइ, सूसइ । रुषादिकों को दीर्घ हो यह क्यों कहते हैं ? सामान्यतः सभी उपधा के उकार को दीर्घ हो, ऐसा मानने पर रुवइ में भी दीर्घ हो जायगा ॥ ४६ ॥

## च्चो व्रजनृत्योः ॥ ४७ ॥

**व्रज, नृती, अनयोरन्त्यस्य च्चो भवति । वच्चइ[3] ( ३-३ रलोपः, शे० पू० ) । णच्चइ[4] (१-२७ ऋ = अ, २-४२ न् = ण, शे० स्प०, ति = इ पू०) ॥**

च्चो व्रजिनृत्योः—व्रज गतौ, नृती गात्रविक्षेपे, इत्यनयोरन्त्यवर्णस्य च्च इत्या-

---

१. हन्ति । २. संजीवन्यनुसारी पाठः । ३. व्रजति । ४. नृत्यति ।

देशः स्यात् । वच्चइ । व्रजति । णच्चइ । नृत्यति । ननु कथं 'णट्ट'मिति ? नट नृत्तावित्यस्य नाट्यमिति, तस्मादिदं स्यात् ॥ ४७ ॥

च्चो–इति । गत्यर्थक व्रजधातु को, पदार्थाभिनयार्थक नृत धातु के अन्त्य वर्ण को 'च्च' यह आदेश हो । वच्चइ । 'सर्वत्र लवराम्' से रेफलोप । व्रजति । उक्त सूत्र से 'च्च' आदेश । 'नो णः' से णकार । णच्चइ । नृत्यति । यदि नृत को सर्वत्र च्च आदेश होता है तो णट्ट यह कैसे होगा ? उत्तर—यहाँ नट नृत्तौ, नृत्यर्थक नट धातु है । 'ऋहलोर्ण्यत्', 'अत उपधायाः'–एवं यह नाट्यशब्द का है । 'अधो मनयाम्' से यलोप । 'शेषादेशयोः' से द्वित्व । 'नो णः सर्वत्र' से णकार । 'अदातो यथादिषु वा' से आकार को अकार । 'मो बिन्दुः' से अनुस्वार । णट्टं । नाट्यम् ॥ ४७ ॥

## युधिबुध्योर्झः ॥ ४८ ॥

**युध सम्प्रहारे, बुध अवगमने, अनयोरन्त्यस्य झो भवति । जुज्झइ । बुज्झइ[1] (ध् = झ्, आदेशत्वात् ३–५० झद्वि०, ३–५१ झ् = ज्, शे० स्प०) ॥**

युधिबुधिगृधिसिधिक्रुधां ज्झः[2]—युध्यादीनामन्त्यस्य ज्झः स्यात् । युध संप्रहारे । जुज्झइ, युध्यते । बुध अवगमने । बुज्झइ, बुध्यते । गृधु अभिकाङ्क्षायाम् । गिज्झइ, गृध्यति । सिधु सन्धौ । सिज्झइ, सिध्यति । क्रुध कोपे । कुज्झइ, क्रुध्यति ॥ ४८ ॥

युधीति । युधादिक धातुओं के अन्त्य वर्ण को ज्झ आदेश हो । युध धातु मारना युद्ध करने के अर्थ में है । ध को ज्झ आदेश । 'आदेर्यो जः' से जकार । जुज्झइ । युध्यते । बुध् धातु समझने के अर्थ में है । पूर्ववत्–बुज्झइ । बुध्यते । गृध धातु अत्यन्त आसक्ति चाहने के अर्थ में है । ज्झ आदेश । 'अडादेशा बहुलम्' से इकार । गिज्झइ । गृध्यति । सिध धातु मिलना, या सिद्ध करने के अर्थ में है । सिज्झइ । सिद्ध्यति । क्रुध धातु क्रोध करने के अर्थ में है । 'सर्वत्र लवराम्' से रेफलोप । कुज्झइ । क्रुध्यति ॥४८॥

## रुधेर्न्धम्भौ[3] ॥ ४९ ॥

**रुधिर् ( अस्य[4] धातो )रन्त्यस्य न्ध–म्भौ भवतः । रुन्धइ, रुम्भइ[5] ( इरित्, ध् = पर्यायेण न्ध, म्भ, ७–१ ति = इ, ४–१७ वर्गान्त० ) ॥४९॥**

रुन्धेर्न्धम्भौ—रुध्-धातोरन्त्यस्य न्ध–म्भ इत्यादेशौ स्तः । रुन्धइ, रुम्भइ । रुणद्धि । 'रुधो न्धम्भौ क्वचिन्नैव क्वचिज्ज्झो भावकर्मणोः' । 'क्तेन दिण्णादयः' इति क्तेन सह रुद्धादेशः, रुद्धशब्दाद् वा । रुद्धो, रुद्धः । रुज्झइ, रुध्यते ॥ ४९ ॥

रुधेरिति । रुध धातु के अन्त्य वर्ण को न्ध म्भ आदेश होते हैं । रुन्धइ । और जहाँ म्भ आदेश होगा वहाँ रुम्भइ । रुध धातु आवरण = ढकना, रूँधना, गाँसना अर्थ में । रुणद्धि । कहीं-कहीं रुध धातु को न्ध म्भ आदेश नहीं होते और कहीं पर भावकर्म में ज्झ आदेश होता है । क्तप्रत्यय के परे 'क्तेन दिण्णादयः' से क्तप्रत्यय के सहित

---

१. युद्ध्यते, बुद्ध्यते । २. संजीवनी-सुबोधिनीसंमतः पाठः । ३. रुधेर्न्धम्भौ—धस्सइ । का० पा० । ४. अयं पाठो न लभ्यते । ५. रुणद्धि, रुन्धे ।

रुद्ध को रुद्ध आदेश। 'अत ओत् सोः' से ओ। रुद्धो। रुद्धः। लट् में ध को ज्झ आदेश। रुज्झइ। रुध्यते ॥ ४९ ॥

## मृदो लः ॥ ५० ॥

**मृद् क्षालने, अस्य धातोरन्त्यस्य लो भवति। मलइ[1] (स्पष्टम्) ॥५०॥**

मृदो लः—मृद क्षोदे, इत्यस्यान्त्यवर्णस्य लः स्यात्। मलइ, मलेइ। मृद्नाति ॥

मृदो-इति। मृद् धातु मसलना, पीसना आदि अर्थ में है। मृद् धातु के अन्त्य वर्ण को ल आदेश हो। मलइ। मृद्नाति ॥ ५० ॥

## शद्लपत्योर्डः ॥ ५१ ॥

**शद्ऌ शातने, पत्ऌ पतने, अनयोरन्त्यस्य डो भवति। सडइ,[2] पडइ (शे० स्प०) ॥ ५१ ॥**

शदि[3]पत्योर्डः—शद्ऌ शातने, पद्ऌ गतौ, इत्यनयोरन्त्यस्य डः स्यात्। सडइ, शीयते। पडइ, पतति। वस्तुतः—शद्ऌ विशरणगत्यवसादनेषु, पद्ऌ पतने ॥५१॥

शदीति। शद् और पत् धातु के अन्त्य वर्ण को 'ड' आदेश हो। 'शषोः सः' से सकार। सडइ, विशीर्यते। फैलता है या नष्ट हो रहा है। पडइ। पतति। गिर रहा है ॥ ५१ ॥

## शकादीनां द्वित्वम् ॥ ५२ ॥

**शक्ऌ शक्तौ, इत्येवमादीनां द्वित्वं भवति। सक्कइ (७-१ ति = इ, स्पष्टम्)। लग्गइ (७-१ ति = इ, शे० स्प०)। शक्नोति। लगति ॥५२॥**

शकादीनां द्वित्वम्—शक्ऌ शक्तौ-इत्यादीनां धातूनामन्त्यस्य द्वित्वं भवति। सक्कइ, शक्नोति। सक्कइ मए। शक्यते मया। 'नान्त्यद्वित्वे' इति निषेधात् यक इय-इज्जयोरभावः। लग्गइ। लग सङ्गे। मग्गइ, इदं नोदाहर्तव्यम्, रेफलोपद्वित्वाभ्यामप्यस्य सिद्धेः। द्वित्वेनैव यगर्थस्य प्रतीयमानत्वात् यगपि न। सक्कइ ते-शक्यते त्वया ॥५२॥

शकेति। शकादिक धातुओं के अन्त्य वर्ण को द्वित्व हो। सक्कइ। समर्थ होता है। भाव में भी सक्कइ-यही होगा। क्योंकि 'नान्त्यद्वित्वे' से इय-इज्ज का निषेध। द्वित्व से ही भावकर्म की प्रतीति हो जायगी, अतः यक् भी नहीं होगा। लग धातु सङ्ग में लगने के अर्थ में है। लग्गइ। मार्ग अन्वेषणे का मग्गइ उदाहरण नहीं देना, क्योंकि 'सर्वत्र लवराम्' से रेफलोप। 'शेषादेशयो०' से द्वित्व। 'अडादेशा बहुलम्' से ह्रस्व होने से मग्गइ हो जायगा ॥ ५२ ॥

## स्फुटिचल्योर्वा ॥ ५३ ॥

**स्फुट विकसने, चल कम्पने, अनयोरन्त्यस्य वा द्वित्वं भवति। फुट्टइ (३-१ सलोपः, टद्वि०, ७-१ ति = इ), फुडइ (द्वित्वाभावे २-२० ट = ड, शे० पू०)। चल्लइ, चलइ[4] ॥ ५३ ॥**

---

१. मृद्नाति। २. शीयते। पतति। ३. संजीवनीस्थः पाठः। ४. स्फोटते, स्फुटति। चलति।

स्फुटिचलोर्वा[1]—स्फुट विकसने, चल कम्पने, अनयोरन्त्यस्य वा द्वित्वं स्यात् । फुट्टइ, फुडइ । स्फुटति । चल्लइ, चलइ । चलति । फुट्टो, फुडिओ । स्फुटितः । चल्लिओ, चलिओ । चलितः ॥ ५३ ॥

स्फुटीति । स्फुट खिलजाने के अर्थ में है, चल–काँपने में है । स्फुट और चल के अन्त्य वर्ण को विकल्प से द्वित्व हो । 'उपरि लोपः' से सकारलोप । फुट्टइ । फूटता है । पक्ष में–'टो डः' । फुडइ । स्फुटति । फुट्टो । स्फुट्टितः के स्थान में 'क्तेन दिण्णादयः' से फुट्ट आदेश । पक्ष में–फुडिओ । स्फुटितः । एवं चल्लइ, चलइ । चलति । चल्लिओ, चलिओ । चलितः ॥ ५३ ॥

## प्रादेर्मीलः ॥ ५४ ॥

**प्रादेरुत्तरस्य मिलोऽन्त्यस्य द्वित्वं भवति वा । पमिल्लइ[1] (स्प० पू०), पमीलइ ( ३–३ रलोपः, 'ह्रस्वः संयोगे' इति हेमसूत्रात् मी = मि, शे० पू० ) ( स्प० ) ॥ ५४ ॥**

प्रादेर्मीलः—प्रादेरुपसर्गात्परस्य मील इत्यस्य अन्त्यस्य वा द्वित्वं स्यात् । मील निमेषणे । निमिल्लइ, निमीलइ । निमीलति । वाशब्दस्य व्यवस्थितविभाषितत्वात् यत्र 'अडादेशा बहुल'मिति ईकारस्य इकारः, तत्रैव द्वित्वम् । तेन, निमीलइ–इत्यत्र न द्वित्वम् । एवम्–पमिल्लइ, पमीलइ । प्रमीलति । संमिल्लइ, संमीलइ । संमीलति । उम्मिल्लइ, उम्मीलइ । उन्मीलति । प्रादेरिति किम् ? मीलइ । मीलति ॥ ५४ ॥

प्रादेरिति । प्रादिक उपसर्ग से पर मील धातु के अन्त्य वर्ण को विकल्प से द्वित्व हो । मील धातु आँख की पलक लगाने के अर्थ में है । 'अडादेशा बहुलम्' से ईकार को इकार । उक्त सूत्र से द्वित्व । निमिल्लइ । यहाँ वा-ग्रहण व्यवस्थितार्थक है । अतः जहाँ 'अडादेशा बहुलम्' से इकार होगा वहीं द्वित्व होगा । अतः पक्ष में–निमीलइ । ह्रस्व न होने से द्वित्व भी नहीं होगा । एवं पमिल्लइ । 'सर्वत्र लवराम्' से रेफलोप । पमीलइ । प्रमीलति । उद् मील, 'उपरि लोपः' से दलोप । 'शेषादेशयो०' से द्वित्व । अन्य कार्य पूर्ववत् । उम्मिल्लइ, उम्मीलइ । उन्मीलति । आदि-ग्रहण करने से केवल धातु में द्वित्व न होगा । मीलइ । मीलति ॥ ५४ ॥

## भुजादीनां क्त्वातुमुन्तव्येषु लोपः ॥ ५५ ॥

**भुज इत्येवमादीनां क्त्वातुमुन्तव्येषु परतोऽन्त्यस्य लोपो भवति । भोत्तूण (जलोपे, ३–१ कलोपे, गुणे[3], ३–५० तद्वि०, ४–२३ क्त्वः शेषस्य वस्य स्थाने ऊणादेशः ) भोत्तुं । भोत्तव्वं । विदः, वेत्तूण ( दलोपे, ३–१ कलोपे, ३–५० तद्वि०, ४–२३ वा = ऊण, गुणः पूर्ववत् ) । वेत्तुं ( पूर्व-**

---

१. संजीवन्यनुगतः पाठः । २. प्रमीलति । ३. 'युवर्णस्य गुणः' । ८।४।२३७ हेमसूत्रेण गुणः । एवमुत्तरत्र । वस्तुतस्तु–'रुद-भुज-मुचां तोऽन्त्यस्य' । ८।४।२१२–एषामन्त्यस्य क्त्वा–तुम्–तव्येषु तो भवति । एष प्रकारः शोभनः प्रतिभाति । 'क्त्व ऊणः' इति क्त्वा = ऊण, पुनस्तकारस्य द्वित्वादि सर्वं सुघटमिति । रोदितुम्–रोदितव्यम् ।

वद् गुणे कृते अलोपे च शेषभूततुमुनस्तकारस्य ३-५० द्वि०, ४-१२ मबिं० )। वेत्तव्वं ( ३-२ यलोपः, ३-५० वद्वि०, ४-१२ मबिं० )। रुदः, रोत्तूण, रोत्तुं, रोत्तव्वं ( भोत्तुं-भोत्तव्वंवत् )। ( भोत्तसावात् ) ॥ ५५ ॥

भुजादीनां क्त्वातुमुन्तव्येषु लोपः—भुजसदृशानां धातूनां क्त्वा-तुमुन्-तव्येषु परतः अन्त्यस्य लोपः स्यात्। भुज पालनाभ्यवहारयोः। 'क्त्वा तूण' इति तूणः, उक्तसूत्रेण अन्त्यलोपः। 'सेवादिषु चे'ति तकारस्य द्वित्वम्। 'अडादेशा बहुलम्' इति ओकारः। भोत्तूण, भुक्त्वा। भोत्तुं, भोक्तुम्। भोत्तव्वं, भोक्तव्यम्। मोत्तूण, मुक्त्वा। तूणादेशे 'कगचजे'ति तलोपे, मोऊण-इत्यपरे। मोत्तुं, मोक्तुम्। मोत्तव्वं, मोक्तव्यम्। रोत्तूण, रोऊण इति वा, रुदित्वा। रोत्तुं, रोदितुम्। रोत्तव्वं, रोदितव्यम्। यथालक्ष्यमुत्प्रेक्ष्यम् ॥ ५५ ॥

भुजेति। भुज-सदृश धातुओं के अन्त्य वर्ण का लोप हो क्त्वा-तुमुन्-तव्य प्रत्ययों के परे। भुज धातु पालन और भोजन अर्थ में है। 'क्त्वा तूण' से तूण आदेश। उक्त सूत्र से जकारलोप। 'सेवादिषु च' से तकारद्वित्व, 'अडादेशा बहुलम्' से उकार को ओकार। भोत्तूण-भुक्त्वा। इसी प्रकार भोत्तुं, भोत्तव्वं में भी जानना। यहाँ 'अधो मनयाम्' से यलोप। 'शेषादेशयो०' से द्वित्व विशेष है। मोत्तूण। मुक्त्वा। तूणादेश में 'कगचज०' से तलोप करने पर मोऊण-कोई आचार्य मानते हैं। एवं रोत्तूण, रोऊण=रुदित्वा। रोत्तुं=रुदितुम्। रोत्तव्वं=रोदितव्यम्। लक्ष्यानुकूल व्यवस्था कर लेनी चाहिये। उभय प्रकार के रूप सिद्ध हैं ॥ ५५ ॥

## श्रुहुजिलूधुवां णोऽन्ते ह्रस्वः[1] ॥ ५६ ॥

श्रु श्रवणे, हु दानादाने,[2] जि जये, लूञ् छेदने[3] धूञ् कम्पने, इत्येतेषामन्ते णः प्रयोक्तव्यः, दीर्घस्य ह्रस्वो भवति। सुणइ ( २-४३ श् = स, ३-३ रलोपः, ७-१ ति = इ, शे० स्प० )। हुणइ। जिणइ। लुणइ। धुणइ[4]। ( स्पष्टाः पू० ) ॥ ५६ ॥

श्रुहुजिलूधूनां[5] णोऽन्ते ह्रस्वश्च—श्रु इत्येवमादीनां पञ्चानां धातूनाम् अन्ते अग्रे णकारः प्रयोक्तव्यः, एषु यो दीर्घः तस्य ह्रस्वश्च स्यात्। श्रु श्रवणे। सुणइ, शृणोति। हु दानादनयोः। हुणइ, जुहोति। जि जये। जिणइ, जअइ। जयति। लूञ् छेदने। लुणइ, लुणेइ। अत्र ऊकारस्य ह्रस्वः। पूर्वेषु दीर्घाभावात् न ह्रस्वः। लूनाति। धूञ् कम्पने। धुणइ, धुणेइ। धूनाति। 'श्र्वादीनां यो णकारोऽन्ते स क्वचिद् वा विधीयते'। सुणिऊण, सोऊण। श्रुत्वा। हुणइ, जुहोति। हुणन्तो, जुह्वत्। जिणि-

---

१. श्रुहुजिमुधुवां णो ह्रस्वश्च। का० पा०। २. हु दानादनयोः। का० पा० ३. मुञ शब्दे इत्यधिकः मुणइ-मवते। का० पा०। ४. शृणोति। जुहोति। जयति। लुनाति-लुनीते। धुनोति-धवते। इत्यादयः। ५. संजीवन्यादिसंमतः पाठः।

ऊण, जेऊण । जित्वा । लुणिअव्वं, लवितव्यम् । 'श्र्वादिभ्य इतरस्यापि णोऽन्ते क्वचन दृश्यते' । थुणइ, स्तौति । थुणिऊण, स्तुत्वा ॥ ५६ ॥

श्रुहु-इति । श्रु-हु-जि-लू-धू इन पाँच धातुओं के अन्त्य वर्ण के आगे णकार का प्रयोग हो और दीर्घ धातु को अर्थात् लू धू धातुओं को ह्रस्व हो । श्रु धातु सुनने के अर्थ में है । सुणइ । शृणोति । सुनता है । हु धातु देने और लेने के अर्थ में हैं । हुणइ । जुहोति । जि-जीतने के अर्थ में । जिणइ । पक्ष में-जअइ । 'एवमन्येऽपि' से जि को जअ आदेश । जयति । लू धातु छेदन-अन्नादि-पौधों के काटने में है । धातु के अन्त 'ण', पूर्व को ह्रस्व । 'लादेशे वा' से एकार । लुणेइ, लुणइ । लूनाति । इसी प्रकार धुणेइ, धुणइ । धूनाति । 'श्र्वादीनामिति' । श्रु-इत्यादिक उक्त पाँच धातुओं से विहित जो णकारागम है, वह कहीं विकल्प से होता है । श्रुधातु से क्त्वाप्रत्यय । 'क्त्वा तूण' से तूण । उक्त वार्तिक से विकल्प से ण । 'सर्वत्र लवराम्' से रेफलोप । 'ए च क्त्वा०' से इकार । सुणिऊण । पक्ष में-'अडादेशा बहुलम्' से उकार को ओकार । सोऊण । इसी प्रकार जिणिऊण, जेऊण-भी होंगे । लुणिअव्वं में लू धातु, तव्य प्रत्यय । उक्त सूत्र से णकारागम, पूर्व को ह्रस्व । 'ए च क्त्वा०' से इकार । 'कगचज०' से तलोप । 'अधो मनयाम्' से यलोप । 'शेषादेशयो०' से वकार-द्वित्व । 'मो बिन्दुः' से बिन्दु । लुणिअव्वं । श्र्वादिभ्य इति । श्रु-इत्यादिक धातुओं से अतिरिक्त भी कहीं धातु के अन्त में ण होता है । स्तु धातु । णकारागम । 'स्तस्य थः' से थकार । थुणइ, थुणिऊण । पूर्ववत् ॥ ५६ ॥

## भावकर्मणोर्व्वश्च ॥ ५७ ॥

**एषां भावकर्मणोरन्त्ये व्व-शब्दः प्रयोक्तव्यः, चकारात् णश्च । सुव्वइ (२-४३ श् = स, ३-३ रलोपः, व्वप्रयोगे, संयोगे ८ । ८ । २२७ हेम० ह्रस्व०, ७-१ ति = इ) । सुणिज्जइ (८-५६ णत्वे ह्रस्वे च कृते, ७-३२ अ = इ, इति सुण-इ = सुणि जाते, ७-२१ धातुप्रत्यययोर्मध्ये ज्ज, ७-१ त = इ) । हुव्वइ, हुणिज्जइ । जिव्वइ, जिणिज्जइ । लुव्वइ, लुणिज्जइ । धुव्वइ, धुणिज्जइ[1] (पूर्ववत् सर्वेषां सिद्धिर्ज्ञेया) ॥ ५७ ॥**

भावकर्मणोर्व्वश्च—भावे कर्मणि चार्थे श्र्वादीनां धातूनामन्ते कृतद्वित्वो 'व्व' इति भवति । चकारात् पूर्वसूत्रोक्तो णकारश्च । सुव्वइ । पक्षे-सुणिअइ, सुणिज्जइ । श्रूयते । हुव्वइ, हुणिअइ, हुणिज्जइ । हूयते । जिव्वइ, जिणिअइ, जिणिज्जइ । जीयते । लुव्वइ, लुणिअइ, लुणिज्जइ । लूयते । धुव्वइ, धुणिअइ, धुणिज्जइ । धूयते ॥ ५७ ॥

भावेति । भाव और कर्म में श्रु इत्यादिक धातुओं के अन्त में द्वित्व-वकार का अर्थात् 'व्व' इसका आगम हो । सुव्वइ । 'सर्वत्र लवराम्' से रेफलोप । 'ततिपो०' से इकार । सुव्वइ । पक्ष में-'यक इअइज्जौ' से इअइज्ज । 'क्वचिदपि लोपः' से णकारा-कार का लोप । रेफलोप । शकार को सकार । त को इकार । पूर्वोक्त के सदृश होंगे । सुणिअइ, सुणिज्जइ । श्रूयते । इसी प्रकार सर्वत्र जानना । लू और धू धातु में ह्रस्व

१. श्रूयते-हूयते-जीयते-लूयते-धूयते ।

भी होगा। लुव्वइ, लुणिअइ, लुणिज्जइ। लूयते। धुव्वइ, धुणिअइ, धुणिज्जइ। धूयते॥५७॥

## गमादीनां द्वित्वं वा ॥ ५८ ॥

**गमादीनां धातूनां द्वित्वं वा भवति। गम्मइ ( स्पष्टं ), गमिज्जइ ( ७-३२ भविष्यति गमोऽकारस्येत्वं, ७-२१ मध्ये ज्ज, ७-१ त = इ, एवमुत्तरत्रापि ज्ञेयम्)। रम्मइ, रमिज्जइ। हस्सइ, हसिज्जइ। गम्यते। रम्यते। हस्यते ॥ ५८ ॥**

गमादीनां द्वित्वं वा—गम्लृ गतौ, भावकर्मणोर्विषये गमादीनां धातूनाम् अन्त्यस्य वा द्वित्वं स्यात्। कर्मणि लकारः-गम्मइ। 'नान्त्यद्वित्वे' इति निषेधात् यकः इअइज्जौ न स्तः। पक्षे-गमिअइ, गमिज्जइ। गम्यते। एवम्-लब्भइ, लभिअइ, लभिज्जइ। लभ्यते। रम्मइ, रमिअइ, रमिज्जइ। रम्यते। भण्णइ, भणिअइ, भणिज्जइ। भण्यते। आकृतिगणोऽयम् ॥ ५८ ॥

गमादीनामिति। भाव और कर्म में गमादिक धातुओं के अन्त्य वर्ण को विकल्प से द्वित्व हो। गम्मइ। 'नान्त्यद्वित्वे' से निषेध होने से इय इज्ज नहीं होंगे। द्वित्व से ही भावकर्म की प्रतीति हो जायगी, अतः तदर्थबोधक यक भी नहीं होगा। पक्ष में-गमिअइ, गमिज्जइ। गम्यते। इसीतरह लब्भइ। भकारद्वित्व के बाद 'वर्गेषु युजः पूर्वः' से बकार। लब्भइ। पक्ष में-लभिअइ, लभिज्जइ। लभ्यते। एवम्-भण्णइ, भणिअइ, भणिज्जइ। भण्यते ॥ ५८ ॥

## लिहेर्लिज्झः[1] ॥ ५९ ॥

**लिह आस्वादने, अस्य धातोर्लिज्झो भवति भावकर्मणोः। लिज्झइ[2] ( स्प० ७-१ त = इ ) ॥ ५९ ॥**

दुहिलिहिवहां दुज्झ-लिज्झ-बुज्झाः[3]—एषां धातूनां भावकर्मणोर्विषये यथाक्रमं दुज्झ-लिज्झ-बुज्झा इत्येते आदेशा भवन्ति। दुह प्रपूरणे, लिह आस्वादने, वह प्रापणे। दुज्झइ। दुह्यते। लिज्झइ। लिह्यते। बुज्झइ। उह्यते। केचित्तु वेत्यनुवर्तयन्ति। तन्मते, दुहिअइ, दुहिज्जइ। लिहिअइ, लिहिज्जइ। वहिअइ, वहिज्जइ। इत्यादयोऽपि भवन्ति ॥ ५९ ॥

दुहीति। दुहादिक तीन धातुओं को भाव-कर्म में दुज्झादिक क्रम से होते हैं। अर्थात्, दुह को दुज्झ, लिह को लिज्झ, वह को बुज्झ होते हैं। दुज्झइ। दुह दोहने के अर्थ में है। लिह आस्वाद लेने में अर्थात् चाटने के अर्थ में है। वह प्राप्त कराने में अर्थात् बोझ इत्यादि को यथास्थान पहुँचाने के अर्थ में है। दुज्झादिक आदेश होने पर दुज्झइ, लिज्झइ, बुज्झइ। साधुत्व सुगम है। कोई आचार्य 'वा' इसकी अनुवृत्ति करते हैं, उनके मत से दुज्झादिक आदेश विकल्पसे होंगे। पक्ष में 'यक इअइज्जौ' से इअ-इज्ज आदेश होंगे। तब दुहिअइ, दुहिज्जइ। दुह्यते। एवं लिहिअइ, लिहिज्जइ। लिह्यते। वहिअइ, वहिज्जइ। उह्यते। ये भी होंगे ॥ ५९ ॥

---

१. लिहेर्ज्जः-लिज्जइ। का० पा०। २. लिह्यते। ३ संजीवन्यादिसंमतः पाठः।

## हृक्रोर्हीरकीरौ ॥ ६० ॥

**हृञ् हरणे, डुकृञ् करणे, अनयोर्हीरकीरौ भवतः भावकर्मणोरर्थयोः । हीरइ । कीरइ[1] ( स्प० पू० ) ॥ ६० ॥**

हृञ्कृञोर्हीरकीरौ[2]—एतयोर्भावकर्मणोर्विषये यथाक्रमं हीरकीरौ स्तः । हीरइ । ह्रियते । कीरइ । क्रियते । 'नान्त्यद्वित्वे' इति योगविभागाद् यकोऽभावः ॥ ६० ॥

हृञ् इति । हृ-कृ को भावकर्म में हीर-कीर आदेश हों । अर्थात् 'हृ' को हीर एवं 'कृ' को कीर । हीरइ । ह्रियते । कीरइ । क्रियते । 'नान्त्यद्वित्वे' इस सूत्र में 'न' को पृथक् करके 'न' यह सूत्र मानना । इसका यह अर्थ होगा कि कहीं अन्यत्र भी आदेश होने पर इअ-इज्ज नहीं होते हैं, अतः यहाँ इअ इज्ज नहीं होंगे ॥ ६० ॥

## ( ज्ञो जाणमुणौ । )

ज्ञो जाणमुणौ[3]—ज्ञा-धातोर्भावे कर्मणि च जाण-मुण इत्यादेशौ वा स्तः । 'लादेशे वा' इत्येत्वम् । जाणेइ, मुणेइ । ज्ञायते । 'नान्त्यद्वित्वे'—इह योगविभागादत्र इअइज्जयोरभावः । एत्वपक्षे तु द्वावपि भवतः । जाणिअइ, जाणिज्जइ । मुणिअइ, मुणिज्जइ । आदेशपक्षे-'म्नज्ञपञ्चाशदि'ति णकारः । णाइअइ, णाइज्जइ । ज्ञायते । केचित्तु-'ज्ञो जाणमुणौ' इत्यस्य स्थाने 'ज्ञो णज्जणव्वौ'- एवं सूत्रं पठन्ति । तन्मते णज्जइ, णव्वइ-इति । ज्ञायते ॥

ज्ञो-इति । ज्ञा धातु जानने के अर्थ में है । ज्ञा धातु को भाववाच्य या कर्मवाच्य रहते जाण और मुण आदेश विकल्प स होते हैं । 'लादेशे वा' से एकार होगा । जाणेइ, मुणेइ । ज्ञायते । एकारादेश होने पर इअ इज्ज नहीं होंगे । क्योंकि पूर्व प्रक्रियानुसार 'नान्त्यद्वित्वे' से न का योगविभाग करके इअ इज्ज का निषेध हो जायगा । 'लादेशे वा' इस विकल्प के पक्ष में इअ इज्ज होंगे । जाणिअइ, जाणिज्जइ । मुणिअइ, मुणिज्जइ । सूत्र के आदेशाभाव में 'म्नज्ञ०' इससे णकार होगा । इअ, इज्ज पूर्ववत् । णाइअइ, णाइज्जइ । ज्ञायते । कोई आचार्य सूत्र में जाण-मुण के स्थान पर णज्ज-णव्व आदेश मानते हैं, उनके मत में णज्जइ, णव्वइ ये रूप होंगे । ज्ञायते ॥

## ग्रहेर्दीर्घो वा[4] ॥ ६१ ॥

**ग्रहेर्धातोर्दीर्घो वा भवति भावकर्मणोरर्थयोः । गाहिज्जइ, गहिज्जइ[5] ( ३-४ रलोपः, विकल्पेन दीर्घे कृते, अग्रे गमिज्जइवत् ) ॥ ६१ ॥**

ग्रहेर्घेप्पः[6]—ग्रह्-धातोर्भावे कर्मणि च वा घेप्पादेशः स्यात् । 'नान्त्यद्वित्वे' इति

---

१. ह्रियते-क्रियते । क्वचित् 'ज्ञो णज्जणवौ वा' । ज्ञा-इत्यस्य धातोः णज्ज, णव इत्यादेशौ भवतः भावकर्मणोः । णज्जइ । णवइ । पक्षे-जाणिज्जइ-मुणिज्जइ । 'ज्ञानृत्योर्णज्जणट्टौ' । अनयोर्भावे णज्ज-णट्टौ भवतः । णज्जइ । णट्टइ । ज्ञायते । नृत्यते । का० पा० इत्यधिकः । २. संजीवन्यादिसंमतः पाठः । ३. नेदं सूत्रं भामहवृत्तौ । ४. ग्रहेर्वा वेत्थ । वेत्थइ-गेण्हिज्जइ-गृह्यते । ५. गृह्यते । ६. भामहसंमतो नायं पाठः ।

निषेधादिअइज्जयोरभावः। घेप्पइ। गृह्यते। पक्षे-'ग्रहेर्गेण्हः'। 'सन्धावज्लोप०' इत्यकारलोपः। गेण्हिअइ, गेण्हिज्जइ। गृह्यते॥ ६१॥

ग्रहेरिति। ग्रह धातु को भाव-कर्म में घेप्प आदेश हो। 'नान्त्यद्वित्वे' से निषेध होने से इअइज्ज नहीं होंगे। घेप्पइ। गृह्यते। पक्ष में 'ग्रहेर्गेण्हः' से गेण्ह आदेश होगा। 'यक इअइज्जौ' से इअ इज्ज होंगे। 'सन्धावज्लोपविशेषा बहुलम्' इससे अथवा 'क्वचिदपि लोपः' इससे अकार का लोप होगा। गेण्हिअइ, गेण्हिज्जइ। गृह्यते॥ ६१॥

## क्तेन दिण्णादयः[1] ॥ ६२ ॥

**दिण्ण = इत्येवमादयः क्तप्रत्ययेन सह निपात्यन्ते। डुदाञ् दाने, दिण्णं (स्प०)। रुदिर्, रुण्णं (पूर्व० स्प०)। त्रसी,[2] हित्थं[3] (स्प०)। दह, दड्ढं[4]। रञ्जि, [5]रत्तं (पु० स्प०)॥ ६२॥**

क्तेन दिण्णादयः—डुदाञ् दाने, इत्यादीनां धातूनां क्तप्रत्ययेन सह दिण्ण इत्यादयो निपात्यन्ते। ये प्रत्ययलोपागमवर्णविकारलक्षणेन अनुपपन्नास्ते निपातनात्साध्यन्ते—

१ दत्त २ मुक्त ३ व्यतिक्रान्त ४ त्रस्तानाम् ५ उदितस्य च।
१ दिण्णं २ मुत्तं च ३ बोलीण ४ हित्थ ५ रुण्णा भवन्त्यमी॥
६ दष्ट ७ दग्धा ८ ऽर्जित ९ ख्यात १० स्थापितानामिमे मताः।
६ डक्कं ७ दड्ढं ८ विढत्तं च ९ संखादं १० थाविअं तथा॥
११ स्पष्टा १२ ऽऽस्वादित १३ नष्टानां स्यात् १४ प्रसारित १५ लूनयोः।
११ छिविअं १२ चक्खिअं १३ लुक्कं तथा १४ विसविअं १५ लुअं॥
१६ आरब्धा १७ ऽर्पितयोः स्याताम् १६ आढत्तं च १७ विणाविअं।
एवं दिण्णादयोऽन्येऽपि दत्तादीनां निपातिताः॥ ६२॥

क्तेनेति। डुदाञ् दाने, क्तप्रत्यय के सहित दा इत्यादिक धातुओं को अर्थात् सिद्ध 'दत्त' इत्यादिक के स्थान पर 'दिण्ण' इत्यादिक निपात से हों। जो कार्य प्रत्यय से, लोप से, आगम से, वर्णविकार से अथवा सूत्र से उपपन्न नहीं होते हैं, वे सब निपात से सिद्ध कर लिये जाते हैं। जैसे १. दत्त को दिण्णं, २. मुक्त को मुत्तं, ३. व्यतिक्रान्त को वोलीण, ४ त्रस्त को हित्थ, ५ उदित को रुण्ण, ६ दष्ट को डक्क, ७ दग्ध को दड्ढ, ८ अर्जित को विढत्त, ९ ख्यात को संखाद, १० स्थापित को थविअ, ११ स्पष्ट को छिविअ, १२ आस्वादित को चक्खिअ, १३ नष्ट को लुक्क, १४ प्रसारित को विसविअ, १५ लून को लुअ, १६ आरब्ध को आढत्त, १७ अर्पित को विणाविअ, होते हैं। एवं जैसे दत्तादिकों को दिण्णादिक होते हैं ऐसे ही अन्य भी होते हैं॥ ६२॥

---

१. दिणादय इत्यपि-दिणं, रुणं। का० पा०। २. त्रसि-तित्थं, तत्थं। का० पा०। ३. (हित्थं व्रीडितभीतयोः।) ४. दट्ठं-टढ्ढं-दढं। का० पा०। ५. रन्तं, रतं, रज्जं। दत्तं-रुदितं-त्रस्तं-दग्धं-रक्तं। का० पा०।

## ( तक्षेरंपवच्छौ । )

**तक्षेरंपवच्छौ**[1]—तक्षेः रंपवच्छ इत्यादेशौ स्तः । तक्ष, त्वक्ष तनूकरणे । रंपइ, वच्छइ । तक्ष्णोति, तक्षति वा ॥

तक्षेरिति । तक्ष धातु को रंप-वच्छ आदेश हों । तनूकरण अर्थ में तक्ष धातु है । रंप आदेश होने से रंपइ, एवं वच्छ आदेश में वच्छइ । तक्ष्णोति तक्षति वा ॥

## खिदेर्विसूरः ॥ ६३ ॥

**खिद दैन्ये, अस्य विसूरो भवति । विसूरइ ( स्पष्टम् । अत्रोदाहरण-भूते प्राकृतपद्यखण्डे 'विरहेण, बाला' इत्येतौ शब्दौ संस्कृते प्राकृतसमौ, शेषो महिलावत् ? ) । विरहेण विसूरइ[2] बाला ॥ ६३ ॥**

**खिदेर्विसूरः**—खिद्-धातोर्विसूर इत्यादेशः स्यात् । विसूरइ, विसूरेइ । खिद्यते । अत्रापि बहुलग्रहणानुवृत्तेः 'खिज्ज' इत्यादेशः । खिज्जइ । वसन्तराजस्तु दैवादिकत्वात् श्यनि, 'त्यथ्यद्यां चछजाः' इति जकारे, 'शेषादेशयो'रिति जकारद्वित्वे खिज्जइ-इत्याह । तन्मये क्तप्रत्यये खिज्जिअं नैव सेत्स्यति ॥ ६३ ॥

खिदेरिति । खिद्दैन्ये, खिद धातु को विसूर आदेश हो । 'लादेशे वा' से विकल्प से एकार, विसूरेइ । पक्ष में-विसूरइ । खिद्यते । इस सूत्र में भी बहुल-पद की अनुवृत्ति करके बहुलग्रहण से खिद को खिज आदेश होगा । खिज्जइ । क्तप्रत्यय में खिज्जिअं होगा । वसन्तराज खिदधातु से श्यन्, 'त्यथ्यद्यां' से जकार, 'शेषादेशयो०' से द्वित्व, खिज्जइ-मानते हैं, उनके मत से क्तप्रत्ययादि में खिज आदेश न होने से खिज्जिअं नहीं होगा ॥ ६३ ॥

## क्रुधेर्जूरः[3] ॥ ६४ ॥

**क्रुध कोपे, अस्य जूरो भवति । जूरइ[4] (पू० ति, त = इ, शे० स्प०) ॥**

**क्रुधेर्जूरः**—क्रुधधातोर्जूर इत्यादेशः स्यात् । क्रुध कोपे । जूरइ । क्रुध्यति ॥६४॥

क्रुधेरिति । क्रुध धातु को जूर आदेश हो । क्रुध कोप करने के अर्थ में है । जूर आदेश । जूरइ, क्रुध्यति ॥ ६४ ॥

## चर्चेश्चम्पः ॥ ६५ ॥

**चर्च अध्ययने, अस्य धातोश्चम्पो भवति । चम्पइ[5] (स्पष्टम्) ॥ ६५ ॥**

**चर्चेश्चरः**[6]—चर्चि-इति ण्यन्तस्य निर्देशः । चर्च अध्ययने, ण्यन्तस्य चर्च-धातोः चर इत्यादेशः स्यात् । चरइ । चर्चयति । वक्तीत्यर्थः । चरिअइ, चरिज्जइ, चर्च्यते ॥

चर्चेरिति । चर्चि यह ण्यन्त का सूचक है । चर्च धातु पढ़ने के अर्थ में है । ण्यन्त चर्च धातु को चर आदेश हो । चरइ । चर्चयति=अध्यापयति । विचारता है, पढ़े हुए पाठ को फिर से विचारता है । कर्म में प्रत्यय करने पर 'यक इअइज्जौ' से इअइज्ज आदेश । चरिअइ, चरिज्जइ । चर्च्यते ॥ ६५ ॥

---

१. भामहे नेदमुपलभ्यते सूत्रम् । २. खिद्यति । ३. झूठ । ४. क्रुद्ध्यति ।
५. चर्चयते । ६. संजीवन्यादिसंमतः पाठः ।

## त्रसेर्वज्जः ॥ ६६ ॥

**त्रसी उद्वेगे, अस्य धातोर्वज्जो भवति । वज्जइ[1] (पू० स्प०) ॥ ६६ ॥**

त्रसेर्वज्जः—इक्‌तिपौ धातुनिर्देशे । त्रस धातोर्वज्ज इत्यादेशः स्यात् । वज्जइ । त्रस्यति, त्रसति वा ॥ ६६ ॥

त्रसेरिति । त्रस धातु घबड़ाने के अर्थ में है । त्रस को वज्ज आदेश हो । वज्जइ । त्रस्यति, त्रसति वा ॥ ६६ ॥

## मृजेर्लुभसुपौ[2] ॥ ६७ ॥

**मृजू शुद्धौ, अस्य धातोर्लुभ, सुप इत्यादेशौ भवतः । लुभइ, सुपइ[3] (स्प०) ॥ ६७ ॥**

मृजेर्लुभपुंसौ[4]—मृजूष् शुद्धौ, मृज-धातोर्लुभ-पुंस इत्यादेशौ स्तः । लुभइ, पुंसइ । मार्ष्टि । सदानन्दस्तु-मृजेर्लुहलुभौ-इत्येवं सूत्रपाठं मन्यते । तन्मते-लुहइ, लुभइ-इत्युदाहर्तव्यम् ॥ ६७ ॥

मृजेरिति । मृज धातु शुद्धि करने के अर्थ में है । मृज धातु को लुभ पुंस आदेश होते हैं । लुभइ, पुंसइ । 'लादेशे वा' से एकार । लुभेइ, पुंसेइ । मार्ष्टि । सदानन्द 'मृजेर्लुहलुभौ' ऐसा सूत्रपाठ मानते हैं । अतः उनके मत से लुहइ, लुभइ रूप होंगे । भकारोच्चारणसामर्थ्य से 'खघथ०' से भ को ह नहीं होगा । मार्ष्टि ॥ ६७ ॥

## वुड्डखुप्पौ मस्जेः[5] ॥ ६८ ॥

**टुमस्जो शुद्धौ, अस्य धातोर्वुड्डखुप्पौ भवतः । वुड्डइ, खुप्पइ[6] (पू० स्प०) ॥ ६८ ॥**

वुड्डखुप्पौ मज्जेः[7]—मस्जधातोर्वुड्डखुप्प इत्यादेशौ स्तः । टुमस्जो शुद्धौ । वुड्डइ, खुप्पइ । 'ब्रुड निमज्जने' इत्यस्य 'सर्वत्र लवरा'मिति रेफलोपे 'सेवादिषु चे'ति डकारस्य द्वित्वे कृते वुड्ड इति सेत्स्यति । पुनः सूत्रे वुड्डग्रहणं चिन्त्यप्रयोजनम् । शुद्धिः निमज्जनं च समानार्थे ॥ ६८ ॥

वुड्डेति । मस्ज धातु शुद्धि के अर्थ में है, शुद्ध्यर्थक मस्ज धातु को वुड्ड खुप्प आदेश होते हैं । वुड्डइ, खुप्पइ । 'लादेशे वा' से सर्वत्र एत्व जानना । मज्जति । ब्रुड धातु निमज्जन अर्थ में है । उसको 'सर्वत्र लवराम्' से रेफलोप, 'सेवादिषु च' से डकार को द्वित्व करने से वुड्डइ सिद्ध हो जायगा, फिर सूत्र में वुड्ड-ग्रहण निष्प्रयोजन है । शुद्धि और स्नान एकार्थक हैं । क्तप्रत्यय में उभयतः वुड्डिअं होगा ॥ ६८ ॥

## दृशेः पुलअणिअक्कअवक्खाः[8] ॥ ६९ ॥

---

१. त्रस्यति = त्रसति । २. मृजेर्जूंसबुसौ । जूसइ-बुसइ । का० पा० । ३. मार्ष्टि । ४. संजीवन्यादिसंमत एष पाठः । ५. बुत्त, बुत्था । बुत्तइ, बुत्थइ । ६. मज्जति । ७. संजीवन्यादिसंमत एष पाठः । ८. दृशेर्दीसपुलगिच्छावक्खाः । दीसइ, पुलइ, गिच्छइ, अवक्खइ । दृश्यते । का० पा० ।

**दृशिर् प्रेक्षणे, अस्य पुलअ-णिअक्क-अवक्खा भवन्ति । पुलअइ । णिअक्कइ । अवक्खइ[2] ( स्पष्टम् ) ॥ ६९ ॥**

दृशेः पुलअ-णिअच्छ-अवक्ख-सच्चवाः[१]—दृश् धातोः पुलअ, णिअच्छ, अवक्ख, सच्चव इत्येते आदेशा भवन्ति । दृशिर् प्रेक्षणे । पुलअइ । 'लादेशे वा' इत्यनेन एकारः, पुलएइ । एवं-णिअच्छइ, णिअच्छेइ । अवक्खइ, अवक्खेइ । सच्चवइ, सच्चवेइ-इत्यादिष्वपि ज्ञेयम् । ननु पलोएइ इति कथम् ? तत्तु प्रपूर्वकस्य लोकृ दर्शने इत्यस्य स्वार्थे णिजन्तस्य ज्ञेयम् ॥ ६६ ॥

**दृशेरिति । दृश धातु देखना अर्थ में है । दृश धातु को पुलअ, णिअच्छ, अवक्ख और सच्चव ये आदेश होते हैं । पुलअइ । 'लादेशे वा' से विकल्प से एकार होगा । पुलएइ । एवम्-णिअच्छइ, णिअच्छेइ । अवक्खइ, अवक्खेइ । सच्चवइ, सच्चवेइ-इत्यादिकों में भी जानना । ननु० प्रश्न यह होता है कि यदि दृश धातु को पूर्वोक्त ही आदेश होंगे, किन्तु 'लोअ' आदेश नहीं होगा तो 'पलोएइ' यह प्रयोग नहीं होगा । उत्तर यह है कि यह प्रयोग दृश धातु का नहीं है, किन्तु दर्शन अर्थ में प्रपूर्वक लोक धातु का है । स्वार्थ में णिच्-प्रत्यय । 'णिच एदादेरात्' से एकार । 'कगचजः' से ककारलोप । 'सर्वत्र लवराम्', 'ततिपोरिदेतौ' से पलोएइ होगा ॥ ६९ ॥**

## शकेस्तरवअतीराः ॥ ७० ॥

**शक्लृ शक्तौ, अस्य धातोः तर, वअ, तीर इत्येत आदेशा भवन्ति । तरइ, वअइ, तीरइ[3] ॥ ७१ ॥**

शकेस्तर-वअ-तीराः—शक्लृ धातोः तर, वअ, तीर इत्येते त्रय आदेशा भवन्ति । तरइ, वअइ, तीरइ । शक्नोति । भावे—'यक इअइज्जौ' इति इअ-इज्जादेशे तरिज्जइ, वइज्जइ, तीरिज्जइ । शक्यते ॥ ७० ॥

**शकेरिति । शक धातु को तर, वअ, तीर ये तीन आदेश होते हैं । साधुत्व पूर्ववत् । भाव में 'यक इअइज्जौ' से इअइज्ज आदेश होंगे । 'सन्धावज्लोप०' से अकारलोप । तरिअइ, तरिज्जइ । एवम्-वइअइ, वरिज्जइ । तीरिअइ, तीरिज्जइ । शक्यते इत्यर्थः ॥७०॥**

## ( एवमन्येऽपि । )

एवमन्येऽपि[४]—एवम् अनेन प्रकारेण यथा पूर्वोक्तानां भूधातोः होहुवौ आदेशौ विहितौ, तथैव अपरेषामपि धातूनां यथादर्शनम् आदेशाः कल्पनीयाः । यथा-लवि अवस्रंसने । विपूर्वस्य लविधातोः 'थक्क' इत्यादेशः । थक्कइ । विलम्बते । यथादर्शनम् इति नियमात् क्वचिद् धातोरेव थक्कादेशः । विथक्कन्तो । विलम्बमानः । स्रंस धातोः 'विअवि' इत्यपि आदेशः इति सदानन्दः । विअविइ । उपवेशने आस्-धातोः अच्छ इत्यादेशः । अच्छइ । आस्ते । अच्छन्तो । आसीनः । प्रेरणे क्षिपः छुह इति । छुहइ । क्षिपति । वाछि (वाञ्छ) इच्छायाम्, वाञ्छधातोः मह-वंछ इत्यादेशौ भवतः । महइ ।

---

१. पश्यति । २. संजीवन्यादिसंमत एष पाठः । ३. शक्नोति । ४. भामह-वृत्तौ नेदं सूत्रम् ।

वंछइ। वाञ्छति। आङ्पूर्वकस्य सेवार्थस्यश्रिञ्धातोः अणि-अल्लि इत्यादेशौ। अणिअइ, अल्लिअइ वा। आश्रयति। रक्षणे गुप्धातोः लूम इति। लूमेइ। जिधातोः जअ इति आदेशः। जअइ। जयति। स्थग संवरणे। स्वार्थे णिजन्तस्य स्थग-धातोः ढक्क इत्यादेशः। ढक्कइ। स्थगयति। हि गतौ। प्रपूर्वकस्य हिधातोः पिणव इत्यादेशः। पिणवइ। प्रहिणोति। भुजधातोः जेंव इति। जेंवइ। भुङ्क्ते। जेमइ इति तु-जिमु अदने, 'अडादेशा बहुलम्' इत्येत्वे। जेमइ। जेमति। बहुलग्रहणानुवृत्तः क्वचिद् विकल्पेन थक्कादयो भवन्ति। विलम्बइ, थक्कइ वा। विलम्बते। छुहइ, खिवइ। क्षिपति। भावकर्मणोरपि-दीसइ। दृश्यते। अर्ज अर्जने। विढप्पइ। अर्ज्यते। आङ्पूर्वकस्य रभ्धातोः-आढप्पइ। आरभ्यते। क्त्वाप्रत्ययेऽपि-थक्किऊण। स्था-धातोः थक्क इत्यादेशः। स्थित्वा, विलम्ब्येति वा। छुहिऊण। क्षिप्त्वा। ढक्किऊण। स्थगयित्वा। क्तप्रत्ययेऽपि-लूमिअं। गोपायितम्। महिअं। वाञ्छितम्। ढक्किअं। स्थगितम्। पिणुविअं। प्रहितम्। 'पण्णविअं' इति सदानन्दः, तेन पण्णविअं। प्रहितम्। एवं प्रत्ययान्तरेऽपि धात्वन्तराणाम् आदेशा ऊह्याः। केचित्तु-'एवमन्येऽपि' इति सूत्रे क्रियापदमेव व्याचक्षते। तन्न युक्तम्। अक्रियापदानामपि आदेशविधानदर्शनात्। उदाहृतं चैवमेव। ननु यद्येवम्, तर्हि 'क्तेन दिण्णादयः' इति सूत्रं व्यर्थं स्यात्? इति चेन्न, तत्र क्तेनेति सहार्थे तृतीया। तेनाप्ययमर्थः-क्तप्रत्ययसहितानां धातूनां दिण्णादयः। अत्र तु केवलानां धातूनामिति नानर्थकत्वम्॥

एवमिति। जैसे भूधातु को हो हुव आदेश कहे हैं, इसी प्रकार अन्य धातुओं को भी कविप्रयोगानुकूल, व्यवहृतप्रयोगानुकूल धात्वादेश की कल्पना कर लें। अवस्रंसन अर्थ में लबिधातु है। उपसर्गसहित विपूर्वक लबिधातु को थक्क आदेश। थक्कइ। विलम्बते। 'यथादर्शनम्' इस कथन से कहीं उपसर्ग रहित धातुमात्र को थक्क आदेश होगा। विथक्कन्तो। विलम्बमानः। 'न्तमाणौ शतृशानचोः' से न्त आदेश। स्रंस् को विअवि आदेश। विअविइ। स्रंसते। आस् को अच्छ। अच्छइ। आस्ते। अच्छन्तो, आसीनः। प्रेरण अर्थ में क्षिप धातु को छुह आदेश। छुहइ। क्षिपति। वांछि को मह-वंछ ये दो आदेश होंगे। महइ, वंछइ। वाञ्छति। श्रिधातु सेवा अर्थ में है। आङ् पूर्वक श्रिधातु को अणि-अल्लि आदेश होंगे। अणिअइ, अल्लिअइ। आश्रयतीत्यर्थः। गुप धातु को लूम आदेश होगा। लूमइ। गोपायति। जि को जअ आदेश। जअइ। जयति। स्थग-धातु संवरण=ढाँकना अर्थ में है। स्वार्थ में णिच्। णिजन्त स्थग धातु को ढक्क आदेश। ढक्कइ, ढक्केइ। 'लादेशे वा' से एत्व। स्थगयति। ढाँकता है। प्रपूर्वक हिधातु को पिणव आदेश। पिणवइ। प्रहिणोति। भेजता है। भुजधातु को जेंव आदेश। जेंवइ। भुङ्क्ते। प्रश्न यह है कि जेमइ यह अनुनासिकरहित मकारयुक्त कैसे होगा? उत्तर यह है कि यह भुज धातु का नहीं है, किन्तु अदन= भोजन अर्थ में जिम् धातु का है। 'अडादेशा बहुलम्' से इकार को एकार। 'शेषाणामदन्तता' से अकारान्त। जेमइ। जेमति। उक्त सूत्र में बहुलपद की अनुवृत्ति करके यह अर्थ करना कि-थक्कादिक आदेश कहीं विकल्प से होंगे। विलम्बइ, थक्कइ वा।

विलम्बते । छुहइ, पक्ष में खिवइ । 'ष्कस्कयां खः' से ख आदेश । 'पो वः' से व । 'शेषाणामदन्तता' से अदन्तता । खिवइ । क्षिपति । भावकर्म में भी ये आदेश होते हैं । दीसइ, दृश्यते । विढप्पइ, अर्ज्यते । आङ्पूर्वक रभ् धातु को आढप्प आदेश । आढप्पइ, आरभ्यते । क्त्वा-प्रत्यय के परे भी ये आदेश होंगे । स्था धातु को थक्क आदेश । थक्किऊण, स्थित्वा । अथवा विपूर्वक लम्बिधातु को थक्कादेश । थक्किऊण । विलम्ब्येत्यर्थः । छुहिऊण, क्षिप्त्वा । ढक्किऊण, स्थगयित्वा । क्तप्रत्यय में भी ये आदेश होंगे । गुपधातु को लुम आदेश । 'क्ते' सूत्र से इकार । 'कगचज०' से तकारलोप । लुमिअं, गोपायितम् । महिअं, वाञ्छितम् । ढक्किअं, स्थगितम् । प्रपूर्वक हिधातु को पिणुव आदेश । साधुत्व पूर्ववत् । पिणुविअं । सदानन्द पण्णव आदेश मानते हैं, अतः उनके मत से पण्णविअं । प्रहितम् । इसी प्रकार दूसरे प्रत्ययों के संयोग में भी आदेशों की कल्पना कर लेना । कोई-कोई आचार्य 'एवमन्येऽपि' सूत्र में क्रियापद की व्याख्या करके क्रिया को ही आदेश मानते हैं, यह ठीक नहीं है, क्योंकि अक्रियापद को भी आदेश विधान है, इसी प्रकार के उदाहरण हैं । ननु प्रश्न यह होता है कि यदि 'एवमन्येऽपि' से सब प्रकार के आदेश हो जायँगे तो 'क्तेन दिण्णादयः' यह सूत्र व्यर्थ हो जायगा ? उत्तर-यह कहना ठीक नहीं है । क्योंकि 'क्तेन दिण्णादयः' इस सूत्र में 'क्तेन' यहाँ सहार्थ में तृतीया है, तो यह अर्थ होता है कि—क्तप्रत्यय के सहित दाधातु को दिण्ण आदेश हो । तो यहाँ केवल धातु को आदेश कहे हैं और वहाँ क्तप्रत्ययसहित को । इस प्रकार अनर्थकत्व की शङ्का नहीं हो सकती ॥

## शेषाणामदन्तता ॥ ७१ ॥

इति श्रीवररुचिकृतेषु सूत्रेष्वष्टमः परिच्छेदः ।

**शेषाणां लुप्तानुबन्धानामदन्तता भवति । भमइ । चुम्बइ[1] ॥ ७१ ॥**

**[ एवमन्येऽपि क्रियाशब्दादेशा ज्ञेयाः । यथा—मृजेः जामइ, पिबतेः पाडइ[2] ] ।**

इति श्रीभामहविरचितायां मनोरमाव्याख्यायां धात्वादेशपरिच्छेदोऽष्टमः[3] ॥

---

१. भ्रमति । चुम्बति । २. [ ] अयं पाठो न सार्वत्रिकः । ३. अत्र प्रकरणान्ते ग्रन्थान्तरेभ्य आवश्यकतया धातुविहितप्रत्ययादेशा धात्वादेशाश्चोल्लिख्यन्ते संक्षेपेण । तत्र पूर्वं धातुविहितप्रत्ययाऽऽदेशाः—

सिनास्तेः सिः ।८।३।१४६ सिना द्वितीयत्रिकादेशेन सह अस्तेः सिरादेशो भवति । निट्ठुरो जं सि । सिनेति किम् ? से आदेशे सति—अत्थि तुमं ।

गुर्वादेरविर्वा ।८।२।१५०। गुर्वादेर्णेः स्थाने अवि इत्यादेशो वा भवति । शोषितम्=सोसविअं, सोसिअं । तोषितम्=तोसविअं, तोसिअं ।

भ्रमेराडो वा ।८।३।१५१। भ्रमेः परस्य णेराड आदेशो वा भवति । भमाडेइ । पक्षे-भामेइ, भमावइ, भमावेइ । ( भ्रमयति ) ।

दु-सु-मु विध्यादिष्वेकस्मिंस्त्रयाणाम् ।८।३।१७३। विध्यादिष्वर्थेषूत्पन्नानामेकत्वेऽर्थे वर्तमानानां त्रयाणामपि त्रिकाणां स्थाने यथासंख्यं दु, सु, मु इत्येते आदेशा भवन्ति । हसउ सा । हससु तुमं । हसामु अहं । दकारोच्चारणं भाषान्तरार्थम् ।

**शेषाणामदन्तता**—विहितादेशेभ्यो धातुभ्योऽन्ये ये अकृतादेशा हलन्ता धातवः, तेषामदन्तता स्यात्। हसइ, हसेइ। 'लादेशे वा' इन्येत्वम्। हसति। हसिओ। हसितः। अदन्तत्वे 'क्ते' इतीकारः। हसिऊण। हसित्वा। एवम्-रूसइ, रूसामि, रूसामहे। अदन्तत्वे 'अत' इत्यधिकारविहितानि सर्वाणि कार्याणि भवन्ति॥ ७१॥

**शेषाणामिति। जिन धातुओं को आदेश कहे हैं उनसे अतिरिक्त हलन्त धातुओं को, क्योंकि भुवादिक आदेश जो होते हैं वे अदन्त ही को होते हैं। अतः आदेश से अतिरिक्त अर्थात् हलन्त धातुओं को अदन्तता हो। जैसे—हस्-हलन्त सकारान्त अकारान्त हो जाने से 'लादेशे वा' से एकार। हसेइ, हसइ। क्त-प्रत्यय में 'क्ते' से इकार। हसिओ। क्त्वा-प्रत्यय में 'ए च क्त्वा तुमन्-तव्य-भविष्यत्सु' से एकार और**

---

सोर्हिर्वा।८।३।१७४। पूर्वसूत्रविहितस्य सोः स्थाने हिरादेशो वा भवति। देहि। देसु।

अत इज्जस्विज्जहीज्जे लुको वा। ८।३।१७५। अकारात्परस्य सोः इज्जसु, इज्जहि, इज्जे इत्येते लुक् च आदेशा वा भवन्ति। हसेज्जसु। हसेज्जहि। हसेज्जे। हस। पक्षे-हससु। अत इति किम्? होसु।

क्रियातिपत्तेः।८।३।१७९। क्रियातिपत्तेः स्थाने ज्ज-ज्जावादेशौ भवतः। होज्ज, होज्जा। अभविष्यदित्यर्थः। जइ होज्ज वण्णणिज्जो।

न्तमाणौ।८।३।१८०। क्रियातिपत्तेः स्थाने न्त-माणौ आदेशौ भवतः। होन्तो। होमाणो। अभविष्यदित्यर्थः।

क्यङोर्यलुक्।८।३।१३८। क्यङन्तस्य क्यजन्तस्य वा सम्बन्धिनो यस्य लुग् भवति। गरुआइ, गरुआअइ। अगुरुर्गुरुर्भवति, गुरुरिवाचरति वेत्यर्थः। क्यच्। लोहिआइ। लोहिआअइ।

क्ते।८।३।१५६। क्ते परत अत इत्वं भवति। हसिअं। पढिअं।

अदेल्लुक्यादेरत आः। ८।३।१५३। णेरदेल्लोपेषु कृतेषु आदेरकारस्य आ भवति। अति-पाडइ। मारइ। एति-कारेइ। खामेइ। लुकि-कारिअं। खामिअं। कारीअइ। खामीअइ। कारिज्जइ। खामिज्जइ। अदेल्लुकीति किम्? कराविज्जइ। करावीअइ। आदेरिति किम्? सङ्गामेइ-इह व्यवहितस्य मा भूत्। कारिअं-इहान्त्यस्य मा भूत्। अत इति किम्? दूसेइ। केचित्तु-आवे-आव्यादेशयोरप्यादेरत आत्वमिच्छन्ति। कारावेइ। दासाविओ जणो सामलीइ

णेरदेदावावे। ८। ३। १४९। णेः स्थाने अत्, एत्, आव, आवे एते चत्वार आदेशा भवन्ति। दरिसइ। कारेइ। करावइ। करावेइ। हासेइ। हसावइ। हसावेइ। बहुलाधिकारात् क्वचिदेन्नास्ति। जाणावेइ। क्वचिद् आवे नास्ति। पाएइ। भावेइ।

दृशिवचेर्डीसडुच्चं। ८। ३। १६१। दृशेर्वचेश्च परस्य क्यस्य स्थाने यथासंख्यं डीस, डुच्च इत्यादेशौ भवतः। ईअइज्जापवादः। दीसइ। वुच्चइ।

सी-ही-हीअ भूतार्थस्य। ८। ३। १६२। भूतेऽर्थे विहितोऽद्यतनादिः प्रत्ययो भूतार्थः, तस्य स्थाने सी-ही-हीअ इत्यादेशा भवन्ति। उत्तरत्र व्यञ्जनादीअ(१)विधानात्स्वरान्तादेवायं

---

**१. 'व्यञ्जनादीअ' इत्यनेन—हुवीअ। ( अभूत्-अभवत्—बभूव )। अच्छीअ। ( आसिष्ट, आस्त, आसांचक्रे ) इत्यादिषु व्यञ्जनान्तादीअ-विधानं वेदितव्यम्। प्राकृतप्रकाशे चैतद् ७-२३ सूत्रे स्पष्टम्।**

इकार। हसेऊण, हसिऊण होंगे। एवं हसामि में 'अत आ मिपि वा' से आकार। पक्ष में-हसेमि। बहुवचन में 'इच्च बहुषु' से आकार, इकार। तात्पर्य यह है कि अदन्त हो जाने से 'अतः' इस अधिकार में जितने कार्य विहित हैं, वे सब होंगे ॥ ७१ ॥

## ( अनदन्तानामद्वा। )

अनदन्तानामद्वा[1]—अदन्तरहितानां स्वरान्तानाम् अकारागमो वा भवति। 'भियो भावीहौ' इति भादेशः। भाइ, भाअइ। बिभेति। होइ, होअइ। भवति ॥

अनदन्तेति। अदन्त से रहित स्वरान्त धातुओं के आगे अकार का आगम होता है। जैसे-भी धातु को भा आदेश होने पर भाइ होगा। विकल्प से अकारागम होने पर भाअइ। बिभेति। एवं भू को हो आदेश, होइ, होअइ। भवति ॥

## ( अडादेशा बहुलम्। )

अडादेशा बहुलम्[2]—अटश्च आदेशाश्चेति द्वन्द्वः। अट् इति पाणिनीयप्रतिपादितः विधिः। कासी। काही। काहीअ। अकार्षीत्, अकरोत्, चकार वेत्यर्थः। एवं ठासी। ठाही। ठाहीअ।

कृदोहं। ८। ३। १७०। करोतेर्ददातेश्च परो भविष्यति विहितस्य म्यादेशस्य स्थाने हं वा प्रयोक्तव्यः। काहं। दाहं। करिष्यामि। दास्यामीत्यर्थः। पक्षे-काहिमि। दाहिमि। इत्यादि।

अधुना धात्वादेशाः प्रदर्श्यन्ते—

भुवेर्हो-हुव-हवाः।८।४।६०। भुवो धातोर्हो, हुव, हव इत्येते आदेशा वा भवन्ति (३)। होइ। होन्ति। हुवइ। हुवन्ति। हवइ। हवन्ति। पक्षे-भवइ। परिहीणविहवो। क्वचिदन्यदपि। उब्भुअइ। भत्तं। भुत्तं।

अविति हुः।८।४।६१। विद्वर्जे प्रत्यये भुवो हु इत्यादेशो वा भवति। हुन्ति। भवन्। ( भुवन् ) हुन्तो। अविति किम्? होइ

पृथक् स्पष्टे णिव्वडः।८।४।६२। पृथक्-भूते स्पष्टे च कर्तरि भुवो णिव्वड इत्यादेशो भवति। णिव्वडइ। पृथक् स्पष्टो वा भवतीत्यर्थः।

प्रभौ हुप्पो वा।८।४।६३। प्रभुकर्तृकस्य भुवो हुप्प इत्यादेशो वा भवति। प्रभुत्वं च प्रपूर्वस्यैवार्थः। अङ्गे च्चिअ न पहुप्पइ। पक्षे-पभवेइ।

सम्भावेरासङ्घः।३५। आसङ्घइ। सम्भावइ।

कथेर्वज्जर-पज्जर-उप्पाल-पिसुण-सङ्घ-बोल्ल-चव-जम्प-सीस-साहाः।८।२। वज्जरइ। पज्जरइ। उप्पालइ। पिसुणइ। सङ्घइ। बोल्लइ। चवइ। जम्पइ। सीसइ। साहइ। पक्षे-कहइ। एते चाऽन्यैर्देशीषु पठिता अपि अत्र धात्वादेशीकृता विविधेषु प्रत्ययेषु प्रतिष्ठन्तामिति। तथाच-वज्जरिओ, कथितः। वज्जरिऊण, कथयित्वा। वज्जरणं, कथनम्। वज्जरन्तो, कथयन्। वज्जरिअव्वं, कथयितव्यम्। इति रूपसहस्राणि सिद्ध्यन्ति। संस्कृतधातुवच्च प्रत्ययलोपागमादिविधिः।(४)

दुःखे णिव्वरः।३। णिव्वरइ। दुःखं कथयतीत्यर्थः।

---

१, २. इमे सूत्रे न स्तो भामहवृत्तौ।

३. 'भवतेर्होहुवौ स्याताम्' इति प्राकृतसर्वस्वम्।

४. 'वज्जादीनां च प्रायः प्रयोगो नास्ति' इति हेमः।

प्रत्याहारः। 'अइउण्, ऋलृक्, एओङ्, ऐऔच्, हयवरट्'। अनुबन्धवर्जित एतदात्मको ग्राह्यः। आदेशा 'भुवो हो हुवौ' इत्यादयः प्रतिपादिताः, ते बहुलम् अनेकप्रकारा भवन्ति। बहुलस्वरूपं दर्शयति—

क्वचित्प्रवृत्तिः, क्वचिदप्रवृत्तिः, क्वचिद् विभाषा, क्वचिदन्यदेव।
विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति॥

अटस्तावत्—धावु गतिशुद्धयोः। अत्र आकारस्य ओकारः। धोवइ। धावति। अत्र शुद्धौ एव ओकारः। गतौ तु धावइ इत्येव। ञिष्वप् शयने। शषोः सः। सर्वत्र लवराम्। पो वः। शेषाणामदन्तता। ततिपोरिदेतौ। सवइ-जाते अडादेशा बहुलम् इति अकारस्य ओकारः उकारश्च। सोवइ, सुवइ। स्वपिति। एवम्-एइ। इण्धातोः

---

जुगुप्सेर्झुंण-दुगुच्छ-दुगुञ्छाः।४। झुणइ। दुगुच्छइ। दुगुञ्छइ। पक्षे-जुगुच्छइ। गलोपे-दुउच्छइ-दुउञ्छइ-जुउच्छइ।

बुभुक्षि-वीज्योर्णीरव-वोज्जौ।५। बुभुक्षेराचारक्विबन्तस्य च वीजेः। णीरवइ। बुभुक्खइ। वोज्जइ। वीजइ।

उदो ध्मो धुमा।८। उधुमाइ।

श्रदो धो दहः।९। सद्दहइ। सद्दहमाणो जीवो।

पिबेः पिज्ज-डल्ल-पट्ट-घोट्टाः।१०। पिज्जइ। डल्लइ। पट्टइ। घोट्टइ। पक्षे-पिअइ।

उद्वातेरोरुम्मावसुआ।११। ओरुम्माइ। वसुआइ। उव्वाइ।

निद्रातेरोहीरोङ्घौ।१२। ओहीरइ। उङ्घइ। निद्दाइ।

आघ्रेराइग्घः।१३। आइग्घइ। अग्घाइ। आजिघ्रतीत्यर्थः।

स्नातेरब्भुत्तः।१४। अब्भुत्तइ। ण्हाइ।

समः स्त्यः खाः।१५। संखाइ।

स्थष्ठा-थक्क-चिट्ठ-निरप्पाः।१६। ठाइ। ठाअइ। ठाणं। पट्ठिओ। उट्ठिओ। पट्ठाविओ। उट्ठाविओ। थक्कइ। चिट्ठइ। चिट्ठिऊण। निरप्पइ। बहुलाधिकारात्क्वचिन्न भवति-थिअं। थाणं। पत्थिओ। उत्थिओ। थाऊण।

उदष्ठ-कुक्कुरौ।१७। उठ्ठइ। उकुक्कुरइ।

म्लेर्वा-पव्वायौ।१८। वाइ। पव्वायइ। मिलाइ। म्लायत इत्यर्थः।

निर्मो निम्माण-निम्मावौ।१९। निम्माणइ। निम्मवइ।

क्षेर्णिज्झरो वा।२०। णिज्झरइ। पक्षे-झिज्जइ।

छदेर्णुम-नूम-सन्नुम-ढक्कोम्बाल-पव्वालाः।२१। णुमइ। नूमइ। णत्वे-णूमइ। ढक्कइ। ओम्बालइ। पव्वालइ। छायइ।

निवृपत्योर्णिहोडः।२२। निवृञः पतेश्च ण्यन्तस्य। णिहोडइ। पक्षे-निवारेइ। पाडेइ।

धवलेर्दुमः।२४। ण्यन्तस्य। दुमइ। धवलइ। दीर्घत्वमपि(१)। दूमिअं। धवलितमित्यर्थः।

तुलेरोहामः।२५। ण्यन्तस्य। ओहामइ। तुलइ।

मिश्रेर्वीसाल-मेलवौ।२८। ण्यन्तस्य। वीसालइ। मेलवइ। मिस्सइ।

---

१. 'स्वराणां स्वराः' इति बाहुलकाद् इति भावः।

इकारस्य एकारः। एति। देइ। ददाति। णेइ। ईकारस्य एकारः। नयति। रुदिर् अश्रुविमोचने, 'रुदो वः' इति वकारः। शेषाणामदन्तता। अत्र उकारस्य वा ओकारः। रोवइ। पक्षे-रुवइ। णसइ। शषो सः। नो णः। अकारस्य आकारः। नश्यति।

अथादेशाः-'स्मरतेर्भरसुमरौ' इति यदुक्तं तद् विकल्प्यते, तेन-'अधो मनया'मिति मलोपे अन्ते अरः। सरइ, इत्यपि ज्ञेयम्। 'वुड्डखुड्डौ मस्जे'रित्यपि विकल्प्यते। ततो मज्जइ, मज्जेइ, इत्यपि। एवं-'तक्षे रंपवच्छौ' इत्यत्रापि बाहुलकाद् विभाषा। ततः तक्खइ इति। तक्ष्णोति। 'शकेस्तर-वअ-तीराः' इदमपि विकल्प्यते। तेन सक्कइ इति। शक्नोति। 'क्षियो भिज्जः' अस्यापि वैकल्पिकत्वात्, पक्षे खिज्जइ इति। क्षयति। क्वचिदन्यदेव-यथा-'ठाझागाश्च भविष्यद्वर्तमानविध्याद्येकवचने' इति भविष्यदाद्येकवचने ठा-झा-गा

---

भ्रमेस्तालिअण्ठ-तमाडौ ।३०। ण्यन्तस्य। तालिअण्टइ। तमाडइ। भामेइ। भमाडेइ। भमावेइ।

दृशेर्दाव-दंस-दक्खवाः ।३२। ण्यन्तस्य। दावइ। दंसइ। दक्खवइ। दरिसइ।

स्पृहः सिहः ।३४। ण्यन्तस्य। सिहइ।

यापेर्जवः ।४०। जवइ। जावेइ।

प्लावेरोम्बालपव्वालौ ।४१। ण्यन्तस्य। ओम्बालइ। पव्वालइ। पावेइ।

विकोशेः पक्खोडः ।४२। ण्यन्तस्य। पक्खोडइ। विकोसइ।

रोमन्थेरोग्गालवग्गोलौ ।४३। नामधातोर्ण्यन्तस्य। ओग्गालइ। वग्गोलइ। रोमन्थइ।

दोलेरङ्खोलः ।४८। स्वार्थे ण्यन्तस्य। रङ्खोलइ। दोलइ।

वेष्टेः परिआलः। ।५१। ण्यन्तस्य। परिआलेइ। वेढेइ।

क्रियः किणो वेस्तु क्के च ।५२। किणइ। विक्कइ। विक्किणइ।

भियो भा-बीहौ ।५३। भाइ। भाइअं। बीहइ। बीहिअं। बहुलाधिकाराद्। भीओ।

आलीङोऽल्ली ।५४। अल्लियइ। (अल्लीअइ)। अल्लीणो।

निलीङेर्णिलीअणिलुक्कणिरिग्घलुक्कलिक्कल्हिक्काः ।५५। णिलीअइ। णिलुक्कइ। णिरिग्घइ। लुक्कइ। लिक्कइ। ल्हिक्कइ। निलिज्जइ। (णिलिज्जइ)।

विलीङेर्विरा ।५६। विराइ। विलिज्जइ।

रुतेरुञ्ज-रुण्टौ ।५७। रौतेः-रुञ्जइ। रुण्टइ। रवइ।

श्रृणोर्हणः ।५८। हणइ। सुणइ।

धूञेर्धुवः ।५९। धुवइ। धुणइ।

काणेक्षिते णिआरः ।६६। काणेक्षितविषयस्य कृञो णिआर इत्यादेशो वा भवति। णिआरइ। काणेक्षितं करोति।

कृञः कुणः ।६७। कुणइ। करइ।

श्रमे वावम्फः ।६८। वावम्फइ। श्रमं करोति।

मन्युनौष्ठमालिन्ये णिव्वोलः ।६९। णिव्वोलइ। मन्युना ओष्ठं मलिनं करोति।

शैथिल्यलम्बने पयल्लः ।७०। पयल्लइ। शिथिलीभवति, लम्बते वा।

क्षुरेः कम्मः ।७२। कम्मइ। क्षुरं करोतीत्यर्थः।

चाटौ गुललः ।७३। गुललइ। चाटु करोतीत्यर्थः। निष्पतनविषयस्य तु णोलुञ्छइ।

आदेशा विहिताः, ते क्त्वा-तुमुन्-तव्येष्वपि बोध्याः। यथा-ठाऊण=स्थित्वा। झाऊण=ध्यात्वा। गाऊण = गात्वा। ठाउं = स्थातुम्। झाउं = ध्यातुम्। गाउं = गातुम्। ठाअव्वं= स्थातव्यम्। झाअव्वं = ध्यातव्यम्। गाअव्वं = गातव्यम्। क्तप्रत्ययादन्यत्रैव एते आदेशाः। एवम्-बहुलग्रहणात्संस्कृतेऽपि कल्प्यते। हिनस्तीति हिंसः। वर्णविपर्ययात् सिंहः इति। पृषद् उदरं यस्येति। बाहुलकात् दकारलोपे गुणे पृषोदरः। एवं यत् किमपि सूत्रात् प्रतिपाद्यम्, तत्सर्वं बहुलग्रहणादवसेयम्॥

इति श्रीमहामहोपाध्याय पं० मथुराप्रसादकृते चन्द्रिकाख्यव्याख्याने धातुविधिरष्टमः परिच्छेदः।

---

स्मरेर्झरझूरभरभललढविम्हरसुमरपयरपम्हुहाः ।७४। झरइ। झूरइ। भरइ। भलइ। लढइ। विम्हरइ। सुमरइ। पयरइ। पम्हुहइ। सरइ। विपूर्वकस्य तु-पम्हुसइ। विम्हरइ। वीसरइ।

व्यपहृञः कोकपोक्कौ ।७६। कोकइ। ह्रस्वत्वे तु-कुक्कइ। पोक्कइ। पक्षे-वाहरइ।

प्रसरेः पयल्लोवेल्लौ ।७७। पयल्लइ। उवेल्लइ। पसरइ। गन्धविषये तु-महमहइ माअई। मालईगंधो पसरइ।

जाग्रेर्जग्गः ।८०। जग्गइ। पक्षे-जागरइ।

व्याप्रेराअड्डुः ।८१। आअड्डुइ। वावरेइ।

आदृङः सन्नामः ।८३। सन्नामइ। आदरइ। अवतरतेस्तु—ओहइ। ओरसइ। ओअरइ।

पचेः सोल्लपउल्लौ ।९०। सोल्लइ। पउल्लइ। पयइ।

मुचेश्च ।९१। छड्डुइ। अवहेडइ। मेल्लइ। उस्सिक्कइ। रेअवइ। णिलुञ्छइ। धंसाडइ। पक्षे-मुअइ।

दुःखेर्णिव्वलः ९२। णिव्वलेइ। दुःखं मुञ्चतीत्यर्थः। वञ्चेस्तु-वेहवइ। वेलवइ। जूरवइ। उमच्छइ। वञ्चइ। सिञ्चेश्च-सिञ्चइ। सिम्पइ। सेअइ।

गर्जेर्बुक्कः ।९८। बुक्कइ। गज्जइ।

वृषेर्ढिक्कः ।९९। ढिक्कइ। वृषभो गर्जतीत्यर्थः।

राजेरग्घ-छज्ज-सह-रीर-रेहाः ।१००। अग्घइ—इत्यादि।

मस्जेराउड्ड-णिउड्ड-बुड्ड-खुप्पाः ।१०१। आउड्डइ—इत्यादि। पक्षे-मज्जइ।

पुञ्जेरारोलवमालौ ।१०२। आरोलइ—इत्यादि।

तिजेरोसुक्कः ।१०४। ओसुक्कइ।

मृजेरुग्घुस-लुञ्छ-पुञ्छ-पुंस-फुस-पुस-लुह-हुल-रोसाणाः ।१०५। उग्घुसइ—इत्यादि। पक्षे-मज्जइ।

भञ्जेर्वेमय-मसुमूर-मूर-सूर-सूड-विर-पविरञ्ज-करञ्ज-नीरञ्जाः ।१०६। वेमयइ-इत्यादि। पक्षे-भञ्जइ। अनुव्रजेस्तु-पडिअग्गइ। अणुवच्चइ।

युजो युञ्ज-जुज्ज-जप्पाः ।१०९। जुञ्जइ। इत्यादि।

भुजो भुञ्ज-जिम-जेम-कम्माण्ह-समाण-चमढ-चड्डाः ।११०। भुञ्जइ—इत्यादि। उपेन युक्तस्य तु-कम्मवइ। उवहुञ्जइ। घटेः-गढइ। घडइ। सम्पूर्वस्य तु-सङ्गलइ। सङ्घडइ।

अडादेशा इति। अट्-प्रत्याहार से 'अ इ उ, ऋ लृ, ए ओ, ऐ औ, हयवर' एतदात्मक पाणिनीयसूत्रप्रतिपादित का ग्रहण करना। और आदेश जैसे—'भुवो होहुवौ'। भू धातु होहुव आदेश, एवं भी धातु को 'भियो भावीहौ' से भा-वीह आदेश कहे गये हैं, वे बहुलग्रहण से अनेक प्रकार के होते हैं। अर्थात् अनेक धातुओं में अनेक प्रकार के अडादिकों के आगम और आदेश होते हैं। कविप्रयोगानुकूल एवं व्यवहारानुकूल कल्पना कर लें। बहुलपद के स्वरूप को कहते हैं—क्वचिदिति। कहीं पर सूत्र की प्रवृत्ति होती है। सूत्र से अप्राप्त भी आगम-आदेश हो जाते हैं। और कहीं पर

---

हासेन स्फुटेर्मुरः । ११४। मुरइ । हासेन स्फुरतीत्यर्थः ।

तुडेस्तोड-तुट्ट-खुट्ट-खुड-उक्खुड-उल्लुक्क-णिलुक्क-लुक्क-उल्लूराः ।११६। तोडइ-इत्यादि । पक्षे-तुडइ ।

घूर्णो घुल-घोल-घुम्म-पहल्लाः ।११७। घुलइ-इत्यादि । ग्रन्थेः-गण्ठइ । गण्ठी ।

मन्थेर्घुसल-विरोलौ ।१२१। घुसलइ । पक्षे-मन्थइ । ह्लादेः-अवअच्छइ । ह्लादते, ह्लादयति वा । खिद्यतेः-जूरइ । विसूरइ । खिज्जइ ।

नेः सदो मज्जः । १२३। निपूर्वस्य सदो मज्ज इत्यादेशो भवति । अत्ता एत्थ-णिमज्जइ । इ० ।

छिदेर्दुहाव-णिच्छल्ल-णिज्झोड-णिव्वर-णिल्लूर-लूराः ।१२४। दुहावइ—इत्यादि पक्षे-छिन्दइ । आङ्पूर्वस्य तु-ओअन्दइ । उद्दालइ ।

मृदो मल-मढ-परिहट्ट-खड्ड-चड्ड-मड्ड-पन्नाडाः । १२६ । मलइ—इत्यादि । स्पन्देः-चुलुचुलइ । पन्दइ । विसंवदेः-विअट्टइ । विलोट्टइ । फंसइ । विसंवयइ । शीयतेः-झडइ । पक्खोडइ । आक्रन्देः-णीहरइ । अक्कन्दइ ।

रुधेरुत्थङ्घः । १३३ । उत्थङ्घइ । रुन्धइ । निषेधतेः-हक्कइ । निसेहइ । तनेः-तडइ । तड्डइ । तड्डवइ । विरल्लइ । तणइ । उपसर्पेः-अल्लिअइ । उवसप्पइ ।

सन्तपेर्झङ्खः । १४० । झङ्खइ । पक्षे-सन्तप्पइ । ओअग्गइ । वावेइ । व्याप्नोतीत्यर्थः ।

क्षिपेर्गलत्थ-अड्डक्ख-सोल्ल-पेल्ल-णोल्ल-छुह-हुल-परी-धत्ताः । १४३ । गलत्थइ । परीइ-इत्यादि । पक्षे-खिवइ ।

उत्क्षिपेर्गुलगुञ्छ-उत्थङ्घ-अल्लत्थ-उब्भुत्त-उस्सिक्क-हक्खुवाः। १४४। गुलगुञ्छइ-इत्यादि । आक्षिपेस्तु-णीरवइ । अक्खिवइ ।

स्वपेः कमवस-लिस-लोट्टाः । १४६ । कमवसइ-इत्यादि। पक्षे-सुअइ । वेपेः—आयम्बइ । आयज्झइ । वेवइ ।

विलपेर्झङ्ख-वडवडौ । १४८ । झङ्खइ—इत्यादि । पक्षे-विलवइ । कृपेः-अवहावेइ । कृपां करोतीत्यर्थः ।

प्रदीपेस्तेअव-सन्दुम-सन्धुक्क-अब्भुत्ताः । १५२ । तेअवइ-इत्यादि । पक्षे-पलीवइ । लुभेः-सम्भावइ । लुब्भइ । क्षुभेः-खउरइ । पड्डुहइ । खुब्भइ ।

उपालम्भेर्झङ्ख-पच्चार-वेलवाः । १५६ । पक्षे-उवालम्भइ ।

अवेर्जृम्भो जम्भा १५७। जृम्भेर्जम्भा इत्यादेशो भवति, वेस्तु न भवति । जम्भाइ । जम्भाअइ । अवेरिति किम् ? केलिपसरो विअम्भइ । नमेः-णिसुढइ । भाराक्रान्तो नमतीत्यर्थः । मण्डेः-चिञ्चइ । चिञ्चिअइ । चिञ्चिल्लइ । रीडइ । टिविडिक्कइ । मण्डइ । विश्राम्यतेः-णिव्वाइ । वीसमइ । आक्रमतेः-ओहावइ । उत्थारइ । छुन्दइ । अक्कमइ ।

भ्रमेष्टिरिटिल्ल-ढुंढुल्ल-ढण्ढल्ल-चक्कम्म-मम्मड-भमड-भमाड-तलअण्ट-झण्ट-झम्प-भुम्प-

सूत्र से सर्वथा प्राप्त हैं परंतु नहीं होंगे अर्थात् तत्प्रयुक्त वर्णागमादिक और आदेश नहीं होंगे। और कहीं विकल्प से और कहीं कुछ और ही हो जायगा, जो सूत्र से कथमपि प्राप्त नहीं है। इस प्रकार कार्य के आगमादि आदेशों को बहुधा भिन्न-भिन्न प्रकार से समीक्षा करके अर्थात् आवापोद्वाप से निर्णय करके चार प्रकार का बहुल-स्वरूप कहते हैं। प्रथम-अडागम के उदाहरण देते हैं। जैसे धाव् धातु को 'शेषाणा-मदन्तता' से अकारान्तता। फिर बहुलपद से अट्-प्रत्याहारान्तर्गत ओकार। एवम्-आकार को ओकार हो गया। धोवइ। लोकव्यवहारानुकूल गति में धावइ रहेगा।

---

भ्रुम-गुम-फुम-फुस-ढुम-ढुस-परीपराः।१६१। भ्रमेरेतेऽष्टादशादेशा वा भवन्ति। टिरिटिल्लइ-इत्यादि। पक्षे-भमइ।

गमेरई-अइच्छ-अणुवज्ज-अवज्जस-उक्कुस-अक्कुस-पच्चड्ड-पच्छन्द-णिम्मह-णी-णीण-णीलुक्क-पदअ-रम्भ-परिअल्ल-वोल-परिअल-णिरिणास-णिवह-अवसेह-अवहराः।१६२। गमेरेते एक-विंशतिरादेशा वा भवन्ति। अईइ। णीइ-इत्यादि। पक्षे-गच्छइ। हम्मइ। णिहम्मइ। णीहम्मइ। आहम्मइ। पहम्मइ। इत्येते तु हम्म गतावित्यस्यैव भविष्यन्ति। हे०। आङ्-पूर्वकस्य गमेः-अहिपच्चुअइ। संयुक्तस्य-अब्भिडइ। अभ्याङ्पूर्वस्य-उम्मत्थइ। अभिमुखमाग-च्छतीत्यर्थः। प्रत्याङ्पूर्वस्य-पलोट्टइ। प्रत्यागच्छतीत्यर्थः। शमेः-पडिसाइ। पडिसामइ। समइ।

रमेः संखुड्ड-खेड्ड-उब्भाव-किलिकिञ्च-कोट्टुम-मोट्टाय-णीसर-वेल्लाः।१६८। संखुड्डइ-इत्यादि। पक्षे-रमइ।

पूरे-रग्घाड-अग्घव-उद्धुम-अङ्गुम-अहिरेमाः।१६९। अग्घाडइ—इत्यादि। पक्षे-पूरइ। पूरयतीत्यर्थः। त्वरतेः-जअडइ—इत्यधिकः।

क्षरः खिर-झर-पज्झर-पच्चड-णिच्चल-णिट्टुआः।१७३। खिरइ-इत्यादि। उच्छ्वलतेः-उत्थलइ। विगलेः-थिप्पइ। दलेः-विसट्टइ। वलेः-वम्फइ। पक्षे-विगलइ। दलइ। वलइ।

भ्रंशेः फिड-फिट्ट-फुड-फुट्ट-चुक्क-भुल्लाः।१७७। फिडइ-इत्यादि। पक्षे-भसइ।

नशेर्णिरनास-णिवह-अवरोह-पडिसा-सेहावहराः।१७८। पक्षे-नस्सइ। संदिशतेः-अप्पाहइ। संदिसइ। अवात्काशेः-ओवासइ।

दृशो निअच्छ-पेच्छ-अवयच्छ-अवयज्झ-वज्ज-सव्वव-देक्ख-ओअक्ख-अवक्ख अवअक्खइ-पुलोअ(पुलोए)निअ-अवपु-आस-पासाः।१८१। निअच्छइ—इत्यादि। निज्झाअइ-इति तु निध्यायतेः।

स्पृशः फास-फंस फरिस-छिव-छिह-आलुङ्ख-आलिहाः।१८२। फासइ—इत्यादि। प्रविशेः-रिअइ। पविसइ। प्रमृशतेः प्रमुष्णातेश्च-पम्हुसइ।

पिषेर्णिवह-णिरिणास-णिरिणज्ज-रोञ्च-चड्डाः।१८५। णिवहइ—इत्यादि। पक्षे-पीसइ। भषेः-भुक्कइ। भसइ।

कृषेः कड्ढ-साअड्ढ-अञ्च-अणच्छ-अयञ्छ-आइञ्छाः।१८७। कड्ढइ-इत्यादि। पक्षे-करिसइ। असिविषयस्य तु-अक्खोडइ (अक्खोडइ) असिं कोशात्कर्षतीत्यर्थः।

गवेषेढुंण्ढुल्ल-ढण्ढोल-गमेस-घत्ताः।१८९। ढुण्ढुलइ-इत्यादि। पक्षे-गवेसइ। श्लिष्यतेः-सामग्गइ। अवयासइ। परिअन्तइ। सिलेसइ। म्रक्षेः-चोप्पडइ। मक्खइ।

काङ्क्षेराइ-अहिलङ्घ-अहिलङ्ख-वच्च-वम्फ-मह-सिह-विलुम्पाः(विलुम्फाः)।१९२। आहइ-इत्यादि। पक्षे-कङ्खइ।

मारवाड़ में दौड़ो-दौड़ो इस अर्थ में धाव-धाव कहते हैं। एवम्-स्वप् धातु को उल्लिखित सूत्रों से सवइ सिद्ध हो जाने पर बहुलपद से अकार को ओकार और उकार होगा। अतः सोवइ एवं सुवइ ये दो रूप होंगे। इण् धातु के इकार को एकार होगा। एइ, एति। दा धातु के आकार को एकार होगा। देइ, ददाति। नी धातु के ईकार को एकार होगा। नेइ, नयति। रुद् धातु अश्रुविमोचन अर्थात् रोने के अर्थ में है। उल्लिखित सूत्रों से रुवइ सिद्ध हो जाने पर बहुलपद से रुगत उकार को ओकार होगा। रोवइ, रोदिति। नश् धातु अदर्शन = नाश होना अर्थ में है। निर्दिष्ट सूत्रों से नसइ सिद्ध हो जाने पर बहुलपद से अकार को आकार होगा। नासइ, नश्यति। इसी प्रकार अन्यत्र भी आगमों की कल्पना कर लेना। बहुलग्रहण से अन्य अड्डादिक आगमों की विधि कही। अर्थात् कहाँ पर क्या आगम होता है-इत्यादि उदाहरण दिये।

---

प्रतीक्षेः सामय-विहीर-विरमालाः ।१९३। सामयइ-इत्यादि। पक्षे-पडिक्खइ।

तक्षेस्तच्छ-चच्छ-रम्फाः ।१९४। तच्छइ-इत्यादि। पक्षे-तक्खइ। विकसेः-कोआसइ। वोसट्टइ। विअसइ। हसेः-गुञ्जइ। हसइ। स्रंसेः-ल्हसइ। परिल्हसइ सलिलवसणं। डिम्भइ। संसइ।

त्रसेर्डर-वोज्ज-वज्जाः ।१९८। डरइ-इत्यादि। पक्षे-तसइ।

न्यसो णिम-णुमौ ।१९९। णिमइ। णुमइ। पर्यसस्तु-पलोट्टइ। पल्लट्टइ। पल्हत्थइ। निश्वसेः-झङ्खइ। नीससइ।

उल्लसेरूसल-ऊसुम्भ-णिल्लस-पुलआल-गुञ्जोल्ल-आरोआः ।२०२। ऊसलइ। गुञ्जोल्लइ। ह्रस्वत्वे-गुञ्जुल्लइ इत्यादि। पक्षे-उल्लसइ। भासेः-भसइ। भासइ। ग्रसेश्च-घिसइ। गसइ। ओवाहइ। ओगाहइ। अवगाहत इत्यर्थः। आरोहतेः-चडइ। वलग्गइ। आरुहइ।

मुहेर्गुम्म-गुम्मडौ ।२०७। पक्षे-मुज्झइ।

दहेरहिऊल-आलुङ्खौ ।२०८। पक्षे-डहइ।

ग्रहो वल-गेण्ह-हर-पङ्ग-निरुवार-अहिपच्चुआः ।२०९। वलइ। गेण्हइ, गिण्हइ-इत्यादि।

वचो वोत् ।२११। क्त्वातुमुन्तव्येषु। वोत्तूण। वोत्तुं। वोत्तव्वं।

दृशस्तेन ठ्ठः ।२१३। दृशोऽन्त्यस्य तकारेण सह द्विरुक्तठ्ठकारो भवति। दठ्ठूण। दठ्ठुं। दठ्ठव्वं।

आः कृगो(१) भूत-भविष्यतोश्च ।२१४। काहीअ। काहिइ। काऊण। काउं। काअव्वं।

छिदिभिदोर्न्दः ।२१६। छिन्दइ। भिन्दइ।

युध-बुध-गृध-क्रुध-सिध-मुहां ज्झः ।२१७। जुज्झइ। बुज्झइ। गिज्झइ। कुज्झइ। सिज्झइ। मुज्झइ।

समो ल्लः ।२२२। सम्पूर्वस्य वेष्टतेरन्त्यस्य द्विरुक्तो लो भवति। संवेल्लइ।

वोदः ।२२१। उदः परस्य तु वा भवति। उव्वेल्लइ। उव्वेढइ।

उवर्णस्यावः ।२३३। धातोरन्त्यस्योवर्णस्य अवादेशो वा भवति। ह्नुङ्-निण्हवइ। ह्नु-निह्नवइ। च्युङ्-च्युवइ। रु-रवइ। कु-कवइ। सू-सवइ। पसवइ।

स्वराणां स्वराः ।२३८। धातुषु स्वराणां स्थाने स्वरा बहुलं भवन्ति। हवइ। हिवइ।

---

१. कृगः संवेवम्।

अब आदेशविधि कहते हैं। जैसे—स्मृ धातु को नित्य भर सुमर आदेश कहे हैं। वे बहुलग्रहण से विकल्प से होंगे। अतः पक्ष में–'अधो मनयाम्' से मकारलोप। 'अन्ते अरः' से अर। सरइ। स्मरति। मस्जधातु को बुड्ड खुड्ड आदेश होते हैं, वे भी बहुलपद से विकल्प से होंगे। पक्ष में–'उपरि लोपः कगड०' से सलोप। 'शेषादेशयोर्द्वित्वमनादौ' से द्वित्व। 'शेषाणामदन्तता' से अकारान्तता। 'लादेशे वा' से एत्व। मज्जइ, मज्जेइ। बहुलग्रहण से तक्ष धातु को रंप वच्छ विकल्प से होंगे। पक्ष में–'ष्कस्कक्षां खः' से ख, 'शेषादेशयोः' से द्वित्व। 'वर्गे(षु)युजः पूर्वः' से ककार। अन्य कार्य पूर्ववत्। तक्खइ। तक्ष्णोति। तथा शक धातु—'शषोः सः'। 'शेषाणामदन्तता'। 'शकादीनां द्वित्वम्'। सक्कइ। चि का विकल्प से पूर्ववत् च को ख। 'अनदन्तानामद् वा' से अकार। खिअइ। चयति। कहीं अन्य ही कार्य हो जाते हैं।

---

चिणइ। चुणइ। सद्दहणं। सद्दहाणं। धावइ। धुवइ। रुवइ। रोवइ। क्वचिन्नित्यम्–देइ। लेइ। विहेइ। नासइ। आर्षे–वेमि।

व्यञ्जनाददन्ते ।२३९। व्यञ्जनान्ताद्धातोरन्ते अकारो भवति। भमइ। हसइ। कुणइ। चुम्बइ। भणइ। उवसमइ। पावइ। सिञ्चइ। रुन्धइ। मुसइ। हरइ। करइ। शबादीनां प्रायः प्रयोगो नास्ति।

स्वरादनतो वा ।२४०। अकारान्तवर्जितात्स्वरान्ताद्धातोरन्ते अकारागमो वा भवति। पाइ। पाअइ। धाइ। धाअइ। जाइ। जाअइ। झाइ। झाअइ। जम्भाइ। जम्भाअइ। उव्वाइ। उव्वाअइ। मिलाइ। मिलाअइ। विक्केइ। विक्केअइ। होऊण। होअऊण (होइऊण)। अनत इति किम्। चिइच्छइ। दुगुच्छइ। जानातेः कर्मभावे–णव्वइ। णज्जइ। पक्षे–जाणिज्जइ, मुणिज्जइ। णाइज्जइ। नञ्–पूर्वकस्य–अणाइज्जइ। व्याहृञः कर्मभावे–वहिप्पइ। वाहरिज्जइ। आरभेः कर्मणि–आढप्पइ, आढवीअइ। स्निह–सिचोः कर्मणि–सिप्पइ। ग्रहेः कर्मणि–घेप्पइ। गिण्हिज्जइ। स्पृशेः कर्मणि–छिप्पइ। छिविज्जइ। जीहइ। लज्जइ। लज्जत इत्यर्थः। विरेचयतेः—ओलुण्डइ। उल्लुण्णइ। पल्लत्थइ। विरेअइ। ताडयतेः—आहोडइ। विहोडइ। पक्षे–ताडेइ। उद्धूलयतेः—गुण्ठइ। उद्धूलेइ। नाशयतेः—विउडइ। नासवइ। हारवइ। विप्पगालइ। पलावइ। नासइ। उत्पूर्वस्य घटेर्ण्यन्तस्य—उग्गइ। उग्घाडइ। सम्भावयतेः—आसङ्घइ। सम्भावइ। उत्थङ्घइ। उल्लालइ। गुलगुञ्छइ। उप्पेलइ। उन्नावइ। उत्पूर्वस्य नमेर्ण्यन्तस्यैते प्रयोगाः। पट्ठवइ। पेण्डवइ। पट्ठावइ। प्रस्थापयतीत्यर्थः। अर्पयतेः—अल्लिवइ। चच्चुप्पइ। पणामइ। अप्पेइ। क्रमेः प्रयोगौ—णिहुवइ, कामेइ–इति। प्रकाशयतेः–णुव्वइ। पयासअइ। विच्छोलइ। कम्पेइ। कम्पयतीत्यर्थः। आरुहेर्ण्यन्तस्य—वलइ। आरोवेइ। रञ्जेर्ण्यन्तस्य—रावेइ। रञ्जेइ। घटयतेः—परिवाडेइ। घडेइ। रचयतेः—उग्गहइ। अवहइ। विडविड्डइ। रयइ। सम्पूर्वस्य तस्य—उवहत्थइ। सारवइ। समारइ। केलायइ। समारयइ।

अफुण्णादयः शब्दाः क्तेन सह निपात्यन्ते। तद्यथा—

अफुण्णो–आक्रान्तः। उक्कोसं–उत्कृष्टम्। फुडं–स्पष्टम्। वोलीणो–अतिक्रान्तः। लुग्गो–रुग्णः। विढत्तं–वेढत्तं, अर्जितम्। निमिअं–स्थापितम्। चक्खिअं–आस्वादितम्। हीसमणं–हेषितम्—इत्यादि।

धातवोऽर्थान्तरेऽपि ।२४१। उक्तादर्थादर्थान्तरेऽपि धातवो वर्तन्ते। बलिः प्राणने पठितः खादनेऽपि वर्तते। वलइ। खादति, प्राणनं करोति वा। एवम्–कलिः संख्यानेऽपि। कलइ।

जैसे–भविष्यदादिक अर्थों में एकवचन के परे ठा–झा–गा आदेश कहे हैं, ये अन्यत्र क्त्वा–तुमुन्–तव्य प्रत्ययों के परे भी होंगे। ठाऊण = स्थित्वा। झाऊण = ध्यात्वा। गाऊण=गात्वा। सर्वत्र 'क्त्वा तूण' से तूण 'कगचज' से तलोप। एवं–ठाउं। झाउं। गाउं। 'कगचज०' से तलोप। 'अधो मनयाम्' से यलोप। 'शेषादेशयोः' से द्वित्व। 'मो बिन्दुः'। ठाअव्वं। झाअव्वं। गाअव्वं। इसीप्रकार संस्कृत में भी बहुल-ग्रहण से वर्णविपर्ययादिक होते हैं। जैसे–हिसि हिंसायाम्। हिनस्ति इति हिंसः प्राप्त था, हकार–सकार का विपर्यय करने से सिंहः होगा। पृषत् उदर यहाँ सूत्र से तलोप अप्राप्त था, बहुलग्रहण से लोप। इसी को 'पृषोदरादीनि यथोपदिष्टानि' कहा है। इस तरह सूत्र से प्रतिपाद्य जो कुछ भी है, बहुलग्रहण से प्रयोगानुकूल उस आगमादेश की कल्पना कर लेना।

इति श्रीमहामहोपाध्याय-मथुराप्रसादकृतायां प्राकृतप्रकाशव्याख्यायां हिन्दी-सरलाव्याख्यायां धातुविधिरष्टमः समाप्तः।

---

जानाति, संख्यानं करोति वा। रिगिर्गतौ, प्रवेशेऽपि। रिगइ (रिग्गइ, रिंगइ)। प्रविशति, गच्छति वा। काङ्क्षतेर्वम्फ आदेशः प्राकृते–वम्फइ। अस्यार्थः–इच्छति, (पृच्छति) खादति वा। फक्कतेस्थक्क आदेशः थक्कइ। नीचां गतिं करोति, विलम्बयति वा। विलप्युपालभ्योर्झङ्ख आदेशः। झङ्खइ विलपति, उपालभते, भाषते वा। एवं–पडिवालेइ। प्रतीक्षते, रक्षति वा। केचित् कैश्चिदुपसर्गैर्नित्यम्। हरइ। युध्यते। संहरइ। संवृणोति। अणुहरइ। सदृशीभवति। नीहरइ। पुरीषोत्सर्गं करोति। विहरइ। क्रीडति। आहारइ। खादति। पडिहरइ। पुनः पूरयति। परिहरइ। त्यजति। उवहरइ। पूजयति। वाहरइ। आह्वयति। पवसइ। देशान्तरं गच्छति। उच्चुपइ। चटति।। उल्लुहइ। निःसरति। इति (१)। प्रायोऽत्र हेमानुसार्यादेशाना-मुल्लेखः।

१. अत्र सूत्रसंख्या हेमचन्द्राभिधस्य शब्दानुशासनस्य परिशिष्टरूपस्याऽष्टमाध्यायस्य चतुर्थपादान्तर्गताऽवगन्तव्या।

# अथ नवमः परिच्छेदः

## निपाताः ॥ १ ॥

**अधिकारोऽयम्। वक्ष्यमाणा निपातसंज्ञका वेदितव्याः। संस्कृतानुसारेण निपातकार्यं वक्तव्यम् ॥ १ ॥**

निपाताः—अधिक्रियन्ते, अतः ये शब्दा वक्ष्यन्ते ते निपात-संज्ञका भवन्तु। ते च अव्ययनामानोऽपि भवन्ति। आ परिच्छेदसमाप्तेरयमधिकारो वेदितव्यः।

सदृशं त्रिषु लिंगेषु सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥

इति प्रातिपदिकेभ्योऽस्य विशेषः ॥ १ ॥

अब इस परिच्छेद में निपातविधि कहते हैं—

निपाता इति। यह अधिकार सूत्र है। इसके अनन्तर सब शब्द निपातसंज्ञक होंगे और वे अव्यय-नाम-वाले होंगे अर्थात् उन्हें अव्यय भी कहेंगे। निपाताधिकार परिच्छेद की समाप्ति तक जानना। अब प्रथम अव्यय का स्वरूप बताते हैं। पुंलिङ्ग, स्त्रीलिङ्ग, नपुंसकलिङ्ग इन तीनों लिङ्गों में, प्रथमा-द्वितीया आदि सातों विभक्तियों में और एकवचनादि सब वचनों में जो सदृश हो समानरूप से रहे, व्यय किसी प्रकार के नाश को न प्राप्त हो वह अव्यय कहाता है। यही प्रतिपदिक से अव्यय का विशेष है। प्रातिपदिक में लिङ्ग-वचन से भेद रहता है ॥ १ ॥

## ( कीस किमर्थे। )

कीस किमर्थे[1]—किम्शब्दस्य योऽर्थः तत्र कीस इति निपातः प्रयुज्यते। कीस तए मह कहिअं। किं त्वया मम कथितम्। अत्र किमर्थे कीस इति ॥

कीसेति। किमर्थ में कीस इस निपात का प्रयोग होता है। 'कीस तए मह कहिअं'। क्या तुमने मुझ से कहा। यहाँ किम्शब्द के अर्थ में कीस यह है ॥

## हुं दानपृच्छानिर्धारणेषु ॥ २ ॥

**हुं-इत्ययं शब्दो दानपृच्छानिर्धारणेष्वर्थेषु निपातसंज्ञो भवति। दाने यथा-हुं गेण्ह अप्पणो जीअं ( गेण्ह ८-१५ सू० स्प०, अप्पणो ५-५५ सू० स्प०, जीअं २-२; ४-५ सू० स्प०, शे० सुगमम् )। पृच्छायाम्-हुं कधेहि साहुसु सब्भावं ( कधेहि इति १२-३ शौरसेन्यां, थ = ध, ७-१८ विध्यादावेकत्वे सिप् = सुकृते[2] ७-३४ लादेशे सति, एत्वम्, मध्यमे २-२७ ध् = ह्, २-४३ ष् = स्। अन्त्ये ३-२ दलोपः, ३-५० भद्वि०, ३-५१ भ् = ब्, प्राय इति २-२ वलोपो न, ५-३ अमोऽकारलोपः, ४-१२**

---

१. भामहवृत्ताविदं नोपलभ्यते सूत्रम्। २. 'सोर्हिर्वा' ८।३।१७४ हेम० सू०-सोर्हिः।

मर्षि० )। निर्धारणे–हुं हुवसु तुण्हिक्को ( ८–१ भू = हुव, ७–१८ सिप् = सु, अन्त्यः ३–५८ सू० द्रष्टव्यः )। हुं गृहाणात्मनो जीवम्। हुं कथय साधुषु सद्भावम्। हुं भव तूष्णीकः ॥ २ ॥

हुं दानपृच्छानिवारणेषु[1]—दाने, पृच्छायां, निवारणे च हुं–इति निपातः प्रयुज्यते। हुं देअर! गेण्हसु। हुं देवर! गृहाण। अत्र हुं–शब्दो दानार्थं द्योतयति। हुं भण। अत्र हुं–शब्दः पृच्छां द्योतयति। हुं होसु तुण्हिओ। हुं भव तूष्णीकः। अत्र हुं–शब्दः प्रतिषेधार्थं द्योतयति। निपाताः क्वचिद् वाचकाः, क्वचिद् द्योतकाश्चेति यथादर्शनमवगन्तव्यम् ॥ २ ॥

हुं–इति। दान–देना, पृच्छा–पूछना, निवारण–रोकना,—इन अर्थों के द्योत्य रहते अर्थात् कथंचित् प्रतीयमान रहते हुं इस निपात का प्रयोग होता है। 'हुं देवर! गेण्हसु'। हाँ, देवर ग्रहण कीजिये। जो मैं दे रही हूं, उसे लीजिये। यहाँ दानप्रतीत्यर्थं हुंशब्द है। हुं भण। हां कहिये। क्या पूछते हो। यहां पृच्छा अर्थ में हुंशब्द है। 'हुं होसु तुह्हिओ'। हां चुप हो जाइये। अर्थात् अब आगे कुछ मत कहिये। यहाँ कथन निवारण अर्थ में हुंशब्द है। निपात कहीं पर वाचक और कहीं पर द्योतक प्रतीत होते हैं। वस्तुतः किसी आचार्य के मत से वाचक हैं और किसी के मत से द्योतक हैं। विहार, आहार, संहार, परिहार–एक ही हृधातु में उपसर्गभेद से अनेक अर्थों की प्रतीति है। एवम्–प्रभवति, पराभवति, संभवति, अनुभवति, उद्भवति–इत्यादि ॥ २ ॥

## विअ-वेअ अवधारणे[2] ॥ ३ ॥

विअ, वेअ इत्येताववधारणे निपातसंज्ञौ भवतः। एवं विअ। एवं वेअ। ( एवं संस्कृतसमः, शे० स्प० )। एवमेव ॥ ३ ॥

चिअ-चेअ[3]अवधारणे—निश्चयार्थे चिअ, चेअ इत्येतौ वर्तेते। एसो चिअ सो राआ। एष एव स राजा–इति निश्चयः। स चेअ इयं णअरी। सैवेयं नगरी। अन्या न भवतीति निश्चयः। स च्चिअ, स च्चेअ। सैव ॥ ३ ॥

चिअ–इति। चिअ, चेअ ये निपात निश्चय अर्थ में प्रयुक्त होते हैं। एसो चिअ सो राआ। यह वही राजा है। यहाँ निश्चयार्थक चिअ–शब्द है। सच्चेअ इअं णअरी। यह वही नगरी है अर्थात् दूसरी नहीं है–यह निश्चय है। इस प्रकार यहाँ निश्चयार्थक चेअ–शब्द है ॥ ३ ॥

## ओ सूचनापश्चात्तापविकल्पेषु ॥ ४ ॥

ओ-इत्ययं शब्दः सूचनापश्चात्तापविकल्पेषु निपातसंज्ञो भवति। ओ चिरअसि ( २–२ यलोपः, ७–२ सि )। गाथासु द्रष्टव्यः ॥ ४ ॥

ओ सूचनापश्चात्तापविकल्पेषु—सूचना=साभिप्रायमुद्देशकथनम्। पश्चात्तापः= अनुशयः। विकल्पः=इदम्, इदं वेति पाक्षिको विधिः। एषु त्रिष्वर्थेषु ओ इति निपातो

---

१. एष पाठः संजीवनीसंमतः। २ विअ चेअ चिअ। इं चिअ। तुमं चिअ। अहमेव—त्वमेव। का० पां०। ३. चिअ–चेअ—इति भामहसंमतः पाठः।

वर्तते। ओ अविणयजत्तणिला। ओ अविनययत्नवती। अत्र ओ-शब्दः पूर्वकृतस्यकीयाकरणीयसूचकत्वं द्योतयति। ओ ण पसण्णम्हि। ओ=किमिति न प्रसन्नाऽहमभवम् इति पश्चात्तापं द्योतयति। ओ अणुणेमि। ओ अनुनयामि। अत्र विकल्पार्थे ओशब्दः॥४॥

ओ–इति। सूचनादिक अर्थों में 'ओ' इस निपातसंज्ञक का प्रयोग होता है। सूचना–अभिप्रायपूर्वक किंचिन्मात्र वस्तु की सूचना। पश्चात्ताप–पछताना। विकल्प–यह अथवा यह—इस प्रकार पाक्षिक विधि विकल्प कहाता है। इन अर्थों में ओ यह निपात होता है। ओ अविणयजत्तणिला। अविनय में यत्नवती थी। यहाँ पूर्वकृत यत्न के अकरणीयत्व की सूचना है। ओ ण पसण्णम्हि। ओ मैं क्यों न प्रसन्न हो गयी। यहाँ प्रसन्न न होने के पश्चात्ताप को यह सूचित करता है। ओ अणुणेमि। अच्छा यदि नहीं मानता है तो मैं पैरों में पड़ूँगा=अनुनयविनय करूँगा। यहाँ विकल्पार्थक ओशब्द है॥४॥

## इरकिरकिला अनिश्चिताख्याने॥५॥

इर, किर, किल इत्येते शब्दा अनिश्चिताख्याने निपातसंज्ञका भवन्ति। पेक्ख इर तेण हदो (आदिमः ६–५१ सू० द्रष्टव्यः। तेण ४–६ तदोऽन्त्यलोपः, ५–१२ एत्वं, ५–४ टा=ण[1]। अन्त्यः ४–६ हनोऽन्त्यलोपः, १२–३ त=द, ५–१ ओ)। अज्ज किर तेण ववसिओ। (व्यवसित इत्यत्र ३–२ यलोपः, प्राय इति २–२ वलोपो न, २–२ तलोपः, ५–१ ओ, शे० स्प०)। अअं किल सिविणओ (२–२ यलोपः, ४–१२ मबिं०, शे० स्प०। अन्त्यं १–३ सू० द्रष्टव्यम्)। प्रेक्षस्व किल तेन हतः। अद्य किल तेन व्यवसितः। अयं किल स्वप्नः॥५॥

इर-किर-किला अनिश्चयाख्यानेषु[2]—इर-किर-किलाः शब्दाः अनिश्चयस्य असम्यगर्थस्य आख्याने प्रतिपादने प्रयुज्यन्ते। इह इर दिट्ठो दइओ। इह किल दृष्टो दयितः। अत्र इरशब्दः स्थानदर्शनादेव निश्चितार्थं वक्ति, इति असम्यगेव निश्चयाख्यानम्। एत्थ किरालिंगिओ। अत्र किलालिङ्गितः। अत्र किरशब्दः स्थानस्यालिङ्गनस्य असम्यगर्थतां द्योतयति। ण किल रमिओ। न किल रमितः। अत्र किलशब्दः रमितार्थप्रतिषेधस्य अपरिस्फुटतां कथयति॥५॥

इरेति। इर–किर–किल ये शब्द अनिश्चय असम्यग् अर्थ के प्रतिपादन में प्रयुक्त होते हैं। इह इर दिट्ठो दइओ। यहाँ पर प्रिय को देखा था। यहाँ पर किल (इर)-शब्द स्थानदर्शन से ही निश्चित अर्थ को कहता है, अतः शब्द के प्रयोग से असम्यक् प्रकार से निश्चय को कहता है। एत्थ किरालिंगिओ। यहाँ पर आलिङ्गन किया गया। यहाँ किरशब्द स्थानस्थ आलिङ्गन के अपरिस्फुटार्थ को सूचित करता है। ण किल रमिओ। यहाँ किलशब्द रमणप्रतिषेध को अपरिस्फुट सूचित करता है। अर्थात्–रमणप्रतिषेध को स्फुटतया नहीं कहता है॥५॥

---

१. तेनेत्यत्र २–४२ इति णत्वमात्रमिति केचित्। २. संजीवनीसंमतः पाठः।

हुं क्खु निश्चयवितर्कसम्भावनेषु ॥ ६ ॥

हुं, क्खु इत्येतौ निश्चयवितर्कसम्भावनेषु निपातसंज्ञकौ भवतः। हुं रक्खसो ( हुं स्प०, ३-२९ क्ष = ख, ३-५० खद्वि०, ३-५१ ख = क्, ४-१ ह्रस्वः, ५-१ ओ )। गुरुओ क्खु भारो ( ५-१ ओत्वम्, अन्यत्स्पष्टम् )। हुं राक्षसः। गुरुः खलु भारः ॥ ६ ॥

हु-क्खु निश्चयवितर्कसंभावनासु[1]—निश्चयो = विश्वासः। वितर्कः = विमर्शः। संभावना = उत्कटैककोटिस्वरूपाशङ्कासंभावना। कार्याध्यवसायस्वरूपेत्यर्थः, एष्वर्थेषु हु, क्खु एतौ निपातौ स्तः। अज्ज हु दीसइ दइआ। हु-निश्चयेन। अद्य दयिता दृश्यते। अत्र हुशब्दो निश्चयं बोधयति। एवमेव क्खुशब्दप्रयोगेऽपि। अज्ज क्खु एसा मं पलोएइ। अद्य खलु एषा मां प्रलोकयेत्। अत्र क्खुशब्दः निश्चयं द्योतयति। ण हु दिट्ठो तइ अज्जवि। न हु दृष्टस्त्वयाऽद्यापि। अत्र हुशब्दो वितर्कं द्योतयति। पेच्छ क्खु दारम्मि सो कदावि ठिओ होज्ज। प्रेक्षस्व खलु द्वारे स कदापि स्थितो भविष्यति। अत्र क्खुशब्दो द्वारदेशस्थितिविमर्शोत्पत्तिद्योतकः। एवं हुशब्दप्रयोगः। संभावनायाम्-अच्छ ताव हु णइए। आस्तां तावत् खलु नद्याः। अत्र हुशब्दो नदीपारगमनसंभावनां द्योतयति। खणा क्खु वच्चामि जलणिहिणो पारं। क्षणात् खलु व्रजामि जलनिधेः पारम्। अत्र क्खुशब्दः सागरपारतीरप्राप्त्यध्यवसायद्योतनार्थः। एवं यथायथं हु-क्खु-शब्दौ निश्चयाद्यर्थं प्रकाशयतः ॥ ६ ॥

हु-इति। निश्चयादिक अर्थों में हु, क्खु ये निपात प्रयुक्त होते हैं। निश्चय-विश्वासात्मक स्थिरज्ञान। वितर्क-विमर्श। संभावना-उत्कटकोटिस्वरूपा शङ्का अर्थात् शङ्कास्पदकार्याध्यवसायस्वरूपज्ञान। अज्ज हु दीसइ दइआ। हु निश्चयेन अद्य दयिता दृश्यते। यहाँ हुशब्द निश्चय को द्योतित करता है। इसी प्रकार क्खु ( खलु ) शब्द के प्रयोग में भी जानना। अज्ज क्खु एसा मं पलोएइ। आज वह मुझे देखेगी। यहाँ निश्चय को खलुशब्द बोधित करता है। ण हु दिट्ठो तइ अज वि। आज भी नहीं देख पड़ा। यहाँ हुशब्द वितर्क को प्रकाशित करता है। एवं क्खु शब्द के प्रयोग में—पेच्छ क्खु दारम्मि सो कदावि ठिओ होज्ज। देखो कदाचित् वह दरवाजे पर स्थित होगा। यहाँ क्खुशब्द द्वार पर ठहरने के विमर्श को बोधित करता है। संभावना में हु शब्द—अच्छ ताव हु णइए। संभवतः नदी के पार होगा। यहाँ हुशब्द नदी के पार जाने की संभावना को कहता है। क्खुशब्द—खणा क्खु वच्चामि जलणिहिणो पारं। क्षणमात्र में मैं समुद्र के पार आता हूँ। यहाँ क्खुशब्द समुद्र के पार आने के उद्योग-साहस से पार-प्राप्ति-सिद्धि संभावना को सूचित करता है। इसी तरह अन्यत्र भी हु-क्खुशब्द पूर्वोक्त निश्चयादिक अर्थों को यथास्थान प्रकाशित करते हैं ॥ ६ ॥

णवरः केवले[2] ॥ ७ ॥

---

१. अयं पाठः संजीवन्यादिसंमतः। नेदं सूत्रं संजीवन्यादौ।

णवरः इत्ययं शब्दः केवलेऽर्थे निपातसंज्ञो भवति। णवर अण्णं ( अन्नशब्दस्य २-४२ न् = ण, ४-१२ मबिं०[1] ) ॥ ७ ॥

## ( इजेराः पादपूरणे। )

इजेराः पादपूरणे[2]—इ-जे-र इत्येते निपाताः पादपूरणे वर्तन्ते। न्यूनपादपूरणमेव एषां प्रयोजनम्। 'एस इ तदा पअट्ठो'। एष तथा प्रवृत्तः। अत्र इकारः पादपूरणमात्रे वर्तते। न्यूनपादपूरणमेवैतेषां प्रयोजनम्। वृत्तभङ्गभयात् इकारस्तत्पूर्त्यै प्रयुक्तः। 'लंभइ जे पेक्खेउं'। लभ्यते प्रेक्षितुम्। अत्र 'जे' इति पादपूरणमात्रे। यत्तु सदानन्देन वसन्तराजेन च 'पेखिउं' इति प्रयुक्तम्, तन्न समीचीनम्। तथासति एकमात्रा न्यूनैवावतिष्ठते। तस्मात्–'ए च क्त्वातुमुन्तव्यभविष्यत्सु' इत्येकारः। 'पेक्खेउं' इति युक्तः पाठः। ण र तए वि ( कहिओ सो )। न त्वयापि कथितः सः। अत्र रेफः पादपूरणार्थः॥

इजेरा इति। इ-जे-र ये निपात श्लोक की पादपूर्ति के लिये होते हैं। न्यूनपाद की पूर्ति ही इनका प्रयोजन होता है अर्थात् इनका अर्थ कुछ नहीं होता। 'एस इ तदा पअट्ठो'। यहाँ वृत्त में एक मात्रा कम होती थी; अतः इकार का प्रयोग किया है, जिससे छन्दोभङ्ग न हो। एवं जे-शब्दप्रयोग में–'लंभइ जे पेक्खेउं'। यहाँ जे पादपूर्ति मात्र के लिये है। 'पेक्खेउं' यहाँ 'ए च क्त्वा' से एकार करने से पादपूर्ति होगी। अन्यथा फिर भी एक मात्रा न्यून होने से छन्दोभङ्ग हो जायगा। 'ण र तए वि कहिओ सो'। यहाँ रेफ पादपूर्त्यर्थमात्र है॥

## आनन्तर्ये णवरि ॥ ८ ॥

णवरि इत्ययं शब्द आनन्तर्ये निपातसंज्ञो भवति। णवरि ( स्पष्टम् )॥

आनन्तर्ये णवरि—अनन्तरस्य भावः आनन्तर्यम्, तस्मिन् णवरि इत्ययं निपातो वर्तते। णवरि छिण्णं सीसं रणे रिउणो। अनन्तरं छिन्नं शीर्षं रणे रिपोः। अत्र णवरिशब्दः शिरश्छेदनस्य आनन्तर्यं द्योतयति। केचित्तु–'णवरि केवलानन्तर्ययोः' इत्येवं सूत्रं पठन्ति। तन्मते-रणे रिपोः केवलं शिरश्छिन्नम्-इत्यपि भवति॥ ८॥

आन-इति। आनन्तर्य अर्थ में 'णवरि' इस निपात का प्रयोग होता है। 'णवरि छिण्णं सीसं रणे रिउणो'। इसके अनन्तर संग्राम में शत्रु का शिर काट दिया। यहाँ णवरि-शब्द आनन्तर्य अर्थ को कहता है। कईएक आचार्य-'णवरि केवलानन्तर्ययोः' ऐसा सूत्र मानते हैं। उनके मत से केवल अर्थ में भी 'णवरि' शब्द है। तो यह भी अर्थ होगा कि-केवल सिर काटा॥ ८॥

## ( उ क्षेपविस्मयसूचनासु। )

उ क्षेपविस्मयसूचनासु[3]—क्षेपः = तिरस्कारः। विस्मयः = आश्चर्यम्। सूचना=

---

१. केवलमन्यमित्यर्थः। केचित्तु अन्यशब्दस्य ३-२ यलोपः, २-४२ न-ण, ३-५० णादि०, शे० पू०। २. नेदं भामहवृत्तौ सूत्रम्। ३. नास्तीदं भामहवृत्तौ सूत्रम्।

अभिप्रायपैशुन्यम् । एष्वर्थेषु उ-इति निपातः प्रयुज्यते । उ अम्ह ण तेण कज्जं । उ अस्माकं न तेन कार्यम् । अत्र तस्य प्रयोजनेऽपि प्रयोजनं नास्तीति अधिक्षेपो बोध्यते । उ सो एष इह कुदो आअदो । उ स एष इह कुत आगतः । अत्र उशब्दः तदागमने आश्चर्यं जनयति । सहि उ विलक्खो व्व । सखि ! उ विलक्ष इव । अत्र वैलक्ष्यजनन-कारणाभिप्रायस्य सूचना उशब्देन द्योत्यते ॥

उ-इति । क्षेपादिक अर्थों में उ इस निपात का प्रयोग होता है । क्षेप = तिरस्कार । विस्मय = आश्चर्य । सूचना = अभिप्राय का संक्षेप कहना । क्षेप-'उ अम्ह न तेण कज्जं' । उ-मुझे उससे कोई कार्य नहीं है । कार्य रहते हुये भी कार्य का निषेध करना तिरस्कार है। उ-पद से उसका बोध होता है। आश्चर्य-'उ सो एस इह कुदो आअदो' । यहाँ उशब्द उसके आगमन में आश्चर्य को कहता है । सूचना-'सहि उ विलक्खो व्व' । हे सखि ! वह विलक्ष-सा हो गया । यहाँ वैलक्ष्योत्पादक कारण के अभिप्राय की सूचनामात्र उशब्द से प्रकाशित होती है ॥

## किणो प्रश्ने[1] ॥ ९ ॥

किणो इत्ययं शब्दः प्रश्ने निपातसंज्ञो भवति । किणो धुव्वसि ( ८-५७ य = व्व, ७-२ थास् = सि ) । किणो हससि ( किणो स्प०, ७—२ सिप् = सि ) । किन्नु धूयसे । किन्नु हससि ॥ ९ ॥

किणो प्रश्ने—किणो-इति निपातः प्रश्नेऽर्थे वर्तते। सुहअ किणो कहेसि मं। सुभग! किं कथयसि माम् । अत्र किणो-इति प्रश्नार्थवाचकः । कीस-किमर्थे वर्तते । किणो-इति तु प्रश्ने । इत्यनयोः अर्थाभेदे अर्थभेदो न कर्तव्यः । तथा चोक्तम्-'सम्भवत्येकवाच्यत्वे वाक्ये भेदश्च नेष्यते' ॥ ९ ॥

किणो-इति । किणो यह निपात प्रश्न अर्थ में है। 'सुहअ किणो कहेसि मं' । हे सुभग मुझे क्या कहते हो ? यहाँ किणोशब्द प्रश्नार्थ में है । कीस यह किमर्थ में है और किणो यह प्रश्न में है । इस प्रकार इनका परस्पर अर्थ में अभेद ही है । अर्थ में भेद नहीं करना । कहा भी है कि-एक वाच्य रहने पर वाक्य भेद नहीं करना-इति ॥ ९ ॥

## अव्वो[2] दुःखसूचनासम्भावनेषु ॥ १० ॥

अव्वो इत्ययं शब्दो दुःखसूचनासम्भावनेषु निपातसंज्ञो भवति । दुःखे-अव्वो कज्जलरसरञ्जिएहिं अच्छीहिं[3] ( अव्वो स्प०, कज्जलरसेति संस्कृतसमः शब्दः, रञ्जितेत्यस्य २-२ तलोपः, ५-१२ अ = ए, ५-५ भिस् = हिं । अन्त्ये २-३० क्ष = छ, ३-५० छद्वि०, ३-५१ चॅ = छ् , ४-२० स्त्रीत्वे ई, ५-५ भिस् = हिं ) । सूचनायाम्-अव्वो अवरं विअ ( २-२५ प = व, ५-३ अमोऽकारलोपः, ४-१२ मबिं०, शे० ९-३ सू० स्प० ) । सम्भावने-अव्वो णमिव अत्तुं ( ३-१ द्लोपः, ३-५० तद्वि०, ४-१२

१. किणो कीस किमु परिप्रश्ने । का० पा० । २. अधो अव्वो, वो । अधो दुःख-सूचनाभाषणेषु । का० पा० । ३. प्राकृते द्विवचनाभावात् बहुवचनम् ।

मर्बि० )। अहो कज्जलरसरञ्जिताभ्यामक्षिभ्याम्। अहो अपरमिव। अहो एनमिवात्तुम् ॥ १० ॥

अव्वो दुःखसूचनासंभाषरोषु[1]—दुःखे, सूचनायां, सम्भाषणे च अव्वो इति निपातो वर्तते। 'अव्वो मह पिअविरहो'। अव्वो मम प्रियविरहः। इत्यत्र अव्वो इति निपातो विरहदुःखातिशयावेदकः। सहि ! एस निट्ठुरो अव्वो। अत्र अव्वोशब्दः अतिनिष्ठुरतासूचकः। सख्या सह संभाषणेऽपि अव्वोशब्द इहावस्थितः। तदर्थद्योतनद्वारेण प्रयुक्तः। अव्वो-इति निपातः आश्चर्यद्योतनेऽपि क्वापि दृश्यते। अव्वो वल्लह किमिणं। आश्चर्यं वल्लभ ! किमिदम्। अत्राश्चर्यद्योतकोऽयम् अव्वोशब्दः ॥ १० ॥

अव्वो इति। दुःखादिक अर्थों में निपात अव्वो का प्रयोग होता है। 'अव्वो मह पिअविरहो'। यहाँ अव्वो यह निपात प्रियविरहदुखातिशय का सूचक है। 'सहि एस निट्ठुरो अव्वो'। यहाँ अत्यधिक निष्ठुरतासूचक है। यहाँ अव्वोशब्द संभाषण में भी है। क्योंकि उसी अर्थ को संभाषण-द्वारा सूचित करता है। अव्वो यह आश्चर्य प्रकाशन में भी होता है। अव्वो वल्लह किमिणं। हे प्रिय ! यह क्या है ? यहाँ आश्चर्यसूचक अव्वोशब्द है ॥ १० ॥

## अलाहि निवारणे ॥ ११ ॥

अलाहि इत्ययं शब्दो निवारणे निपातसंज्ञो भवति। अलाहि कलहलेसेण। अलाहि कलहबन्धेण। ( संस्कृतसमौ कलहो बन्धश्च, २-४३ श् = स् , ५-४ टा=ण, ५-१२ ए, शे० स्प० )। अलं कलहलेशेन। अलं कलहबन्धेन ॥ ११ ॥

अलाहि निवारणे—अलाहि इत्ययं निपातः निवारणेऽर्थे वर्तते। अलाहि तुम्हे अम्हणामेण। अलं तव अस्मदीयनाम्ना। अन्यः कश्चिन्नामग्रहणात् अलाहि-इत्यनेन निपातेन प्रतिषिध्यते ॥ ११ ॥

अलाहीति। निवारण अर्थ में अलाहि यह निपात है। अलाहि तुम्हे अम्हणामेण। हमारा नाम न लीजिये और किसी का नाम लें। यहाँ अलाहि इस निपात से नाम-ग्रहण का प्रतिषेध है ॥ ११ ॥

## अइ-वले सम्भाषणे ॥ १२ ॥

अइ, वले इत्येतौ शब्दौ सम्भाषणे निपातसंज्ञकौ भवतः। अइ मूलं पसूसइ ( अइ स्प०, मूलं संस्कृतसमः, शे० ३-३ रलोपः, २-४३ श, ष् = स् , ३-२ यलोपः, ८-४६ उद्दीर्घः, ७-३१ ति = इ)। वले किं कलेसि ( वले स्प०, किं संस्कृतसमः, २-२ यलोपः, ७-२ सिप्=सि, ७-३४ एत्वं कले, शे० स्प० )। अपि मूलं प्रशुष्यति। वले किं कलयसि ॥१२॥

अइ-रणे संभाषणे[2]—अइ-रणे-इत्येतौ निपातौ संभाषणे = निरूपणेऽर्थे वर्तेते।

---

[1] संजीवन्यादिसमतः पाठः। [2] 'रणे' इत्यस्य स्थाने 'वले' इति भामहे पाठः।

अइ पिअतम खणं दिअहो । अयि प्रियतम ! क्षणं दिवसः । अत्र क्षणम्-अर्थं संभावयन् 'अइ'शब्दः संभाषितः । अज्ज रणे नाह गम्मइ घराउ । अद्य नाथ ! गम्यते गृहात् । अत्र रणे-शब्दः गमनस्य संभाषणं बोधयति ॥ १२ ॥

अइ-इति । संभाषण और निरूपण अर्थ में 'अइ-रणे' ये दो निपात प्रयुक्त होते हैं । 'अइ पिअतम खणं दिअहो' । यहाँ क्षणमात्र अभी दिन है, इस अर्थ को सूचित करता हुआ संभाषण में अइशब्द का प्रयोग है । एवम्-'अज्ज रणे नाह गम्मइ घराउ । यहाँ 'रणे' वह सप्तम्यन्तानुकरणस्वरूप निपात गमन-संभाषण में प्रयुक्त है, संग्रमार्थ रणशब्द का सप्तम्यन्त रूप नहीं है । तो यह अर्थ होता है-हे नाथ ! आज घर से जा रहे हैं । यहाँ गमन-संभाषण में 'रणे'शब्द प्रयुक्त है ॥ १२ ॥

## णवि वैपरीत्ये ॥ १३ ॥

णवि इत्ययं शब्दो वैपरीत्ये निपातसंज्ञो भवति । णवि तह पहसइ बाला ( तह १-१० सू० स्प०, ३-३ रलोपः, ७-१ ति = इ, बाला इति संस्कृतसमः ) । विपरीतं तथा प्रहसति बाला ॥ १३ ॥

## सू कुत्सायाम् ॥ १४ ॥

सू इत्ययं शब्दः कुत्सायां निपातसंज्ञो भवति । सू सिविणो ( सिविणो १-३ सू० स्प० ) । धिक् स्वप्नः ॥ १४ ॥

धू[2] कुत्सायाम्—धू-इत्ययं नितातः कुत्सायां वर्तते । कुत्सा = निन्दा । धू तुह सवत्तिचरिअं । धिक् तव सपत्नीचरितम् । अत्र धूशब्देन सपत्नीचरितस्य निन्दा प्रतीयते ॥ १४ ॥

धू-इति । धू यह निपात निन्दा अर्थ में है । 'धू तुह सवत्तिचरिअं' । तुम्हारी सवत के चरित्र को धिक्कार है । यहाँ धूशब्द से निन्दा प्रतीयमान है ॥ १४ ॥

## रे-अरे-हिरे सम्भाषणरतिकलहाक्षेपेषु ॥ १५ ॥

रे, अरे, हिरे इत्येते शब्दाः सम्भाषण-रतिकलहा-क्षेपेषु निपातसंज्ञा भवन्ति यथासंख्यम् । रे मा करेहि । णाओसि अरे । दिट्ठोसि हिरे ( रे स्प०, संस्कृतसमो मा-शब्दः, १२-१५ कृञ् = कर, ७-३४ एत्वं, १२-२७ परस्मैपदं, संस्कृतवत् लोटः सेर्हिः ) । ( २-४२ न् = ण, २-२ गलोपः, ७-६ स्प० सि, अरे स्प० ) । ( १-१८ ऋ = इ, ३ = १० ष्ट = ठ, ३-५० ठद्वि०, ३-५१ ठ-ट, ५-१ ओ ) । रे मा कुरुष्व । नागोसि अरे । दृष्टोऽसि हिरे ॥ १५ ॥

रे-अरे-हरे संभाषणरतिकलहक्षेपेषु[3]—संभाषणम् = पारस्परिककथनम् । रतिकलहः = निधुवनकेलिः । क्षेपः = तिरस्कारः । एष्वर्थेषु यथासंख्यं रे, अरे, हरे-इति निपाता वर्तन्ते । णिसुअं जं रे जंपसि । निश्रुतं यत् रे जल्पसि । अत्र रेशब्दः संभा-

---

१. नेदं सूत्रं संजीवन्यादिषु, अतो नास्य चन्द्रिकाव्याख्या, नापि हिन्दीटीका ।

२. 'धू'स्थाने 'सू' इति भामहे । ३. संजीवनीसंमतः पाठः ।

पणं द्योतयति । देहि अरे णिवसणं । देहि अरे निवसनम् । अत्र अरेशब्दः प्रार्थनाभिप्रायरतिकलहद्योतकतां विधत्ते । हरे घट्ठो । अहो धृष्टः । अत्र हरेशब्दः धृष्टत्वलक्षणम् अधिक्षेपम् उद्बोधयति ॥ १५ ॥

रे अरे-इति । संभाषणादिक अर्थों में रे-अरे-हरे का यथाक्रम प्रयोग होता है। संभाषण = परस्पर बातचीत करना, उसमें 'रे' इस निपात का, रतिकलह = निधुवन-केलि, इसमें 'अरे' इस निपात का, क्षेप = तिरस्कार, इसमें 'हरे' इस निपात का प्रयोग होता है। णिसुअं जं रे जंपसि। हाँ सुना, जो कहते हो। यहाँ रे-शब्द से संभाषण प्रतीत है। देहि अरे णिवसणं। यहाँ अरेशब्द वसनप्रार्थना से रतिकलह को द्योतित करता है। हरे धिट्ठो। यहाँ हरेशब्द धृष्टस्वरूपात्मक अधिक्षेप = तिरस्कार को कहता है ॥ १५ ॥

## म्मिवमिवविआ इवार्थे ॥ १६ ॥

**म्मिव, मिव, विअ इत्येते शब्दा इवार्थे निपातसंज्ञका भवन्ति। गअणं म्मिव, गअणं मिव, गअणं विअ कसणं ( २-२ गलोपः, २-४२ न् = ण् , ५-३० बिं० ), ( अन्त्ये ३-६१ वर्णे नित्यं विप्रकर्षः । पूर्वस्य तत्स्वरता च ) । गगनमिव कृष्णम् ॥ १६ ॥**

पिव-मिव-विव-व इवार्थे[1]—एते चत्वारः शब्दा निपाता इवार्थे उपमानोत्प्रेक्षादौ वर्तन्ते। रंभा पिव रूवेण । रम्भेव रूपेण । हरिणी मिव तरलपेच्छिएण । हरिणीव तरलप्रेक्षितेन । हंसी विव गमणेण । हंसीव गमनेन । सीआ व्व सईत्तणेण । सीतेव सतीत्वेन । अत्र 'सेवादिषु चे'ति वकारस्य द्वित्वम् । एवमन्येऽपि निपाताः सन्ति ।

अनारम्भे च क्षेपे च पश्चात्तापविषादयोः ।
निश्चये च बुधैः प्रोक्तो निपातो हन्त इत्ययम् ॥ १ ॥
हन्त वाच्यविभूषायां हे इत्यामन्त्रणे भवेत् ।
आ-शब्दोऽपि भवत्यर्थे नाम इत्येवमर्थकः ॥ २ ॥
हञ्जे-हण्डे-हले-इत्यादयः सम्बोधने मताः ।
इवार्थे ण इति क्वापि हा खेदानुपतापयोः ॥ ३ ॥
अलं-अलं विषादार्थौ अप्यर्थोऽपि इ इत्ययम् । इति ।

एवं चवादयः शब्दाः अर्थानतिक्रमेण अव्ययत्वेन अवगन्तव्याः ।

च वा ह हे अहो हंहो णमे आहो हही सिहो ।
अविमो मुत्तु अह हो इत्याद्यास्तु चवादयः ॥
आहो अहो उताहो च है हे भो भोस्तथैव च ।
हंहो इत्यादयः शब्दाः स्युः संबोधनबोधकाः ॥-॥ १६ ॥

पिवेति । ये चार पिवादिक निपातशब्द इवार्थ में अर्थात् कहीं उपमान में और कहीं उत्प्रेक्षा अर्थ में होते हैं। 'रंभा पिव रूवेण'। यहाँ पिवशब्द से सादृश्य प्रतीति है।

---

१. एष पाठः संजीवन्यनुगामी ।

रूप से रम्भा के सदृश। 'हरिणी मिव तरलपेच्छिएण'। तरल-प्रेक्षण से हरिणी के सदृश। यहाँ मिवशब्द इवार्थ में है। 'हंसी विव गमणेण'। यहाँ विवशब्द इवार्थ में सादृश्य बोधक है। एवं 'सीअ व्व सईत्तणेण'। यहाँ वशब्द इवार्थ में है। 'सेवादिषु च' से वकार को द्वित्व होगा। यहाँ कहीं-कहीं प्रसङ्गानुरूप उत्प्रेक्षा भी हो सकती है। जैसे रूप से रम्भा हो। गमन से मानो हंसी ही है। इत्यादि यथास्थान समझ लेना। इसी प्रकार और भी निपात हैं और वे विभिन्न अर्थों में होते हैं। जैसे—'हन्त' यह अव्यय अनारम्भ में, क्षेप=तिरस्कार में, पश्चात्ताप=कृतकार्य के संताप में, विषाद=दुःख में और निश्चय=ऐसा ही है—इसमें, विद्वानों ने इन अर्थों में हन्त अव्यय को माना है और वक्तव्य के सौन्दर्य में भी हन्तशब्द होता है। 'हे' यह संबोधन में। 'आ' यह हो गया, हो रहा है—इस अर्थ में है। 'नाम' यह ऐसा ही है इसमें और संभावना में भी होता है। हञ्जे=चेटी के संबोधन में, हण्डे=नीच के संबोधन में, हले=सखी के संबोधन में हैं। 'ण' इवार्थ में, 'हा' खेद और संताप अर्थ में है। अलं=यह पर्याप्त अर्थ में और विषाद अर्थ में है। 'इ' यह अव्यय अपि के अर्थ में है। इसी प्रकार च-वा इत्यादिक अव्ययों को भी जानना। च, वा, ह, हे, अहो, हंहो, णमे, आहो, हही, सिहो, अविमो, मुत्तू, अह, हो-इत्यादिक चादि अव्यय हैं। आहो, अहो, उताहो, है, हे, भो, भोः, हंहो-इत्यादिक संबोधन में प्रयुक्त होते हैं, क्योंकि संबोधन के बोधक हैं॥ १६॥

## अज्ज आमन्त्रणे॥ १७॥

अज्ज इत्ययं शब्द आमन्त्रणे निपात्यते। अज्ज महाणुहाव! किं करेसि (अज्ज स्प०, २-४२ न्=ण, २-२७ भ=ह, प्राय इति २-२ वलोपो न। ७-२ सि, शेषं ९-१५ सू० स्पष्टम्)। अहो महानुभाव! किं करोषि॥ १७॥

वेच्च[1] आमन्त्रणे—आमन्त्रणम्=आह्वानम्। तस्मिन् अर्थे वेच्च इत्ययं निपातो वर्तते। वेच्च देवर! जाणसु। हे देवर! जानीहि। अत्र वेच्चशब्दः आमन्त्रणार्थं द्योतयति। देश्यां पुनरयम् अन्यार्थेष्वपि दृश्यते। यथा-'वेच्चवेव्वलिओ स्यातां वारणे तूरणे तथा'॥ १७॥

वेच्च-इति। वेच्च यह निपात आमन्त्रण अर्थ में रहता है। वेच्च देअर! जाणीहि। हे देवर! आप जानिये। यहाँ आमन्त्रण अर्थ में वेच्चशब्द है। यह आमन्त्रण को सूचित करता है। वेच्च यह निपात देशी में अन्य अर्थों में भी प्रयुक्त है। 'वेच्च-वेव्वलिअ' ये वारण अर्थ में और तूरण=शब्दकरना अथवा शीघ्रता में हैं॥ १७॥

## शेषः संस्कृतात्॥ १८॥

इति श्रीवररुचिकृते प्राकृतप्रकाशे नवमः परिच्छेदः।

---

१. 'अज्ज' इति 'वेच्च' इत्यस्य स्थाने पाठो भामहवृत्तौ दृश्यते।

उक्तादन्यः शेषः। प्रत्ययसमासतद्धितलिङ्गवर्णादिविधिः शेषः संस्कृतादवगन्तव्यः। इह ग्रन्थविस्तरभयान्न दर्शितः॥ १८॥

इति श्रीभामहविरचितायां मनोरमायां निपातसंज्ञाविधिर्नाम नवमः परिच्छेदः।

शेषाः[1] संस्कृतात्—उक्तेभ्योऽन्ये शेषाः। सुप्तिङ्तद्धितसमासप्रत्याहारकारकलिङ्गसंख्यादयोऽत्र नोक्ताः, ते संस्कृतात् समीक्ष्यावगन्तव्याः। उक्तं च-'प्राकृतं संस्कृतयोनि'-इति। प्रकृतेः संस्कृतात् आगतं प्राकृतम्। संस्कृतं च—

इन्द्रश्चन्द्रः काश्यपश्च कपिलः शाकटायनः।
पाणिन्यमरजैनेन्द्रा इत्यष्टौ शाब्दिका मताः॥

एभिः प्रणीतं प्रकृतिप्रत्ययविभागेन। तत्संपादनं लोकप्रसिद्धम्। क्वचिच्च-उक्तलक्षणमपि बाधित्वा एकदेशसंस्कृतमुपपाद्य व्याक्रियते। यथा—'वचन्ते पिअम्मि भणिअं'। व्रजति प्रिये भणितम्। व्रज् गतौ। शतृ-प्रत्यये। 'चो व्रजिनृत्योः' इति जकारस्य 'च' इत्यादेशः। 'न्तमाणौ शतृशानचोः' इति न्त इत्यादेशः। एवं वचन्तशब्दात् सप्तम्येकवचने ङिः। 'ङेरेम्मी' इति ए इत्यादेशः। क्वचिदपि लोपः-न्तगतस्याकारस्य लोपः। वचन्ते। 'सर्वत्र लवराम्' इति रेफस्य, 'कगचजे'ति यकारस्य च लोपः। 'ङेरेम्मी' इति म्मि। पिअम्मि। शतृ-क्तप्रत्ययाविधानात् संस्कृतस्यैकदेशमुपपाद्य व्याख्यातम्। क्वचिच्च संस्कृतोपपाद्यमाश्रित्य एकदेशेन व्याख्यायते। यथा—शिरस्-शब्दस्य तृतीयैकवचने टाविभक्तौ 'अन्त्यस्य हलः' इति सलोपः। 'टामोर्णः' इति टाप्रत्ययस्य णः। 'ए च सुप्यङिङसोः' इति एत्वम्। 'शषोः सः' इति सः। एवं सिरेण-इति प्राप्नोति। संस्कृते शिरसा-इति तृतीयासिद्धमङ्गीकृत्य 'शषोः सः' इति सः। सिरसा-इत्यपि भवति। एवं-भगम् = ऐश्वर्यम् अस्यास्तीति मत्वर्थे 'आल्विल्लोल्लालवन्तेन्ता मतुपः' इति मतुपः स्थाने वन्त इति। ततः तृतीयैकवचने टा, 'टामोर्णः' इति णः। 'ए सुप्यङिङसोः' इत्येकारः। भगवन्तेण इति। संस्कृते सिद्धं भगवता-इति रूपमाश्रित्य, 'कगचजे'ति गलोपः। 'ऋत्वादिषु तो दः' इति दकारः। भअवदा। वकारस्यापि लोपे 'भअअदा' इत्यपि भवति। एवम्-किम्शब्दस्य सप्तम्येकवचने कस्मिन् काले इति विवक्षामाश्रित्य 'आहे-इआ काले' इति पर्यायेण भवतः। 'किमः कः' इति कः। 'क्वचिदपि लोपः' इत्यलोपः। काहे, कइआ इत्येतौ एव भवतः। संस्कृतसिद्धम् कदा-इति प्रयोगमाश्रित्य 'कगचजे'ति दलोपः। कआ-इत्यपि भवति। एवं यथासिद्धं कविप्रयोगमाश्रित्य व्याख्येयम्॥ १८॥

इति श्रीमहामहोपाध्याय-पं० मथुराप्रसादकृतायां प्राकृतप्रकाशस्य चन्द्रिकाख्य-टीकायां निपातविधिर्नाम नवमः परिच्छेदः समाप्तः।

१. संजीवन्यादिसमतोऽयं पाठः।

शेषा इति। उक्त से अतिरिक्त शेष कहाता है अर्थात् जो प्राकृत के नियमों में नहीं कहा गया है वह शेष है, उसका ग्रहण संस्कृत से करना। जैसे सुप्–तिङ्–तद्धित-समास–प्रत्याहार–कारक–कर्ता–कर्म–करण–सम्प्रदानादिक, लिङ्ग=पुंलिङ्ग–स्त्रीलिङ्ग-नपुंसकलिङ्ग, संख्या=एकवचन, द्विवचन, बहुवचनादिक। ये सब संस्कृत से लिये जायँगे। कहा भी है कि—'प्राकृतं संस्कृतयोनि'=प्राकृत संस्कृत से ही उत्पन्न है। निदान बालक, स्त्री, वृद्ध, मूर्ख, स्फुट संस्कृत का उच्चारण नहीं कर सकते हैं, एवं विकृत उनका उच्चारण ही प्राकृत है। 'जैसे उष्ट्र का उट्ट। हस्त का हत्थ। कर्म का कम्म इत्यादि। प्रकृति=संस्कृत, उससे जो हुआ वह प्राकृत अर्थात् संस्कृतोद्भव ही प्राकृत है। संस्कृत=स्वतः समुच्चरित शब्द हैं। परंतु दो हजार धातु–प्रकृति–प्रत्यय–विभाग आदि करके आठ आचार्यों ने दिखाये हैं, वे सब आचार्य शाब्दिक हैं। यथा—इन्द्र, चन्द्र, काश्यप, कपिल, शाकटायन, पाणिनि, अमरसिंह और जैनेन्द्र ये आठ शाब्दिक हैं अर्थात् व्याकरण के निर्माता हैं। इन्होंने प्रकृति–प्रत्ययादि का विभाग करके शब्द-स्वरूप बताया है, वही नियम सूत्रादि व्याकरण कहाता है। व्याकरण–शब्द लोक में प्रसिद्ध है। कहीं पर व्याकरण के नियमों को बाधकर एकदेश संस्कृत का लेकर प्राकृत का साधुत्व देते हैं। जैसे—'वच्चन्ते पिअम्मि भणिअं'। यहाँ उक्त सूत्रों से 'च्च' आदेश 'न्त' आदेश, ङि को ए। यह सब प्राकृत सूत्रों से है। परंतु शतृ-प्रत्यय, क्त-प्रत्यय ये संस्कृत से ग्रहण किये हैं। इस प्रकार संस्कृत का एकदेश लेकर साधुत्व है। कहीं पर संस्कृत के पूरे सिद्ध शब्द को लेकर प्राकृत के कार्य करके प्राकृत का प्रयोग करते हैं। जैसे—शिरस् शब्द की तृतीया का एकवचन निर्दिष्ट सूत्रों से अन्त्यलोप, टा को ण, श को स, सिरेण होता है और शिरस्–शब्द के तालव्य श को स करके सिरसा भी होता है। एवं-भगवता अस्त्यर्थ में मतुप्प्रत्यय, मतुप् को निर्दिष्ट सूत्र से वन्त आदेश, टा को ण आदेश, अकार को एकार, भगवन्तेण होगा और 'भगवता' इस संस्कृतसिद्ध रूप को लेकर तकार को ऋत्वादि से द आदेश, उक्त सूत्र से गलोप, भअवदा भी होगा। एवं-किम्शब्द से सप्तमी में काल=समय अर्थ की विवक्षा में आहे, इआ पर्याय से प्रत्यय होंगे। किम् को क आदेश, अकार का लोप। काहे, कइआ। क्वचिद्–ग्रहण से अकार का लोप कइआ में नहीं होगा। इस प्रकार काहे, कइआ ये दो होंगे। कदा इस संस्कृत–सिद्ध प्रयोग में 'कगचज' से दकार का लोप करने से कआ यह सिद्ध होता है। इस प्रकार तीनों प्रयोगों का यथारुचि भावुक कवि प्रयोग कर सकता है। अन्यत्र भी इसी प्रकार से साधुत्व मान कर प्रयोग कर सकते हैं। इति ॥ १८ ॥

इति श्री म० म० पं० मथुराप्रसाददीक्षितकृतायां प्रदीपनामकसरल-
हिन्दी-टीकायां नवमः परिच्छेदः समाप्तः ।

# अथ दशमः परिच्छेदः

## पैशाची ॥ १ ॥

**पिशाचानां भाषा पैशाची, सा च लक्ष्यलक्षणाभ्यां स्फुटीक्रियते ॥**

भिल्लीवेषोल्लसद्भूषां संविद्वल्लीमतल्लिकाम् ।
भक्ताभीष्टप्रदामम्बामाश्रये रेणुकां शिवाम् ॥ १ ॥

नवीनां व्याख्यां पूरयितुकामेन प्रयत्यते सम्प्रति । सा च यथा—

पैशाची—पिशाचानां जातिविशेषाणां योनिविशेषाणां वा परस्परं व्यवह्रियमाणा भाषा पैशाचीति कथ्यते । सा तु लक्ष्यलक्षणाभ्यां स्फुटीक्रियते । अधिकारोऽयमापरिच्छेदसमाप्तेः ॥ १ ॥

पैशाचीति । जातिविशेष अथवा योनिविशेष के लोगों को 'पिशाच' कहते हैं । परस्पर की बोलचाल में आनेवाली उनकी भाषा को पैशाची-भाषा कहते हैं । उसे उदाहरणों तथा लक्षणों द्वारा स्पष्ट किया जाता है । इस परिच्छेद की समाप्ति तक यह अधिकार सूत्र है अर्थात् इस परिच्छेद के सूत्रों द्वारा बनाये गये रूप पैशाची भाषा के हैं—ऐसा समझना चाहिए ॥ १ ॥

## प्रकृतिः शौरसेनी ॥ २ ॥

**अस्याः पैशाच्याः प्रकृतिः शौरसेनी । स्थितायां शौरसेन्यां पैशाचीलक्षणं प्रवर्त्तयितव्यम्[1] ॥ २ ॥**

प्रकृतिः शौरसेनी—अस्याः पैशाचीभाषायाः प्रकृतिः = मूलं हि शौरसेनी शूरसेनानां भाषास्तीति शौरसेनीनिष्पन्नेषु पदेषु पैशाचीलक्षणं प्रवर्तयितव्यमिति बोध्यम् ॥

प्रकृतिरिति । पैशाची भाषा का मूल आश्रय शौरसेनी भाषा है, अतः शौरसेनी के नियमों से बने पदों में पैशाची के लक्षणों की प्रवृत्ति करनी चाहिए । तब वे पैशाची के पद समझे जायँगे ॥ २ ॥

## वर्गाणां तृतीयचतुर्थयोरयुजोरनाद्योराद्यौ[2] ॥ ३ ॥

**वर्गाणां तृतीयचतुर्थयोर्वर्णयोरयुक्तयोरनादौ वर्तमानयोः स्थाने आद्यौ प्रथमद्वितीयौ भवतः । गकनं ( ५–३० सो० बि०, २–२ सूत्रबाधः । एवम्-अग्रेऽपि यथास्थानेषु पूर्वसूत्राणां बाधो ज्ञेयः ) । मेखो । राचा । णिच्छरो । वटिसं । दसवतनो । माथवो । गोविन्तो । केसवो । सरफसं ।**

---

१. इति वेदितव्यमिति शेषः । २. केचित् 'अनादावयुजः'–इति विभज्य अनादौ वर्तमानाः वर्णाः सर्वे असंयुक्ताः प्रयोक्तव्याः । कसणो । पणयं । कृष्णः । पण्यम् । ततः 'तथयोर्दधौ' । ( उक्तोऽर्थः ) इति योगविभागेन व्याचख्युः । का० पा० ।

सलफो। णिज्झरो ( ३–५१ सू० स्प०, अत्र ज् = च्, झ् = छ ) बटिसं ( २–२३ सू० स्प०, अत्र ड = ट, शे० स्प० ) । ( दसवतन-केसव-सलफ इत्येतेषु २–४३ श = स, अन्यत्सर्वं स्पष्टम् । विभक्तयः पञ्चमपरिच्छेदस्थ-सूत्रैर्यथालक्षणं साधनीयाः । शे० स्प० ) । अयुजोरिति किम् ? संग्गामो (३–३ रलोपः, ३–५० गद्वि०, ५–१ ओ ) । संग्रामः । वग्घो इत्यादि ( ३–२ यलोपः, ३–३ रलोपः, ३–५० घद्वि०, ३–५१ घ् = ग्, ४–१ ह्रस्वः, ५–१ ओ ) । अनादाविति किम् ? गमनं ( स्प० ) इत्यादि । गगनम्, मेघः, राजा, निर्झरः, बडिशम्, दशवदनः, माधवः, गोविन्दः, केशवः, सरभसम्, शलभः, संग्रामः, व्याघ्रः, गमनम् ॥ ३ ॥

वर्गाणां तृतीयचतुर्थयोरिति—कादि-मान्तेषु पञ्चविंशतिवर्णेषु पञ्चपञ्चवर्णात्मक एको वर्गः । एव पञ्च वर्गाः सन्ति । ते च यथा—१ कवर्गः, २ चवर्गः, ३ टवर्गः, ४ तवर्गः, ५ पवर्ग इति । तेषु वर्गेषु प्रत्येकस्य वर्गस्य आदौ न वर्तमानयोः असंयुक्तयोः तृतीयचतुर्थयोर्वर्णयोः स्थाने तस्यैव वर्गस्य क्रमशः प्रथमद्वितीयौ वर्णौ भवतः । यथा—कवर्गीयतृतीयवर्णस्य गकारस्य स्थाने कवर्गीय एव प्रथमो वर्णः ककारः स्यात् । गगनं-इति शौरसेनीनिष्पन्नस्य शब्दस्य अनादिस्थितमसंयुक्तं तृतीयमक्षरं गगनेत्यत्र द्वितीय-गकाररूपं तस्य स्थाने तद्वर्ग्यं प्रथममक्षरं ककाररूपं स्थापनीयं, तेन 'गकनं' शब्दरूपं पैशाचीसंमतं बोध्यम् । उदाहरणानि—गकनं = गगनं ( गगनम् ) । मेखो = मेघो ( मेघः ) । राचा = राजा ( राजा ) । णिच्छरो = णिज्झरो ( निर्झरः ) । बटिसं = बडिसं (बडिशम्) । दसवतनो = दसवदनो (दशवदनः) । माथवो = माधवो (माधवः) । सलफो = सलभो ( शलभः ) । अयुजोरिति किम् ? संगामो ( संग्रामः ) । अनाद्योरिति किम् ? गमनं ( गमनम् ) ॥ ३ ॥

वर्गाणामिति । 'क' से 'म' तक पचीस अक्षर या वर्ण हैं । उनमें पांच-पांच का एक-एक वर्ग है । एवं पाँच वर्ग हैं, जो अपने प्रथम अक्षर के नाम से प्रसिद्ध हैं । जैसे—'क, ख, ग, घ, ङ' इन पाँच अक्षरोंके समुदाय को कवर्ग कहते हैं । इसी प्रकार अन्य चार वर्ग 'चवर्ग, टवर्ग, तवर्ग तथा पवर्ग' के नाम से प्रसिद्ध हैं । आदि में न रहनेवाले, असंयुक्त ( एक दूसरे से न मिले हुए=जोड़ अक्षर नहीं ) ऐसे उन वर्गों के तृतीय और चतुर्थ वर्णों के स्थान पर उसी वर्ग के क्रमशः प्रथम और द्वितीय अक्षर होते हैं । ( गगनम् ) 'नपुंसके' ६२ से सु को बिन्दु, इससे द्वितीय गकार के स्थान पर ककार, 'कगचज०' २ से प्राप्त लोप का बाध, गकनं । ( मेघः ) 'अत ओत्सोः' ४२ से सु को ओ, इससे 'घ' को 'ख', 'खघ०' २३ से प्राप्त 'ह' का बाध, मेखो । ( राजा ) 'राज्ञश्च' ५–३६ से आ, इससे 'ज' को 'च', 'कग०' २ से प्राप्त लोप का बाध, राचा । (निर्झरः) 'सर्वत्र ल०' ५ से रलोप, इससे 'झ' को 'छ', 'शेषादेशयो०' ६ से द्वित्व, 'वर्गेषु' ७ से 'छ' को 'च', नो णः'२५ से णत्व, 'अत ओत्' ४२ से ओकार, णिच्छरो । (बडिशम्)'शषोः सः' २६ से 'श' को 'स', इससे 'ड' को 'ट', ६२ से बिन्दु, बटिसं । (दशवदनः) 'शषोः सः' २६से स, 'अतः' ४२ से ओकार, इससे 'द' को 'त', 'कगच०' २ से प्राप्त लोप का बाध, दस-

वतनो। (माधवः) 'अतः'४२ से ओ, इससे 'ध' को 'थ','खघथ०' २३ से प्राप्त ह का बाध, माधवो। (शलभः) 'शषोः'२६ से स, ४२ से ओ, इससे 'भ' को 'फ', २३ से प्राप्त ह का बाध, सलफो। अयुजोः—ऐसा क्यों कहा ? नहीं तो संग्राम में संयुक्त 'ग्रा' के स्थान में कादेश होता, संयुक्त होने से यहाँ नहीं हुआ। किन्तु (संग्रामः) में 'सर्वत्र' ५ से रलोप, आदिस्थ होने से ग को द्वित्व नहीं, ४२ से ओ, संगामो। अनाद्योः—ऐसा क्यों कहा ? नहीं तो ( गमनम् ) के प्रथम ग को भी क हो जाता, अनाद्योः कहने से आदिस्थ गकार होने से ककार नहीं हुआ, ६२ से बिन्दु, गमनं ॥ ३ ॥

## इवस्य पिवः ॥ ४ ॥

**इवशब्दस्य स्थाने पिव इत्ययमादेशो भवति। कमलं पिव मुखं ( कमलं, मुखं संस्कृतसमौ शब्दौ, शे० स्प० ) ॥ ४ ॥**

इवस्य पिवः—इव इति सिद्धस्याव्ययस्य स्थाने पिव-इत्ययमादेशः स्यात्। कमलं पिव मुखं ( कमलमिव मुखम्)। कमलं ( अत्र सोर्बिन्दुः ), ( मुखं-इत्यत्रापि ), इमावुभावपि शब्दौ संस्कृतेन समौ, केवलम् इवेत्यव्ययस्य स्थाने पिवादेशः ॥ ४ ॥

इवस्येति। इव इस अव्यय के स्थान में पैशाची भाषा में पिव आदेश होता है। कमलम् इव मुखम्—यहाँ पर इव के स्थान पर पिव आदेश हुआ और कमलम् तथा मुखम् इन दोनों में 'नपुंसके सोर्बिन्दुः' से बिन्दु होने से रूप-सिद्धि हुई ॥ ४ ॥

## णो नः ॥ ५ ॥

**णकारस्य स्थाने न इत्ययमादेशो भवति। तलुनी (स्प०)। तरुणी[1] ॥**

णो नः—पैशाचीभाषायां णकारस्य स्थाने सर्वत्रैव न इत्ययमादेशः कर्तव्यः। (तरुणी) अनेन नकारः, तथा 'रसोर्लशौ'विति हेमसूत्रेण लत्वम्। तथा च तलुनी ॥ ५ ॥

ण इति। पैशाचीभाषा में सर्वत्र 'ण' इस अक्षर के स्थान पर 'न' यह आदेश करना चाहिए। ( तरुणी ) में हेमसूत्र 'रसोर्लशौ' से रुकार के रकार को लकार और प्रकृत सूत्र से णकार के स्थान पर नकार करने से 'तलुनी' यह बनता है ॥ ५ ॥

## ष्टस्य सटः ॥ ६ ॥

**ष्ट इत्यस्य स्थाने सट इत्ययमादेशो भवति। कसटं मम वट्टइ ( ५-३० बिं०, मम तत्समः, ३-२२ र्तस्य टः, ३-५० टद्वि०, ७-१ त = इ )। कष्टं मम वर्तते ॥ ६ ॥**

ष्टस्य सटः—अस्यां भाषायां मूलादागतस्य 'ष्ट' इति वर्णस्य स्थाने 'सट' इति आदेशो भवति। ( कष्टं मम वर्तते स्पष्टम् ) कसटं मम वट्टइ फसटं ॥ ६ ॥

ष्टस्येति। पूर्व में स्थित ष्ट इस अक्षर के स्थान में सट यह आदेश हो। कष्टं मम वर्तते स्पष्टम्—यहाँ कष्टशब्दगत 'ष्ट' के स्थान पर सट करने पर ६२ से बिन्दु 'कसटं' हुआ, मम-यह संस्कृतसम है और ६-५० से सिद्ध भी है, वर्तते में ३-२२ 'र्तस्य टः' से र्त

---

१. रसोर्लशौ। ८।४।२८८। मागध्यां रेफस्य दन्त्यशकारस्य च स्थाने यथासंख्यं लकारस्तालव्यशकारश्च भवति। हे०। बाहुलकात् पैशाच्यामपि भवति।

को ट, ३-५० 'शेषादेश०' से टद्वित्व, तथा ७-१ 'ततिपो०' से त को इ = वट्टइ, स्पष्टम् में ३-३६ 'स्पस्य' इससे फ, प्रकृत से ष्ट को सट तथा 'सोर्बिन्दुर्नपुंसके' ५-३० से बिन्दु, फसटं बनेगा । कसटं मम वट्टइ फसटं ॥ ६ ॥

## स्नस्य सनः ॥ ७ ॥

**स्न इत्यस्य स्थाने सन इत्ययमादेशो भवति । सनानं । सनेहो (स्प०, पू० विभक्तिः साध्या ) । स्नानम् । स्नेहः ॥ ७ ॥**

**स्नस्य सनः**—सकारनकाराभ्यां संयुक्तस्य 'स्न' इति वर्णस्य स्थाने सन-इत्ययमादेशो भवति । सनानं = स्नानम्, सनेहो = स्नेहः ॥ ७ ॥

स्नस्येति । संयुक्त 'स्न' के स्थान पर 'सन' यह आदेश होता है । ( स्नानम् ) स्ना के स्थान पर प्रकृत सूत्र से 'सना' हुआ और ५-३० से बिन्दु, सनानं । ( स्नेहः ) स्ने के स्थान पर 'सने' करने पर ५-१ से ओ, सनेहो ॥ ७ ॥

## र्यस्य रिअः ॥ ८ ॥

**र्य इत्यस्य स्थाने रिअ इत्ययमादेशो भवति । भारिआ । भार्या ॥**

**र्यस्य रिअः**—संयुक्तस्य 'र्य'-इत्यस्य स्थाने 'रिअ' इत्यादेशः स्यात् । ( भार्या ) रिआदेशे कृते भारिआ ॥ ८ ॥

र्यस्येति । संयुक्त अर्थात् र्-युक्त य के स्थान में 'रिअ' आदेश हो । भार्या में र्य के स्थान पर 'रिअ' आदेश प्रकृत सूत्र से करने पर स्त्रीत्व होने से आकार, भारिआ ॥ ८ ॥

## ज्ञस्य ञ्ञः ॥ ९ ॥

**ज्ञ इत्यस्य स्थाने ञ्ञ इत्ययमादेशो भवति । विञ्ञातो ( ५-१ ओ, शे० स्प० ) । सव्वञ्ञो ( ३-३ रलोपः, ३-५० वद्वि०, शे० स्प० पू० ) । विज्ञातः । सर्वज्ञः ॥ ९ ॥**

**ज्ञस्य ञ्ञः**—जकार-ञकाराभ्यां संपन्नस्य ज्ञ-इत्यक्षरस्य स्थाने ञ्ञ-इत्यादेशः स्यात् । ( विज्ञातः ) = विञ्ञातो । ( सर्वज्ञः ) = सव्वञ्ञो ॥ ९ ॥

ज्ञस्येति । 'ज्ञ' इस अक्षर के स्थान में 'ञ्ञ' यह आदेश हो । विज्ञातः—प्रकृत सूत्र से ञ्ञ करने पर ५-१ से ओ, विञ्ञातो । सर्वज्ञः—'सर्वत्र लवराम्' से रलोप, 'शेषादेशयोः' से वद्वित्व, प्रकृत से ञ्ञ, 'अत ओत्सोः' से ओकार, सव्वञ्ञो ॥ ९ ॥

## कन्यायां न्यस्य ॥ १० ॥

**कन्याशब्दे न्यस्य स्थाने ञ्ञ इत्ययमादेशो भवति । कञ्ञा ( स्पष्टम् )॥**

**कन्यायां न्यस्य**—कन्याशब्दान्तर्गतस्य 'न्ये'त्यक्षरस्य स्थाने 'ञ्ञ' आदेशो भवति । कन्या = कञ्ञा ॥ १० ॥

कन्येति । कन्या-शब्द के 'न्य' के स्थान पर ञ्ञ आदेश होता है । कन्या । प्रकृत सूत्र से ञ्ञ-आदेश करने पर कञ्ञा ॥ १० ॥

## ज्ञ च्च ॥ ११ ॥

ज्जशब्दस्य शौरसेनीसाधितस्य स्थाने च्च इत्ययमादेशो भवति। कच्चं। कार्यम्[1] ॥ ११ ॥

ज्ज च्च—'ज्ज' इति लुप्तषष्ठीकं, च्चेति प्रथमान्तं पदम्, शौरसेनीनियमसिद्धस्य 'ज्ज'वर्णस्य स्थाने च्च-इत्यादेशो भवति। संयुक्तत्वात् 'वर्गाणा'मिति सूत्रेणाप्राप्तस्य विधानम्। कार्यम् = कच्चं ॥ ११ ॥

ज्जेति। शौरसेनीनियम से साधित 'ज्ज' के स्थान पर 'च्च' यह आदेश होता है। कार्यम् = 'र्यशय्याभिमन्युषु जः' इससे र्य के स्थान पर ज, 'शेषादे०' से द्वित्व होने पर 'ह्रस्वः संयोगे' से ह्रस्व करने पर 'कज्ज' इस दशा में प्रकृत से 'ज्ज' को 'च्च', 'सोर्बिन्दुर्नपुंसके' से बिन्दु, 'कच्चं' यह रूप पैशाची में सिद्ध होता है ॥ ११ ॥

## राज्ञो राचि टाङसिङस्ङिषु वा ॥ १२ ॥

राजन्-शब्दस्य टा, ङसि, ङस्, ङि-इत्येतेषु परतो राचि इत्ययमादेशो वा भवति। राचीना (५-४१ टा = णा कृते, १०-५ णा = ना[2], शे० स्प०)। रञ्ञा (राज्ञा अत्र १०-९ ज्ञा = ञ्ञा, ह्रस्वः संयोग इति ह्रस्वः, एवमग्रेऽपि)। राचिनो (५-३८ ङसि, ङस् = णो[3], १०-५ णो = नो)। रञ्ञो। राचिनि, रञ्ञि। (राचि=ङि ५-२८ ङि=णो, शे० पू०)। राज्ञः। राज्ञि। एतेष्विति किम्? राचा। राचानं। रञ्ञो (राजा इत्ययुक्तस्य १०-३ सू० जा = चा, एवं राजानं = राचानं। राज्ञः १०-९ ज्ञ = ञ्ञ) ॥ १२ ॥

राज्ञो राचि टा-ङसि-ङस्-ङिषु वा—राजन्-शब्दस्य टा-ङसि-ङस्-ङिषु परेषु 'राचि'-इत्ययमादेशो विकल्पेन भवति। टा-राचिना, रञ्ञा = राज्ञा। ङसिङसोः—राचिनो, रञ्ञो = राज्ञः, पञ्चमीषष्ठयोः। ङौ-राचिनि, रञ्ञि = राज्ञि। पूर्वोक्तास्वेव विभक्तिषु इति किम्? सौ-राचा, अमि-राचानं-इत्यत्रापि स्यात्, न च भवति ॥ १२ ॥

राज्ञ इति। टा-ङसि-ङस्-ङि इन पर रहते राजन्-शब्द को राचि यह आदेश विकल्प से होता है। टा, राचिना—राजन्शब्द से टा पर रहते प्रकृत सूत्र से राचि आदेश, 'टा णा' ५-४१ से टा को णा, 'णो नः' १०-५ से ण को न, राचिना। राचि आदेश के अभाव पक्ष में-'ज्ञस्य ञ्ञः' १०-९ से ञ्ञ आदेश, 'ह्रस्वः संयोगे' से ह्रस्व, रञ्ञा = राज्ञा। इसी प्रकार ङसि तथा ङस् पर रहते प्रकृत से राचि आदेश, 'जश्शसङसां णो' ५-३८ में 'ङस्' से ङसि, ङस् दोनों का ग्रहण होने से पञ्चमी तथा षष्ठी दोनों विभक्तियों में ङसि-ङस् को णो आदेश, 'णो नः' १०-५ से ण को न, राचिनो। अभावपक्ष में-'ज्ञस्य०' १०-९ से ञ्ञ आदेश, 'ह्रस्वः संयोगे' से ह्रस्व, रञ्ञो = राज्ञः। एवं ङि = सप्तमी के एकवचन में-इससे राचि आदेश, 'जश्शस्०' ५-३८ से णो, ण को नत्व, ह्रस्व, राचिनि।

१. ३-१७ प्रतिपादितस्येत्यर्थः। तत्र ज्ज इति पाठान्तरं दृश्यते। प्राकृतस्य शौरसेनी-व्यवहारस्य प्रायशो दर्शनाच्च। २. लाक्षणिकत्वाऽपीति साम्प्रदायिकाः। ३. तत्र ङस्ग्रहणान्ङसेरपि ग्रहणम्।

पक्षान्तर में-रश्मि = राशि । सिद्धि पूर्ववत् । टा-ङसि-ङस्-ङि पर रहते ही राचि आदेश क्यों ? ऐसा न कहेंगे तो-राचा, राचानं इत्यादि में भी होगा, परन्तु होता नहीं ॥ १२ ॥

## क्त्वस्तूनं ॥ १३ ॥

**क्त्वाप्रत्ययस्य स्थाने तूनं इत्ययमादेशो भवति । दातूनं ( दाधातोः क्त्वास्थाने तूनमादेशः ) । कातूनं ( ८-१७ कृञ् = का, शे० पू० ) । घेत्तूनं ( ८-१६ ग्रह = घेत् , शे० स्प० ) ॥ १३ ॥**

क्त्वस्तूनं—पैशाचीभाषायां क्त्वा-प्रत्ययस्य स्थाने तूनं-इत्यादेशो भवति । दातूनं । कातूनं । घेत्तूनं ॥ १३ ॥

क्त्व इति । पैशाची में क्त्वा-प्रत्यय के स्थान पर तूनं यह आदेश होता है। (दत्वा) दा धातु से क्त्वाप्रत्यय, प्रकृत से तूनं आदेश, दातूनं । ( कृत्वा ) कृञ् धातु से क्त्वा, प्रकृत से क्त्वा को तूनं, 'कृञः का०' ८-१७ से कृ को का, कातूनं । ( गृहीत्वा ) ग्रह धातु से क्त्वा, इससे क्त्वा को तूनं, 'घेत् क्त्वातुमुन्तव्येषु' ८-१६ से ग्रह को घेत् आदेश, घेत्तूनं ॥ १३ ॥

## हृदयस्य हितअकं ॥ १४ ॥

इति श्रीवररुचिकृतेषु प्राकृतसूत्रेषु दशमः परिच्छेदः ।

**हृदयशब्दस्य हितअकं निपात्यते । हितअकं हरसि मे तलुनि ( १-२७ ऋ = अ, ७-२ थास् , सिप् = सि । मे तत्समः, तुलनि ५-२९ ह्रस्वः, शे० १०-५ सू० स्प० ) ॥ १४ ॥**

इति श्रीभामहकृतायां मनोरमाव्याख्यायां पैशाचिको नाम दशमः परिच्छेदः[1] ॥

---

१. ण्यो ञ्ञः पैशाच्याम् ८।४।३०६ । अभिमञ्ञू । पुञ्ञकम्मो । पुञ्ञाहं । कञ्ञका । लो ळः ८।४।३०८ । लकारस्य ळकार एव । सीळं । कुळं । सलिळं । न कगजादिषट्स-सम्यन्तसूत्रोक्तम् ८।४।३२४ । इति सूत्रेण प्रायो द्वितीयपरिच्छेदस्थकार्याभावोऽत्र ज्ञेयः । यथा—सुबुसा । क्वचित्तृतीयस्यापि । तेन भगवती पव्वतीत्यादौ न तलोपः । पताका, वेतसो-इत्याद्यपि च सिद्धयति । तथा च मकरकेतू-सगरपुत्तवचनं-'विजयसेनेन लपित'-मित्यादि सङ्गच्छते । शषोः सस्तु भवति, 'शषोः सः' ८।४।३०९ । इति पुनः सूत्राऽऽरम्भाद् । हृदये यस्य पः ८।४।३१० । हितपकं । किंपि किंपि हितपके अत्थं चिन्तय-मानी । टोस्तुर्वा ८।४।३११ । कुतुम्बकं—कुटुम्बकं । ट्धूनत्थूनौ ष्ट्वः ८।४।३१३ नद्धून–नत्थून । तद्धून । तत्थून । र्य स्न-ष्टां रिय-सिन-सटाः क्वचित् । ८।४।३१४ । यथासंख्यम् । भार्या = भारिया । स्नातम् = सिनातम् । कष्टम् = कसटम् । क्वचिदिति किम् ? सुज्जो । सुनुसा । तिट्ठो-इत्यादि । सूर्यः । स्नुषा । दिष्टम् । यादृशादेर्दुस्ति ८।५।३१७ यातिसो । तातिसो । केतिसो । एतिसो । युम्हातिसो, अम्हातिसो । यादृशः । तादृशः । कीदृशः । एतादृशः । युष्मादृशः । अस्मादृशः । अन्यादृशस्य तु अञ्ञादिसो-इति । शेषं शौरसेनीवदवगन्तव्यम् । हेमस्तु पैशाचीशुद्धचूलिका-

हृदयस्य हितअक – हृदय-शब्दस्य स्थाने पैशाच्यां हितअकं-इति निपात्यते। हृदयं हरसि मे तरुणि !, हृदयम् इत्यस्य स्थाने निपातनात् हितअकं। एवं पूर्णस्य वाक्यस्य पैशाचीरूपान्तरमिदम्—हितअकं हरसि मे तलुनि !-इति ॥ १४ ॥

इति श्रीहोशिङ्ग-जगन्नाथशास्त्रिकृतायां चन्द्रिकापूरण्यां प्राकृतप्रकाश-
व्याख्यायां पैशाचिको नाम दशमः परिच्छेदः।

हृदयस्येति। पैशाची में हृदय के स्थान पर हितअकं निपातन से किया जाता है। हितअकं हरसि मे तलुनि ! में 'हृदयं' के स्थान पर हितअकं-ऐसा व्यवहार में आता है। हरसि में हृधातु, 'ऋतोऽत्' १-२७ से ऋ को अर, 'थास्सिपोः सिसे' ७-२ से सि, मे संस्कृत-सम, 'मे मम०' ६-५० से सिद्ध भी, तरुणि ! में 'णो नः' १०-५ से ण को न, 'रसोर्लशौ' इस हेमसूत्र से ल, 'ईदूतो०' ५-२९ से सम्बुद्धि में ह्रस्व, तलुनि। 'हितअकं हरसि मे तलुनि' इति ॥ १४ ॥

इति प्राकृतप्रकाशस्य प्रदीपाख्यसरलहिन्दीव्याख्यानस्य पूरण्यां
दशमः परिच्छेदः।

---

भेदेन द्विधा भित्त्वा 'वर्गाणा'मिति प्रतिपादितं कार्यं चूलिकाविषयकं मन्यते। पैशाच्यां दकारस्य तकारविधानार्थं 'तदोस्तः' ८।४।३०७। सूत्रमेव पठितवान्। मतनपरवसो = मदनपरवश इति। अत एव पैशाच्यां सगरपुत्तवचनं, भगवतीत्याद्युदाजहार। तत्र 'रस्य लो वे'ति भेदमेकमित्य-
[मुदाजहार। 'उच्छलन्ति समुद्दा, सइला निपतन्ति, तं हलं नमथं'-इति। अन्यत् पूर्ववत्।

# अथैकादशः परिच्छेदः

## मागधी ॥ १ ॥

**मागधानां भाषा मागधी, लक्ष्यलक्षणाभ्यां स्फुटीक्रियते ॥ १ ॥**

मागधी—मागधानां मगधदेशवासिनां लोकानां पारस्परिकव्यवहारप्रवृष्टा तैरुच्यमाना भाषा मागधीति संज्ञिता भवति । सा च सम्प्रति लक्ष्यलक्षणाभ्यां स्पष्टीक्रियते । परिच्छेदसमाप्ति यावत् एतत्सूत्रस्याधिकारः ॥ १ ॥

मागधीति । मगध-देश-निवासियों के आपस के व्यवहार में बोली जानेवाली उनकी भाषा मागधी कहलाती है । उदाहरण एवं लक्षणों से उसे स्पष्ट करते हैं । यह परिच्छेद-समाप्ति तक अधिकार सूत्र है । अतः प्रत्येक सूत्र से साधित रूप मागधी भाषा के हैं—ऐसा अर्थ समझना होगा ॥ १ ॥

## प्रकृतिः शौरसेनी ॥ २ ॥

**अस्या मागध्याः प्रकृतिः शौरसेनी[1]-इति वेदितव्यम् ॥ २ ॥**

प्रकृतिः शौरसेनी—मागधीभाषाया अपि प्रकृतिः अर्थात् मूलाश्रयवती पैशाचीवत् शौरसेन्येव भाषा वर्त्तते-इति ज्ञेयम् ॥ २ ॥

प्रकृतिरिति । मागधी-भाषा की भी पैशाची-भाषा के समान प्रकृति = मूल आधार शौरसेनी भाषा ही है । शौरसेनी के नियमों से सिद्ध शब्दों में प्रकृतिप्रत्ययादि के कुछ परिवर्तन द्वारा मागधी नामक भाषा बनती है—ऐसा समझना चाहिए ॥ २ ॥

## षसोः शः ॥ ३ ॥

**षकारसकारयोः स्थाने शो भवति । माशे । विलाशे । ( रूप० ) । माषः । विलासः ॥ ३ ॥**

षसोः शः—शौरसेनीनियमानुसारं सिद्धानां शब्दानां मध्ये वर्तमानयोः षकार-सकारयोः मूर्धन्यदन्त्ययोः स्थाने तालव्यः शः = शकारो भवति । ( माषः ) = माशे । ( विलासः ) = विलाशे ॥ ३ ॥

षसोरिति । शौरसेनी के नियमों द्वारा साधित शब्दों में वर्तमान मूर्धन्य और दन्त्य ष-स के स्थान पर तालव्य शकार होता है । ( माषः ) प्रकृत सूत्र से 'ष' के स्थान में 'श', 'अत इदेतौ' ११-१० इससे एकार, माशे । इसी प्रकार (विलासः) का विलाशे ॥३॥

## जो यः ॥ ४ ॥

**जकारस्य यकारो भवति । यायदे ( प्रायोग्रहणात् २–२ यलोपो न, १२–२ त् = द् ) । जायते ॥ ४ ॥**

---

१. प्राकृतस्याप्यत्र ग्रहणं वेदितव्यम् ।

जो यः—जकारस्य स्थाने यकारो भवति। ( जायते ) यायदे ॥ ४ ॥

ज इति। शौरसेनीसिद्ध शब्द में वर्तमान जकार के स्थान पर यकार आदेश होता है। जायते—यहाँ शब्द के आदि में वर्तमान ज को इससे य हुआ, 'कगच०' २-२ में प्रायोग्रहण से 'य' का लोप नहीं, 'अनादावयुजो०' १२-३ से त को द, यायदे ॥ ४ ॥

## चवर्गस्य स्पष्टता तथोच्चारणः ॥ ५ ॥

**चवर्गो यथास्पष्टस्तथोच्चारणो भवति। पलिचए ( रसोर्लशौ ८।४।२८० हेम० सू० र्=ल्, २-२ यलोपः, एत्वं पूर्ववत्)। गहिदच्छले (२-२७ ऋ=अ, १२-३ त = द्, शे० पू०)। वियले (११-४ ज=य, शे० पू०)। णिज्झले ( एत्वं पूर्ववत्, शे० ३-५१ सू० स्प० )। परिचयः। गृहीत-च्छलः। विजलः। निर्झरः ॥ ५ ॥**

चवर्गस्य स्पष्टता तथोच्चारणः—चवर्गस्य यथा स्पष्टमुच्चारणं स्यात्तथा तस्योच्चारणं कर्तव्यम्। ( परिचयः ) पलिचए। ( गृहीतच्छलः )=गहिदच्छले। (विजलः)= वियले। ( निर्झरः )= णिज्झले ॥ ५ ॥

चवर्गेति। चवर्ग की स्पष्टता झलकानेवाला उच्चारण इस भाषा में करना चाहिए। ( परिचयः ) 'रसोर्लशौ' हेमसूत्र से ल, 'कगच०' २-२ से यलोप, 'अत इ०' ११-१० से एत्व, पलिचए। ( गृहीतच्छलः ) 'ऋतोऽत्' १-२७ से ऋ को अ, 'अनादावयु० १२-३ से त को द, ह्रस्व, पूर्ववत् एत्व, गहिदच्छले। ( विजलः ) 'जो यः' ११४ से ज को य, पूर्ववत् एत्व, वियले। ( निर्झरः ) 'सर्वत्र ल०' ३-३ से रलोप, 'शेषादे०' ३-५० झद्वित्व, 'वर्गेषु युजः' ३-५१ से झ को ज, 'रसोर्लशौ' हेमसूत्र से र को ल, पूर्ववत् एत्व, 'नो णः सर्वत्र' २-४२ से नि के न को णत्व, णिज्झले ॥ ५ ॥

## हृदयस्य हडक्कः ॥ ६ ॥

**हृदयस्य स्थाने हडक्को भवति। हडक्के आलले मम ( स्पष्ट० )। हृदये आदरो मम ॥ ६ ॥**

हृदयस्य हडक्कः—मागध्यां हृदयशब्दस्य स्थाने हडक्क-इत्यादेशो भवति। हृदये आदरो मम = हडक्के आलले मम ॥ ६ ॥

हृदयेति। हृदय-शब्द के स्थान में हडक्क-आदेश होता है। ( हृदये ) इससे हडक्क आदेश, 'ङेरेम्मी' ५-९ से ए, हडक्के। ( आदरः ) 'अत इदेतौ०' ११-१० से एत्व, 'रसोर्लशौ' से लत्व, आलले। मम-तत्समशब्द। एवं 'हडक्के आलले मम' इति ॥ ६ ॥

## र्यर्जयोर्य्यः[1] ॥ ७ ॥

**र्यकारर्जकारयोः स्थाने य्यो भवति। कय्ये ( संयोगे ह्रस्वः, ११-१० एत्वम्)। दुय्यणे(२-४२ न्=ण्, पूर्ववत् एत्वम्)। कार्य्यम्। दुर्जनः॥७॥**

---

१. क्वचिद् ज्ज इति पाठस्तन्मते-कज्ज, दुज्जनो-इति।

र्यर्जयोर्य्यः—रकारयुक्तयोर्यकारजकारयोः र्य-र्ज इति वर्णयोः स्थाने य्य इत्यादेशः स्यात् । ( कार्यम् ) र्यस्य य्यकारादेशे, 'सन्धावचा' ४-१मन्तर्गतेन 'संयोगे ह्रस्वः' इति सूत्रेण ह्रस्वे, कय्य इति जाते पूर्ववद् एत्वे, कय्ये । एवमेव दुय्यणे ( दुर्जनः ) ॥७॥

र्येति । र्य और र्ज के स्थान में य्य आदेश हो । ( कार्यम् ) प्रकृत से र्य के स्थान में य्य, 'सन्धावचां०' ४-१ के अन्तर्गत संयोग पर रहते ह्रस्व, पूर्ववत् एत्व, कय्ये । ( दुर्जनः ) प्रकृत से र्ज को य्य, 'नो णः०' २-४२ से णत्व, पूर्ववत् एत्व, दुय्यणे ॥ ७ ॥

## क्षस्य स्कः ॥ ८ ॥

**क्षस्य स्थाने स्ककारो भवति । लस्कशे । दस्के ( पलिचप-वत् र = ल, ११-३ स=श, एत्वं माशेवत् । एवं दस्के ) । राक्षसः । दक्षः ॥ ८ ॥**

क्षस्य स्कः—क्ष-इत्यक्षरस्य स्थाने स्क-इत्यादेशः स्यात् । ( राक्षसः ) = लस्कशे । ( दक्षः ) = दस्के । उभयत्र क्षस्य स्थाने स्कादेशः । एत्वम् ॥ ८ ॥

क्षस्येति । मागधी में क्ष के स्थान पर स्क-आदेश हो । (राक्षसः) इससे क्ष को स्क, 'षसोः शः' ११-३ से स को श, पूर्ववत् एत्व, 'रसोर्लशौ' से ल, 'सन्धा०' ४-१से संयोग पर रहते ह्रस्व, एत्व, लस्कशे । ( दक्ष ) प्रकृत से क्ष को स्क, पूर्ववत् एत्व, दस्के ॥ ८ ॥

## अस्मदः सौ हके-हगे-अहके ॥ ९ ॥

**अस्मदः स्थाने सौ परतो हके, हगे, अहके इत्येत आदेशा भवन्ति । हके, हगे, अहके भणामि । ( स्प० ) अहं भणामि ॥ ९ ॥**

अस्मदः सौ हके-हगे-अहके—सौ परतः अस्मदः स्थाने हके, हगे, अहके इति त्रय आदेशा भवन्ति । आशयः—अहम्-इत्यस्य पूर्वोक्तानि त्रीणि रूपाणि भवन्तीति । ( अहं भणामि ) अहम्-इत्यत्र हके, हगे, अहके भणामि ॥ ९ ॥

अस्मद इति । अस्मद्शब्द को प्रथमैकवचन सुविभक्ति में हके, हगे, अहके ये तीन रूप होते हैं । हके, हगे, अहके=( अहं ), भणामि-तत्समक्रिया । भण्धातु से'इडमिपोर्मिः' ७-३ से मि, 'अत आ मिपि वा' ७-३० से आत्व ॥ ९ ॥

## अत इदेतौ लुक् च ॥ १० ॥

**साविस्यनुवर्तते । अकारान्ताच्छब्दात्सौ परत इकारैकारौ भवतः, पक्षे-लोपश्च । एशि (एतत्सूत्रेण इकारैकारौ । पक्षे लुप्यते, ११-३ ष=श) । लाआ (राजा इत्यत्र रसोर्लशौ इति हेम० व्याकरणानुसारं र=ल, शे० ५-३६ सू०स्प० ) । एशे (एशिवत् शकारः,शे०स्प०) । पुलिशे (लाआवत् लकारः, शे० पू० ) । एष राजा । एष पुरुषः ॥ १० ॥**

अत इदेतौ लुक् च—'अस्मदः सौ०' इत्यतः सौ-इत्यस्यानुवृत्तिः । अकारान्तात् शब्दात् सौ परतः इदेतौ भवतः, तत्पक्षे लोपश्च भवति । (एष राजा) = एशि लाआ । ( एष पुरुषः ) = एशे पुलिशे । इत्वपक्षे-एशि-इति, एत्वपक्षे-एशे-इति । उभयत्रापि सोर्लोपः ॥ १० ॥

अत इति। इस सूत्र में पूर्व सूत्र से 'सौ' की अनुवृत्ति करते हैं तब अर्थ होता है कि अकारान्त शब्द को 'सु' पर रहते इ, ए होते हैं तभी सु का लोप भी होता है। (एषः) 'तदेतदोः सः०' ६-२२ से तकार को सकार, 'अन्त्यस्य हलः' ४-६ से दलोप, 'एतदः सावोत्वं वा' ६-१९ से प्राप्त ओत्व को बाध कर मागधी में प्रकृत सूत्र से इत्व तथा सुलोप, एशि। एत्वपक्ष में—एशे। उभयत्र 'षसोः शः' १४-३ से शकार। (राजा) 'रसोर्लशौ' हेमसूत्र से र को ल, 'राज्ञश्च' ५-३६ से आ, 'कगचज०' २-२ से जलोप, लाआ। (पुरुषः) 'रसोः' इससे ल, 'षसोः शः' ११-३ से शकार, 'इत्पुरुषे रोः' १-२३ से उकार को इकार, पूर्ववत् एत्व, पुलिशे ॥ १० ॥

## क्तान्तादुश्च ॥ ११ ॥

क्तप्रत्ययान्ताच्छब्दात्सौ परतः उकारश्च भवति, चकाराद् इदेतौ लुक् च। हशिदु, हशिदि, हशिदे, हशिद। (शकारः पूर्ववत्, शे० स्प० पू०)। हसितः ॥ ११ ॥

क्तान्तादुश्च—क्तप्रत्ययान्तात् शब्दात् सौ परतः उकारो भवति, चकारादिदेतौ लुक् च। (हसितः) उकारे-शत्वे लुकि च हशिदु। इत्वे-हशिदि। एत्वे-हशिदे इति त्रीणि रूपाणि ॥ ११ ॥

क्तान्तादिति। क्त-प्रत्यय है अन्त में जिसके ऐसे शब्द को सु-पर रहते उकार होता है। सूत्र में चग्रहण से इकार और एकार भी होते हैं और सु का लोप भी। हस् धातु से क्तप्रत्यय करने पर सिद्ध क्तप्रत्ययान्त हसित-शब्द है, उसे सु पर रहते क्तप्रत्ययवाले अकार को उकार, इकार, एकार तथा लोप करने पर 'षसोः' ११-३ से स को श किया, तब हशिदु, हशिदि, हशिदे ये तीन रूप हुए ॥ ११ ॥

## ङसो हो वा दीर्घत्वं च ॥ १२ ॥

ङसः षष्ठ्येकवचनस्य स्थाने हकारादेशो वा भवति तत्संयोगे च दीर्घत्वम्। पुलिशाह (पुलिशवत् र = ल, शकारश्च, शे० स्प०)। धणे (२-४२ न् = ण्, एत्वं मालेवत्)। पक्षे-पुलिशश्श धणे (५-८ ङस् = स्स, ११-३ स्स = श्श, शे० पू०)। पुरुषस्य धनम् ॥ १२ ॥

ङसो हो वा दीर्घत्वं च—षष्ठीविभक्तेरेकवचनस्य ङसः स्थाने हकारो विकल्पेन भवति, तत्संयोगे च दीर्घत्वमपि भवति। (पुरुषस्य) पुरुष + ङस् इति स्थितौ प्रकृत-सूत्रेण वैकल्पिके हकारे, तत्संयोगे दीर्घे च कृते पुरुषाह इति जाते, हेमसूत्रेण 'रसोर्लशा'-वित्यनेन लकारे, 'इत्पुरुषे रोः' १-२३ इत्यनेन रोरुकारस्य इत्वे, 'षसोः शः' इति शत्वे पुलिशाह-इति सिद्धम्। पक्षान्तरे-'स्सो ङसः' ५-८ इति सूत्रेण ङसः स्सकारादेशे, पूर्ववत् इत्वे, लत्वे, शकारे च कृते पुलिशश्श इति रूपं सिद्धयति। धनम्-णत्वे, एत्वे च धणे-इति। पुलिशाह, पुलिशश्श वा धणे = पुरुषस्य धनम् ॥ १२ ॥

ङस इति । षष्ठी के एकवचन के ङस्–प्रत्यय के स्थान पर 'ह' यह आदेश विकल्प से होता है, उसी समय उसके साथ ही तत्पूर्ववर्ती स्वर को दीर्घ भी होता है । उदाहरण– पुलिशाह धणे, अथवा पुलिशश्श धणे । पुलिशाह और पुलिशश्श दोनों स्थान पर 'इत्पुरुषे रोः' से रुके उकार को इकार, 'रसोर्लशौ' से लकार । ङस् को प्रकृत सूत्र से हकारादेश के पक्ष में दीर्घ भी होने पर पुलिशाह । पक्षान्तर में–'स्सो ङसः' से ङस् को स्स करने पर ष और स्स को 'षसोः शः' से शकार करने पर पुलिशश्श–इति । धनम्– को 'नो णः' से णत्व, पूर्ववत् एत्व करने पर धणे सिद्ध होता है ॥ १२ ॥

## अदीर्घः सम्बुद्धौ ॥ १३ ॥

**अदन्तादित्येव । अदन्ताच्छब्दादकारो दीर्घो भवति सम्बुद्धौ । पुलिशा आगच्छ । माणुशा ( २–५२ न–ण, ११–३ ष = श, ५–२ जसो लोपः ) आगच्छ । सम्बुद्धाविति किम् ? बम्हणश्श धणे ( ५–४७ सू० स्प०, शे० पुलिशश्शवत् ) । ब्राह्मणस्य धनम् ॥ १३ ॥**

अदीर्घः सम्बुद्धौ—ह्रस्वाकारान्तादित्येव । अस्य दीर्घः = अदीर्घः इति षष्ठी-तत्पुरुषः । ह्रस्वाकारान्तस्य शब्दस्य अन्ते वर्तमानोऽकारो दीर्घो भवति सम्बुद्धौ । पुलिशा आगच्छ, माणुशा आगच्छ । = हे पुरुष ! आगच्छ । हे मानुष ! आगच्छ । सम्बुद्धाविति किम् ? बम्हणश्श धणे ( ब्राह्मणस्य धनम् ) ॥ १३ ॥

अदीर्घ इति । अदन्त (ह्रस्व अकारान्त) से ही । अदीर्घः में नञ्–तत्पुरुष नहीं किन्तु 'अस्य दीर्घः' इस प्रकार षष्ठीतत्पुरुष समास है । ह्रस्व अकारान्त शब्द के अन्तिम अकार को सम्बुद्धि पर रहते दीर्घ होता है । ह्रस्व अकारान्त पुरुष शब्द से तथा मानुष शब्द से सम्बुद्धि के सु पर रहते उभयत्र षकारोत्तरवर्ती अकार को दीर्घ अर्थात् आ हुआ तब पुरुषा, मानुषा हुआ । पूर्वोदाहरण में 'इत्पुरुषे रोः' से इत्व, 'रसोर्लशौ' से ल, 'षसोः शः' से श, पुलिशा इति । द्वितीयोदाहरण में 'णो नः सर्वत्र' से णत्व तथा 'षसोः शः' से शकार, माणुशा इति । सम्बुद्धौ ऐसा क्यों कहा ? नहीं कहते तो षष्ठी में 'बम्हणश्श' यहाँ पर भी दीर्घ प्राप्त हो जाता । यहाँ सम्बुद्धि न होने से दीर्घ नहीं हुआ ॥

## चिट्ठस्य चिष्ठः ॥ १४ ॥

**चिट्ठस्य[1] स्थाने चिष्ठ इत्ययमादेशो भवति । पुलिशे चिष्ठदि । ( पुलिशे व्याख्यातः, १२-१६ चिट्ठस्य चिष्ठः, १२-३ ति=दि ) । पुरुषस्तिष्ठति ॥१४॥**

चिट्ठस्य चिष्ठः—वक्ष्यमाणेन 'स्थश्चिट्ठः' १२-१६ इति सूत्रेण साधितस्य चिट्ठ-इत्यस्य स्थाने चिष्ठ-इत्यादेशो भवति । पुलिशे चिष्ठदि = पुरुषस्तिष्ठति । चिष्ठदि–स्थाधातोः शौरसेन्यां साधितस्य चिट्ठस्य स्थानेऽनेन चिष्ठादेशे 'अनादा०' १२-३ इति सूत्रेण तीत्यस्य तकारस्य दकारः, चिष्ठदि ॥ १४ ॥

---

१. 'स्थश्चिट्ठ' इति साधितस्येत्यर्थः ।

चिट्ठेति। शौरसेनी-भाषा-नियम के द्वारा साधित 'चिट्ठ' के स्थान में चिष्ठ आदेश होता है। पुलिशे चिष्ठदि=(पुरुषस्तिष्ठति) में पुलिशे की सिद्धि पूर्व में कही जा चुकी है। स्था धातु से वर्तमानकालिकप्रत्ययादेश ति करने पर वक्ष्यमाण 'स्थश्चिट्ठः' सूत्र से चिट्ठ होने पर प्रकृत से चिट्ठ को चिष्ठ, 'अनादावयुजोः' से तकार को दकार, चिष्ठदि॥

## कृञ्मृङ्गमां क्तस्य डः ॥ १५ ॥

डुकृञ् करणे, मृङ् प्राणत्यागे, गम्लृ गतौ एतेषां क्तप्रत्ययस्य स्थाने डकारो भवति। कडे। मडे। गडे (१-२७ ऋ = अ, एत्वं, सोर्लोपश्च माशेवत्, शे० स्प०)। कृतः। मृतः। गतः॥ १५॥

कृञ्-मृङ्-गमां क्तस्य डः—डुकृञ् करणे, मृङ् प्राणत्यागे, गम्लृ गतौ-एषां धातूनां परतः कृतस्य क्तप्रत्ययस्य स्थाने डकारो भवति। (कृतः) = कडे। (मृतः)= मडे। (गतः) = गडे॥ १५॥

कृञिति। कृञ् धातु, मृङ् धातु तथा गम् धातु से विहित क्तप्रत्यय के स्थान पर 'ड' यह आदेश होता है। कृतः-'ऋतोऽत्' १-२७ से ऋ को अ, प्रकृत से ड, पूर्ववत् प्रथमैकवचन में एत्व, सुलोप, कडे। मृतः=में कृतः के समान सब कार्य, मडे। गतः-उक्त सूत्र से ड, एत्व, सुलोप, गडे॥ १५॥

## क्त्वो दाणिः ॥ १६ ॥

क्त्वाप्रत्ययस्य स्थाने दाणि इत्ययमादेशो भवति। शहिदाणि गडे (११-३ स = श, ७-३३ इत्वं, शे० स्प०)। करिदाणि (१२-१५ कृञ्= कर, इकारः, पू० शे० स्प०)। आअडे (२-२ गलोपः, शे० पू०)। सोढ्वा गतः। कृत्वाऽऽगतः॥ १६॥

क्त्वो दाणिः—धातोर्विहितस्य क्त्वाप्रत्ययस्य स्थाने दाणि-इत्येष आदेशः स्यात्। शहिदाणि गडे = सोढ्वा गतः। करिदाणि आअडे = कृत्वा आगतः। षह मर्षणे-इत्यस्मात् क्त्वाप्रत्यये सूत्रेणानेन दाणि आदेशः, शहिदाणि। डुकृञ् करणे धातोः विहितस्य क्त्वाप्रत्ययस्य दाणि-इत्यादेशः, करिदाणि॥ १६॥

क्त्व इति। क्त्वाप्रत्यय के स्थान में मागधी भाषा में दाणि आदेश हो। षह् मर्षणे से क्त्वाप्रत्यय करने पर 'षसोः शः' से श, 'ए च क्त्वा०' ७-३३ से चकारात् इ, प्रकृत से दाणि आदेश, शहिदाणि=सोढ्वा। गडे-गतः पूर्व सूत्र में स्पष्ट किया गया है। करिदाणि = कृत्वा, कृधातु से क्त्वाप्रत्यय करने पर कृ+त्वा, 'डुकृञः करः' १२-१५ वक्ष्यमाण से कर, ७-३३ से इ, प्रकृत से दाणि, करिदाणि। आङ्पूर्वक गम् धातु से क्त-प्रत्यय, आ+ग+त इस स्थिति में 'कगच०' २-२ से गलोप, 'कृञ्-मृङ्-गमां क्तस्य डः' ११-१५ से ड, एत्व-सुलोप, आअडे॥ १६॥

## श्रृगालशब्दस्य शिआलाशिआलकाः ॥ १७ ॥

इति श्रीवररुचिकृतेषु सूत्रेष्वेकादशः परिच्छेदः !

**श्रृगालशब्दस्य स्थाने शिआलादय आदेशा भवन्ति । शिआले आअच्छदि । शिआलके आअच्छदि ( आङ्पूर्वक-गमेः २-६ गलोपः, १२ । स्प० ) । श्रृगाल आगच्छति ॥ १७ ॥**

इति श्रीभामहविरचिते प्राकृतप्रकाशस्य मनोरमाव्याख्याने

मागध्याख्य एकादशः परिच्छेदः ।[1]

श्रृगालशब्दस्य शिआलाशिआलकाः—श्रृगाल-इतिशब्दस्य स्थाने शिआल- शिआलक इत्यादेशौ भवतः । श्रृगाल आगच्छति-इत्यत्र श्रृगालस्य स्थाने शिआल-इत्यादेशे, एत्वे सुलोपे च शिआले-इति । शिआलक-इत्यादेशपक्षेऽपि एत्वसुलोपयोः कृतयोः शिआलके-इति । आङ्पूर्वस्य गमेः वर्तमाने तिप्रत्यये आ + गच्छ + ति-इत्यत्र 'कगच०' इत्यादिना गलोपः, 'अनादावयुजोः' इति तस्य दकारे, आअच्छदि ॥

इति श्रीजगन्नाथशास्त्रिहोशिङ्गकृतायां चन्द्रिकापूरण्यां

मागधः एकादशः परिच्छेदः समाप्तः ।

---

१. अत एत् सौ पुंसि मागध्याम् ८।१।२८७। मागध्यां भाषायां सौ परे अकारस्य एकारो भवति पुंल्लिङ्गे । एष मेषः । ऐशे मेशे । एष पुरुषः । एशे पुलिशे । करोमि भदन्त । करेमि भन्ते । अत इति किम् ? णिही । कली । गिली । पुंसीति किम् ? जलम् । [ रसोर्लशौ ] र, नले । कले स, दंशे । उभयोः । शालशे । पुलिशे ।

सषोः संयोगे सोऽग्रीष्मे ८।४।२८९ । मागध्यां सकारषकारयोः संयोगे वर्तमानयोः सो भवति, ग्रीष्मशब्दे तु न भवति । ऊर्ध्वलोपाद्यपवादः । स-पस्खलदि हस्ती । बुहस्पदी । मस्कली । ष-सुस्कदालु । कस्टं । विस्नुं । शस्पकवले । उस्मा । निस्फलं । धनुस्खण्डं । अग्रीष्म इति किम् ? गिम्हवाशले ।

ट्टष्ठयोः स्टः ८।४।२९० । द्विरुक्तस्य टस्य षकाराक्रान्तस्य च ठकारस्य मागध्यां सकाराक्रान्तः टकारो भवति । ट्ट-भस्टालिका । भस्टिणी । ष्ठ-शुस्ठु कदं । कोस्टागालं ।

स्थर्थयोस्तः ८।४।२९१ । स्थ-र्थ-इत्येतयोः स्थाने मागध्यां सकाराक्रान्तस्तो भवति । स्थ-उवस्तिदे । शुस्तिदे । र्थ-अस्तवदी । शस्तवाहे ।

जद्यां यः ८।४।२९२ । मागध्यां ज-द्य-यां स्थाने यो भवति । ज-यणवदे । द्य-मय्यं । अय्य किल विय्याहके आगदे । यस्य यत्वविधानम् आदेर्यो जः ८।१।२४५ । इति बाधनार्थम् ।

शृगालेति। शृगालशब्द के स्थान में शिआल, शिआलक—ये दो आदेश मागधी में होते हैं। 'शृगालः आगच्छति' में शृगाल के स्थान में शिआल किंवा शिआलक आदेश करने पर पूर्ववत् एत्व तथा सुलोप, शिआले, शिआलके—ये दो रूप होते हैं। आगच्छति में आङ्पूर्वक गम् धातु से वर्तमानकालिक लादेश ति करने पर 'कगचज०' २-६ से गलोप, 'अनादावयुजोः' १२-१ से ति को दि, आअच्छदि। एवं-शृगाल आगच्छति—यह सिद्ध हुआ॥ १७॥

इति प्राकृतप्रकाशस्य प्रदीपाख्ये हिन्दीसरलव्याख्याने
एकादशः परिच्छेदः समाप्तः।

---

व्रजो ञः ८।४।२९४। मागध्यां व्रजेजकारस्य ञो भवति। यापवादः। वञति।

छस्य श्चोऽनादौ ८।४।२९५। मागध्यामनादौ वर्तमानस्य छस्य तालव्यशकाराक्रान्तश्चो भवति गश्च। पिश्चिले। पुश्चदि। लाक्षणिकस्यापि-आपन्नवत्सलः। अवन्नवश्चले। तिर्यक्-तिरिच्छि। तिरिश्चि। अनादाविति किम्? छाले।

स्कः प्रेक्षाचक्षोः ८।४।२९७। मागध्यां प्रेक्षेराचक्षेश्च क्षस्य सकाराक्रान्तः को भवति। जिह्वामूलीयापवादः। पेस्कदि। आचस्कदि।

अवर्णाद्वा ङसो डाहः। ८।४।२९९। मागध्यामवर्णात्परस्य ङसो डित् आह इत्यादेशो वा भवति। हगे न एलिशाह कम्माह काली। पक्षे-हिडिम्बाए घडुक्कय शोके ण उवशमदि।

आमो डाहँ वा ८।४।३००। मागध्यामवर्णात्परस्य आमोऽनुनासिकान्तो डित् आहादेशो वा भवति। शय्यणाहँ सुहं। पक्षे-नलिन्दाणं। व्यत्ययात्प्राकृतेऽपि-ताहँ। तुम्हाहँ। अम्हाहँ। सरिआहं। कम्माहं।

अहंवयमोर्हगे ८।४।३०१। मागध्यामहंवयमोः स्थाने हगे इत्यादेशो भवति। हगे शकावदालतिस्तणिवाशी धीवले। हगे शम्पत्ता। शेषं शौरसेनीवत्। इति हेमः।

# अथ द्वादशः परिच्छेदः

## शौरसेनी[1] ॥ १ ॥

**शूरसेनानां भाषा शौरसेनी। सा च लक्ष्यलक्षणाभ्यां स्फुटीक्रियते-इति वेदितव्यम्। अधिकारसूत्रमेतदापरिच्छेदसमाप्तेः ॥ १ ॥**

शौरसेनी—शूरसेनदेशोद्भवैः पुरुषैः परस्परं व्यवह्रियमाणा शूरसेनानां भाषा शौरसेनीति निगद्यते। सा च लक्षणोदाहरणैः स्पष्टतां नीयते-इत्यवगन्तव्यम्। आ परिच्छेदसमाप्तेरिदमधिकारसूत्रम्। इदं सूत्रं प्रत्येकस्मिन् सूत्रे स्वाधिकारेण प्रविश्य त्वया क्रियमाणं कार्यं शौरसेनीसंज्ञकं स्यादिति बोधयति ॥ १ ॥

शौरसेनीति। शूरसेन-नामक-देशवासियों की आपस की बोलचाल की भाषा को शौरसेनी कहते हैं। उस शौरसेनी को लक्षणों तथा उदाहरणों द्वारा स्पष्ट करते हैं। परिच्छेद-समाप्ति तक अधिकार-सूत्र होने के कारण निम्नाङ्कित सूत्रों द्वारा साधित रूप शौरसेनी के कहे जायँगे ॥ १ ॥

## प्रकृतिः संस्कृतम् ॥ २ ॥

**शौरसेन्यां ये शब्दास्तेषां प्रकृतिः संस्कृतम् ॥ २ ॥**

प्रकृतिः संस्कृतम्—शौरसेनीभाषायां वर्तमानानां शब्दानां प्रकृतिः प्रधानं मुख्यमवलम्बनं संस्कृतं गीर्वाणानां वाण्येव-इति ज्ञेयम् ॥ २ ॥

प्रकृतिरिति। शौरसेनीनियमों से सिद्ध शब्दों की मूल प्रकृति संस्कृत ही है ॥ २ ॥

## अनादावयुजोस्तथयोर्दधौ[2] ॥ ३ ॥

**अनादौ वर्तमानयोरसंयुक्तयोस्तथयोर्दधौ भवतः। तस्य-मारुदिना मन्तिदो (त = द, शे० संस्कृतवत्, ३-३ रलोपः, ५-१ ओ) थस्य-करेध (१२-१५ कृञ्=कर, ७-३४ पत्वम्)। तथा (स्प०)। असंयुक्तयोरित्येव। तेन अज्जउत्त-हला [illegible]ले, इत्यादौ न। अनादाविति किम्? तस्स। मारुतिना मन्त्रितः। कुरुथ। तथा। आर्यपुत्र-हला शकुन्तले। तस्य ॥३॥**

अनादावयुजोस्तथयोर्दधा—आदाववर्तमानयोरसंयुक्तयोः तकारथकारयोः स्थाने क्रमेण दकारधकारौ भवतः। तस्योदाहरणं, 'मारुदिना मन्तिदो'=मारुतिना मन्त्रितः।

---

१. अस्मिन् परिच्छेदे सर्वत्र वृत्त्यनुपलब्धिर्वर्तते। तत्र मया यथामति भामहानुसृतां शैलीमवलम्ब्य वृत्तिर्वितन्यते। २. अधिकारोऽयम्। अत्र केचिद् 'अनादावयुजः' अतादौ वर्त्तमाना वर्णाः सर्वे असंयुक्ताः प्रयोक्तव्याः। कसणो। पणयं। कृष्णः। पण्यम्। इति। ततः 'तथयोर्दधौ' इति च छेदेन व्याख्यातवन्तः। का० पा०।

थस्य-करेध = कुरुथ । तधा = तथा । असंयुक्तयोरित्येव, तेनेह न—'अज्जउत्त, हला सउन्तले' आर्यपुत्र-हला शकुन्तले ! अनादाविति किम्? तस्स, आदिस्थत्वान्नात्र ॥३॥

अनादाविति । आदि में अवर्तमान तथा असंयुक्त त एवं थ के स्थान पर क्रम से द और ध अर्थात् त को द और थ को ध होते हैं। त का, मारुतिना-संस्कृतप्रकृतिसिद्ध मारुतिना में त को द होने से, मारुदिना । मन्त्रितः—'सर्वत्र लवराम्' ३-३ से रलोप, प्रकृत से क्तप्रत्ययावयव त को द, 'अत ओत्सोः' ५-१ से ओकार, मन्तिदो । थ का, कुरुथ-कृञ् धातु को 'डुकृञः करः' १२-१५ से कर, 'लादेशे वा' ६-२४ से एत्व, प्रकृत से थ को ध, करेध । तथा में प्रकृत से थ को ध, तधा । संयोग-रहित त-थ होने चाहिएँ, अत एव 'अज्जउत्त' = (आर्यपुत्र) में तथा 'सउन्तले' (शकुन्तले !) में संयुक्त होने से दकार नहीं हुआ । अनादौ—ऐसा क्यों कहा ? न कहते तो तस्स = (तस्य) में भी होता । होना इष्ट न होने से अनादौ कहा । अतः यहाँ आदिस्थ तकार होने से दकार नहीं हुआ ॥ ३ ॥

## व्यापृते डः ॥ ४ ॥

**व्यापृतशब्दे तस्य डो भवति । पूर्वसूत्रापवादः । वावडो ( ३ २ यलोपः, २-१५ प-व, ५-१ ओ ) । व्यापृतः ॥ ४ ॥**

व्यापृते डः—व्यापृतशब्दावयवस्य तकारस्य डकारो भवति । पूर्वसूत्रापवादः । व्यापृतः—'अनादा'विति १२-३ सूत्रेण प्राप्तं दकारम् अपवादत्वेन बाधित्वाऽनेन डकारः, वावडो ॥ ४ ॥

व्यापृते-इति । व्यापृत के त को ड हो । 'अनादा'वित्यादि-पूर्वसूत्र का अपवाद अर्थात् बाधक सूत्र है । व्यापृतः—'अधो मनयाम्' ३-२ से व्यागत य का लोप, 'पो वः' २-१५ से व, 'ऋतोऽत्' १-२७ से ऋ को अ, प्रकृत से त को ड, 'अत ओत्सोः' ५-१ से ओ, वावडो ॥

## पुत्रेऽपि क्वचित् ॥ ५ ॥

**क्वचित् पुत्रशब्देऽपि तस्य डो भवति । पुडो ( ३-३ रलोपः ) । पक्षे-पुत्तो ( ३-३ रलोपः, ३-५० तद्वि०, ५-१ ओ ) ॥ ५ ॥**

पुत्रेऽपि क्वचित्—क्वचिदितिपदेन विकल्पो गृह्यते । पुत्रशब्दावयवीभूतस्यापि तकारस्य विकल्पेन डकारो भवति । डादेशपक्षे—पुडो । पक्षान्तरे तु-पुत्तो । पुत्र इत्यर्थः ॥

पुत्रेऽपीति । पुत्र शब्द में भी कहीं त को ड होता है । कहीं कहने से यह भी सिद्ध होता है कि अन्यत्र नहीं भी होता अर्थात् विकल्प से होता है । पुत्रः—'सर्वत्र' ३-३ से रलोप, उक्त से ड, 'अतः' ५-१ से ओ, पुडो । पक्षान्तर में-'सर्वत्र' ३-३ से रलोप, 'शेषादेशयो०' ३-५० से तद्वित्व, 'अत ओत्' ५-१ से ओ, पुत्तो ॥ ५ ॥

## इ गृध्रसमेषु ॥ ६ ॥

**गृध्रसमेषु ऋकारस्य इर्भवति । गिद्धो ( ३-३ रलोपः, ३-१ दलोपः, ३-५० धद्वि०, ३-५१ ध् = द्, ५-१ ओ ) । गृध्रः ॥ ६ ॥**

इ गृध्रसमेषु—गृध्रसदृशेषु ऋकारयुक्तेषु शब्देषु ऋकारस्य इकारो भवति । गृध्रः–इकारे, रलोपे, द्वित्वे च गिद्धो ॥ ६ ॥

इ–इति । गृध्रशब्द के समान शब्दों में ऋकार को इकार होता है । गृध्रः—प्रकृत से गकारोत्तरवर्ती ऋकार को इकार, 'सर्वत्र' ३–३ से रलोप, 'शेषादेश०' ३–५० से द्वित्व, 'वर्गेषु युजः०' ३–५१ से ध को द, 'अत ओत्०' ५–१ से ओ, गिद्धो ॥ ६ ॥

## ब्रह्मण्यविज्ञयज्ञकन्यकानां ण्यज्ञन्यानां ञ्ञो वा ॥ ७ ॥

एतेषां ण्यज्ञन्यानां ञ्ञो वा भवति । पैशाच्यां तु नित्यमिति विशेषः । बम्हञ्ञो ( ३–३ रलोपः, ३–८ ह्रस्य विपर्ययः, ५–१ ओ ) विञ्ञो, जञ्ञो, कञ्ञा ( एते १०–९, १०–१० सूत्रयोः स्प० ) । पक्षे–बम्हण्णो, विण्णो, जण्णो, कण्णा ( ३–४४ सू० द्रष्टव्यम् ) ॥ ७ ॥

ब्रह्मण्यविज्ञयज्ञकन्यकानां न्यज्ञन्यानां ञ्ञो वा—एतेषां शब्दानां मध्ये वर्तमानानां ण्य–ज्ञ-न्य वर्णानां स्थाने ञ्ञो=ञकारसहितो ञकारो वा स्यात् । पैशाच्यां नित्यम्, इह तु विकल्पेनेति विशेषः । ब्रह्मण्यम्–बम्हञ्ञो । विज्ञः–विञ्ञो । यज्ञः–जञ्ञो । कन्या–कञ्ञा । पक्षान्तरेतु क्रमशः—बम्हण्णो, विण्णो, जण्णो, कण्णा–इति ॥ ७ ॥

ब्रह्मण्येति । ब्रह्मण्य, विज्ञ, यज्ञ, कन्या–शब्दों में अन्तिम ण्य, ज्ञ, न्य वर्णों के स्थान पर ञ यह आदेश विकल्प से होता है । पैशाची में नित्य और शौरसेनी में विकल्प से यही विशेषता है । ब्रह्मण्यम्—'सर्वत्र ल०' ३–३ से रलोप, 'ह्नह्मेषु' ३–८ से प्रथम मकार अनन्तर हकार ( ऊर्ध्वस्थिति ), प्राकृतत्वात् लिङ्गान्तर पुंस्त्व, 'अत ओत्' ५–१ से ओकार, बम्हञो । विज्ञः–प्रकृत सूत्र से ञ, 'अतः' ५–१ से ओ, विञो । यज्ञः–'आदे॰ र्यो जः' २–३१ से य को ज, प्रकृत से ज्ञ को ञ, पूर्ववत् ओत्व, जञो । कन्या–इससे ञ, कञा । वैकल्पिक आदेश होने से पक्षान्तर में तो–'म्नज्ञ॰' ३–४४ से ण, 'शेषादेश०' ३–५० से आदेशभूत ण को द्वित्व, ओत्व पूर्ववत्, बम्हण्णो । ३–४४ से ण, पूर्ववत् द्वित्व ओत्व, विण्णो । 'आदे॰' २–३१ से ज, पूर्ववत् णत्व, द्वित्व, ओत्व, जण्णो । 'अधो मनयाम्' ३–२ से यलोप, 'नो णः सर्वत्र' २–४२ से णत्व, 'शेषा०' ३–५० द्वित्व, कण्णा ॥

## सर्वज्ञेङ्गितज्ञयोर्णः ॥ ८ ॥

एतयोः संयुक्तस्यान्त्ययोर्णो भवति । सव्वण्णो ( ३–२ रलोपः, ३–५० वणयोर्द्वि०, ५–१ ओ) । इङ्गिअण्णो (२–२ तलोपः, शे० पूर्व०) ॥८॥

सर्वज्ञेङ्गितज्ञयोर्णः—सर्वज्ञेङ्गितज्ञशब्दयोरन्त्यस्य ज्ञस्य ण इत्यादेशः स्यात् । सव्वण्णो-सर्वज्ञः । इङ्गिअण्णो-इङ्गितज्ञः । अनेनोभयत्र ज्ञस्य णादेशात् सिद्धिः ॥ ८ ॥

सर्वज्ञेति । सर्वज्ञ और इङ्गितज्ञ शब्दों में वर्तमान ज्ञ–वर्ण के स्थान में ण आदेश हो । सर्वज्ञः—'सर्वत्र लवराम्' ३–३ से रलोप, 'शेषादेश॰' ३–५० से वद्वित्व, प्रकृत से ज्ञ को ण, पुनः 'शेषादेश॰' से णद्वित्व, 'अत ओत्' ५–१ से ओत्व, सव्वण्णो । इङ्गितज्ञः–'कगचज॰' २–२ से तलोप, पूर्ववत् णत्व, द्वित्व, ओत्व, इङ्गिअण्णो ॥ ८ ॥

## क्त्व इअः[1] ॥ ९ ॥

**क्त्वा इत्यस्य इअ आदेशः। भणिअ। भविअ (स्पष्टम्)। भणित्वा। भूत्वा ॥ ९ ॥**

क्त्व इअः—क्त्वाप्रत्ययस्य स्थाने शौरसेन्याम् इअ इत्यादेशः स्यात्। भणित्वा-भण् धातोः क्त्वाप्रत्यये, भण्+क्त्वा इत्यत्र सूत्रेणानेन क्त्वाप्रत्ययस्य स्थाने इअ-इत्यादेशे, भणिअ। भूत्वा=भविअ ॥ ९ ॥

क्त्व इति। शौरसेनी में क्त्वाप्रत्यय के स्थान में इअ-ऐसा आदेश होता है। भण् से क्त्वा-प्रत्यय करने पर उक्त सूत्र से इअ आदेश करने पर भणिअ=भणित्वा बनता है। भू+क्त्वा-यहाँ प्रकृत सूत्र से क्त्वा को इअ करने पर भू+इअ इस दशा में गुण, अवादेश, भविअ ॥ ९ ॥

## कृगमोर्डुअः[2] ॥ १० ॥

**आभ्यां परस्य क्त्वाप्रत्ययस्य डुअ इत्यादेशः। कदुअ=कृत्वा। गदुअ=गत्वा (स्प०) ॥ १० ॥**

कृगमोर्डुअः—पूर्वसूत्रस्यांशिकोऽपवादः। कृ-गम्-धातुभ्यां परस्य क्त्वाप्रत्ययस्य स्थाने डुअ इत्यादेशः स्यात्। कृत्वा-कृ+क्त्वा-इत्यत्र 'ऋतोऽत्' १-२७ इत्यनेन अत्वे, क्त्वाप्रत्ययस्य डुअ आदेशे, कदुअ। एवमेव-गत्वा=गदुअ ॥ १० ॥

कृगमोरिति। कृ और गम् धातु से पर क्त्वाप्रत्यय को डुअ आदेश हो। पूर्वसूत्र से सर्वत्र क्त्वा को इअ प्राप्त था, इसने कृ-गम् धातुओं में विशेष डुअ-आदेश के विधान द्वारा आंशिक बाध दिखलाया है। कृत्वा-कृ धातु से क्त्वाप्रत्यय होने पर इससे डुअ आदेश हुआ और 'ऋतोऽत्' से कृ के ऋ को अकार, कदुअ। गम् धातु से क्त्वा करने पर शौरसेनी की प्रकृति संस्कृत होने से किस्वात् धात्ववयव म का लोप, क्त्वा को प्रकृत सूत्र से डुअ, गदुअ ॥ १० ॥

## णिर्जश्शसोर्वा क्लीबे स्वरदीर्घश्च ॥ ११ ॥

**नपुंसके वा जश्शसोर्णिर्भवति, पूर्वस्य स्वरस्य दीर्घश्च। वणाणि, धणाणि=वनानि, धनानि (२-४२ न्=ण, शे० स्प०) ॥ ११ ॥**

णिर्जश्शसोर्वा क्लीबे स्वरदीर्घश्च—नपुंसके प्रातिपदिकात् परयोर्जस्-शस्-प्रत्यययोः स्थाने णिः=णि इत्यादेशो भवति, तदैव पूर्वस्य स्वरस्य दीर्घश्च भवति। वनानि-वनशब्दात् जसि शसि वा पूर्वोक्तसूत्रेण णित्वे दीर्घे च, 'नो ण' इति वनशब्द-घटकीभूतस्य नकारस्य च णत्वे, वणाणि। एवमेव धनानि-इत्यस्य धणाणि ॥ ११ ॥

---

१. सिद्धहेमस्तु-क्त्व इयदूणौ ८।४।२८१। भवतः। भविय। भोदूण। हविय। होदूण। पठिय। पठिदूण। रमिय। रन्दूण। पक्षे-भोत्ता। होत्ता। पठित्ता। रन्ता-इति। ता अहं बम्हणो भविअ दाणि भवन्तं सीसेण पडिअ विण्णेमि। तदहं ब्राह्मणो भूत्वेदानीं भवन्तं शीर्षेण पतित्वा विज्ञापयामि।

२. कृगमोर्डडुअः ८।४।२७२। कडुअ। गडुअ। पक्षे-करिय, करिदूण। गच्छिय, गच्छिदूण।

णिरिति। प्रातिपदिकमात्र से नपुंसकलिङ्ग में जस् और शस को णि होता है और पूर्वस्वर को दीर्घ भी होता है। वन अथवा धन शब्द से जस् और शस् प्रत्यय करने पर इस सूत्र से जश्शस् को णि और तत्पूर्ववर्ती नकार के अकार को दीर्घ, तथा 'नो णः' २-४२ इस सूत्र से वन और धन के नकार को णकार, वणाणि=वनानि, धणाणि=धनानि ये रूप सिद्ध होते हैं ॥ ११ ॥

## भो भुवस्तिङि ॥ १२ ॥

**भूधातोर्भो भवति तिङि। भोमि = भवामि ॥ १२ ॥**

**भो भुवस्तिङि**—भू-धातोस्तिङि परतो भो इत्यादेशो भवति। भोति = भवति। भोसि = भवसि। भोमि = भवामि ॥ १२ ॥

भो-इति। तिङ् पर रहते भू धातु को भो यह आदेश होता है। भू को भो आदेश करने पर भोति, भोसि, भोमि ये रूप वर्तमान के एकवचन में भवति, भवसि, भवामि के स्थान पर शौरसेनी में प्रयुक्त किए जायँगे। ऐसे ही बहुवचन में भवामः के स्थान पर भी भो आदेश करने पर भोमो ऐसा रूप होगा ॥ १२ ॥

## न लृटि ॥ १३ ॥

**भूधातोर्लृटि भो न भवति। भविस्सदि = भविष्यति ॥ १३ ॥**

**न लृटि**—भूधातोर्लृटि परे भो इत्यादेशो न स्यात्। भविस्सदि=भविष्यति ॥१३॥

नेति। भूधातु को पूर्वसूत्र से प्राप्त भो आदेश नहीं होता लृट् पर रहते। भविष्यति 'शषोः सः' २-४३ से षकार को सकार, 'अधो मनयाम्' ३-२ से यलोप, 'शेषादेश०' ३-५० से सद्वित्व, 'अनादा०' १२-३ से ति को दि, लृट् होने से भो आदेश का प्रकृत सूत्र से निषेध, भविस्सदि ॥ १३ ॥

## ददातेर्दे[1] दइस्स लृटि ॥ १४ ॥

**दाधातोर्दे आदेशो भवति तिङि, दइस्स इति लृटि च। देमि=ददामि। दइस्स = दास्यामि ॥ १४ ॥**

**ददातेर्दे दइस्स लृटि**—दाधातोस्तिङि परतो दे इत्यादेशो भवति, किन्तु लृटि परतो दइस्स इति भवति। देति = ददाति। देसि = ददासि। देमि = ददामि। लृटि तु तिङ्प्रत्ययविशिष्टस्य दाधातोः दइस्स इत्यादेशः, तेन-दइस्स इत्यस्य दास्यति, दास्यसि, दास्यामि इति ॥ १४ ॥

ददातेरिति। दा-धातु को तिङ पर रहते दे यह आदेश होता है और लृट् पर रहते दइस्स आदेश होता है। इससे दा को दे आदेश करने पर देति, देसि, देमि रूप सिद्ध होते हैं। इसी प्रकार लृट् में दइस्स यह रूप होगा ॥ १४ ॥

---

१. अत्र केचित् सूत्रद्वयं लिखितवन्तः-'तदस्तेदे'। तच्छब्दस्य तेदे आदेशो भवति। तेदो गदो। तेदं पुच्छ। तेदेण किदं इति। ततः 'ददातेर्दे दस्य लृटि'। दाधातोः दकारस्य लृटि परतो दे आदेशो भवति। देस्सदि-इति च। का० पा०।

## डुकृञः करः ॥ १५ ॥

**डुकृञ्-धातोः कर आदेशो भवति । करेमि=करोमि (६-४१ सू० स्प०)॥**

डुकृञः करः—डुकृञ् करणे-धातोः स्थाने कर आदेशो भवति तिङि परतः। करोमि । कृञ् धातोर्वर्तमाने लादेशे मिपि तिङ्परकत्वादनेन कर आदेशे, 'लादेशे वा' ७-३३ सूत्रेण, 'अनन्त्य एच्च' १२-२८ इति सूत्रेण वा एत्वं, करेमि ॥ १५ ॥

डु-इति । डुकृञ् करणे-धातु को कर आदेश होता है तिङ् पर रहते । कृधातु से लट् को मिप् करने पर उक्त सूत्र से कर आदेश, 'लादेशे वा' अथवा 'अनन्त्य एच्च' से एत्व, करेमि = करोमि ॥ १५ ॥

## स्थश्चिट्ठः ॥ १६ ॥

**तिङि । एशे चालुदत्ते रुक्खवाडिआए चिट्ठदि = एष चारुदत्तो वृक्षवाटिकायां तिष्ठति । ( स्प० ) ॥ १६ ॥**

स्थश्चिट्ठः—ष्ठाधातोः 'धात्वादेः षः स' इति सत्वे 'निमित्तापाये नैमित्तिकस्याप्यपाय' इति नियमेन ठस्य थकारे कृते स्था-इति भवति । तस्यैव स्थाधातोः तिङि परे शौरसेन्यां चिट्ठ आदेशः स्यात् । एशे चालुदत्ते रुक्खवाडिआए चिट्ठदि = एष चारुदत्तो वृक्षवाटिकायां तिष्ठति ॥ १६ ॥

स्थ इति । ष्ठाधातु से परिवर्तित स्थाधातु को तिङ् पर रहते चिट्ठ-आदेश हो । एशे-एतद् में 'अन्त्यस्य हलः' ४-६ से दलोप, 'तदेतदोः' ६-२२ से त को स, 'षसोः शः' ११-३ से स को श, 'अत इदेतौ०' ११-१० से ए, एशे = एषः । चालुदत्ते-'रसोर्लशौ' हे. सू. से र को ल, 'अत इदेतौ' से ए, चालुदत्ते = चारुदत्तः । रुक्खवाडिआए—'वृक्षे वेन रुर्वा' १-३२ से वृ को रु, 'ष्कस्कक्षां खः' ३-२९ से क्ष को ख, 'शेषादे०' ३-५० से ख-द्वित्व, 'वर्गेषु०' ३-५१ से प्रथम ख को क, 'टो डः' २-२० से ट को ड, 'कगचज०' २-२ से कलोप, 'ङेरेम्मी' ५-९ से एत्व, रुक्खवाडिआए = वृक्षवाटिकायाम् । चिट्ठदि-स्थाधातु को प्रकृत सूत्र से चिट्ठ, ति के त को 'अनादा०' १२-३ से द, चिट्ठदि = तिष्ठति ॥१६॥

## स्मरतेः सुमरः ॥ १७ ॥

**तिङि स्मृधातोः केवलं सुमर इत्यादेशो भवति । स्मरतेर्भरसुमरौ प्राप्तौ, तदेकं भरादेशं निवर्तयति । सुमरइ = स्मरति (८-१४ सू० स्प०) ॥**

स्मरतेः सुमरः—अस्यां भाषायां स्मृधातोः तिङि परे केवलं सुमर इत्यादेशो भवति । 'स्मरतेर्भरसुमरौ' ८-१८ इति प्राप्तं केवलं भरादेशं निषेधति । स्मरति-स्मृधातोः स्थाने तिपि परे सुमरादेशे, 'ततिपोरिदेतौ' ७-१ इति तिप इत्वे, सुमरइ ॥ १७ ॥

स्मरतेरिति । स्मृ धातु को तिङ् पर रहते केवल सुमर आदेश होता है । 'स्मरतेर्भरसुमरौ' ८-१८ से प्राप्त भर-सुमर इन दो आदेशों में से केवल एक ही होता है दूसरा जो भर-आदेश है उसको निषेध करता है । स्मृ चिन्तायाम्-इस धातु से ति करने पर 'स्मरतेर्भरसुमरौ' से प्राप्त भर आदेश के बाधक प्रकृत सूत्र से सुमर आदेश किये जाने पर 'ततिपोरिदेतौ' ७-१ से ति को इ हुआ—एवं सुमरइ-सिद्ध हुआ ॥ १७ ॥

## दृशेः पेक्खः ॥ १८ ॥

**दृश्-धातोः पेक्खादेशस्तिङि । पेक्ख = पश्य । अरे रे पेक्ख पेक्ख ओहारिओ पवहणो वट्टइ मज्झेण राअमग्गस्स । एदं ताव विआरह-कस्स कहिं पवसिओ पवहणोत्ति ॥ १८ ॥**

दृशेः पेक्खः—दृश्-धातोस्तिङि पेक्खादेशो भवति । पश्य—दृश्धातोर्लोटि मध्यमपुरुषैकवचने सेर्हिरादेशे, प्रकृतेन पेक्खादेशे संस्कृतप्रकृतित्वात् 'अतो हेः' इति हेर्लुकि, पेक्ख-इति । अरे रे पेक्ख पेक्ख, ओहारिओ पवहणो वट्टइ मज्झेण राअ-मग्गस्स = अरे रे ! पश्य पश्य, अपसारितं प्रवहणं वर्तते मध्येन राजमार्गस्य । एदं ताव विआरह—कस्स कहिं पवसिओ पवहणोत्ति = इदं तावद्विचारय—कस्य कुत्र प्रवेशितं प्रवहणमस्ति ॥ १८ ॥

दृशेरिति । दृश् धातु को पेक्ख आदेश होता है तिङ् पर रहते । दृश् धातु से लोट्-मध्यमपुरुषैकवचन में सि को 'सेर्ह्यपिच्च' से हि होने पर प्रकृत सूत्र से पेक्ख आदेश, 'अतो हेः' से हि का लोप, पेक्ख = पश्य । वाक्यगत प्रयोग नाटक से उद्धृत किया गया है—'अरे रे पेक्ख पेक्ख'—इत्यादि ॥ १८ ॥

## अस्तेरच्छः ॥ १९ ॥

**अस्धातोस्तिङि अच्छादेशो भवति ॥ १९ ॥**

अस्तेरच्छः—अस्-धातोः अच्छ-इत्यादेशो भवति तिङि । अच्छसि = असि ॥

अस्तेरिति । अस् धातु को तिङ् पर रहते अच्छ-आदेश होता है । असि—अस् + सिप् इस अवस्था में अस् को अच्छ और 'थास्सिपोः सि-से' ७-२ से सि, अच्छसि ॥ १९ ॥

## तिपा त्थि[2] ॥ २० ॥

**अस्तेस्तिपा सह त्थि इत्यादेशो भवति । अत्थि = अस्ति । पसंसिदुं णात्थि मे वाआविहवो । प्रशंसितुं नास्ति मे वाग्विभवः ॥ २० ॥**

तिपा त्थि—तिप्-प्रत्ययेन सह अस्धातोरर्थादन्त्यस्य सकारस्य स्थाने त्थि-इत्यादेशो भवति । अस्ति-इत्यत्र सूत्रेणानेन 'स्ति'-इत्यस्य स्थाने त्थि-इति । अत्थि = अस्ति । ग्रन्थान्तरादुदाहरणमुद्धृत्य प्रदर्श्यते—पसंसिदुं णात्थि मे वाआविहवो = प्रशंसितुं नास्ति मे वाग्विभवः ॥ २० ॥

तिपेति । अस् धातु को तिप् के साथ त्थि-यह आदेश होता है । अस् धातु के अन्त्य अवयव स् को ति के साथ त्थ आदेश करने पर अत्थि = अस्ति-सिद्ध हुआ । वाक्य में प्रयुक्त ग्रन्थान्तर का उदाहरण—पसंसिदुं = ( प्रशंसितुम् ) रलोप, सत्व, दत्व । णात्थि = ( नास्ति ) इस सूत्र का मुख्य उदाहरण, वाआविहवो = ( वाग्विभवः ) 'खियामात्' ४-७ से क् को आ, 'खघथधभां हः' २-२७ से ह, 'अत ओत्' ५-१ से ओ ॥

## भविष्यति मिपा स्सं वा स्वरदीर्घत्वं च ॥ २१ ॥

---

१. 'मिपि थः' । मिपि परतः अस्धातोः थ आदेशो भवति । थम्मि । इति केचित् । का० पा० ।

अस्तेर्मिपा सह स्सं इत्यादेशः, पक्षे धातोः स्वरदीर्घत्वं च। स्सं, आस्सं = भविष्यामि ॥ २१ ॥

भविष्यति मिपा स्सं वा स्वरदीर्घत्वं च—अस्तेर्भविष्यदर्थे मिपा सह स्सं-इत्यादेशो भवति वा। पक्षे धात्ववयवस्य अकारस्य स्वरस्य दीर्घत्वं च भवति। भविष्यामि—एतस्य स्थाने स्सं-इत्यादेशे, स्सं-इति। पक्षान्तरे-पूर्वस्वरस्य दीर्घत्वे, आस्सं-इति। भविष्यामीत्यर्थः ॥ २१ ॥

भविष्यतीति। अस् धातु को भविष्यत्काल के उत्तम पुरुषैकवचन में मिप् के साथ स्सं-यह आदेशरूप होता है विकल्प से। पक्षान्तर में-स्वर को दीर्घ भी होता है। तथा च-स्सं, आस्सं-ये दो रूप होते हैं। इनका अर्थ भविष्यामि = (होऊंगा) यह होता है ॥

## स्त्रियामित्थी ॥ २२ ॥

**स्त्रीशब्दस्य स्थाने इत्थी इत्यादेशो भवति। इत्थी = स्त्री ॥ २२ ॥**

स्त्रियामित्थी—स्त्रीशब्दे अर्थात् स्त्रीशब्दस्य स्थाने इत्थी-इत्यादेशो भवति। इत्थी स्त्री ॥ २२ ॥

स्त्रियामिति। स्त्रीशब्द के स्थान में इत्थी आदेश होता है। तात्पर्य यह कि 'स्त्री' का इत्थी यह रूपान्तर शौरसेनी में होता है। स्त्री = इत्थी ॥ २२ ॥

## एवस्य जेव्व ॥ २३ ॥

**स्पष्टम्। जेव्व = एव ॥ २३ ॥**

एवस्य जेव्व—एव-इत्यव्ययस्य स्थाने जेव्व-इति प्रयुक्तं भवति। जेव्व = एव ॥

एवस्येति। शौरसेनी में एव इस अव्यय के स्थान पर जेव्व का प्रयोग होता है। एव = जेव्व ॥ २३ ॥

## इवस्य विअ ॥ २४ ॥

**सुगमम्। विअ = इव ॥ २४ ॥**

इवस्य विअ—इव-इत्यव्ययस्य स्थाने विअ-इति प्रयुज्यते। विअ=इव ॥ २४ ॥

इवस्येति। इस भाषा में इव-इस अव्यय के स्थान में विअ का प्रयोग किया जाता है। जैसे—विअ = इव। वावडो विअ = व्यापृत इव। वावडो की सिद्धि 'व्यापृते डः' १२·४ सूत्र में स्पष्ट की गई है ॥ २४ ॥

## अस्मदो जसा वअं च ॥ २५ ॥

**अस्मदो जसा सह वअं इत्यादेशः, चकारात् अम्हेऽपि भवति। वअं, अम्हे = वयम् ॥ २५ ॥**

अस्मदो जसा वअं च—जसा सह अस्मद्-शब्दस्य वअं इत्यादेशो भवति, चकारात् अम्हे-अपि भवति। वअं, अम्हे = वयम् ॥ २५ ॥

अस्मद इति। अस्मद्-शब्द को जस् के साथ वअं-आदेश होता है। चकारग्रहण से 'अम्हे जश्शसोः' ६·४३ से नित्य प्राप्त अम्हे को केवल जस् पर रहते विकल्प से करता है। वयम्-प्रकृत से वअं-आदेश करने पर, वअं। चकार से अम्हे भी होता है तब,

अम्हे। वयं-इस संस्कृत का 'कगचज०' से प्रायिक लोप करने पर भी वअं-होगा। केवल भाषा-वैशिष्ट्य के सूचनार्थ यह सूत्र है ॥ २५ ॥

## सर्वनाम्नां ङेः सित्वा ॥ २६ ॥

**सर्वनाम्नां ङेः सप्तम्येकवचनस्य स्थाने सित्वा इत्यादेशो भवति। सव्वसित्वा। इदरसित्वा। सर्वस्मिन्। इतरस्मिन् ॥ २६ ॥**

सर्वनाम्नां ङः सित्वा—सर्वनामसञ्ज्ञकानां शब्दानां परस्य सप्तम्येकवचनस्य ङेः-इत्यस्य स्थाने सित्वा-इत्यादेशो भवति। सव्वसित्वा = सर्वस्मिन्। इदरसित्वा = इतरस्मिन् ॥ २६ ॥

सर्वेति। सर्वनामसंज्ञक शब्दों से विहित सप्तमी एकवचन ङि प्रत्यय के स्थान पर सित्वा यह आदेश होता है। सर्वशब्द से ङि करने पर सर्व+ङि—इस दशा में प्रकृत सूत्र से ङि को सित्वा, 'सर्वत्र लवराम्' ३-३ से रलोप, और 'शेषा०' ३-५० से वद्वित्व, सव्वसित्वा = सर्वस्मिन्। इतर से ङि होने पर उक्त सूत्र से ङि को सित्वा, 'अनाद्यो०' १२-३ से त को द, इदरसित्वा = इतरस्मिन् ॥ २६ ॥

## धातोर्भावकर्तृकर्मसु परस्मैपदम् ॥ २७ ॥

**शौरसेन्यामेव। भावे-सासाअसि। किं दाणि दासीएपुत्ता! दुब्भिक्खकाले रुढरंको विअ उद्धकं सासाअसि ऐसा सा सेत्ति। किमिदानीं दास्याः पुत्र! दुर्भिक्षकाले वृद्धरङ्क इव ऊर्ध्वकं श्वासायसे, एषा सा सेति। कर्तरि—अज्ज वन्दामि=आर्य्य वन्दे। कर्मणि—कामीअदि। अदाज्जेव कामीअदि = अतएव काम्यते ॥ २७ ॥**

धातोर्भावकर्तृकर्मसु परस्मैपदम्—धातोः शौरसेन्यामेव भावे, कर्तरि, कर्मणि च परस्मैपदं भवति, नात्मनेपदम्। भावे, सासाअसि। ग्रन्थान्तरोदाहरणं यथा—किं दाणि दासीए पुत्ता! दुब्भिक्खकाले रुढरंको विअ उद्धकं सासाअसि, एसा सा सेत्ति। किमिदानीं दास्याः पुत्र! दुर्भिक्षकाले वृद्धरङ्क इव ऊर्ध्वकं श्वासायसे, एषा सा सेति। कर्तरि, अज्ज! वन्दामि = आर्य! वन्दे। कर्मणि, कामीअदि। अदो जेव्व कामीअदि= अत एव काम्यते ॥ २७ ॥

धातोरिति। शौरसेनी भाषा में ही भाव, कर्तृ, कर्म में धातु से परस्मैपद होता है अर्थात् प्राप्त आत्मनेपद नहीं होता। भाव में—श्वासायसे का सासाअसि, 'शषोः सः' से स, 'सर्वत्र लवराम्' से व-य-लोप, उक्त से परस्मैपद, अतएव 'सि'। कर्त्रर्थ में—वन्द धातु आत्मनेपदी होने पर उक्त नियम से परस्मैपद, वन्दे का वन्दामि। कर्म में—काम्यते का कामीअदि, परस्मैपद, त को इत्व-इत्यादि ॥ २७ ॥

---

१. केचित् 'सर्वनाम्नां ङेः'। सर्वनामशब्दानां चतुर्थ्येकवचनस्य वअं इत्यादेशो भवति। सव्ववअं। कवअं। महवअं। तुहवअं। सर्वस्मै। कस्मै। मह्यम्। तुभ्यम्। ततः 'सित्वोर्धात्वो'-रित्यादि-इत्याहुः। का० पा०।

## अनन्त्ये एत्व ॥ २८ ॥

**अन्त्यभिन्ने वर्णे एत्वं च भवति। करेदि ॥ २८ ॥**

अनन्त्य एत्व—अन्त्यवर्णभिन्ने वर्णे एत्त्वं च भवति। करोति = करेदि। कृञ्-धातोर्लटि प्रथमपुरुषैकवचने तिप्रत्यये परे 'डुकृञः करः' १२-१५ इति सूत्रेण कृञः करादेशे, 'अनाद्यो'रिति १२-३ सूत्रेण तकारस्य दकारे, प्रकृतसूत्रेण कर-इति रकारोत्तरवर्तिनोऽकारस्य एत्वे, करेदि ॥ २८ ॥

अनन्त्य इति। अन्त्य से भिन्न वर्ण को एत्व होता है। करेदि–'डुकृञः करः' से कर, प्रकृत से एत्व, 'अनाद्योः' से त को द, करेदि = करोति ॥ २८ ॥

## मिपो लोटि च ॥ २९ ॥

**मिपश्चैत्वं भवति लोटि परतः[2] ॥ २९ ॥**

मिपो लोटि च—लोटः स्थानिकस्य मिपोऽपि एत्वं भवति। करए = करवाणि। मेप एत्वे रूपमिदम् ॥ २९ ॥

मिप इति। लोट् के स्थान में हुए मिप् को एकार हो। कृञ्-धातु से लोट्, उसके स्थान में उत्तमपुरुषैकवचन में मि होने पर 'डुकृञः करः' से कर, प्रकृत से मिप् के मि को एत्व, करए = करवाणि ॥ २९ ॥

## आश्चर्यस्याचरिअं ॥ ३० ॥

**आश्चर्य इत्यस्य अच्चरिअमित्यादेशः। अहह, अच्चरिअं अच्चरिअं ॥३०॥**

आश्चर्यस्याचरिअं। आश्चर्यम्–इत्यस्य स्थाने अच्चरिअं–इत्यादेशो भवति। अहह! अच्चरिअं अच्चरिअं = अहह! आश्चर्यमाश्चर्यम् ॥ ३० ॥

आश्चर्यस्येति। आश्चर्यम् के स्थान पर अच्चरिअं यह आदेश होता है। अर्थात् आश्चर्यम्–को अच्चरिअं निपातवत् आदेश होता है। अहह! आश्चर्यमाश्चर्यम्–का 'अहह! अच्चरिअं अच्चरिअं'–ऐसा बनता है ॥ ३० ॥

## प्रकृत्या दोलादण्डदशनेषु ॥ ३१ ॥

**दोलादिषु प्रकृतिवद्भावो भवति ॥ ३१ ॥**

प्रकृत्या दोलादण्डदशनेषु। दोला–दण्ड–दशन–शब्देषु प्रकृतिवद्भावो भवति। एषु त्रिष्वपि शब्दरूपेषु 'दोलादण्डदशनेषु डः' २–२५ इति सूत्रात् डत्वे, दशनशब्दे सत्वे च प्राप्ते प्रकृतसूत्रेण प्रकृतिवद्भावाादेशान्तराणि। दोला, दण्डो, दशनो–इति रूपाणि भवन्ति शौरसेन्याम् ॥ ३१ ॥

---

१. 'अन्त्ये एव'। सिव्योर्थातोर्माबादिषु विहितं यत् परस्मैपदं तदन्त्यवर्णस्य एव भवति। इति केचित्। का० पा०। गच्छदे। गच्छदि। हे०।

२. 'मिपो लोटि च'। लोटि परतोऽन्त्ये मिप एव भवति। अहं करवामि, अहं गच्छामि। अहं करवाणि, गच्छानि इति केचिद् व्याचख्युः। का० पा०।

३. प्राकृतो–इति प्राकृतः शब्दः प्रयोक्तव्यः इति च व्याचख्युः। का० पा०।

प्रकृत्येति। शौरसेनी भाषा में दोला, दण्ड तथा दशन–इन शब्दों को प्रकृतिभाव होता है अर्थात् इनका रूपपरिवर्तन नहीं होता। इन तीनों शब्दों में 'दोलादण्डदशनेषु डः' २–३५ सूत्र से दकार को डकार प्राप्त था तथा दशनशब्द में 'शषोः सः' २–४३ से श को सत्व भी प्राप्त था, परन्तु प्रकृत सूत्र से प्रकृतिवद्भाव होने से ये कार्य नहीं होंगे। दण्डो-दशनो, में सुप् प्रत्ययसम्बन्धी सु को 'अत ओत्०' ५–१ से ओत्व होगा। उदाहरण ये हैं—दोला। दण्डो। दशनो। इति ॥ ३१ ॥

## शेषं महाराष्ट्रीवत् ॥ ३२ ॥

इति श्रीवररुचिकृतेषु सूत्रेषु द्वादशः परिच्छेदः।

---

१. पूर्वस्य पुरवः ८।४।२७०। शौरसेन्यां पूर्वशब्दस्य पुरव इत्यादेशो वा भवति। अपुरवं नाडयं। अपुरवागदं। पक्षे—अपुव्वं पदं। अपुव्वागदं।

विरिचेचोः ८।४।२७३। त्यादीनामाद्यत्रयास्य आद्यस्येचेचौ ८।३।१३९। इति विहितयोरिचेचोः स्थाने दिर्भवति। वेति निवृत्तम्। नेदि। देदि। भोदि। होदि।

अतो देश्च ८।४।२७४। अकारात्परयोरिचेचयोः स्थाने देश्चकाराद् दिश्च भवति। अच्छदे। अच्छदि। गच्छदे। गच्छदि। रमदे। रमदि। किज्जदे। किज्जदि। अत इति किम्? वसुआदि। नेदि। भोदि।

भविष्यति स्सिः ८।४।२७५। शौरसेन्यां भविष्यदर्थे विहिते प्रत्यये परे स्सिर्भवति। हिस्साहामपवादः।

इदानीमो दाणिं ८।४।२७७। शौरसेन्यामिदानीमः स्थाने दाणिमित्यादेशो भवति। अनन्तरं करणीयं दाणिं आणवेदु अय्यो। व्यत्ययात्प्राकृतेऽपि अन्नदाणिं बोहिं।

तस्मात्ता ८।४।२७८। शौरसेन्यां तस्माच्छब्दस्य ता इत्यादेशो भवति। ता जाव पविसामि। ता अलं एदिणा माणेण।

मोऽन्त्याण्णो वेदेतोः ८।४।२७९। शौरसेन्यामन्त्यान्मकारात्पर इदेतोः परयोर्णकारागमो वा भवति। इकारे–जुत्तं णिमं, जुत्तं मिणं। सरिसं णिमं, सरिसं मिणं। एकारे–किं णेदं, किमेदं। एवं णेदं, एवमेदं।

एवार्थे य्येव २८०। स्पष्टम्। मम य्येव बम्भणस्स।

हञ्जे चेट्याह्वाने २८१। शौरसेन्यां चेट्याह्वाने हञ्जे इति निपातः प्रयोक्तव्यः। हञ्जे चदुरिके।

हीमाणहे विस्मये निर्वेदे २८२। शौरसेन्यां हीमाणहे इत्ययं निपातो विस्मये, निर्वेदे च प्रयोक्तव्यः। विस्मये–हीमाणहे जीवन्तवश्चा मे जणणी। निर्वेदे–हीमाणहे पलिस्सन्ता हगे एदेण नियमविधिणो दुव्ववसिदेण।

णं नन्वर्थे २८३। शौरसेन्यां नन्वर्थे णमिति निपातः प्रयोक्तव्यः। णं अफलोदया। णं अय्यमिस्सेहिं पुढमं य्येव आणत्तं। णं भवं मे अग्गदो चलदि। आर्षे–वाक्यालङ्कारेऽपि दृश्यते। नमोत्थु णं। जयाणं, तयाणं।

अम्महे हर्षे २८४। शौरसेन्याम् अम्महे निपातो हर्षे प्रयोक्तव्यः। अम्महे एआए सुम्मिलाए सुपलिगढिदो भवं।

**अनुक्तं कार्यं महाराष्ट्रीवज्ज्ञेयम्। महाराष्ट्रीपदेनात्र प्राकृतस्य ग्रहणं बोध्यम् ॥ ३२ ॥**

( इत्यभिनवायां वृत्तौ द्वादशः परिच्छेदः )

**इति श्रीवररुचिप्रणीतसूत्रसहितः श्रीभामहविरचितः प्राकृतप्रकाशः समाप्तः।**

---

ही-ही विदूषकस्य २८५। शौरसेन्यां ही-ही इति निपातो विदूषकाणा हर्षे द्योत्ये प्रयोक्तव्यः। ही-ही भो ! सम्पन्नो मणोरधो पियवयस्सस्स ।

इहहचोर्हस्य। इह-शब्दसम्बन्धिनो 'मध्यमस्येत्थाहचौ' ( ८।३।१४३ ) इति विहितस्य हचश्च हकारस्य शौरसेन्यां धो वा भवति। इध। होध। परिताअध। पक्षे-इह। होह। परित्तायह।

न वा र्यो य्यः ८।४।२६६। शौरसेन्यां र्यस्य स्थाने य्यो वा भवति। अय्यउत्त ! पय्याकुलीकदह्मि। पक्षे—अज्जो। पज्जाउलो। कज्जपरवसो।

शेषं प्राकृतवत् २८६। इति हेमः।

**अथ मार्कण्डेयमुनीन्द्रकृत-प्राकृतसर्वस्वानुसारि-**
**सौरसेनी-विशेषकार्याणि प्रदर्श्यन्ते—**

वेदसो, अङ्गारो-इदभावः। वेतसः, अङ्गारः। वअरं, लवणं, लावण्णं, चउट्ठी, चउद्दही, मऊरो, मऊहो। ओदभावः-जधा, तधा, कुमारी। हस्वाभावः-पिण्डं इत्यादि। सु एदभावः-किंसुओ, केसुओ = किंशुकम्। तुण्ड-इत्यादिषु ओत्वाभावः। मोती = मुक्ता। पोक्खरम्-पुष्करम्। पोक्खरिणी = पुष्करिणी। उलूहलो। ओदभावः। ईदिसं, कीदिसं-एदभावः। पुरुषो-इदभावः। जुहुट्ठिरो, उवरि अदभावः। वेअणा, देअरो-इदभावः। पओट्ठो, वत्वाभावः। देव्वं, अइत्वाऽभावः। गोरवं, गउरवं। पोरवो, गोरवो-अउत्वाभावः। आदभावः-क्वचिद् भवति-पउरसं। जादिसं। तादिसं। मिओ = मृतः। पिदणा = पूतना। रुक्खो = वृक्षः, नतु वच्छो। सीभरो ( भ )। चंदिआ ( भ, न )। पताकाव्यावृतगर्भितेभ्योऽन्यस्य तस्य दः। पावो = पापः। कवंधो = कवन्धः। ( प०, भ०, न )। अउव्वं, अवरूवं, अपूर्वम्। जधा। मरधो। सोदामिणी-बहुलं न दलोपः। क्वचित्। हिअअं। धमौदवदुच्चार्यो मधुरम्। ( उ० मदुरं ) रस्य लः क्वचित्। हलिद्दा। महुरो। सहलं = सफलम्। सहरी = शफरी। पासाणो। ( ह०, ष०, न ) दस, दह-दश। नाम्नि-दसरहो। एआरह। वारह। सावो। ( छ० न )। लङ्गलं। लोहलं। लंगूलं। णत्वाभावः। जट्ठी = यष्टी लत्वाभावः। किरातो-चत्वाभावः। डज्झमाणो = दह्यमानः। फोडओ = स्फोटकः-खत्वाभावः। उत्थिदो-ठत्वाभावः। खणो, खीरं, सरिक्खं-छत्वाभावः। सम्मद्दहो-उत्वाभावः। कुम्हण्डो—हत्वाभावः। अहिमण्णू-अत्वाभावः। जण्णसेणो = यज्ञसेनः। इङ्गिअज्जो = इंङ्गितज्ञः। चिण्हं-न्धाभावः। बाहो, वप्फो-वाष्पः। भिन्दिवालो, भिण्डिवालो = भिन्दिपालः। अब्बम्हण्णं, अब्बम्हज्जं = अब्रह्मण्यम्। कण्णआ, कञ्जआ कन्याः-लोपाभावः ( सन्धौ० ४-१ वत् )। कोदूहलं, थूलं-द्वित्वाभावः। कालाअसो, माअणम्-अलुक्। इदाणिं, इदाणि-लुक् वा। मंसं। णूणं। कधं। विहप्फदी = बृहस्पतिः-भआऽभावः। पहुत्तणम्-त्तमभावः। ङसेः दो एव। क्वचित् अदन्तादा अपि। 'तव

शेषं महाराष्ट्रीवत्। 'उक्तादन्यः शेषः' इति नियमादनुक्तमित्यर्थो लभ्यते। तथा च—अनुक्तं कार्यं शौरसेन्यां महाराष्ट्रीवत् बोध्यम्। महाराष्ट्रीपदेनात्र सामान्यतया विहितस्य प्राकृतस्य ग्रहणं कर्तव्यमिति। महच्च तद्राष्ट्रं च महाराष्ट्रमिति 'आन्महतः समानाधिकरणयो'रित्यात्वे भवति। एवं भारतस्य राष्ट्रस्येति फलितोऽर्थः। तत्रस्थानां भाषा महाराष्ट्रीति, तया तुल्यमित्यर्थे 'तेन तुल्यं क्रिया चेद्वति'रिति वत्-प्रत्ययः॥ ३२॥

इति श्री काशीवास्तव्यस्य साहित्याचार्यस्य होशिङ्गोपनाम्नः श्रीजगन्नाथशास्त्रिणः कृतौ प्राकृतप्रकाशस्य चन्द्रिकापूरण्यां व्याख्यायां शौरसेनीसमाख्यो द्वादशः परिच्छेदः समाप्तिमगात्।

होशिङ्गान्वय विश्वनाथविबुध-श्रीलाऽन्नपूर्णाजनेः
श्रीमल्लक्ष्मणभालचन्द्रविबुधोत्तंसाप्तबोधश्रियः।
काशीवासरतेः कृतौ द्विज जगन्नाथस्य पूर्तिं गता
व्याख्या 'प्राकृत'-सत्-'प्रकाश'विषये श्रीचन्द्रिकापूरणी॥ १॥
रसेन्दुनाङ्काक्षिमिते श्रीमद्विक्रमवत्सरे।
अपूर्यत नभःशुक्लपूर्णिमाकुजवासरे॥ २॥

---

कारणा किलिट्ठि सो जणो'। अदन्तान्ङेरेः—रुक्खे। इदुद्भ्यां ङेर्म्मिः—अग्गिम्मि, वाउम्मि। इदुद्भ्यां जसो वो-आदेशाभावः। कइणो = कअओ। भाणुओ, भाणओ। स्त्रियां जस उद्भावः। मालाओ। णईओ। बहूओ। टाङस्ङिङस्ङीनामेत्-बालाए। नईए। बहूए। द्वितीयायां मातुः-मादरं। किमादेः स्त्रियामीत्वाऽभावः-का। जा। ताए। इमाए। क्लीबे-शसो णि वा, वणाणि-वणाइं। इदमादेराम एसि मभावः। तथा-अमा सह इदमः सिमभावः। इमाणं काणं। जाणं। ताणं, एदाणं = एतेषाम्। आस, स्सा, त्तो, इति विभक्त्यादेशाः, से इति पदादेशश्च न भवति। कस्स। जस्स। तस्स। काए। ताए। इमाए। एदाए। कदो। जदो। तदो। इमादो। कुदो, इदो-इति तु भवतः। आहा, इआ, आहे-इत्यादयस्तु न भवन्ति। कस्सि, कहिं, कत्थ। तस्सि, तहिं, तत्थ। म्मिर्न भवति। इध = इह। इदं वनं, इणं वणं-इति द्वे क्लीबे। इअं बाला। अअं रुक्खो। एसो जणो। अदसश्चाऽहाभावः। अमु जणो। अमु बहू। अमु वणं। एतदसोर्ङसिङस्भ्याम्। अदो। कारणादो। तुमं (त्वं, त्वां वा) तुम्हे (यूयम्, युष्मान् वा)। तए (त्वया, त्वयि)। तुम्हेहिं = (युष्माभिः)। तुम्हेहिन्तो = (युष्मभ्यम्, युष्मान्)। तुम्हाणं = युष्माकम्। तुम्हेसु = युष्मासु तुमादो = त्वत्। ते, दे, तुम्ह = (तव)। वो = (युष्मान्, युष्माकम्)। अहं = अहम्। वअं = वयम्। अम्हे = वयम्,-अस्मान् वा। मे = मां। मए = (मया)। मइ = मयि। ङसा मज्झादेशाभावः, (मत्) मे, मम, मह। अम्हं, अम्हाणं = (अस्माकम्)। मत्तो, ममादो-अन्य न भवन्ति। धातोः परस्मैपदमेव। त्रिष्वपि कालेषु लडेव प्रायेण। त्यादेस्तस्य दः-गच्छदु भोदि-इत्यादि बहुत्वे तस्य धः। उत्तमे मिपा सह स्समेव = गमिस्सं इ०। धातुतिङोर्मध्यवर्तिना ज्ज, ज्जा इति

शेषमिति। शौरसेनी में अनुक्त कार्य महाराष्ट्री = भारतीय राष्ट्र की भाषा के समान अर्थात् पूर्वोक्त सर्वसाधारण प्राकृत-नियमों से सिद्ध भाषा की तरह होते हैं—ऐसा समझ कर ग्रहण करना चाहिए॥ ३२॥

इति श्री प्राकृतप्रकाशस्य प्रदीपाभिधस्य हिन्दीसरलव्याख्यानस्य द्वादशः परिच्छेदः।

---

त्रयः, तिङां स्थाने ज्ज, ज्जा इत्युभौ च, सोच्छं-इत्यादयश्च न भवन्ति। देहि। भोदि। करिस्सदि इत्यादि। भू = भो, हो। भोदि, भविस्सदि। क्ते-भूः। भूदं। दृशेः पेच्छ-पेच्छदि। ब्रुवो बुच्च-बुच्चदि। कथेः कधः-कधेदि। घ्रातेः जिग्घ-जिग्घदि। भातेर्भाअः-भाअदि। मृजेः फुंसः = फुंसदि। घूर्णेः घुम्मः-घुम्मदि। स्तोतुः थुणः-थुणदि। भियो भा-मादि। सृजतेः पसः-पसदि। ल्टटि दाअः-दइस्सदि। चर्चेः चव्वः। चव्वदि। ग्रहेर्गेण्हः। गेण्हदि। ग्रहेर्यपा सह गेज्झ-घेप्पौ गेज्झदि, घेप्पदि। शक्नोतेः सक्कुणसक्कौ-सक्कुणादि, सक्कदि। म्लायो-मिआअदि। उदा सह तिष्ठतेः उत्थः-उत्थेदि। स्वपेः सुअः-सुअदि। शीङ् सुआदि। रुधेः-रोवदि। रुदेः-रोददि। मज्जेः-बुड्डदि। दुहादीनां यका सह दुब्भादयो न-दुहीअदि। वहीअदि, लिहीअदि। भिष्फो-(भीष्मः) सत्तुग्घो (शत्रुघ्नः) जेत्तिकं यावत् (तेत्तिकं) एत्तिकं। भट्टा। धूदा। दुहिदिआ। इत्थी। भादा, भादुओ जमादा, जामादुओ इत्यादयः। दउत्ति-द्राग्। क्खु-निश्चये बिन्दुनः परे तु खु इत्येव। तं खु भणामि इत्यादि। व्व-इव। चन्दो व्व। ज्जेव एवार्थे। बिन्दोः परे, तं जेव। तंजेव्व इति। णं—ननु। विअ = इव।

इति डबरालोपाह्वेन श्रीउदयरामशास्त्रिणा कृता टिप्पणी समाप्ता।

# प्राकृतप्रकाशस्य पाठान्तरसहितः सूत्रपाठः ।

## तत्र प्रथमः परिच्छेदः

सूत्राङ्काः — सूत्राणि

१ आदेरतः
२ आ समृद्ध्यादिषु वा
३ इदीषत्पक्वस्वप्नवेतसव्यजनमृदङ्गाङ्गारेषु
( इदीषत्पक्वस्वप्नवेतसव्यजनमृदङ्गाङ्गारेषु च )
४ लोपोऽरण्ये
५ ए शय्यादिषु
( ए च शय्यादिषु )
६ ओ बदरे देन
७ लवणमल्लिकयोर्वेन
८ मयूरमयूखयोर्य्वा वा
९ चतुर्थीचतुर्दश्योस्तुना
१० अदातो यथादिषु वा
११ इत्सदादिषु
१२ इत एत् पिण्डसमेषु
१३ अत् पथिहरिद्रापृथिवीषु
१४ इतेस्तः पदादेः
१५ उदिक्षुवृश्चिकयोः
१६ ओ च द्विधाकृञः
१७ ईत् सिंहजिह्वयोश्च
❀ ऊदुत उपसर्गे विसर्जनीयेन
❀ ईद्वितः
१८ इदीतः पानीयादिषु
१९ एन्नीडापीडकीदृशेदृशेषु
२० उत ओत् तुण्डरूपेषु
( उत ओत् तुण्डसमेषु )
२१ उलूखले ल्वा वा
२२ अन्मुकुटादिषु
२३ इत्पुरुषे रोः
२४ उदूतो मधूके
( उदूतो मधूकादिषु )
२५ अद् दुकूले वा लस्य द्वित्वम्
२६ एन्नूपुरे
२७ ऋतोऽत्
२८ इदृष्यादिषु
( इदृष्यादिषु वा )
२९ उदृत्वादिषु
३० अ रीति[1]
३१ क्वचिद्युक्तस्यापि
३२ वृन्ते वेन ण्टः
३३ लृतः क्लृप्त इलिः

( ) एतत्कोष्ठकान्तर्गतः पाठः 'चन्द्रिका'व्याख्यासंमतः–इति ज्ञेयम् ।

❀ पाठान्तरेण रूपान्तरं प्राप्तानां सूत्राणां पाठान्तराणि संजीवन्यादिसंमतया नवीनया 'चन्द्रिका'समाख्यया व्याख्यया संमतानि सूत्राणि ❀ एतच्चिह्नेन दर्शितानि ।

१. पुस्तकान्तरे तु—'अयुक्तस्य रिः'—इति पाठः। द्वयोरनयोः सूत्रयोः स्थाने सूत्रमेकमिदम् ।

सूत्राङ्काः सूत्राणि

३४ एत इद्वेदनादेवरयोः

३५ ऐत एत्

३६ दैत्यादिष्वइ

( दैत्यादिष्वइत् )

३७ दैवे वा

३८ इत् सैन्धवे

३९ ईद् धैर्ये

सूत्राङ्काः सूत्राणि

४० ओतोऽद्वा प्रकोष्ठे कस्य वः

( ओत उद्वा प्रकोष्ठे कस्य वः )

४१ औत ओत्

४२ पौरादिष्वउ

( पौरादिष्वउत )

४३ आ च गौरवे

( आच्च गौरवे )

४४ उत्सौन्दर्यादिषु

## द्वितीयः परिच्छेदः

१ अयुक्तस्यानादौ

२ कगचजतदपयवां प्रायो लोपः

३ यमुनायां मस्य

४ स्फटिकनिकषचिकुरेषु कस्य हः

५ शीकरे भः

(स्फटिकनिकषचिकुरशीकरेषु को हः)

६ चन्द्रिकायां मः

७ ऋत्वादिषु तो दः

८ प्रतिसरवेतसपताकासु डः

( प्रतिवेतसपताकासु डः )

९ वसतिभरतयोर्हः

१० गर्भिते णः

११ ऐरावते च

( ऐरावते वा )

१२ प्रदीप्तकदम्बदोहदेषु दो लः

१३ गद्गदे रः

१४ सङ्ख्यायां च

१५ पो वः

१६ आपीडे लः

१७ उत्तरीयानीययोर्जो वा

( उत्तरीयानीययोर्यो ज्जो वा )

१८ छायायां हः

१९ कबन्धे बो मः

२० टो डः

२१ सटाशकटकैटभेषु ढः

२२ स्फटिके लः

२३ डस्य च

२४ ठो ढः

२५ अङ्कोले ल्लः

( अङ्कोठे ल्लः )

२६ फो भः

२७ खघथधभां हः

( खघथधफभां हः )

२८ प्रथमशिथिलनिषधेषु ढः

२९ कैटभे वः

३० हरिद्रादीनां रो लः

३१ आदेर्यो जः

३२ यष्ट्यां लः

३३ किराते चः

३४ कुब्जे खः

३५ दोलादण्डदशनेषु डः

३६ परुषपरिघपरिखासु फः

सूत्राङ्काः सूत्राणि

३७ पनसेऽपि
( चन्द्रिकायां नास्ति सूत्रमिदम् )
३८ बिसिन्यां भः
३९ मन्मथे वः
४० लाहले णः
(लाहललाङ्गललाङ्गूलेषु वा णः)
४१ षट्शावकसप्तपर्णानां छः
( षट्शावसप्तपर्णेषु छः )

सूत्राङ्काः सूत्राणि

४२ नो णः सर्वत्र
( नो णः )
४३ शषोः सः
४४ दशादिषु हः
४५ संज्ञायां वा
४६ दिवसे सस्य
४७ स्नुषायां ण्हः

## तृतीयः परिच्छेदः

१ उपरि लोपः कगडतदपषसाम्
२ अधो मनयाम्
३ सर्वत्र लवराम्
४ द्रे रो वा
५ सर्वज्ञतुल्येषु ञः
६ श्मश्रुश्मशानयोरादेः
७ मध्याह्ने हस्य
८ ह्नह्लेषु नलमां स्थितिरूर्ध्वम्
९ युक्तस्य
१० ष्टस्य ठः
११ अस्थनि
१२ स्तस्य थः
१३ स्तम्बे
( तः स्तम्बे )
१४ स्तम्भे खः
१५ स्थाणावहरे
१६ स्फोटके
( खेटके च )
१७ र्यशय्याभिमन्युषु जः
१८ तूर्यधैर्यसौन्दर्याश्चर्यपर्यन्तेषु रः
१९ सूर्ये वा
२० चौर्यसमेषु रिअं
( चौर्यसमेषु रिअः )
२१ पर्यस्तपर्याणसौकुमार्येषु लः
२२ र्तस्य टः
२३ पत्तने
( मृत्तिकापत्तनयोश्च )
२४ न धूर्तादिषु
२५ गर्ते डः
२६ गर्दभसंमर्दवितर्दिविच्छर्दिषु र्दस्य
२७ त्यथ्यद्यां चछजाः
२८ ध्यह्योर्झः
( ध्यह्ययोर्झः )
२९ क्स्कक्षां खः
३० अक्ष्यादिषु च्छः
३१ क्षमावृक्षक्षणेषु वा
( क्षमावृक्षक्षणेषु वा )
३२ ष्मपक्ष्मविस्मयेषु म्हः
३३ ह्नस्नष्णक्ष्णश्नां ण्हः
३४ चिह्ने न्धः
३५ ष्पस्य फः
३६ स्पस्य सर्वत्र स्थितस्य
( स्पस्य )

सूत्राङ्काः सूत्राणि

३७ सि च

( चन्द्रिकायां सूत्रमिदं नास्ति )

३८ बाष्पेऽश्रुणि हः

३९ कार्षापणे

४० श्चत्सप्सां छः

४१ वृश्चिके ञ्छुः

४२ नोत्सुकोत्सवयोः

४३ न्मो मः

४४ ज्ञशपञ्चाशत्पञ्चदशेषु णः

( ज्ञशपञ्चाशत्पञ्चदशसु णः )

४५ तालवृन्ते ण्टः

४६ भिन्दिपाले ण्डः

४७ विह्वले भह्नौ वा

( विह्वले भो वा )

※ आदेश्च

४८ आत्मनि पः

४९ क्मस्य

५० शेषादेशयोर्द्वित्वमनादौ

५१ वर्गेषु युजः पूर्वः

( वर्गे युजः पूर्वः )

५२ नीडादिषु

सूत्राङ्काः सूत्राणि

५३ आम्रताम्रयोर्वः

५४ न रहोः

५५ आङो ज्ञस्य

( आङो ज्ञादेशस्य )

५६ न विन्दुपरे

( चन्द्रिकायां नास्ति )

५७ समासे वा

५८ सेवादिषु च

५९ विप्रकर्षः

( विकर्षः )

६० क्लिष्टश्लिष्टरत्नक्रियाशार्ङ्गेषु तत्स्वरवत्पूर्वस्य

६१ कृष्णे वा

६२ इः श्रीह्रीक्रीतक्लान्तक्लेशम्लानस्वप्नस्पर्शहर्षार्हगर्हेषु

( इत् श्रीह्रीक्लान्तक्लेशम्लानस्वप्नस्पर्शादर्शहर्षार्हेषु )

६३ अः क्ष्माश्लाघयोः

६४ स्नेहे वा

६५ उः पद्मतन्वीसमेषु

६६ ज्यायामीत्

## चतुर्थः परिच्छेदः

१ सन्धावचामज्लोपविशेषा बहुलम्

(सन्धावचामज्लोपविशेषा बहुलम्)

२ उदुम्बरे दोर्लोपः

( उदुम्बरे दोर्वा लोपः )

३ कालायसे यस्य वा

( कालायसे यस्य )

४ भाजने जस्य

५ यावदादिषु वस्य

६ अन्त्यहलः

( अन्त्यस्य हलः )

७ स्त्रियामात्

८ रो रा

९ न विद्युति

※ क्षुधो हः

१० शरदो दः

( शरदोऽत् )

| सूत्राङ्काः | सूत्राणि |
|---|---|
| ११ | दिक्प्रावृषोः सः |
| १२ | मो बिन्दुः |
| १३ | अचि मश्च |
| | ( मो बिन्दुरचि वाऽलोपश्च ) |
| १४ | नञोर्हलि |
| | ( नञोर्हलि ) |
| १५ | वक्रादिषु |
| १६ | मांसादिषु वा |
| | ( मांसादिषु ) |
| १७ | यदि तद्वर्गान्तः |
| | ( कपि तद्वर्ग्यान्तः ) |
| १८ | नसान्तप्रावृट्शरदः पुंसि |
| | ( नसन्तप्रावृट्शरदः पुंसि ) |
| १९ | न शिरोनभसी |
| २० | पृष्ठाक्षिप्रश्नाः स्त्रियां वा |
| २१ | ओदवापयोः |
| २२ | तल्त्वयोर्दात्तणौ |
| २३ | त्वस्य डुणः |
| | ( त्वस्य तूण ) |
| २४ | तृण इरः शीले |
| | ( तृन इर शीले ) |
| २५ | आल्विल्लोल्लालवन्तेन्ता मतुपः |
| | * स्वार्थे को वा |
| २६ | विद्युत्पीताभ्यां वा लः |
| | ( विद्युत्पीतयोर्लः ) |
| २७ | वृन्दे वो रः |
| | ( वृन्दे द्रो वः ) |
| २८ | करेण्वां रणोः स्थितिपरिवृत्तिः |
| २९ | आलाने लनोः |
| | * महाराष्ट्रे हरोः |
| ३० | बृहस्पतौ बहोर्भओ |
| | ( बृहस्पतौ बहोर्भपौ ) |
| ३१ | मलिनेरिलौ वा |
| ३२ | गृहे घरोऽपतौ |
| | ( गृहस्य घरोऽपतौ ) |
| ३३ | दाढादयो बहुलम् |

## पञ्चमः परिच्छेदः

१ अत ओत् सोः
२ जश्शसोर्लोपः
३ अतोऽमः
( अमोऽमः )
४ टामोर्णः
५ भिसो हिं
६ ङसेरादोदुहयः
७ भ्यसो हिन्तो-सुन्तो
८ ङसो स्सः
९ ङेरेम्मी
१० सुपः सुः
११ जश्शस्ङस्याम्सु दीर्घः
( जस्ङस्याम्सु दीर्घः )
१२ ए च सुप्यङिङसोः
( ए सुप्यङिङसोः )
१३ क्वचिद् ङसिङ्योर्लोपः
( क्वचिदपि लोपः )
१४ इदुतोः शसो णो
१५ ङसो वा
१६ जसश्च ओ पुंस्त्वम्
( जस ओ वो वाऽत्वं च )
१७ टा णा

| सूत्राङ्काः | सूत्राणि |
|---|---|
| १८ | सुभिस्सुप्सु दीर्घः |
| १९ | स्त्रियां शस उदोतौ |
| २० | जसो वा |
| २१ | अमि ह्रस्वः |
| २२ | टाङस्ङीनामिदेदातः |
| २३ | नातोऽदातौ |
| २४ | आदीतौ बहुलम् |
| २५ | न नपुंसके<br>( नास्तीदं चन्द्रिकायाम् ) |
| २६ | इज्जश्शसोर्दीर्घश्च<br>( इं जश्शसोर्दीर्घश्च ) |
| २७ | नामन्त्रणे सावोत्वदीर्घबिन्दवः |
| २८ | स्त्रियामात एत्<br>( आत ए ) |
| २९ | ईदूतोर्ह्रस्वः |
| ३० | सोर्बिन्दुर्नपुंसके<br>( नपुंसके सोर्बिन्दुः ) |
| ३१ | ऋत आरः सुपि |
| ३२ | मातुरात्<br>( मातुरा ) |
| ३३ | उर्जश्शस्टाङस्सुप्सु वा<br>( उ जश्शस्टाङस्सु वा ) |

| सूत्राङ्काः | सूत्राणि |
|---|---|
| ३४ | पितृभ्रातृजामातॄणामरः |
| ३५ | आ च सौ |
| ३६ | राज्ञश्च<br>( राज्ञः ) |
| ३७ | आमन्त्रणे वा बिन्दुः<br>( आमन्त्रणे बिन्दुर्वा ) |
| ३८ | जश्शस्ङसां णो |
| ३९ | शस एत्<br>( शस एच्च ) |
| ४० | आमो णं<br>( अमो णं ) |
| ४१ | टा णा |
| ४२ | ङसश्च ह्रिस्वं वान्त्यलोपश्च<br>( ङसश्च ह्रिस्वं वा जलोपश्च ) |
| ४३ | इदह्रिस्वे |
| ४४ | आ णोणमोर्ङसि |
| ४५ | आत्मोऽप्पाणो वा |
| ४६ | इत्वह्रिस्ववर्जं राजवद्नादेशे<br>( इदह्रिस्ववर्जं राजवद्नादेशे ) |
| ४७ | ब्रह्माद्या आत्मवत्<br>( ब्रह्मादयोऽप्येवम् ) |

---

## षष्ठः परिच्छेदः

१ सर्वादेर्जस एत्वम्
( सर्वादेः )
( जस एत् ) } चन्द्रिकायां सूत्रद्वयम्
२ ङेः सिंस्मित्थाः
३ इदमेतत्किंयत्तद्भ्यष्टा इणा वा
५ आम एसिं
५ किंयत्तद्भ्यो ङस आसः
( किंयत्तद्भ्यो ङस आस )
६ ईद्भ्यः स्सा-से
७ ङेर्हि
८ आहे-इआ काले
९ त्तो दो ङसेः
( ओत्तोदो ङसेरनिदमः )
१० तद ओश्च }
११ ङसा से }
( तदो ङसा से वा स्त्रियामपि )

| सूत्राङ्काः | सूत्राणि |
|---|---|
| १२ | आमा सिं |
| | ( आमः सिं ) |
| १३ | किमः कः |
| १४ | इदम इमः |
| १५ | स्सस्सिमोरङ्गा |
| | ( अं स्सिंस्सयोर्वा ) |
| १६ | ङेर्देन हः |
| | ( ङेर्मेन हः ) |
| १७ | न त्थः |
| १८ | नपुंसके स्वमोरिदमिणमिणमो |
| १९ | एतदः सावोत्वं च |
| | ( एतदः सोरोत्वं च ) |
| २० | त्तो ङसेः |
| २१ | त्थेत्थयोस्तलोपः |
| | ( त्थत्थयोस्तस्य लोपः ) |
| २२ | तदेतदोः सः सावनपुंसके |
| २३ | अदसो दो मुः |
| २४ | हश्च सौ |
| २५ | पदस्य |
| २६ | युष्मदस्तं तुमं |
| २७ | तुं चामि |
| २८ | तुज्झे-तुम्हे जसि |
| | ( तुज्झे-तुज्झ-तुम्हे जसि ) |
| २९ | वो च शसि |
| ३० | टाङ्योस्तइ-तए-तुमए-तुमे |
| | ( टाङ्योस्तइ-तए-तुमइ-तुमए-तुमे ) |
| ३१ | ङसि तुमो-तुह-तुज्झ-तुम्ह-तुम्माः |
| | (ङसि तुमो-तुह-तुज्झ-तुव-तुम्हाः) |
| ३२ | आङि च ते दे |
| ३३ | तुमाइ च |
| ३४ | तुज्झेहिं-तुम्हेहिं-तुम्मेहिं भिसि |
| | ( तुज्झेहि-तुब्भेहि-तुम्हेहि भिसि ) |

| सूत्राङ्काः | सूत्राणि |
|---|---|
| ३५ | ङसौ तत्तो-तइत्तो-तुमादो-तुमादु-तुमाहिं |
| | (ङसौ तत्तो-तइत्तो-तुमाओ-तुमाइ-तुमाहि वा ) |
| ३६ | तुम्हाहिंतो-तुम्हासुंतो भ्यसि |
| | (तुज्झाहिंतो-तुज्झासुंतो भ्यसि) |
| ३७ | वो-मे-तुज्झाणं-तुम्हाणमामि |
| | ( वो-ते-तुज्झाणं-तुम्हाणमामि ) |
| ३८ | ङौ तुमम्मि |
| | ( तुमम्मि च ङौ ) |
| ३९ | तुज्झेसु-तुम्हेसु सुपि |
| | ( तुज्झेसु-तुब्भेसु-तुम्हेसु सुपि ) |
| ४० | अस्मदो हमहमहअं सौ |
| ४१ | अहम्मिरम्मि च |
| | ( अम्मिरम्मि च ) |
| ४२ | मं ममं |
| | ( मं-ममं च ) |
| ४३ | अम्हे जश्शसोः |
| ४४ | णो शसि |
| | ( णो च शसि ) |
| ४५ | आङि मे-ममाइ |
| ४६ | ङौ च मइ-मए |
| ४७ | अम्हेहिं भिसि |
| ४८ | मत्तो-मइत्तो-ममादो-ममादु-ममाहि ङसौ |
| | ( मत्तो-मइत्तो-ममाओ-ममाउ-ममाहि ङसौ ) |
| ४९ | अम्हाहिंतो-अम्हासुंतो भ्यसि |
| ५० | मे-मम-मह-मज्झ ङसि |
| ५१ | मज्झणो-अम्ह-अम्हाणमम्हे आमि |
| ५२ | ममम्मि ङौ |
| ५३ | अम्हेसु सुपि |

सूत्राङ्काः सूत्राणि

५४ द्वेर्दो

५५ त्रेस्ति

( त्रेस्ती )

५६ तिण्णि जश्शस्भ्याम्

( तिण्णि जश्शस्भ्याम् )

५७ द्वेर्दुवे-दोण्णि वा

( द्वेर्दुवे-दोण्णि )

५८ चतुरश्चत्तारो-चत्तारि

सूत्राङ्काः सूत्राणि

५९ एषामामो ण्हं

६० शेषोऽदन्तवत्

( शेषाददन्तवत् )

६१ न ङिङस्योरेदातौ

६२ ए भ्यसि

६३ द्विवचनस्य बहुवचनम्

६४ चतुर्थ्याः षष्ठी

ॐ क्वचिच्च तादर्थ्ये

## सप्तमः परिच्छेदः

१ तातिपोरिदेतौ

२ थास्सिपोः सि-से

( सिप्थासोः सि-से )

३ इड्मिपोर्मिः

( इण्मिपोर्मिः )

४ न्तिहेत्थामोमुमा बहुषु

५ अत ए से

६ अस्तेर्लोपः

७ मिमोमुमानामधो हश्च

८ यक ईअइज्जौ

( यक इअइज्जौ )

९ नान्त्यद्वित्वे

१० न्तमाणौ शतृशानचोः

११ ई च स्त्रियाम्

१२ धातोर्भविष्यति हिः

१३ उत्तमे स्सा-हा च

१४ मिना स्सं वा

१५ मोमुमैर्हिस्सा-हित्था

१६ कृदाश्रुवचिगमिरुदिदृशिविदिरूपाणां काहं-दाहं-सोच्छं-वोच्छं-गच्छं-रोच्छं-दच्छं-वेच्छं

( कृदाश्रुवचिगमिरुदिदृशिरूपाणां काहं-दाहं-सोच्छं-वोच्छं-गच्छं-रोच्छं-दच्छं )

१७ श्वादीनां त्रिष्वप्यनुस्वारवर्जं हिलोपश्च वा

( श्वादीनां त्रिष्वनुस्वारवर्जं हिलोपश्च वा )

१८ उ-सु-मु विध्यादिष्वेकस्मिन्

१९ तु-ह-मो बहुषु

२० वर्तमानभविष्यदनद्यतनयोर्ज्जज्जा वा

( वर्तमानभविष्यदनद्यतनयोश्च ज्ज-ज्जा वा )

२१ मध्ये च

२२ नानेकाचः

२३ ईअ भूते

२४ एकाचो हीअ

२५ अस्तेरासिः

( आसिरस्तेः )

२६ णिच एदादेरत आत्

( णिच एदादेरात् )

२७ आवे च

सूत्राङ्काः सूत्राणि

( आवे वा )

२८ आविः ककर्मभावेषु वा

( आविः कभावकर्मसु वा )

२९ मैदावे

सूत्राङ्काः सूत्राणि

३० अत आ मिपि वा

३१ इच्च बहुषु

३२ क्ते

३३ ए च क्त्वातुमुन्तव्यभविष्यत्सु

३४ लादेशे वा

## अष्टमः परिच्छेदः

१ भुवो हो-हुवो

( भुवो होहुवौ )

२ क्ते हुः

( क्ते हू )

३ प्रादेर्भवः

४ त्वरस्तुवरः

५ क्ते तुरः

( चन्द्रिकायां नास्ति )

६ घुणो घोलः

( घुर्णो घोलघुम्मौ )

७ णुदो णोल्लः

८ दूङो दूमः

( चन्द्रिकायां नास्ति )

९ पटेः फलः

१० पदेः पालः

( चन्द्रिकायां नास्ति )

११ वृषकृषमृषहृषामृतोऽरिः

( वृषादीनामृतोऽरिः )

१२ ऋतोऽरः

( अन्ते अरः )

१३ कृञः कुणो वा

( कृञः कुण च )

१४ जृम्भो जम्भाअः

( जृम्भेर्जम्भा )

१५ ग्रहेर्गेण्हः

१६ वेत् क्त्वातुमुन्तव्येषु

( वेत्त क्त्वातुमुन्तव्येषु )

१७ कृञः का भूतभविष्यतोश्च

१८ स्मरतेर्भरसुमरौ

१९ भियो भावीहौ

२० जिघ्रतेः पापाओ

( चन्द्रिकायां नास्ति )

२१ म्लै वावाओ

( म्लो वा-वाअ )

२२ तृपस्थिपः

( तृपस्थिप्पः )

२३ ज्ञो आणमुणौ

❀ घटेर्गढः

❀ समो गलः

❀ हसो रहसः

❀ नेः सदः सज्जः

❀ आङो रभेर्दवः

❀ उदि शलेः शल्लो वा

❀ पिबतेर्घोटः

२४ अल्पेर्लोमः

२५ ह्याघ्यागानां ठाअ-झाअ-गाआः

२६ ठाझागाश्च वर्तमानभविष्यद्विध्या-
द्येकवचनेषु

सूत्राङ्काः सूत्राणि

( ठाक्षागाश्च भविष्यद्वर्तमानविध्याद्येकवचने )

२७ खादिधाव्योः खाधौ

( खादिधाव्योः खा-धा )

२८ ग्रसेर्विसः

२९ चिञश्चिणः

३० क्रीञः किणः

३१ वेः क्के च

( वेः कं च )

३२ उद्ध्म उद्धुमा

( उद्ध्मो धुमा )

३३ श्रदो धो दहः

३४ अवाद् गाहेर्वाहः

३५ कासेर्वासः

( काशेर्वासः )

३६ निरो माङो माणः

( निरो माङो माणमवौ )

❀ पदेर्वलः

३७ च्चियो झिज्जः

३८ भिदिच्छिदोरन्त्यस्य न्दः

३९ क्रथेढः

४० वेष्टेश्च

४१ उत्समोर्लः

( उत्समोर्ल्लः )

४२ रुदेर्वः

( रुदो वः )

४३ उदो विजः

( उदो विजेः )

४४ वृधेढः

( वृधेर्ढ्ढः )

४५ हन्तेर्म्मः

सूत्राङ्काः सूत्राणि

४६ रुषादीनां दीर्घता

( रुषादीनां दीर्घः )

४७ श्रो मज्जनृत्योः

४८ युधिबुध्योर्ज्झः

( युधिबुधिगृधिसिधिक्रुधां ज्झः )

४९ रुन्धेर्न्धम्भौ

५० सृदो लः

५१ शदूलुपत्योर्डः

( शदिपत्योर्डः )

५२ शकादीनां द्वित्वम्

५३ स्फुटिचल्योर्वा

( स्फुटिचलोर्वा )

५४ प्रादेर्मीलः

५५ भुजादीनां क्त्वातुमुन्तव्येषु लोपः

५६ श्रुहुजिलूधुवां णोऽन्त्ये ह्रस्वः

( श्रुहुजिलूधूनां णोऽन्त्ये ह्रस्वश्च )

५७ भावकर्मणोर्व्वश्च

५८ गमादीनां द्वित्वं वा

५९ लिहेर्लिज्झः

(दुहिलिहिवहां दुज्झ-लिज्झ-वुज्झाः

६० हृक्रोर्हीरकीरौ

( हृञ्क्रुञोर्हीरकीरौ )

❀ ज्ञो आणमुणौ

६१ ग्रहेर्घेप्पो वा

( ग्रहेर्घेप्पः )

६२ क्तेन दिण्णादयः

❀ तक्षे रंपचच्छौ

६३ खिदेर्विसूरः

६४ क्रुधेर्जूरः

६५ चर्चेश्चम्पः

( चर्चेश्चरः )

६६ ग्रसेर्वञ्जः

| सूत्राङ्काः | सूत्राणि |
|---|---|
| ६७ | मूत्रेर्लुंभसुपौ ( मूत्रेर्लुंभपुंमौ ) |
| ६८ | बुड्डखुप्पौ मस्जेः ( बुड्डखुप्पौ मज्जेः ) |
| ६९ | इशेः पुलअ-णिअच्छ-अवक्खाः ( इशेः पुलअ णिअच्छ-अवक्ख-सच्चवाः ) |
| ७० | काकेस्तर-वअ-तीराः |
| ※ | एवमन्येऽपि |
| ७१ | शेषाणामदन्तता |
| ※ | अनदन्तानामङ्गा |
| ※ | अङ्गादेशा बहुलम् |

## नवमः परिच्छेदः

१ निपाताः

※ कीस किमर्थे

२ हुं दानपृच्छानिर्धारणेषु

( हुं दानपृच्छानिवारणेषु )

३ क्खिअ-वेअ अवधारणे

( क्खिअ-च्चेअ अवधारणे )

४ ओ सूचनापश्चात्तापविकल्पेषु

५ इरकिरकिला अनिश्चिताख्याने

( इरकिरकिला अनिश्चयाख्याने )

६ हुं-क्खु निश्चयवितर्कसम्भावनेषु

(हुं-क्खु निश्चयवितर्कसम्भावनासु)

७ णवरः केवले

( चन्द्रिकायां नास्ति )

※ इजेराः पादपूरणे

८ आनन्तर्ये णवरि

※ उ क्षेपविस्मयसूचनासु

९ किणो प्रश्ने

१० अव्वो दुःखसूचनासम्भावनेषु

( अव्वो दुःखसूचनासम्भावनेषु )

११ अलाहि निवारणे

१२ अइ-वले सम्भाषणे

( अइ-रणे सम्भाषणे )

१३ णवि वैपरीत्ये

१४ सू कुत्सायाम

( थू कुत्सायाम् )

१५ रे-अरे-हिरे सम्भाषणरतिकलहाक्षेपेषु

( रे-अरे-हरे सम्भाषणरतिकलहक्षेपेषु )

१६ म्मिवमिवविअ इवार्थे

( पित्र-मित्र-विव-व इवार्थे )

१७ अज्ज आमन्त्रणे

( वेब्व आमन्त्रणे )

१८ शेषः संस्कृतात्

## दशमः परिच्छेदः*

१ पैशाची

२ प्रकृतिः शौरसेनी

३ वर्गाणां तृतीयचतुर्थयोरयुजोरनाद्योराद्यौ

४ इवस्य पिवः

५ णो नः

६ ष्टस्य सटः

७ स्नस्य सनः

८ र्यस्य रिअः

---

* इत आरभ्य चन्द्रिकाटीकाया अभावान्न पाठान्तराणि, नाप्यधिकानि सूत्राणि ।

सूत्राङ्काः सूत्राणि

९ ज्ञस्य ञः
१० कन्यायां न्यस्य
११ ञ वा
१२ राज्ञो राचि टाङसिङस्ङिषु वा
१३ त्वस्तूनं
१४ हृदयस्य हितअकं

## एकादशः परिच्छेदः

१ मागधी
२ प्रकृतिः शौरसेनी
३ षसोः शः
४ जो यः
५ चवर्गस्य स्पष्टता तथोच्चारणः
६ हृदयस्य हडक्कः
७ र्यर्जयोर्य्यः
८ क्षस्य स्कः
९ अस्मदः सौ हके हगे अहके
१० अत इदेतौ लुक् च
११ क्त्वस्ताढुअ
१२ ङसो हो वा दीर्घत्वं च
१३ अदीर्घः सम्बुद्धौ
१४ चिट्ठस्य चिष्ठः
१५ कृञ्मृङ्गमां क्तस्य डः
१६ क्त्वो दाणिः
१७ शृगालशब्दस्य शिआलशिआ-लकाः

## द्वादशः परिच्छेदः

१ शौरसेनी
२ प्रकृतिः संस्कृतम्
३ अनादावयुजोस्तथयोर्दधौ
४ व्यापृते डः
५ पुत्रेऽपि क्वचित्
६ इ गृध्रसमेषु
७ ब्रह्मण्यविज्ञयज्ञकन्यकानां ण्यज्ञ-न्यानां ञो वा
८ सर्वज्ञेङ्गितज्ञयोर्णः
९ क्त्व इअः
१० कृगमोर्डुअः
११ णिज्जस्शसोर्वा क्लीबे स्वरदीर्घश्च
१२ भो भुवस्तिङि
१३ न लृटि
१४ ददातेर्दे, दइस्स लृटि
१५ डुकृञः करः
१६ स्थश्चिट्ठः
१७ स्मरतेः सुमरः
१८ दृशेः पेक्खः
१९ अस्तेरच्छः
२० तिपा त्थि
२१ भविष्यति मिपा स्सं वा स्वर-दीर्घत्वं च
२२ स्त्रियामित्थी
२३ एवस्य जेव्व
२४ इवस्य विअ
२५ अस्मदो जसा वअं च
२६ सर्वनाम्नां ङेः स्सिं
२७ धातोर्भावकर्तृकर्मसु परस्मैपदम्
२८ अनस्य एव
२९ मिपो कोटि च
३० आश्चर्यस्याच्चरिअं
३१ प्रकृत्या दोलादण्डदशनेषु
३२ शेषं महाराष्ट्रीवत्

इति प्राकृतप्रकाशस्य सूत्रपाठः समाप्तः ।

# प्राकृतप्रकाशस्थसूत्राणामकाराद्यनुक्रमणिका ।


| पृष्ठाङ्काः | सूत्रांशाः | |
|---|---|---|
| | अ | |
| ८० | अः क्षमाश्लाघ० | ३।६३ |
| २१८ | अड्ड-बले० | ९।१२ |
| ६१ | अक्ष्यादिषु० | ३।३१ |
| ३८ | अङ्कोठे० | २।२५ |
| ९४ | अचि मश्च | ४।१३ |
| २२१ | अज आम० | ९।१७ |
| २०३ | अडादेशा० | ८।* |
| १६९ | अत आ० | ७।३० |
| २३३ | अत इदेतौ | ११।१० |
| १५२ | अत ए से | ७।५ |
| १०७ | अत ओत्० | ५।१ |
| १०८ | अतोऽमः | ५।२ |
| १० | अत् पथि० | १।१३ |
| १३५ | अदसो दो० | ६।२३ |
| ७ | अदातो० | १।१० |
| २३५ | अदीर्घः० | ११।१३ |
| १७ | अद् दुकू० | १।२५ |
| ७९ | अधो मन० | ३।२ |
| २०३ | अनद्यन्ता० | ८।* |
| २४८ | अनन्त्य पु० | १२।२८ |
| २३९ | अनादावा० | १२।३ |
| ८७ | अन्त्यहलः | ४।६ |
| १६ | अभ्रुकुटा० | १।२२ |
| २१७ | अव्वो दुःख० | ९।१० |
| ११५ | अमि ह्रस्वः | ५।२१ |
| १४३ | अम्हाहिंतो० | ६।४९ |
| १४१ | अम्हे अस्म० | ६।४३ |
| १४४ | अम्हेसु सु० | ६।५३ |
| १४२ | अम्हेहिं भि० | ६।४७ |

| पृष्ठाङ्काः | सूत्रांशाः | |
|---|---|---|
| २८ | अयुक्तस्या० | २।१ |
| २१८ | अलाहि० | ९।११ |
| १८४ | अवाद् गा० | ८।३४ |
| २४५ | अस्तेरच्छः | १२।१९ |
| १६५ | अस्तेरासिः | ७।२५ |
| १५२ | अस्तेर्लोपः | ७।६ |
| ५३ | अस्थनि | ३।११ |
| २३३ | अस्मदः सौ० | ११।९ |
| २४६ | अस्मदो ज० | १२।२५ |
| १४० | अस्मदो ह० | ६।४० |
| १४० | अहम्मिर० | ६।४१ |
| | आ | |
| १३८ | आङि च ते० | ६।३२ |
| १४२ | आङि मे-म० | ६।४५ |
| ७३ | आङः शस्य | ३।५५ |
| १७९ | आङो रभे० | ८।* |
| २६ | आ च गौर० | १।४३ |
| १२० | आ च सौ | ५।३५ |
| १२४ | आ णोणमो० | ५।४४ |
| ६८ | आत्मनि पः | ३।४८ |
| १२४ | आत्मनोऽप्पा० | ५।४५ |
| ११६ | आदीतौ ब० | ५।२४ |
| १ | आदेरतः | १।१ |
| ४१ | आदेर्यो जः | २।३१ |
| ६८ | आदेश्च | ३।* |
| २१६ | आनन्तर्ये० | ९।८ |
| ३५ | आपीडे मः | २।१६ |
| १२८ | आम एसिं | ६।४ |
| १२१ | आमन्त्रणे० | ५।२७ |
| १३२ | आमा सिं | ६।१२ |


* सूत्रांशोत्तरं क्रमशः परिच्छेराङ्काः सूत्राङ्काश्च सन्ति ।

* सूत्राङ्कस्थानेषु चन्द्रिकाधृतानां सूत्राणां कृते * एतच्चिह्नं स्थापितम् ।

| पृष्ठाङ्काः सूत्रांशाः | |
|---|---|
| १२२ आमो णं | ५।४० |
| ७२ आम्रताम्र० | ३।५३ |
| १०१ आलाने० | ४।२९ |
| ९७ आश्लिष्टो० | ४।२५ |
